ADI SANKARA ADVAITA RESEARCH CENTRE Publication Series 2

BHĀMATĪ TILAKA

(*Cattussūtrī*)

(a commentary on Bhāmatī with the texts of Brahma sūtra Śaṅkara bhāṣyam and Bhāmatī)

OF

Allalasuri

Edited by :

Atmavidyabhusanam, Sahityavisarada, Sahityavedantasiromani

V. S. V. Guruswami Sastrigal, P.O.L.,

Rtd. Professor of Vedanta, Govt. Sanskrit College, Trivandrum
Recipient of President's award

AND

Bhasyabhavajna, Sahityavisarada,
Sahityavedantasiromani

V. R. Kalyanasundara Sastrigal,

Rtd. Professor of Sanskrit,
Ramakrishna Mission, Vivekananda College, Madras-4
Recipient of President's award

MADRAS.

1984

First Edition August 1984

Price Rs. 50-00

Printed by :

T. V. Ramani at Ramani Brothers
4, C. P. Ramaswami Iyer Street,
Madras-600 018.

आदिशङ्कराद्वैतविमर्शसमितिप्रकाशितः द्वितीयो ग्रन्थः

भामतीतिलकः

(चतुःसूत्र्यन्तभागः)

(भामतीव्याख्यानरूपः, शाङ्करभाष्य-तद्व्याख्या भामतीसहितश्च)

श्री अल्लालसूरिभिः

विरचितः

आत्मविद्याभूषणैः, साहित्यविशारदैः, साहित्यवेदान्तशिरोमणिभिः,

अनन्तशयनस्थराजीयसंस्कृतकलाशालाप्राध्यापकचरैः,

राष्ट्रपतिसम्मानितैः

व. श. वै. गुरुस्वामिशास्त्रिभिः

भाष्यभावज्ञैः, साहित्यवेदान्तशिरोमणिभिः,

श्री रामकृष्णमठीय विवेकानन्दकलाशालासंस्कृतप्राध्यापकचरैः


राष्ट्रपतिसम्मानितैः

व. रा. कल्याणसुन्दरशास्त्रिभिश्च

परिशोधितः

मद्रपुरी

१९८४



His Holiness Jagadguru
SRI JAYENDRA SARASWATHI
Sri Sankaracharya Swamigal of

PREFACE

In accordance with the desire and the blessings of His Holiness *Jagadguru Sri Jayendra Sarasvati Swamigal of Sri Kanchi Kamakoti Peetham* this book viz. Bhāmatītilaka of Śrī Allālasūri is published by the Adi Sankara Advaita Research Centre, Madras. The present publication contains the commentary on Bhāmatī for the portion ending with the fourth Brahma sutra. This work is a critical edition and is the outcome of the three years of research work undertaken by me during 1975-78 as a Professor under the University Grants Commission Scheme in the Department of Sanskrit, University of Kerala, Trivandrum. In the process of the preparation of this critical edition, as many as 13 Oriental Manuscripts Libraries located in the cities of Trivandrum, Tanjore, Kanchi, Kumbakonam, Madras, Tirupathi, Poona, Bombay and Baroda have been visited by me and a comparitive study of the following works has been made. The works are :

1. Bhāmatīkalpataru of Amalānanda (Printed)
2. Ṛjuprakāśikā of Akhaṇḍānandānubhūti (Printed)
3. Bhāmatyuktārthasaṅgraha of unknown authorship (Manuscript)
4. Bhāmatīvivaraṇa of Subramaṇya Śāstri (Printed)
5. Bhāmatībhāvadīpikā of Acyuta Kṛṣṇa Tīrtha (Manuscript)
6. Bhāmatītilaka of Allālasūri (Manuscript)

According to the traditional scholars there are Prasthānatraya and Prasthānadvaya in the Advaita philosophy. It is well-known that the Prasthānadvaya constitutes Vivaraṇaprasthāna and Bhāmatīprasthāna. Both of them have as their basis, the commentary of Śrī Śaṅkara bhagavatpāda on the Brahmasūtras.

The present work, Bhāmatītilaka is a commentary by Allālasūri on the celebrated Advaita work of Śrī Vācaspatimiśra viz. Bhāmatī, which itself is a commentary on Śrī Śaṅkara's Brahmasūtra bhāṣyam.

Śrī Allālasūri was born to Nāgamāmbā and Trivikramārya in Koṭikalāgrāma. He is believed to have lived in the 14th century AD and had been a disciple of Śrī Pūrṇaprajña and Śrī Anantārya.

The observation that Śrī Śaṅkara wrote his commentary on the Brahmasūtras when he was a Jīvanmukta must be indisputable. In his commentary, Śrī Śaṅkara has quoted the Nyāyasūtras with utmost reverence for the Sage Gautama. A careful and candid study of the Brahma sūtra-bhāṣya of Śrī Śaṅkara would reveal that the had considered Nyāyasūtras as fully authoritative in propounding the principles of Advaita philosophy. This interesting point of view has been supported by Śrī Pakṣilasvāmi (the commentator on Nyāyasūtras), Śrī Brahmānandasvāmi, Śrī Nāgojibhaṭṭa and others. A detailed study of this important point has been made in the introduction written in Sanskrit for the benefit of the scholars.

It is hoped that this commentary Bhāmatītilaka which is so far an unpublished and a very useful work will certainly be a boon to the lovers of Advaita philosophy in general and to the students in particular for whom Bhāmatī is a prescribed text for writing the Oriental title-Vedanta Siromani examination and others.

Our whole-hearted thanks and blessings are due to **Sri J. R. S. Vasan Ramanan**, M.A., M. Phil., Assistant Professor of Sanskrit, Ramakrishna Mission, Vivekananda College, Madras-4 who has been very kind to copy the Catussūtrī portion in the Śāṅkarabhāṣyam and its commentary, Bhāmatī and for going through the proof.

Our sincere thanks are due to **Sri V. T. Rajan** and the **Ramani Brothers Printers** for their cooperation and help.

V. S. V. Guruswami Sastry

ओं श्रीः

नमः कामाक्ष्यै

श्री गुरुभ्यो नमः

उपोद्घातः

श्री काञ्चीकामकोटिपीठाधीश्वराणां श्रीजयेन्द्रसरस्वती श्रीचरणानां अनुग्रहपूर्विकया आज्ञया आदिशङ्कर भगवत्पादाद्वैतविमर्शसमित्या इतःपूर्वं अमुद्रितः अप्रकाशितश्च श्री अल्लालसूरिविरचितः भामतीतिलकाभिधानः भामतीव्याख्यारूपः चतुःसूत्र्यन्तभागः मुद्राप्य प्रकाश्यते । तत्रायमुपोद्घातः—

अद्वैतमेवाखिलदर्शनानां अत्युत्तमं दर्शनमागमोक्तम् ।
अनाद्यविच्छिन्नसुसम्प्रदायसिद्धं शिवं ब्रह्मविदेकवेद्यम् ॥
श्रीशङ्कराचार्यजगद्गुरूणां तुल्याः महान्तो गुरवस्त एव ।
विवस्वतो विश्वविभासकस्य समो विवस्वान् भगवान् स एव ॥
प्रसन्नगम्भीरपवित्रदिव्यतद्भाष्यतुल्यश्च तदीयभाष्यम् ।
जगत्पवित्रामलदिव्यगङ्गातोयोपमं गाङ्गपयस्तदेव ॥
पातञ्जले शब्दकृतं महत्त्वं यच्छाबरेऽप्यर्थकृतं महत्त्वम् ।
देदीप्यते तद्द्वितयं प्रसन्नगम्भीरभाष्ये भगवत्पदानाम् ॥
कृत्वापि बह्वीः विमलाः कृतीर्यः स्वनामधेयम् कृतिनामधेयम् ।
स्वग्रन्थसर्वोत्तमताप्रशंसां नैवालिखत् क्वापि निजप्रबन्धे ॥
हित्वा त्वहन्तां ममतां प्रशान्तः जीवन्विमुक्तो भगवान्गुरुर्नः ।
तं सम्प्रदायाध्वविदग्रगण्यं श्रीशङ्करं सद्गुरुमानतोऽस्मि ॥
श्रीशङ्कराचार्यपदाब्जभक्तिः तदीयभाष्याब्जरसानुभूतिः ।
अद्वैततत्त्वे विमला मतिश्च सञ्जायते कोटिभवोत्थपुण्यैः ॥

I दर्शनीयतममद्वैतदर्शनं सनातनम्

जगतीतलेऽस्मिन् अनादिकालमारभ्य महान्तो मनीषिणः दर्शनेषु सकलेष्वपि दर्शनीयतमं दर्शनं अद्वैतदर्शनमेव आमनन्ति । सनातनमेतद्दर्शनं श्रुतिभिः स्मृतिभिः पुराणैरितिहासैः अन्यैश्च प्रत्नैः आर्षग्रन्थैः सुष्ठु प्रतिपाद्यते । अद्वैतदर्शने एव वेदान्तानां परमं तात्पर्यं प्रतिपादयितुं श्रीमद्भिः भगवद्भिः बादरायणचरणैः ब्रह्मसूत्रात्मकं शारीरकमीमांसाशास्त्रं प्रारब्धम् । अतिप्राचीनाः वेदान्तविज्ञानसुनिश्चितार्थाः विपश्चितः द्रविडाचार्यसुन्दरपाण्ड्यब्रह्मानन्दिप्रभृतयः स्वकीयैः ग्रन्थैः अद्वैतदर्शनं निःश्रेयसप्रदमिति प्रतिपादयामासुः ।

II भगवत्पादानां भाष्यादिप्रणयनैर्शिष्यानुशासनैरद्वैतमतप्रतिष्ठापनम्

तदनु अनेकसहस्रसंवत्सरेभ्यः प्राक् साक्षाच्छ्रीपरमेश्वरः कैलासपतिः कपर्दी, हित्वा कैलासं कपर्दं मौनं च सर्वलोकानुजिघृक्षया पुण्यभारतं अवतीर्णः श्रीशङ्करनामा व्युप्तकेशः परमहंसो भूत्वा अनाद्यविच्छिन्नसम्प्रदायागतां अद्वैतविद्यां उपसन्नेभ्यः मुमुक्षुभ्यः परमकरुणया उपदिदेश । स भगवान् दुरन्तात् दुस्तरात् अपारात् संसारात् सर्वानेव जन्तून् भवाग्नितापपापच्यमानान् त्रातुकामः करतलामलकवत् अद्वैतं तत्त्वं बोधयितुकामश्च निर्मलान् अनेकान् ग्रन्थान् निर्ममे । उत्तमाधिकारिणां कृते ईश-केन-कठ-प्रश्न - मुण्डक - माण्डूक्य - तैत्तिरीय - ऐतरेय-छान्दोग्य बृहदारण्यक-श्वेताश्वतर - नृसिंहतापन्युपनिषदां तथा भगवद्गीतानां ब्रह्मसूत्राणां च प्रसन्नगम्भीराणि भाष्याणि व्यरचयत् । मध्यमाधिकारिणः प्रति विष्णुसहस्र-नाम-ललितानामत्रिशती - सनत्सुजातीय - हस्तामलकीय - आपस्तम्बीयाध्यात्मपटलानां च लघूनि भाष्याणि अकल्पयत् । तथा प्रबोधसुधाकरादित्रिंशत्संख्याकान् प्रकरणग्रन्थान् अकरोत् । एवं विवेकचूडामणि - सर्ववेदान्तसिद्धान्तसारसङ्ग्रह - उपदेशसाहस्रीरूपान् उपदेशग्रन्थांश्च निर्ममे । मन्दाधिकारिणां विषये सुतरां सान्द्रकरुणः आचार्यः महागणपति - सुब्रह्मण्य - विष्णु - शिव - देवी - राम - कृष्ण - गोविन्द - नृसिंहादि-विषयाः सगुणब्रह्मस्तुतीः गङ्गा - यमुना - नर्मदादिपुण्यनदीस्तुतीः, काशीश्रीशैलादिपुण्यक्षेत्रसम्बन्धिनीः स्तुतीश्च किञ्चिन्यूनसप्ततिसंख्याकाः अकरोत् । एवं प्रापञ्चिकेषु सुखेषु यथारुचि तत्तत्सुखकामनावतः उद्दिश्य तत्तत्फललब्धये देवतायन्त्रमन्त्रादिस्वरूपनिरूपणपूर्वं तत्तद्देवतावरिवस्याप्रकारान् बोधयितुं त्रयस्त्रिंश-त्पटलात्मकं महान्तं प्रपञ्चसाराख्यं प्रबन्धं कल्पयामास । एवं पूज्यपूज्याः भगवत्पादाः शताधिकैः विमलैः निजग्रन्थैः साक्षात्परम्परया च निःश्रेयसकरं निरुपमं अद्वैततत्त्वं सर्वेभ्योऽपि अधिकारिभ्यः उपदिदिशुः ।

इत्थं श्रीमच्छङ्करभगवत्पादाः निजसूक्तिसुधामये निर्मले परमपावने महाप्रासादे अद्वैततत्त्वं सुप्रतिष्ठितं कृत्वा बहुमानयामासुः ।

III भगवत्पादाः निरहङ्काराः निर्ममाः स्थितप्रज्ञाः अलोकसामान्यचरिताः अप्रमेयानुभावाः

अत्रेदं अवधेयं प्रियपाठकैः । श्रीशङ्करभगवत्पादाः बहुग्रन्थप्रणेतारोऽपि न कस्मिंश्चिदपि निजग्रन्थे 'शङ्कराचार्योऽहं' इति न स्वनाम निर्दिशन्ति, नापि 'एतावन्तो ग्रन्थाः एतन्नामधेयाः मया कृताः' इति ब्रुवन्ति । स्वग्रन्थस्य पठनमात्रेणैव, मोक्षफलजनकत्वं इति स्वग्रन्थोत्कर्षं न शंसन्ति । अपि च सर्वज्ञेश्वरोदाहरणप्रसङ्गे आत्मानमेव न उदाहरन्ति । न च स्वकालजीविनं भूपालं स्वग्रन्थे स्तौति । तथापि स्वविद्यागुरून् अद्वैतविद्यासम्प्रदायप्रवर्तकगुरूंश्च तदा तदा स्तुवन्ति, नमन्ति, नैव विस्मरन्ति ।

किञ्च अत्रेदं सुतरां प्रियवाचकैः श्रद्धेयम् । भगवद्गीता-द्वितीयाध्यायोपान्त्यगीतायां स्थितप्रज्ञस्य (जीवन्मुक्तस्य) लक्षणं कथ्यते । तत्रत्यानि निस्पृहः, निर्ममः, निरहङ्कारः इति त्रीणि पदानि भगवत्पादैः एवं व्याख्यातानि-निस्पृहः=शरीरजीवनमात्रेऽपि निस्पृहः सन्, निर्ममः=शरीरजीवनमात्राक्षिप्तपरिग्रहेऽपि ममेदं इति अभिनिवेशवर्जितः, निरहङ्कारः=विद्यावत्त्वादि - निमित्त - आत्मसम्भावनारहितः - एवंभूत, शान्तिमाप्नोति इति । भगवत्पादाः स्थितप्रज्ञलक्षणं न केवलं व्याचख्युः, अपि तु तल्लक्षणलक्षिताः तथैव अजीवन्न् । अत एव तैःकृतं स्वनामनिर्देशादिकं न क्वापि भाष्ये उपलभ्यते । किञ्च स्थितप्रज्ञैः भगवत्पादैः, ग्रन्थानां बहूनां प्रणयनं, छात्राणां अनेकेषां अध्यापनं, बहूनां तीर्थानामटनं, अन्यच्च लोकक्षेमार्थं यद्यत्कृतं तत्सर्वं देहाभिमानहीनेन स्थितप्रज्ञेन कथं तत् देहाधीनं कार्यं सर्वं कर्तुं शक्यते इति संशयालून् प्राकृतान् अविवेकिनः प्रति शारीरकभाष्ये चतुर्थे अध्याये प्रथमे पादे समुचितमुत्तरं भगवत्पादैरेव अभिहितं अत्र लिख्यते—"अपि च नैवात्र विवदितव्यं ब्रह्मविदा कञ्चित्कालं शरीरं ध्रियते न वा ध्रियते इति । कथं हि एकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं च अपरेण प्रतिक्षेप्तुं शक्येत । श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेन एतदेव निरूप्यते" इति ॥

भगवत्पादैः तावत् वेदान्तात्मकोपनिषद्भाष्येषु स्वेन प्रथमं आरचिततैत्तरीयोपनिषद्भाष्योपक्रमे उपनिषद्व्याख्यातॄणां पूर्वेषां सम्प्रदायप्रवर्तकानां गुरुत्वेन अनुसन्धानपूर्वकं, 'यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः । व्याख्याताः सर्ववेदान्ताः तान्नित्यं प्रणतोऽस्म्यहम् ॥' इति पद्येन स्वगुरूणां प्रणामो विहितः । "तैत्तरीयकसारस्य मया आचार्यप्रसादतः । विस्पष्टार्थरुचीनां हि व्याख्येयं सम्प्रणीयते" इति पद्येन आचार्याणां प्रसादबलावलम्बनेनैव तदुपदिष्टया रीत्या यथासम्प्रदायं उपनिषदां व्याख्यानं मया

क्रियते न तु स्वकपोलकल्पनया सम्प्रदायातिक्रमेण इति चोक्तम् । किञ्च बृहदारण्यकोपनिषदि मधु-मुनि-खिल-काण्डभेदेन त्रिवारं प्रवृत्तं ब्रह्मविद्यासम्प्रदायप्रवर्तकमहर्षिकीर्तनरूपं वंशब्राह्मणं चानुसृत्य बृहदारण्यकभाष्योपक्रमे 'ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यः वंशर्षिभ्यः नमो गुरुभ्यः इति मङ्गलपरग्रन्थेन अद्वैतब्रह्मविद्यामार्गः अनादिसम्प्रदायसिद्ध इति संसूच्य पूर्वेषां गुरूणां अभिवन्दनं आरचितम् । अपि च बृहदारण्यकभाष्यवार्तिकोपक्रमे श्रीमद्भिः सुरेश्वराचार्यैः इत्थं अभाणि:—'यां काण्वोपनिषच्छलेन सकलाम्नायार्थसंशोधिनीम् सञ्चक्रुः गुरवो अनुवृत्तगुरवः वृत्तिं सदा शान्तये' इति । अत्र भगवत्पादाः वार्तिककाराणां सुरेश्वराचार्याणां गुरवः अनुवृत्तगुरवः इति तैर्निरूपिताः । अत्र आनन्दगिर्याचार्यैः व्याख्याने एवं विवृतम्:—साम्प्रदायिकप्रणीतत्वात् सा व्याख्येया इत्याह - अनुवृत्तेति । शुश्रूषादिद्वारा गुरवः गोविन्दभगवत्पादादयः अनुवृत्ताः यैः ते अनुवृत्तगुरवः ततो लब्धविद्याः वृत्तिं चक्रुः, अतः सा व्याख्येया इत्यर्थः इति ।

अपि च बृहदारण्यक - द्वितीयाध्याय - प्रथमब्राह्मणान्ते भाष्ये "तस्मात् तार्किकचाटभटराजाप्रवेश्यमभयं दुर्गमिदं अल्पबुद्ध्यगम्यं शास्त्रगुरुसम्प्रदायरहितैश्च" इत्युक्तम् । तत्रैव पञ्चमब्राह्मण-पञ्चदशकण्डिकावसाने 'तस्मात् तत्र य एव श्रुत्याचार्यदर्शितमार्गानुसारिणः त एव अविद्यायाः पारमधिगच्छन्ति, त एव चास्मात् मोहसमुद्रात् अगाधात् उत्तरिष्यन्ति; नेतरे स्वबुद्धिकौशलानुसारिणः" इति स्फुटीकृतम् । एवं गीतायां त्रयोदशे क्षेत्रज्ञपरमात्मैक्यविचारावसरे 'तस्मात् असम्प्रदायवित् सर्वशास्त्रार्थविदपि मूर्खवदेव उपेक्षणीयः' इति च उक्तम् । किञ्च माण्डूक्यकारिकाभाष्यावसाने साक्षात् स्वगुरोः श्रीगोविन्दभगवत्पादस्य अप्रमेयप्रभावमनुसन्धाय भगवान् भाष्यकारः,

'यत्पादावाश्रितानां श्रुतिशमविनयप्राप्तिरग्र्या ह्यमोघा'
तत्पादौ पावनीयौ भवभयविनुदौ सर्वभावैर्नमस्ये ।। इति ।

तथा तत्रैव स्वगुरोर्गुरून् श्रीमतो गौडपादान् शास्त्रार्थसम्प्रदायविदः परमगुरून् 'यस्तं पूज्याभिपूज्यं परमगुरुममुं 'पादपातैर्नतोऽस्मि' इति प्रणमति । तदेवं "गुरुणा सह नाद्वैतं" इति शास्त्रार्थमनुसरन्तः सन्तः साक्षाद्गुरुपरमगुरु - सम्प्रदायगुरूणां नमनस्तवनादि कृत्वा शिष्यशिक्षार्थं स्वग्रन्थेष्वपि तत्सर्वं उपनिबबन्धुः । किञ्च शास्त्रयोनित्वाधिकरणे सर्वज्ञानाकरान् वेदानपेक्ष्य तत्प्रणेतुः परमेश-

रस्य अधिकविज्ञानवत्त्वमुदाहर्तुं पाणिन्यादीन् परमर्षीनेव तत्प्रणीतव्याकरणादिशास्त्रजन्यज्ञानापेक्षया अधिक विज्ञानान् उदाजहार। न तु स्वकृतग्रन्थजन्यज्ञानापेक्षया अधिकविज्ञानं शताधिकग्रन्थप्रणेतारमात्मनमेव। तदेवं अद्वैतविद्याचार्येषु महत्स्वपि विपश्चिद्वरेषु द्रष्टुमतिदुष्करं निर्ममत्व - निरहङ्कारत्व - गुरुचरणस्मरणमित्यादि अनितरसाधारणं निरुपमं महत्त्व शङ्करभगवत्पादेष्वेव प्रसिद्धम्। तस्मात् लोकत्रयेऽपि दृष्टान्तरहिताः सर्वविशेशानपरमेश्वरानतिरिक्ताः श्रीशङ्करभगवत्पादाः श्रेयस्कामैः सर्वैरेव अस्माभिः प्रत्यहं सायंप्रातः साञ्जलिबन्धनन्तव्याः स्तोतव्याः पूजयितव्याः। तत्सुष्ठूक्तम् वृद्धैः—" आचार्याः शङ्कराचार्याः सन्तु मे जन्मजन्मनि " इति।

IV श्रीशङ्करभगवत्पादसमा नैव वाचस्पतिमिश्रादयः इति प्रकृते ते व्यतिरेकदृष्टान्ताः

तदेवमुक्तप्रभावेषु श्रीशङ्करभगवत्पादेषु सुदृढां भक्तिं सम्पादयितुमेव सर्वतन्त्रस्वतन्त्रानपि भामतीकारकल्पतरुकारान् अद्वैतविद्याचार्यान् व्यतिरेकदृष्टान्तत्वेन प्रतिपादयामि, न तु तेषां महात्मनां सर्वथा अस्मत्तो विशिष्टविज्ञानानां निकर्षप्रतिपिपादयिषया। तदिह भामतीकार - कल्पतरुकारान् प्रति यत्किञ्चिदुच्यमानं तत्सर्वं न हि निन्दा न्यायेन विश्ववन्द्यविश्वगुरुश्रीशङ्करभगवत्पादपदपङ्कजदृढभक्तिचिकीर्षयेति बोध्यम्।

तथा हि श्रीभगवत्पादादारभ्य अद्वैतविद्यायां सर्वे आचार्याः मूलग्रन्थस्य वा व्याख्योपव्याख्याग्रन्थयोर्वा कर्तारः स्वग्रन्थारम्भे इष्टदेवतामूलग्रन्थप्रणेतृप्रणामानन्तरं साक्षात्स्वगुरून् नमस्कुर्वन्ति इति तद्ग्रन्थगतैः तत्कृतैः श्लोकैरवगम्यते। मधुसूदनसरस्वत्यः स्वगुरूणां श्रीरामविश्वेश्वर - माधवानां प्रणामं अद्वैतसिद्धौ आरम्भेऽलिखन्। एवं गौडब्रह्मानन्दाः स्वगुरूणां श्रीशिवरामवर्णिनां श्रीनारायणतीर्थानां च नमस्कारान् लघुचन्द्रिकायां वर्णयन्ति। श्रीवाचस्पतिमिश्रास्तु स्वकृतेषु ग्रन्थेषु साक्षात् स्वमातापित्रोः स्वगुरूणां वा प्रणामं क्वापि नावर्णयन्। किञ्च 'वाचस्पतिमिश्रनामाहं, (न्यायभाष्यवार्तिकटीकां) न्यायसूचीनिबन्धं, मण्डनमिश्रकृतविधिविवेकव्याख्यां न्यायकणिकां, भाट्टमतप्रतिपादनपरप्रकरणं लघुशरीरं तत्त्वबिन्दुं, मण्डनमिश्रकृतां (ब्रह्मसिद्धिव्याख्यां) अद्य यावदनुपलब्धां तत्त्वसमीक्षां, सांख्यकारिकाव्याख्यां सांख्यतत्त्वकौमुदीं, पातञ्जलयोगसूत्रभाष्यव्याख्यां, तत्त्ववैशारदीं, शाङ्करभाष्यव्याख्यां भामतीं च सप्तग्रन्थान् अकरवम्' इति तत्र तत्रालिखत्। एते सप्त मम ग्रन्थाः, एतद्ग्रन्थकरणजनितं मम पुण्यं ईश्वरे समर्पये इति मिश्राः कथयन्ति। कल्पतरुकारः मिश्राणां जीवन्मुक्तत्वात् पुण्यमीश्वरे समर्प्यते इति व्याकरोति। अपि च भामतीनिबन्धपठन-

जनितविवेकेन भूलोकवासिनः मुनयः सर्वेऽपि मुक्तिं गताः, तस्मात् न कश्चिदपि मुनिः इन्द्रादिस्थानप्राप्तये तपश्चरति इति निर्विशङ्कः इन्द्रः स्वस्थो अभवत् इति सनातननामकस्वशिष्यकृतां भामतीस्तुतिं भामत्या चतुर्थाध्यायारम्भे मिश्राः अकल्पयन्। स्वयञ्च ग्रन्थावसाने केवलया: भामत्या: परिज्ञानादेव सर्वे अमृता: भवन्ति। मुमुक्षुपार्थस्य भामतीप्रणयनेन मया महोपकारः कृत इति लिलेख, निरुपमसकलसद्गुणसम्पन्ने नृगमहाराजे महीं शासति भामतीनिबन्धः मया कृतः इत्यप्यवर्णयत्। उक्तार्थबोधकाः तदीयाः श्लोकाः अधस्तात् लिख्यन्ते:—

मङ्क्त्वा वाद्यसुरेन्द्रवृन्दमखिलाविद्योपधानातिगं
येनाम्नायपयोनिधेर्नयमथा ब्रह्मामृतं प्राप्यते।
सोऽयं शाङ्करभाष्यजातविषयो वाचस्पतेः सादरं
संदर्भः परिभाव्यतां सुमतयः स्वार्थेषु को मत्सरः॥

अज्ञानसागरं तीर्त्वा ब्रह्मतत्त्वमभीप्सताम्।
नीतिनौकर्णधारेण मयाऽपूरि मनोरथः॥
यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिः।
यन्न्यायसांख्ययोगानां वेदान्तानां निबन्धनैः॥

समचैषं महत्पुण्यं तत्फलं पुष्कलं मया।
समर्पितमथैतेन प्रीयतां परमेश्वरः॥
नृपान्तराणां मनसाप्यगम्यां भ्रूक्षेपमात्रेण चकार कीर्तिम्।
कार्तस्वरासारसुपूरितार्थसार्थः स्वयं शास्त्रविचक्षणश्च॥
नरेश्वराः यच्चरितानुकारमिच्छन्ति कर्तुं न च पारयन्ति।
तस्मिन्महीपे महनीयकीर्तौ श्रीमन्नृगेऽकारि मया निबन्धः॥
शङ्के सम्प्रति निर्विशङ्कमधुना स्वराज्यसौख्यं वहन्-
नेन्द्रः सान्द्रतपःस्थितेषु कथमप्युद्वेगमप्येष्यति।
यद्वाचस्पतिमिश्रनिर्मितमितव्याख्यानमात्रस्फुट-
द्वेदान्तार्थविवेकवञ्चितभवाः स्वर्गेऽप्यमी निस्पृहाः" इति।

शास्त्रयोनित्वाधिकरणे भाष्यकृद्भिः सर्वज्ञब्रह्मदृष्टान्ततया पाणिन्याद्युदाहरणप्रदर्शनानन्तरमपि वाचस्पतिमिश्राः यथा अस्मत्कृतग्रन्थजन्यज्ञानापेक्षया अस्मदादेः अधिकज्ञानत्वं तद्वत् ब्रह्मणो अधिकज्ञानत्वमिति ग्रन्थसप्तकमात्रकृतः स्वस्यैव प्रकृतब्रह्मोदाहरणत्वं अभाषन्त । एवं मिश्राः शारीरके द्वितीयाध्यायद्वितीयपादे त इन्द्रियाणीत्यधिकरणे भाष्यव्याख्यानं अध्याहारपुनरुक्तिदोषदुष्टमिति उक्त्वा व्याख्यान्तरं प्रदर्शयामासुः । प्रदर्श्य चान्ते 'भाष्यकारीयमधिकरणं सूत्रेषु नेयं' इत्युक्तं मिश्रैः । सूत्रयोरिति वक्तव्ये सूत्रेषु इति बहुवचनं असङ्गतं इति मत्वा कल्पतरुकारः, 'सूत्रेषु इत्यस्य पदस्य सूत्रद्वयगतपदेषु' इत्यर्थमवर्णयत् । 'आचार्यकृतिनिवेशनं' इति पद्यं भामत्यामिव न्यायकणिकायामपि प्रयुञ्जानैः मिश्रैः मण्डनमिश्रसाधारणमेव आचार्यत्वं भगवत्पादेषु परिकल्पितं इति स्फुटम् ।

कल्पतरुकारोऽपि भामतीकारवदेव त इन्द्रियाणि इत्यधिकरणभाष्ये दुरुक्तचिन्तनं वार्तिककस्यैव युक्तं न व्याख्यायाः इति शङ्कामुत्थाप्य किं वार्तिकस्य शृङ्गमस्ति व्याख्ययापि कर्तुं शक्यते एव । पूर्वमपि आनन्दमयाधिकरणे मान्त्रवर्णिकसूत्रे तथारम्भणाधिकरणे उपलब्धेः इति सूत्रे च भाष्यदुरुक्तचिन्तनं वाचस्पतिमिश्रैः कृतमिति कल्पतरुकारः भाष्यकारवार्तिककारापेक्षयापि वाचस्पतिमिश्राः विशिष्टाविज्ञाना इति तान् उपश्लोकयामास । परिमलकाराः श्रीमदप्पय्यदीक्षितेन्द्रास्तु वाचस्पतिमिश्रप्रदर्शितव्याख्यानमेव दुष्टम् भाष्यव्याख्यानं निर्दुष्टमिति सम्यक् निरूपयामासुः । अयमर्थः तत्रत्यपरिमले एव द्रष्टव्यः । किञ्च कल्पतरुकारः स्वीयं कल्पतरुं स्वयमेव स्वग्रन्थे तृतीयाध्यायारम्भे प्रशंसति, 'कल्पतरुप्रशस्तिविस्तारज्ञ हरिः तदनुगुणतया दिशः विस्तृताः ससर्ज तथा ब्रह्मा कल्पतरुं सम्यक् श्रोतुं स्वस्य कर्णाष्टकमकल्पयत्; इन्द्रोऽपि कल्पतरुं सम्यगवलोकयितुं सहस्रनयनोऽभवत् " इति । अयमत्र तदीयश्लोकः,

कल्पादौ नूनमाशाः हरिरसृजदमूः कीर्तिविस्तारविज्ञः
श्रीमद्व्यासाश्रमस्य प्रतिवदनमधात् कर्णयुग्मं विरिञ्चिः ।
श्रोतुं वाचस्पतेर्वाक्सरणिषु विततं कल्पवृक्षं प्रबन्धं
भेजे वज्री सहस्रं चरितमभिनवं द्रष्टुमक्ष्यम्बुजानाम् ॥ इति ॥

तदेवं सुनिरूपितैः सोदाहरणैः सन्दर्भविशेषैः जीवनमात्राक्षिप्तपरिग्रहे ममेदं—इत्यभिमानराहित्यलक्षणं निर्ममत्वं, विद्वत्ताभिमाननिमित्तात्मसम्भावनाराहित्यलक्षणं अनहङ्कारत्वञ्च गीतोपदिष्टं भगवत्पादनिष्ठं

भामतीकारकल्पतरुकारयोः न विद्यत इति कुशाग्रधिषणैः विमर्शकुशलैः बोद्धुं शक्यते एव इत्यस्माद्विषयात् उपरम्यते ।

V निरुपमं भगवत्पादीयभाष्यं शब्दार्थसुन्दरं अनर्घानेकतत्त्वरत्नाकरम्

इत्येतत् तद्भाष्यमनवरतमभ्यसतामतिरोहितमेव । परमार्थसत्यप्रतिपत्त्युपायतया परस्परविलक्षणा अपि प्रक्रियाविशेषाः रत्नाकरादिव रत्नविशेषाः भगवत्पादीयभाष्याकरादेव तैस्तैराचार्यैरादरेण संगृहीताः स्वस्वग्रन्थेषु सुष्ठु प्रतिपाद्यन्ते, ते च बिम्बप्रतिबिम्बवादः, अवच्छेदवादः, आभासवादः, एकजीववादः, अनेकजीववादः, मायाविद्याभेदवादः, मायाविद्यैक्यवादः इत्येवं प्रक्रियाविशेषाः, प्रसिद्धाः भगवत्पादीयभाष्योदिताः तत्तदाचार्यग्रन्थेषु विराजन्ते ।

यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैवा प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता ॥ इति ॥

वार्तिककाराः तासां परस्परविरुद्धानामपि प्रक्रियाणां साधुत्वं बोधयन्ति ।

अधिगतमिधा पूर्वाचार्यालुपेत्य सहस्रधा सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता जननहरिणी सूक्तिःब्रह्माद्वयैकपरायणा ॥ इति ॥

श्रीमदप्पय्यदीक्षितेन्द्रैः शास्त्रसिद्धान्तलेशसङ्ग्रहे अद्वैताचार्येषु दृश्यमानानां नानाविधप्रस्थानानां प्रसन्नगम्भीरं भगवत्पादीयभाष्यमेव मूलमित्येव अभ्यधायि । पातञ्जलभाष्यगतशब्दसौन्दर्यं शाबरभाष्यगतार्थसौन्दर्यं च युगपद्भगवत्पादीये भाष्ये द्रष्टुंशक्यत इति शब्दार्थसुन्दरंभगवत्पादीयभाष्यम् ॥

VI श्री शाङ्करं भाष्यं रागद्वेषनिरसनपूर्वं चित्तशान्तिप्रदम् ॥

भगवत्पादाः मतान्तरमपि खण्डनीयमित्येव न खण्डयन्ति, किन्तु बुभुत्सुभ्यः तत्त्वं बोधयितुमेव । ते स्वयं वीतरागत्वात् न रोचयन्ते परमतनिराकरणप्रक्रियाम् । अत एव तैः तर्कपादोपोद्घातभाष्ये 'किं परमतनिराकरणेन परद्वेषकारणेन इति' इत्युक्तम् । एकत्वदर्शनं प्रति आदरवन्तः मुमुक्षवः स्युः इति तार्किकमतदोषप्रदर्शनं किञ्चिदुच्यते अस्माभिः, न तु तार्किकवत्तात्पर्येण " इति उक्तम् । मतान्तरं खण्डयन्तश्च भगवत्पादाः शास्त्रयुक्तिविरोधमेव दर्शयन्ति न पुरुषव्यक्तिं परिहसन्ति । यथा केचित्तु

ब्रह्मविदोऽपि एषणासम्बन्धं वर्णयन्ति तैः बृहदारण्यकं न श्रुतम् । सर्वक्रियाकारकफलोपमर्दस्वरूपायां विद्यायां सत्यां सह कार्येणाविद्यायाः अनुपपत्तिलक्षणो विरोधश्च न विज्ञातः, व्यासवचनञ्च तैः न श्रुतम् " इत्यादि । अन्यत्र च ' सर्वमिदं अबार्हदारण्यकम् ' इति ।

मतान्तरभाष्यकारास्तु अद्वैतप्रक्रियाखण्डनावसरे भगवत्पादान् महता परिकरेण निन्दन्ति । यथा,

" शङ्कराख्यस्य दुर्योनेः निस्सृतेन रजःखला ।
गीतानारी समीरेण शोधिता हंसरूपिणा ।' " (मध्वगीताभाष्यान्ते) । " तदिदं औपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविरहिणां अनादिपापवासनादूषिताशेषशेमुषीकानाम् . . . . विकल्पासहकुतर्ककल्ककल्पितमिति, " (रामानुजभाष्यं १ - १ - १)

VII भगवत्पादीयं भाष्यं महोपदेशदायि

भगवत्पादाः तत्वजिज्ञासुभ्यः इत्थमुपदिशन्तिः—वेदार्थजिज्ञासुभिः पूर्वनिर्णीताः स्वाभिप्रायाः न उपनिषत्सु अन्वेषणीयाः । अपि तु निर्मत्सरैः श्रुत्यर्थः विचार्य निर्णेतव्यः इति ज्ञापयन्ति, ' एवं तर्हि श्रृणु श्रुत्यर्थं हित्वा सर्वमभिमानं न तु अभिमानेन वर्षशतेनापि श्रुत्यर्थः ज्ञातुं शक्यते सर्वैः पण्डितंमन्यैः " इति ॥

VIII [शाङ्करं भाष्यं तदध्येतॄणां अहन्ताममतानिवर्तकम्]

यद्येको नानाग्रन्थान् रचयति तदा स्वीये एकस्मिन् ग्रन्थे स्वीयग्रन्थान्तरानुवादः प्रायेण ग्रन्थकर्तृषु दृष्टचरः । यथा भामत्यां, ' विस्तरस्तु न्यायकणिकायां द्रष्टव्यः ' इत्यनुवादः । नेयं शैली अहन्ताममताविरहिणां भगवत्पादानां दृष्टचरी, न हि कस्मिंश्चिदपि उपनिषद्भाष्ये अन्योपनिषद्भाष्यस्य वा सूत्रभाष्यस्य वा गीताभाष्यस्य वा उदाहरणमस्ति नापि सूत्रभाष्ये भाष्यान्तरानुवादः । भगवत्पादाः हि मन्यन्ते, एकैकमपि स्वीयं भाष्यं सम्यक् परिशीलितं सत् इतरनिरपेक्षतया तत्वज्ञानसाधनं भविष्यति इति ।

IX श्रुत्युक्ते अर्थे भगवत्पादैः न्यायसूत्रस्य प्रमाणत्वेनोपन्यासः

अपि च पश्यन्तु निर्मत्सराः गुणैकपक्षपातिनः प्रियपाठकमहाशयाः भगवत्पादानां न्यायदर्शन-प्रणेतृषु श्रीमद्गौतममहर्षिषु बहुमानातिशयम् । शारीरक-प्रथमाध्याय-प्रथमपादगत-चतुर्थसमन्वयसूत्रभाष्ये मोक्षप्राप्तिप्रकारनिरूपणावसरे ' त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि ', श्रुतं ह्येव मे

भगवद्दृशेभ्यः, तरति शोकं आत्मवित्, सोऽहं भगवः शोचामि, तं मा भगवान् शोकस्य पारं तारयतु, तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः, इत्येवमाद्याः श्रुतयः मोक्षप्रतिबन्धकनिवृत्तिमात्रमेव आत्मज्ञानस्य फलमिच्छन्ति इत्यभिधाय एवं नित्यशुद्धबुद्धमुक्तस्वभावे ब्रह्मणि अज्ञानमेकं मुक्त्वा तथाविधात्मानुभवप्रतिबन्धकं अन्यन्नास्ति इति श्रुतिबोधितेऽर्थे न्यायैरनुगृहीतं तर्कैरुपबृंहितं, परिशोधिततात्पर्यकं न्यायदर्शनप्रणेतृतार्किकवृद्धगौतमाचार्यप्रणीतं सूत्रं प्रमाणयति —तथा च आचार्यप्रणीतं न्यायोपबृंहितं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरापायात् अपवर्गः इति । उपनिषदुपदिष्टोऽयं अर्थः सुष्ठु उपपत्त्या सूत्रेण दृढीकृतः इति सन्तुष्टाः भगवत्पादाः न्ययोपबृंहितं इति सूत्रं विशिंषन्तः सूत्रप्रणेतारं आचार्य इति महता बहुमानेन सङ्कीर्तयन्ति ।

X न्यायसूत्रं समग्रांशे न प्रमाणं किन्तु एकदेशे अंशे, अक्षपादसम्मतं तत्त्वज्ञानं न वेदान्तसम्मतम् इति वाचस्पतिमिश्राः ।

पञ्चाध्यायीलक्षणे न्यायदर्शने प्रथमाध्याये प्रथमसूत्रे तत्त्वज्ञानान्निःश्रेयसाधिगमः इति प्रतिज्ञाय तत्त्वज्ञानान्निःश्रेयसाधिगमश्च मिथ्याज्ञानापायद्वारा भवति इति दुःखजन्मेत्यादिना द्वितीयसूत्रेणाभिहितम् । मिथ्याज्ञानतत्त्वज्ञानयोः स्वरूपञ्च तत्त्वनिर्णयप्रधाने चतुर्थेऽध्याये सम्यङ् निरूप्यते । न्यायसूत्रकारैः गौतमाचार्यैः तद्भाष्यकर्तृभिः पक्षिलस्वामिभिश्च वेदान्तसम्मतमेव मिथ्याज्ञानं तत्त्वज्ञानञ्च न्यायदर्शनसम्मतम् इति सुष्ठु प्रत्यपादि । किन्तु न्यायवार्तिकतात्पर्यटीकाकारैः वाचस्पतिमिश्रैस्तु आरम्भवाद-आत्मनानात्व - ज्ञानेच्छासुखाद्यात्मधर्मत्वादिप्रक्रियायाः अक्षपादसिद्धान्तत्वात् तद्विरोधभिया तत्त्वनिर्णयाध्यायगतानि सूत्राणि स्वरसं भाष्यव्याख्यानमुपेक्ष्य विज्ञानवादनिराकरणपरतया क्लेशेन व्याख्यातानि । अत एव भामत्यां तत्त्वज्ञानान्मिथ्याज्ञानापायः इत्येतावन्मात्रेण सूत्रोपन्यासः, न तु अक्षपादसम्मतं तत्त्वज्ञानं इह सम्मतं इत्युक्तं वाचस्पतिमिश्रैः । भगवत्पादैः अक्षपादसूत्रं समग्रं सर्वांशेऽपि प्रमाणत्वेनोपन्यस्तम्, न तु एकदेशांशे एव । वेदान्तसम्मतं तत्त्वज्ञानमेव अक्षपादस्यापि सम्मतम् इत्येतत् सप्रमाणं सयुक्तिकं निरूप्यते ।

XI न्यायसूत्रं समग्रं सर्वांशे प्रमाणं, वेदान्तसम्मतं तत्त्वज्ञानमेव अक्षपादस्यापि सम्मतम् इति भगवत्पादानां सुदृढोऽभिप्रायः

तथाहि भगवत्पादास्तु न्यायदर्शने तत्त्वनिर्णयप्रधाने चतुर्थाध्याये सयुक्तिकं सप्रमाणं प्रपञ्चमिथ्यात्वस्य परमार्थात्मतत्त्वस्य न्यायाचार्यैः सम्यङ् निरूपणात् न्यायसूत्रभाष्ययोः तत्र परमं तात्पर्यं बुद्ध्वा

अवैदिकमतनिराकरणाय प्रदर्शितायां आरम्भादिप्रक्रियायां अतात्पर्यं च निश्चित्य औपनिषदं तत्त्वज्ञानमेव अक्षपादसम्मतं तत्त्वज्ञानमिति समग्रमेव न्यायसूत्रं सर्वांशेऽपि प्रमाणमिति अभाषन्त। यथा अद्वैतमेव परमार्थमिति अङ्गीकुर्वद्भिः अद्वैतिभिरपि तादृशाद्वैतज्ञानोदयावधि अतात्पर्यविषयायाः जीवेश्वरमानमेयादि-प्रक्रियायाः अङ्गीकारः न विरुध्यते। तथा, न्यायाचार्यस्यापि मते न विरुध्यते इति बोध्यम्। अवैदि-कमतनिराकरणार्थत्वं न्यायशास्त्रस्य वाचस्पतिमिश्रैरपि न्यायवार्तिकारम्भहेतुप्रदर्शनावसरेऽभिहितम्, 'यद्यपि भाष्यकृता कृतव्युत्पादनमेतत् तथापि दिङ्नागप्रभृतिभि अर्वाचीनैः कुहेतुसन्तमसोत्पादनेनाच्छादितं शास्त्रं, न तत्त्वनिर्णयाय पर्याप्तम् इति उद्योतकरेण स्वनिबन्धोद्योतेन इति प्रयोजनवानयमारम्भः इति स्वटीकायां उक्तं मिश्रैः। तत्सिद्धं तदा तदा नैयायिकैः अवैदिकप्रक्रिया निराक्रियते इति।

अपि च भगवत्पादाः आरम्भवाद - आत्मनानात्व - ज्ञानसुखेच्छा,—आत्मधर्मत्वादिप्रक्रियायाः कणादगौतमप्रतिपादितायाः वैशेषिकनैयायिकोभयमतसाधारण्येऽपि तार्किकमतनिराकरणावसरे कणाद-प्रवर्तितवैशेषिकप्रक्रियामेव दूषयन्ति, न क्वापि गौतमप्रवर्तितन्यायप्रक्रियाम्। तथाहि सूत्रभाष्ये प्रथमाध्याय-प्रथमपादगत - ईक्षत्यधिकरणारम्भे, "काणादास्तु एतेभ्यः एव वाक्येभ्यः ईश्वरं निमित्तकारणं अनुमिमते, अणूंश्च समवायिकारणमिति;" महद्दीर्घाधिकरणे, "परमाणुकारणवादः निराकर्तव्यः, तत्रायं वैशेषिकाणामभ्यु-पगमः" इति। गीताभाष्ये अष्टादशाध्याये सहजं कर्मेति गीताव्याख्याने, "शुद्धं तद्द्रव्यं शक्तिमदवतिष्ठते इत्येवं आहुः काणादाः, अस्मिन् पक्षे को दोषः? इति। अयमेव तु दोषः यतस्तु अभागवतं मतमिदम्।" इति। उपनिषद्भाष्ये माण्डूक्ये अद्वैतप्रकरणे यथैकस्मिन्घटाकाशे इति कारिकाभाष्ये, 'ये त्वाहुः वैशेषिकादयः इच्छादयः आत्मसमवायिनः इति, तदप्यसत्" इति। छान्दोग्यषष्ठे द्वितीयखण्डभाष्ये, 'तस्माद्वैशेषिकपरिकल्पितात् सतः अन्यदेव कारणं सदुच्यते' इति। बृहदारण्यके प्रथमाध्याये द्वितीयब्राह्मणे, 'मृत्युरेवेदमावृतमासीत्' इति वाक्यार्थवर्णनावसरे कार्यकारणभावविचारः वैशेषिकपक्षनिराकरणेनैव उपसंह्रियते। उपदेशसाहस्र्यां पद्यप्रबन्धे पार्थिवप्रकरणे, "एकनीडत्वतोऽग्राह्याः स्युः कणादादिवर्त्मनाम्" (श्लो. ५१) इति। एवं भगवत्पादैः कणादमतमिव गौतमीयैः नैयायिकैः उक्तं न समीचीनमिति तन्मतं न खण्डितम्। नापि कणादादिमतवत् गौतममतमपि समानयोगक्षेमतया निराकृतं वेदितव्यम् इति लिखितम्। तत्कस्य हेतोः इति विवेचनीयं विद्वद्भिः। वयं तु पश्यामः भगवत्पादास्तु तत्वनिर्णयाध्याये औपनिषदमेव प्रपञ्चमिथ्यात्वं परमार्थात्मतत्वं च तात्पर्यविषयतया न्यायाचार्यैः निरूपितम्। अवैदिकमतनिराकरणाय प्रदर्शितायां आरम्भादिप्रक्रियायां तस्य अनास्थेति ज्ञात्वा तत्राग्ना

सम्मतं न निराचक्रुः । प्रत्युत मोक्षप्राप्तिप्रकारनिरूपणे वेदान्तानां प्रमाणत्वेन प्रदर्शनानन्तरं वेदान्तसमकक्षतया न्यायसूत्रं प्रमाणत्वेन वर्णयांबभूवुः । किञ्च बृहदारण्यकोपनिषदि तृतीयाध्याये उपपत्तिप्रधाने याज्ञवल्कीयकाण्डे उपक्रमभाष्ये श्रीशङ्करभगवत्पादाः, 'अपि च तद्विद्यसंयोगः तैश्च सह वादकरणं विद्याप्राप्त्युपायः न्यायविद्यायां दृष्टः । तच्च अस्मिन् अध्याये प्रदर्श्यते । प्रत्यक्षा च विद्वत्संयोगे प्रज्ञावृद्धिः इति वदन्तः, 'ज्ञानग्रहणाभ्यासः तद्विद्यैस्सह संवादः, तं शिष्य-गुरु-सब्रह्मचारि—विशिष्टश्रेयोऽर्थिभिः अनसूयुभिः अभ्युपेयात् " इति तत्त्वनिर्णयाध्यायद्वितीयाह्निकगतं सूत्रद्वयं गौतमप्रणीतं प्रमाणत्वेन स्मारयन्ति । धर्मसूत्रकर्तापि अयमेव गौतमः इति वृद्धाः वदन्ति । तद्युक्तमेव प्रतिभाति । येन भगवत्पादाः प्रमाणत्वेन धर्मसूत्रप्रदर्शनावसरे गौतमीयान्येव धर्मसूत्राणि प्रमाणयन्ति । शारीरके अपशूद्राधिकरणभाष्ये " वेदमुपश्रृण्वतः त्रपुजतुभ्यां श्रोत्रप्रतिपूरणं, वेदोच्चारणे जिह्वाच्छेदः, धारणे शरीरभेदः, द्विजादीना अध्ययनं इज्या दानं च " इति । एवं तृतीयाध्याये कृतात्ययाधिकरणे 'वर्णाः आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलं अनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूप - आयुःश्रुत - वृत्त - सुखमेधसो जन्म प्रतिपद्यन्ते ' इति । गीताभाष्ये पञ्चमाध्याये निर्दोषं इति गीतोपक्रमभाष्ये 'समासमाभ्यां विषमसमे पूजातः' इति गौतमधर्मसूत्राणि भगवत्पादेन उपन्यस्तानि । तदेवं दुःखजन्मेत्यादिसूत्रं समग्रमपि सर्वांशेऽपि भगवत्पादैः प्रमाणत्वेन उपन्यस्तमिति बोध्यम् ।

XII न्यायसूत्रं समग्रमपि प्रमाणं वेदान्तसम्मतं तत्त्वज्ञानमेव अक्षपादस्यापि सम्मतम् इति पञ्चपादिकाविवरणाचार्याः

श्रीपद्मपादाचार्याः भगवत्पादानां साक्षाच्छिष्याः भाष्यव्याख्यायां पञ्चपादिकायां 'इतश्च एतत् एवं, अन्येऽपि न्यायविदः मिथ्याज्ञानापाये तदनन्तरं दुःखाभावं निर्वाणं दर्शयन्ति मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति, न क्रियातः इत्यभाषन्त । श्रीप्रकाशात्मयतयः पञ्चपादिकाव्याख्याने विवरणे इदानीं तर्कशास्त्रानुसारेणापि मिथ्याज्ञाननिवृत्तिफलं तत्त्वज्ञानमिति दर्शयति इतश्च एतदेवमिति । अयमर्थः— 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरापायात् अपवर्गः' इति । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गेषु द्वादशसु पदार्थेषु यदिदं अनादिप्रवृत्तं मिथ्याज्ञानं तस्य आत्मपरमात्मशरीरेन्द्रियादि द्वादशपदार्थतत्त्वदर्शनवैमल्यात् अपाये तेषु रागद्वेषमोहाः नोत्पद्यन्ते । ततः प्रवर्तकाभावात् सुखदुःखफले प्रवृत्तिनिवृत्ती नोपजायेते ततः प्रवृत्तिनिवृत्तिद्वारोपचितशुभाशुभव्यामिश्रकर्म-

शून्यतया ब्रह्मादिस्थावरान्तेषु योनिभेदेषु न जायते शरीरसम्बन्धं प्रतिपद्यते इत्यर्थः। ततः शरीराभावे सुखदुःखे नोत्पद्येते इति मिथ्याज्ञानापायमेव मोक्षं दर्शयति इति निरूपयामासुः। तत्स्फुटमेव पञ्चपादिकाविवरणाचार्याः समग्रमेव न्यायसूत्रं भाष्यकारैः प्रमाणत्वेनोपन्यस्तमिति प्रतिपादयामासुः।

XIII न्यायसूत्रं समग्रं सर्वांशे प्रमाणम् वेदान्तसम्मतमेव तत्त्वज्ञानं अक्षपादस्यापि सम्मतमित्यत्र मिथ्याज्ञान–तत्त्वज्ञान–अपवर्गस्वरूपप्रतिपादकं श्रीपक्षिलस्वामिभिः कृतं न्यायसूत्रभाष्यं परमं प्रमाणम्

किं पुनस्तन्मिथ्याज्ञानम्? अनात्मनि आत्मग्रहः अहमस्मीति मोहः अहङ्कारः इति। अनात्मानं खलु अहमस्मीति पश्यतः दृष्टिः अहङ्कार इति। किं पुनस्तदर्थजातम्? यद्विषयो अहङ्कारः। शरीरेन्द्रियमनोवेदनाबुद्धयः। कथं तद्विषयो अहङ्कारः संसारबीजं भवति? अयं खलु शरीराद्यर्थजातं अहमस्मीति व्यवसितः तदुच्छेदेन आत्मोच्छेदं मन्यमानः तदनुच्छेदतृष्णापरिप्लुतः पुनः पुनः तदुपादत्ते। तदुपाददानः जन्ममरणाय यतते। तेन अवियोगात् न अत्यन्तं दुःखात् विमुच्यते इति। यस्तु दुःखं, दुःखायतनम् दुःखानुषक्तं सुखं च सर्वमिदं दुःखमिति पश्यति, सः दुखं परिजानाति, परिज्ञातञ्च दुःखं प्रहीणं भवति अनुपादानात्, सविषान्नवत्। एवं दोषान् कर्म च दुःखहेतुरिति पश्यति। न च अप्रहीणेषु दोषेषु दुःखप्रबन्धोच्छेदेन शक्यं भवितुमिति दोषान् जहाति। प्रहीणेषु च दोषेषु न प्रवृत्तिः प्रतिसन्धानाय इत्युक्तम्। प्रेत्यभावफलदुःखानि च ज्ञेयानि व्यवस्थापयति। कर्म च दोषांश्च प्रहेयान्। अपवर्गः अधिगन्तव्यः। तस्य अधिगमोपायः तत्त्वज्ञानम्। एवं चतसृभिः विधाभिः प्रमेयं विभक्तं आसेवमानस्य अभ्यस्यतः भावयतः **सम्यग्दर्शनं यथाभूतावबोधः तत्त्वज्ञानं उत्पद्यते**। एवञ्च

[सू] दोषनिमित्तानां तत्त्वज्ञानात् अहङ्कारनिवृत्तिः (न्यायदर्शनम् ४-२-१)

[भा] **शरीरादिदुःखान्तं प्रमेयम्, दोषनिमित्तम्, तद्विषयत्वान्मिथ्याज्ञानस्य। तदिदं तत्त्वज्ञानं तद्विषयं उत्पन्नमहङ्कारं निवर्तयति, समानविषये तयोर्विरोधात्।** एवं तत्त्वज्ञानात् 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति। स चायं शास्त्रार्थसंग्रहः अनूद्यते, न अपूर्वः विधीयते इति।

[सू] दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः ॥ (न्यायदर्शनं ४-२-२)

[भा] कामविषयाः इन्द्रियार्थाः इति रूपादयः उच्यन्ते। ते मिथ्यासंकल्प्यमानाः रागद्वेषमोहान् प्रवर्तयन्ति। तान् सर्वं प्रसञ्चक्षीत। तं च प्रसञ्चक्षाणस्य रूपादिविषयः मिथ्यासंकल्पः निवर्तते। सोऽयं अध्यात्मं बहिश्च विविक्तचित्तः विहरन् मुक्तः इत्युच्यते। अतः परं काचित् संज्ञा हेया, काचित् भावयितव्या इत्युच्यते। न अर्थनिराकरणं न अर्थ उपादानं वा। कथमिति ?

[सू] तन्निमित्तं तु अवयव्यभिमानः (न्यायदर्शनं ४-२-३)

[भा] तेषां दोषाणां निमित्तं तु अवयव्यभिमानः। सा च खलु स्त्रीसंज्ञा सपरिष्कारा पुरुषस्य, पुरुषसंज्ञा च स्त्रियाः सपरिष्कारा, निमित्तसंज्ञा, अनुव्यञ्जनसंज्ञा च। मिनित्तसंज्ञा—रसनाश्रोत्रं, दन्तोष्ठं चक्षुर्नासिकम्। अनुव्यञ्जनसंज्ञा—इत्थं दन्तौ, इत्थं ओष्ठौ इति। सेयं संज्ञा कामं वर्धयति, तदनुषक्तांश्च दोषान। वर्जनं तु अस्याः भेदेन अवयवसंज्ञा। केश, रोम, मांस शोणित, अस्थि, स्नायु, शिरा, कफ, पित्त, उच्चारादिसंज्ञा। ताम् अशुभसंज्ञेति व्याचक्षते। तामस्य भावयतः कामरागः प्रहीयते।

“नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम्।
एतन्मांसवसादिविकारं मनसि विचिन्तय वारं वारम्।”

इति मोहमुद्गरेण श्रीपक्षिलस्वाम्युपदिष्टं स्मारयन्ति भगवत्पादाः। सत्येवं द्विविधे विषये काचित् संज्ञा भावनीयाः, काचित् परिवर्जनीया इति उपदिश्यते। यथा विषसंपृक्ते अन्ने अन्नसंज्ञा उपादानाय, विषसंज्ञा प्रहाणाय इति।

दोषनिमित्तानां तत्त्वज्ञानात् अहङ्कारनिवृत्तिरित्युक्तम्। अथ कथं तत्त्वज्ञानं उत्पद्यते इतिः—

[सू] समाधिविशेषाभ्यासात (४-२-३५)

[भा] स तु प्रत्याहृतस्य इन्द्रियेभ्यः मनसः धारकेण प्रयत्नेन धार्यमाणस्य आत्मना संयोगः तत्त्वबुभुत्साविशिष्टः। सति हि तस्मिन् इन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते, तदभ्यासवशात् तत्त्वबुद्धिः उत्पद्यते।

[सू] तदभावश्च अपर्गे (न्यायदर्शनं ४-२-४२)

[भा] तस्य बुद्धिनिमित्ताश्रयस्य, शरीरेन्द्रियस्य धर्माधर्माभावः अपवर्गे। तत्र यदुक्तं अपवर्गेऽपि एवं प्रसङ्गः इति तदयुक्तं तस्मात् सर्वदुःखविमोक्षः अपवर्गः यस्मात् सर्वदुःखबीजं सर्वदुःखायतनञ्च अपवर्गे विच्छिद्यते। तस्मात् सर्वेण दुखेन विमुक्तिः अपवर्गः, न निर्बीजं निरायतनञ्च दुःखं उत्पद्यते इति भाष्यकृद्भिः उक्तम्। तदेतत् भाष्यवाक्यं पूर्वोक्तार्थे परमं प्रमाणमिति सुष्ठु अवगम्यते।

XIV न्यायसूत्रं समग्रमेव प्रमाणं तत्त्वज्ञानं वेदान्तसम्मतमेव गौडब्रह्मानन्दस्वामिभिः अद्वैतसिद्धिव्याख्यायां गुरुचन्द्रिकायां एकमेवाद्वितीयमिति श्रुत्यर्थविचारगवसरे न्यायाचार्येण प्रपञ्चमिथ्यात्वं परमार्थात्मतत्वं च तात्पर्येण प्रतिपाद्यते इति यत् सोपपत्तिकं सप्रमाणं निरूपितं तन्नितरां विशिष्टं प्रमाणं भवति।

श्रीब्रह्मानन्दस्वामिभिस्तु—"किञ्च तार्किकधुरन्धरगौतमसूत्रैरपि प्रपञ्चो मिथ्या, तथा हि एकस्मिन् भेदाभावात् भेदशब्दप्रयोगानुपपत्तेः अप्रश्नः (१) बुद्ध्या विवेचनात्तु भावानां याथार्थ्यानुपलब्धिः तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् (२) स्वप्नविषयाभिमानवत् अयं प्रमाणप्रमेयाभिमानः (३) माया गन्धर्वनगरमृगतृष्णावद्वा (४) मिथ्योपलब्धेर्विनाशः स्वप्नविषयोपलब्धिप्रणाशवत् प्रबोधे (५) बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् (६) तत्वप्रधानभेदाच्च मिथ्याबुद्धेः द्वैविध्योपपत्तिः (७) दोषनिमित्तानां तत्वज्ञानात् अहङ्कारनिवृत्तिः (८) दोषनिमित्तं रूपादयः विषयाः सङ्कल्पकृताः (९) तन्निमित्रं तु अवयव्यभिमानः (१०) विद्याविद्याद्वैविध्यात् संशयः (१२) इति तत्त्वनिर्णयनामकचतुर्थाध्यायसूत्राणि गौतमीयानि। अथ पूर्वपक्षसूत्राणि इमानि आरम्भवादरूपतत्सिद्धान्तविरुद्धत्वात् इति चेत्, न। बुद्ध्या विवेचनादित्यादिना "यदग्ने लोहितं रूपं तेजसः तद्रूपं, अपागात् अग्नेः अग्नित्वं" इत्यादिश्रुत्युक्तस्य तर्कस्य उक्तत्वात्। अत एव उक्तसूत्रार्थः तोटकाचार्यैः श्रुत्यर्थत्वेन उक्तः—

'प्रदिदर्शयिषुर्वसनस्य यथा वितथत्वं अयास्यति तन्तुगुणं।
अपकृष्य तु तन्तुसमं त्रितयं ज्वलनप्रमुखस्य तथोक्तवती" ॥ इति

'यदग्नेः' इत्यादि श्रुतिः इति शेषः। मायेत्यादिना इन्द्रजालमिव, मायामयं स्वप्न इव, मिथ्यादर्शनं, इत्यादि श्रुत्युक्तस्य, मिथ्येत्यादिना 'यत्र हि द्वैतमिव भवति' इति श्रुत्युक्तस्य, सङ्कल्पकृता इत्यादिना 'एतत्सर्वं मन एव' इत्यादि श्रुत्युक्तस्य, तर्कस्यापरिहार्यस्य-उक्तत्वात् आरम्भादि प्रक्रियायाः अवैदिकनिरासमात्र - अभिप्रायेणोक्तत्वाच्च। अन्यथा चतुर्थाध्यायान्ते तादृश-प्रक्रियायाः हेयत्वं अद्वैतमतस्य च ग्राह्यत्वं सूत्रभाष्ययोः नोच्येत। तथाहि, तदर्थं यमनियमाभ्या-मात्मसंस्कारः, योगाच्च आत्मविध्युपायैः (१) तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः। यमः समानमाश्रमिणां धर्मसाधनम्, नियमः प्रतिविशिष्टं आत्मसंस्कारः, पुनरधर्महानं धर्मोपायश्च योगशास्त्राच्च अध्यात्मविधिः प्रतिपत्तव्यः। स पुनः तपः, प्राणायामः, प्रत्याहारः, ध्यानं, धारणा इति इन्द्रियविषयेषु च प्रसङ्ख्यानाभ्यासः रागद्वेषविघातार्थः। उपायस्तु योगाचारविधानम् इति। ज्ञानग्रहणाभ्यासः तद्विद्यैश्च सह संवादः (२) तदर्थं इति प्रकृतम्। ज्ञायते अनेन इति ज्ञानं, आत्मविद्याशास्त्रम्, तस्य ग्रहणं अध्ययनधारणं, अभ्यासः सततं तत्क्रिया। अध्ययनानुबन्धश्रवणचिन्तनानि तद्विद्यैश्च सह संवाद इति प्रज्ञापरिपाकार्थम्। प्रज्ञापरिपाकस्तु संशयच्छेदनम्, विज्ञातार्थावबोधः अध्यवसितार्थाभ्यनु-ज्ञानमिति समायवादः। संवादः, तद्विद्यैश्च सह संवादः इति अविविक्तार्थं वचनं तद्विभजते। तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयार्थिभिः अनसूयुभिः अभ्युपेयात् (३) एतत् निगदव्याख्यानेनैव नीतार्थमिति। यदि च मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्येति, प्रतिपक्षहीनमपि वा प्रयोजनार्थं अर्थित्वे तमभ्युपेयात् इति वर्तते। परतः प्रज्ञां उपादित्समानः तत्त्वबुभुत्साप्रज्ञापनेन स्वपक्षं अनवस्थापयन् स्वदर्शनं परिशोधयेत्। अन्योन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि स्वपक्षरागेण च एके न्यायमतिवर्तन्ते (४) तत्र तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे, बीजप्ररोहरक्षणार्थं कण्टकशाखावरणवत् अनुत्पन्नतत्त्वज्ञानानां अप्रहीणदोषाणां तदर्थं घटमानानामेतत् "इति विद्यानिर्वेदादिभिश्च परेण अवज्ञाय-मानस्य ताभ्यां विगृह्य कथनम् (६) ताभ्यां जल्पवितण्डाभ्यां विगृह्येति विजिगीषया न तत्त्वबुभुत्सया। तदेतत् विद्यापालनात् न लाभपूजाख्यात्यर्थम् इति अत्यन्तं विशदतया न्यायसूत्रप्रणेतुः गौतमाचार्यस्य परमप्रामाणिकस्य प्रपञ्चमिथ्यात्वे परमार्थात्मतत्त्वे परमं तात्पर्यं निरूप्य, भाष्यकृद्भिः भगवत्पादैः प्रमाणीकृतम् न्यायसूत्रं समग्रांशे प्रमाणमेव, तत्त्वज्ञानञ्च औपनिषदमेव अक्षपादाभिमतं नान्यत् किमपि इति सुष्ठु निरूपितं भवति।

अपि च

'ओतः प्रोतश्च तन्तुष्विह विततपटश्चित्रवर्णेषु चित्रः
तस्मिन् जिज्ञास्यमाने ननु भवति पटः सूत्रमात्रावशेषः ।
तद्वद्विश्वं विचित्रं नग-नगर- नरग्रामपश्वादिरूपं
प्रोतं वैराजरूपे स वियति तदपि ब्रह्मणि प्रोतमोतम् ॥'

इति भगवत्पादाः अपि शतश्लोक्यां 'बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिः तन्त्वपकर्षे पटसद्भावानुपलब्धिवत्' इति न्यायसूत्रप्रणेतृगौतमर्षिप्रदर्शितदिशा पटदृष्टान्तेनैव प्रपञ्चमिथ्यात्वं बोधयन्ति ।

XV न्यायसूत्रं समग्रं प्रमाणं वेदान्तसम्मतमेव तत्त्वज्ञानं अक्षपादस्यापि सम्मतं इत्यत्र श्रीमहामहोपाध्याय नागोजिभट्टैः वैयाकरणसिद्धान्तलघुमञ्जूषायां लिङर्थविचारावसरे यत्प्रतिपादितं तत्सुतरां प्रमाणं भवति

श्रीनागोजिभट्टैः, "गौतमोऽपि स्वप्नविषयाभिमानवत् अयं प्रमाणप्रमेयाभिमानः मायागन्धर्वनगरमृगतृष्णिकावद्वा हेत्वाभासादसिद्धिः" इत्याह । प्रत्यवतिष्ठते विज्ञानवादी इत्येवं वाचस्पतिमिश्रैः अवतारितेन आद्यसूत्रद्वयेन यथा स्वप्ने विषयाः न सन्ति, अथ च अभिमानो भवति, एवं प्रमाणप्रमेयानि न सन्ति, अथ च तदभिमानः । एवं च विज्ञानधारारूपचित्ताव्यतिरेकिणो विषयाः जाग्रत्प्रत्यया अपि निर्विषयाः दृष्टाः, मायागन्धर्वनगरादिप्रत्ययाः इव इति पूर्वपक्षं कृत्वा, यद्यपि विषयाणामसत्त्वं प्रतिबोधादौ अनुपलम्भात् तथापि जाग्रदवस्थायां समीपे एव उपलभ्यमानानां यावद्व्यवहारं अबाध्यमानजातीयानां चित्तव्यतिरेकेण उपलभ्यमानानां तत्त्वे न हेतुः इति न्यायवार्तिकतट्टीकादौ तृतीयं सिद्धान्तत्वेन व्याख्यातम् । एवं च अनिर्वचनीयतावादस्य सूत्रसम्मतत्वं अर्थात् उक्तप्रायं तस्य श्रुतिमूलकत्वेन हेत्वाभासादसिद्धिः इत्यनेन खण्डनासम्भवाच्च । तद्वदेव च अनिर्वचनीयस्य व्यावहारिकसत्त्वाङ्गीकारात् अदोषः इति ग्रन्थेन तर्कशास्त्रस्य अद्वैतपरत्वं प्रत्यपादि । तत्रैव मञ्जूषायां यमनियमाभ्यां आत्मसंस्कारः, योगाच्च आत्मविद्युपायैः इति न्यायसूत्रोक्तयोगपदस्य वेदान्तोपलक्षणतां उपवर्ण्य, तदनन्तरेण नन्वेवं तेनैव सिद्धे इदं शास्त्रं किमर्थम्, अत उक्तम्, 'तत्त्वाध्यवसायसंरक्षार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति' । अनुत्पन्नतत्त्वज्ञानानां अप्रहीणदोषाणां तदर्थं घटमानानां उपायाय एतदिति तद्भाष्यम् । तस्यामवस्थायां सौगतादि-

कृततर्कैः प्राप्तस्य तन्मतविश्वासस्य नाशाय जल्पवितण्डाभ्यां तन्मतखण्डनतात्पर्यकमिदं शास्त्रं स्थूलसूक्ष्मशरीरातिरिक्तात्मसाधनद्वारा अध्यात्मशास्त्राङ्गमिदं इति तदाशयः। अनेन अद्वैतशास्त्रातिरिक्तसर्वशास्त्राणां एवंविधत्वं सूचितमिति सुनिपुणं सोपपत्ति तार्किकवृद्धस्य अद्वैतदर्शने एव परमं तात्पर्यम् न्यायशास्त्रस्यापि तदङ्गत्वं इति निरूपितम्।

XVI नवीनानां आधुनिकानामपि तार्किकप्रवराणां अद्वैतमते महती प्रतिपत्तिः

तार्किकप्रवराः श्रीमदुदयनाचार्याः अद्वैतसिद्धान्तस्यैव निर्दोष-श्रुतिसम्मततां न्यायकुसुमाञ्जलौ प्रोचुः। ईश्वरस्वरूपविचारावसरे विप्रतिपत्तिप्रदर्शनारम्भे शुद्धबुद्धस्वभावः इत्यौपनिषदाः इत्यवोचन्। नात्र शैववैष्णवादयः औपनिषदाः इत्युच्यन्ते। अनन्तरं शैववैष्णवादेः पृथक्परिगणनात्। किञ्च परिगणनक्रमोऽपि उक्तौपनिषदमतस्य परमाभ्यर्हिततामुपदिशति। उत्कृष्टोपक्रमं अपकृष्टान्तं हि प्रकृते परिगणनं दृश्यते। अत एव चार्वाकस्य अन्ते निवेशः कृतः।

किञ्च एते एव आचार्याः आत्मतत्त्वविवेके बौद्धमतनिराकरणप्रसङ्गे अद्वैतमतं सर्वमतश्रेष्ठतया अवधारयन्ति। तथाहि,

> "न ग्राह्यभेदं अवधूय धियोऽस्ति वृत्तिः तद्बाधके बलिनि वेदनये जयश्रीः।
> नो चेदनित्यमिदं ईदृशमेव विश्वं तथ्यं तथागतमतस्य तु कोऽवकाशः॥"

इति पद्ये द्वितीयपादेन अद्वैतमतस्य सर्वोत्कृष्टत्वमाचार्यैः प्रत्यपादि। तदनन्तरं विस्तृतविचारावसाने 'तस्मादनुभवव्यवस्थितौ अनात्मापि स्फुरति इति अवर्जनीयमिति प्रविश वा अनिर्वचनीयख्यातिकुक्षिम्, तिष्ठ वा मतिकर्दममपहाय न्यायानुसारेण नीलादीनां पारमार्थिकत्वे इति'॥ अत्र अद्वैतप्रक्रिया सुस्पष्टमभिहिता। अन्ते च ततः संस्काराभिभवात् केवलोऽपि न विकल्प्यते, यामाश्रित्य चरमवेदान्तोपसंहारः। तत्प्रतिपादनार्थं 'यतो वाचो निवर्तन्ते ह्यप्राप्य मनसा सह' इति। **सा च अवस्था न हेया, मोक्षनगरगोपुरायमाणत्वात्। निर्वाणं तु तस्य स्वयमेव। यामाश्रित्य न्यायमतोपसंहारः।** 'अथ यो निष्कामः आप्तकामः आत्मकामः स ब्रह्मैव सन् ब्रह्माप्येति, न तस्य प्राणा उत्क्रामन्ति, अत्रैव समवलीयन्ते इत्यादीनि' इत्यत्रापि अद्वैतमेव उपसंहृतम्। अत्र यामाश्रित्य न्यायमतोपसंहार इति चरमामद्वैतावस्थां आश्रित्यैव च न्यायमतस्यापि मोक्षसाधनोपदेष्टृत्वमिति न्यायाचार्यः स्पष्टीचकार।

श्रीगङ्गेशोपाध्यायाः

नवीनतर्कशास्त्रप्रवर्तकः गङ्गेशोपाध्यायोऽपि स्वग्रन्थे तत्त्वचिन्तामणौ,

" गुणातीतोऽपि ईशः त्रिगुणसचिवः त्र्यक्षरमयः
त्रिमूर्तिः यः सर्गस्थितिविलयकर्माणि कुरुते ॥"

इति मङ्गलश्लोके एव परमात्मनः निर्गुणत्वेऽपि सृष्टिकर्तृत्वकृपाश्रयत्वादिकं वदन् स्वतः निर्गुणत्वं औपाधिकं च सगुणत्वं अभिप्रैति। किञ्चायं चिन्तामणिकारः दीपालोकः तमसो विवर्तने यथा सहायान्तरं नापेक्षते, तथा ज्ञानं मिथ्याज्ञाननिवर्तने सहायान्तरं नापेक्षते इति ब्रुवन् ज्ञानकर्मसमुच्चयवादमपि विस्तरेण निराकरोति अनुमानचिन्तामणौ।

श्रीरघुनाथशिरोमणयः

नव्यतार्किकमूर्धन्यः श्रीरघुनाथशिरोमणिः स्वग्रन्थारम्भे, 'ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते। अखण्डानन्दबोधाय पूर्णाय परमात्मने'॥ इति मङ्गलपद्ये एव परमात्मनः अद्वैताभिमतं अखण्डानन्दबोधरूपत्वं स्वस्याप्यभिमतमिति आविष्करोति।

श्री गदाधरभट्टाचार्याः

विश्वविश्रुतवैदुष्याः श्रीगदाधरभट्टाचार्याः पूर्वोक्तपद्यस्य व्याख्याने ओमिति समस्तैः अकार - उकार - मकारैः सन्धिवशेन प्रणवभावमावहद्भिः, अव्ययतया लुप्तचतुर्थीकैः, प्रत्येकशक्त्युपस्थापितस्य वासुदेवादित्रयस्य अभेदेन परमात्मनो विशेषणत्वमत्राभिहितम्। अत्र जगतः पालनादिकर्तृत्वं न अकारादिपदार्थतावच्छेदकं उद्देश्यतावच्छेदकस्य परमपदार्थोत्कर्षस्यापि तद्रूपतया अन्वयानुपपत्तेः। अपि तु विग्रहविषेवत्वमेव। परमार्थतः पदार्थस्य एकत्वेऽपि पदार्थतावच्छेदकानां नारायणादिशरीराणां भेदः द्वन्द्वस्य साधुतामुपपादयति। अखण्डेति - अत्र नित्यसुखात्मकायेति यद्यपि वेदान्तिनामेव शोभनम् तथापि ग्रन्थकृता नित्यसुखाभिव्यक्तिः मुक्तिः इति अङ्गीकृतत्वात् न दोषः इति स्पष्टमेव आनन्दरूपत्वं परमात्मनः अभाषन्त।

श्रीप्रशस्तपादाचार्याः

वैशेषिकसूत्रभाष्यकारः प्रशस्तपादाचार्यः वेदान्तसम्मतं मोक्षस्वरूपं, 'रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्तते । तदा निरोधात् निर्बीजस्यात्मनः शरीरादिनिवृत्तिः । पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवत् उपशमः मोक्षः' इति स्वभाष्ये प्रत्यपादयत् ।

श्रीकणादमहर्षयः

वैशेषिकतन्त्रप्रवर्तकः महर्षिः कणादोऽपि निरवयवयोः द्वयोः परमाण्वोः संयोगेन द्व्यणुकोत्पत्तिं ब्रुवन् जगतः अतात्त्विकत्वं ब्रवीति । तथाहि - अव्याप्यवृत्तिः संयोगः इति वैशेषिकानां मतम् । निरवयवयोः अव्याप्यवृत्तिसंयोगः न सम्भवति । यदि तु परमाणुद्वयसंयोगस्य व्याप्यवृत्तत्वं तदा द्व्यणुकस्य प्रथिमा नोपपद्यते । परमाणुषु कल्पिताः प्रदेशाः स्युरिति चेत्, तर्हि द्व्यणुकादेरपि कल्पितत्वापत्तिः । सोऽयं अद्वैतमतप्रवेशः । तदुक्तम्—"कणादः पारिमाण्डल्यसंयोगात् द्व्यणुकक्रमात् जगदुत्प्रेक्षयन् मायावादसादरमानसः" इति ।

XVII भगवत्पादः श्रीपरमेश्वर एव, तत्सूक्तिः साक्षाच्छ्रुतिरेव

अन्ते चाहं प्रियवाचकेभ्यः सहृदयेभ्यः सश्रद्धमवधेयं इदं निवेदये । शारीरके देवताधिकरणे भगवत्पादाः 'ऋषीणां व्यासादीनां सामर्थ्यं न अस्मदीयेन सामर्थ्येन उपमातुं युक्तमिति अस्मानुपदिशन्ति । तत्सूक्तिसारग्राहिभिः अस्माभिरपि भगवत्पादानां निर्मलं निरुपमं पाण्डित्यं न अस्मदीयेन पाण्डित्येन उपमातुं युक्तम् । परिमिताक्षरसूत्रनिगूढार्थं आशयादिप्रकाशकविस्तृतभाष्यप्रणयनं यावद्विज्ञानं अपेक्ष्येत तावद्विज्ञानं भाष्यव्याख्याप्रणयने नापेक्ष्येत इति सुबोधमेतत् । तस्मात् भाष्यव्याख्यामिषेण भाष्यदूषणं न श्रेयस्करमिति सुदृढो मे अभिप्रायः । अत एव भगवत्पादशिष्याः श्रीपद्मपदाचार्याः पञ्चपादिकायां भाष्यव्याख्यायां, 'तद्ब्रह्मविदमेकपुण्डरीकस्य भगवतो भाष्यकारस्य मतं आगमयितव्यम्' इति भगवत्पादसूक्तिं वेदतुल्यामुपादिशन् ।

अद्वैतसिद्धिकाराः श्रीमधुसूदनसरस्वत्यः, गौडब्रह्मानन्दसरस्वतीभिः, 'मधुसूदनभारत्याः पारं वेत्ति सरस्वती । वेत्ति पारं सरस्वत्याः मधुसूदनभारती ।' इत्युपश्लोकितविज्ञाना भवन्ति । ते महान्तः भगवद्गीतायाः भगवत्पादीयं भाष्यं संक्षिप्तं मिताक्षरं मत्वा अनेकगूढार्थसम्पूर्णां विस्तृतां गूढार्थदीपिकानाम्नीं व्याख्यां व्यरचयन् । गीतायां षष्ठाध्याये १४ तमे पद्ये मच्चित्तः मत्परमः इति पदद्वयस्य भाष्यव्याख्यानं मिताक्षरं संक्षिप्तमपि विवक्षितार्थनिरूपणसमर्थं विलोक्य स्वव्याख्यापेक्षया भाष्यकृद्व्याख्यानं रमणीयं पश्यन्तः

स्वस्य भाष्यकृत्साम्यं नास्तीति अस्मानपि बोधयितुं तत्रैव, 'व्याख्यातृत्वेपि मे नास्ति भाष्यकारेण तुल्यता । गुञ्जायाः किं नु हेम्नैकतुलारोहेऽपि तुल्यता ॥' इत्यलिखन् ।

श्रीमदप्पय्यदीक्षितेन्द्राः मीमांसाप्रभृतिषु सकलशास्त्रेषु स्वतन्त्रप्रज्ञाः, यानधिकृत्य मीमांसाग्रन्थकारः खण्डदेवोपि 'तदुक्तम् मीमांसकमूर्धन्येन विधिरसायनकृता' इति मीमांसाकौस्तुभे ब्रुवन् दीक्षितेन्द्राणां अनितरसाधारणं पाण्डित्यं बहुमानयति । दीक्षितेन्द्राणां भगवत्पादेषु परमेश्वरे इव अचञ्चला भक्तिः । भगवत्पादसूक्तीनां वेदतुल्यत्वेन उपादेयत्वमिति श्रद्धा च दरीदृश्यते । अत एव, 'प्रामादिकं सम्पातायातं पाठं भगवत्पादाः न लिखन्ति' इति स्वभक्तिं दर्शयन्ति न्यायरक्षामणौ वैश्वानराधिकरणे । अत एव इन्द्रियाधिकरणे (२ - ४ - २७) भामतीकारेण भाष्यव्याख्यानं दूषयित्वा वृत्तिकारव्याख्या निर्दुष्टेति वर्णिता । दीक्षितेन्द्राः परिमले वृत्तिकृद्व्याख्यानं दुष्टमिति निरूप्य भाष्यकृद्व्याख्यानमेव समञ्जसं साधीयः इति साटोपं स्थापयन्ति । 'अशुद्धमिति चेन्न, शब्दात्' इत्यधिकरणे मीमांसकाभिमतं, 'न हिंस्यात्' इति निषेधस्य पुरुषार्थहिंसापरत्वं उल्लङ्घ्य क्रत्वर्थहिंसायाः उत्सर्गापवादन्यायविषयत्वं भाष्यकारैरभिहितम् । परिमलकारैस्तु मीमांसकमतमेव पृष्ठतः कृत्वा भाष्याभिमतः उत्सर्गापवादन्याय एव अत्र प्रसाध्यते । एवं 'वेधाद्यर्थभेदात्' इत्यत्र बृहस्पतिसवस्य वाजपेयाङ्गस्य कर्मान्तरत्वमिति मीमांसकाभिप्राये स्थिते भाष्यकारैः मीमांसामुद्रां उल्लङ्घ्य वाजपेयसन्निधिपठितस्य बृहस्पतिसवस्य प्रसिद्धबृहस्पतिसवाभिन्नत्वं उक्तम् । तत्रापि परिमलकारैः भाष्यसमर्थनमेव सम्यक् कृतम् । मीमांसकव्यवस्था च दूरीकृता । तदेवं श्रीपद्मपाद - श्रीमदप्पय्यदीक्षितेन्द्र - श्रीमन्मधुसूदनसरस्वतीनां भगवत्पादेषु यादृशी भक्तिः तत्सूक्तिषु यादृशी श्रद्धा च तथाविधा भक्तिः श्रद्धा च भगवत्पादेषु तत्सूक्तिषु च सर्वैरस्माभिरनसूयुभिःकर्तव्येति सर्वानेव प्रियवाचकान् अभ्यर्थये ।

तन्न्यायसूत्रं भगवत्पदैस्तु सर्वात्मनैवाभिहितं प्रमाणम् ।
सर्वागमान्तोदितमेव तत्त्वज्ञानं महर्षेरपि गौतमस्य ॥
मात्सर्यमुत्सार्य वचो मदीयं विमृश्य सन्तः कथयन्तु कामम् ।
दोषं गुणं वा यदि युक्तियुक्तं तं सप्रमोदं शिरसा वहामि ॥
पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरत् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥

इति महाकविसूक्तिं अविस्मरद्भिः विमत्सरैः विद्वद्भिः इदं विलोकनीयम् ।

XVIII भगवत्पादप्रतिष्ठापिते अद्वैतदर्शने प्रस्थान भेदः

अद्वैतदर्शने **प्रस्थानत्रयं, प्रस्थानद्वयं** इति वृद्धव्यवहारोऽस्ति। उपनिषदः, भगवद्गीताः, ब्रह्मसूत्राणि चेति त्रयं **प्रस्थानत्रय**मिति व्यपदिश्यते। नानाविधाभिः अनेकाभिः आख्यायिकाभिः साक्षात्परम्परया च ज्ञानोपकारक-श्रौतस्मार्तधर्मोपासनोपदेशैः सह ब्रह्मविद्या उपदिश्यते इति इयं उपनिषद्भिः समाहृता सरणिः। गीतायां तत्त्वबुभुत्सवे शिष्याय अर्जुनाय गुरुणा वेदविदा वासुदेवेन वादकथामालम्ब्य ब्रह्मविद्या उपदिश्यते। गुरुशिष्यसंवादरूप - वादकथापद्धतिः गीतया अवलम्बिता। वेदान्तवाक्यानि विचार्य न्यायैः अर्थनिर्धारणपूर्वं ब्रह्मसूत्रैः ब्रह्म उपदिश्यते। न्यायैः वेदान्तार्थनिर्धारणपुरस्सरं ब्रह्मप्रतिपादनरूपा ब्रह्मसूत्राणां शैली। त्रिष्वपि उपनिषद्गीताब्रह्मसूत्रप्रस्थानेषु तत्त्वप्रतिपादनप्रकारभेद एव, न तत्त्वभेदः। एतत्त्रितयमेव अद्वैतदर्शनस्य परमं प्रमाणम्।

प्रस्थानद्वयं तु विवरणप्रस्थानं भामतीप्रस्थानं इति प्रसिद्धम्। एतदुभयमपि भगवत्पादभाष्य-मूलकमेव। व्याससूत्रं भगवत्पादीयं भाष्यं भगवत्पादशिष्यपद्मपादप्रणीता भाष्यव्याख्या पञ्चपादिका तद्व्याख्यानं श्रीप्रकाशात्मयतिप्रणीतं विवरणम् तद्व्याख्यानं अखण्डानन्दमुनिकृतं तत्त्वदीपनम् इति इयं पञ्चग्रन्थी **विवरणप्रस्थान**मित्यभिधीयते। इदं तु प्रस्थानं न पूर्णम्, चतुस्सूत्र्यन्तमेव उपलभ्यते। पञ्चपादिकोक्तार्थप्रपञ्चनपरे विवरणे प्रकाशात्मश्रीचरणैः अद्वैतसिद्धान्तस्थापन मूलस्तम्भायमानाः नैके तत्त्वभूताः अंशाः प्रतिपादिताः। ते च अद्वैतसिद्ध्यादि वादग्रन्थेषु बहुषु प्रकरणेषु प्रमाणत्वेनोपन्यस्यन्ते, विचार्यन्ते च। प्रपञ्चो मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत् इति प्रसिद्धं मिथ्यात्वानुमानं अनेकैः प्रकरणैः विचार्यते। एवं सदसद्विलक्षणत्वं, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं, ज्ञाननिवर्त्यत्वं इति त्रीणि मिथ्यात्वलक्षणानि अज्ञानलक्षण - तत्प्रमाणादीनि पञ्चपादिकाविवरणोक्तानि वादग्रन्थेषु दरीदृश्यन्ते। तस्मात् अपूर्णमपि प्रस्थानमिदं अद्वैतसिद्धान्तस्य पौष्कल्यं पूर्णतां च सम्पादयति। अत एव **विवरण-प्रस्थान**मिति विद्वद्भिरुद्घुष्यते।

भामतीप्रस्थानं तु ब्रह्मसूत्रं, भगवत्पादभाष्यं, श्रीवाचस्पतिमिश्रप्रणीत भामती श्रीमदमलानन्दप्रणीत-कल्पतरुः, श्रीमदप्पय्यदीक्षितेन्द्रप्रणीत - परिमलः इतीयं पञ्चग्रन्थी **भामतीप्रस्थानमिति** वृद्धैः व्यपदिश्यते। इदं तु प्रस्थानं सम्पूर्णं वर्तते। चतुरध्यायीलक्षणं शारीरकमीमांसाशास्त्रं अनयैव पञ्चग्रन्थ्या व्याप्तमिति इदमेव प्रस्थानं वेदान्तशास्त्रमिति सबहुमानं श्रीगौडब्रह्मानन्दैः सिद्धान्तबिन्दुव्याख्यायां रत्नावल्यां अभाणि।

भामतीकाराः सावतरणं पदार्थवाक्यार्थतात्पर्यार्थवर्णनपूर्वं भाष्याशयं सम्यग्विशदयन्ति । आत्मनः स्वप्रकाशकत्वादेः सम्यङ्निरूपणेन सहृदयहृदयान् आवर्जयन्ति । शिष्यजनचित्तधारणोपकारक सङ्ग्रह-कारिकाः व्यरचयन्, अवश्यबोद्धव्यानि औपनिषदानि आख्यानानि गद्यकाव्यवत् अवर्णयन्, भामतीयं मिश्रैर्यौवने पत्नीमपि विस्मृत्य लिखितुमारब्धा वार्धक्ये समापिता । अत एव ग्रन्थस्य भामतीति पत्नीनाम कृतमिति केचनाहुः । आभोगकारस्तु चत्वारिंशता दिवसैः भामती कृतेति वदति । प्रस्थानयोरुभयोरपि ब्रह्मात्मैक्यसाक्षात्कारात् मोक्ष इति महातात्पर्यविषये नैव भेदः किन्तु अवान्तरतात्पर्यविषयेषु पूर्वोक्तज्ञानप्राप्त्युपायभूतेषु अंशेषु केषुचिदेव भवति । तदत्र किञ्चिदुदाह्रियते:—

विवरणं	भामती
(1) मायाशबलितं ब्रह्म जगत्कारणम्	(1) ब्रह्मैव केवलं जगत्कारणम् । माया तु सहकारिमात्रम् ।
(2) श्रवणादौ विधिः	(2) श्रवणादौ न विधिः
(3) अविद्याप्रतिबिम्बो जीवः । बिम्बभूतः ईश्वरः ।	(3) अन्तःकरणावच्छिन्नचैतन्यं जीवः । अनवच्छिन्नचैतन्यं ईश्वरः ।
(4) अविद्याश्रयः ब्रह्म	(4) अविद्याश्रयः जीवः ।
(5) श्रुतिमात्रं प्रत्यक्षाद्बलीयः	(5) तात्पर्यवती श्रुतिः प्रत्यक्षाद्बलीयसी ।
(6) यज्ञादिकर्मणां वेदने उपयोगः ।	(6) यज्ञादिकर्मणां वेदनेच्छायां उपयोगः ।
(7) ब्रह्मसाक्षात्कारे महावाक्यमेव करणम् ।	(7) ब्रह्मसाक्षात्कारे मन एव करणम् ।
(8) शुद्धं ब्रह्म न वृत्तिविषयः	(8) शुद्धं ब्रह्म वृत्तिविषयः

द्वयोरपि प्रस्थानयोः परमं प्रामाण्यं सर्वतन्त्रस्वतन्त्राः श्रीविद्यारण्याचार्य - श्रीमदप्पय्यदीक्षितेन्द्र श्रीमधुसूदनसरस्वती श्रीब्रह्मानन्दसरस्वत्यः स्वग्रन्थेषु तत्र तत्र तुल्यमेव प्रतिपादयन्ति ।

XIX अल्लालसूरिः भामतीतिलककर्ता (14th Century AD.)

इदंप्रथमतया प्रकाश्यमानस्य भामतीतिलकस्य भामतीव्याख्यानस्य प्रणेता श्रीमानल्लालसूरिः । क्रिस्तोरनन्तरं चतुर्दश - शतककाले अयं बभूव इति अवगम्यते । अस्य ग्रन्थकर्तुः जन्मभूमिः

निवासस्थानं च कोटिकलाग्रामः । अस्य माता नागमाम्बानाम्नी, पिता त्रिविक्रमाचार्यः । विद्यागुरवः अनन्तार्याः, प्रज्ञानारण्याः चित्सुखेत्यपराभिधानाः । ग्रन्थकर्तुः इष्टदेवः सीतापती रामचन्द्रः । व्यासाश्रम - अपरनामधेयं कल्पतरुकारमनुसृत्यैव अयं स्वव्याख्यां व्यरचयत् । कल्पतरुकारः कल्पतरौ तृतीयाध्यायप्रारम्भे व्यासाश्रम इति आत्मानं पद्येनैकेन अवर्णयत् । पूर्वोक्तग्रन्थकृद्वृत्तान्ते प्रमाणभूताः एतद्ग्रन्थगताः श्लोकाः एव । ते च अत्र लिख्यन्ते:-

व्याचष्ट अल्लालनामैवं नागमाम्बासुतः सुधीः ।
भामत्याः प्रथमेऽध्याये द्वितीयं पादमादरात् ॥
वेदान्तोदधिचन्द्राय प्रज्ञानारण्ययोगिने ॥ (१ - ३ - १)
इति श्रीमदनन्तार्यशिष्येण अल्लालसूरिणा ।
तृतीयो विवृतः पादः भामत्याः लक्षणेऽग्रिमे ॥
इति कोटिकलाग्रामवासिनाल्लालसूरिणा ।
व्यभाजि प्रथमेऽध्याये भामत्याः चरणोऽन्तिमः ॥
सीताप्राणेशपादाब्जभ्रमरोऽल्लालकोविदः ।
भामत्याः प्राणपादस्य ग्रन्थग्रन्थीनमोचयत् ॥

XX भामतीतिलकः

तिलकः भामतीवाक्यानि सुललितैः प्रसन्नैः शब्दैः सावतरणं पदार्थवाक्यार्थ-तात्पर्यवर्णनपुरस्सरं व्याख्याय भामत्याशयं सम्यगाविष्करोति । शङ्कास्थलेषु विकल्प्य कोटीः प्रदर्श्य तासां कोटीनां निरसन-प्रकारः अत्यन्तरुचिरो दृश्यते । तिलके चतुःसूत्र्यन्तभागे चतुर्विंशतिस्थलेषु भामतीपाठभेदः अल्लासूरिणा स्वीकृतः । अस्मिन् तिलकव्याख्याने भामतीप्रथमवाक्यव्याख्यानावसरे करटदन्ता वा इति दृष्टान्ते—' ननु तस्य दन्ता न सन्ति इति आश्रयशून्यं निदर्शनम्, सत्यं, करटस्य दन्तोचिताः प्रदेशविशेषाः विवक्षिताः इत्यदोषः इति ग्रन्थान्तरादृष्टौ दोषपरिहारौ इहाभिहितौ । एवं तिलके, ' अक्षपादेनापि मोक्षस्य नित्यसुखा-भिव्यक्तिमात्रत्वाभ्युपगमात् आनन्दं ब्रह्मणो रूपं, तच्च मोक्षेऽभिव्यज्यते इति श्रुतेः नैयायिकैः उदाह्रियमा-णत्वात् ' इति वदन् अल्लालसूरिः दुःखाभाव एव मोक्ष इति अक्षपादमतं इति पक्षं प्रतिचिक्षेप । विदुषां

व्युत्पित्सूनां अध्येतॄणां च यथावत् भामत्यर्थं बोद्धुं इयं अत्यन्तमुपकारिणी तिलकव्याख्या। इयं व्याख्या परमतनिराकरणे वा प्रासङ्गिकविचारे वा न प्रवर्तते। भामिनीं तिलक इव भामतीं तिलकः (व्याख्यानरूपः) समलङ्करोति। तदयं ग्रन्थः सर्वैः अध्यात्मविद्याकुतूहलीभिः अवश्यमवलोकयितव्यः।

XXI सम्पादकीयं निवेदनम्

नवसम्वत्सरेभ्यः प्रागहं केरलसर्वकलाशालायां संस्कृतविभागे विश्वविद्यालय अनुदान-आयोगाधिकृतानां (UGC) निर्देशानुसारं भामत्याः उपलभ्यमानव्याख्यानानां परस्परवैलक्षण्यनिरीक्षणपूर्वकं भामतीतिलकपरिशोधने प्रवृत्तोऽभवम्। नैकदेशस्थेषु अनेकेषु प्राच्यग्रन्थालयेषु विद्यमानाः तालपत्रमयीः काकदमयीश्च मातृकाः समालोक्य अशुद्धपाठान् परिहरन् शुद्धांश्च पाठान् स्वीकुर्वन् भामतीतिलकस्य प्रथमाध्यायान्तं भागं परिशोध्य विलिख्य मुद्रणयोग्यमकल्पयम्। अधुना श्रीकाञ्चीकामकोटिपीठाधीशानां जगद्गुरूणां श्रीजयेन्द्रसरस्वती श्रीचरणानामाज्ञानुसारं चतुःसूत्र्यन्तभागः मुद्राप्य प्रकाश्यते।

भामती - तिलक - मुद्रणावसरे मुद्रणायापेक्षितयोः मूलग्रन्थयोर्भाष्यभामत्योः अपेक्षितभागस्य सम्यङ्विलिख्य समर्पणेन, ग्रन्थस्य निर्दुष्टतासम्पिपादयिषया शोधमीयत्वेन प्रथममुद्रितानां पत्राणां पौनःपुन्येन परिशोधनेन तदा तदा सम्भवदेतदर्थकार्यकरणेन च बहूपकृतवते **श्रीमते वासन् रमणन्** महाशयाय, विवेकानन्दकलाशालासंस्कृतविभागे उपप्राध्यापकपदमलङ्कुर्वते, सर्वतोमुखीं श्रेयःपरम्परां सर्वेश्वरः प्रयच्छत्विति श्रीत्रिपुरसुन्दरीसमेत श्रीचन्द्रमौलीश्वरमेव प्रार्थये।

"रमणीव्रतम्" मुद्रणालये ग्रन्थमिमं सम्यङ् मुद्रितवते **श्रीमते वि. टि. राजन्** महाशयाय गुरुकृपया सर्वविधं श्रेयः भवत्विति सर्वेश्वरं प्रार्थये।

रक्ताक्ष-मिथुन-कृष्णै-
कादशी-भानुवारः
24-6-1984

इत्थम्,
आचार्यचरणकमलचञ्चरीकः
व. श. वै. गुरुस्वामिशास्त्री

भामतीतिलकः

विषयानुक्रमणी		पृष्ठसंख्या

॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

भामतीतिलकः

॥ श्रीमदल्लालसूरिविरचितः ॥

वन्दामहे चिदानन्दवपुषं रघुनन्दनम् ।
अद्वितीयस्य यस्यामी विवर्ता वियदादयः ॥ १ ॥

मुहुर्मुहुर्नमस्यामो महादेवपदास्पदम् ।
महीयो मोहिनीहारपरिहारविशारदम् ॥ २ ॥

चरणस्मरणाद्यस्य कर्तुमल्पोऽपि कल्पते ।
कार्यं पुरुषधुर्याणां नमामस्तं विनायकम् ॥ ३ ॥

यत्कृपालोकलेशाप्तिलुप्ताज्ञप्तितमोगुणः ।
मन्दोऽपि गुरुतां याति भारतीं तां भजामहे ॥ ४ ॥

विष्णवे व्यासरूपाय ब्रह्मसूत्रकृते नमः ।
महेशाय च तद्भाष्यकृते शङ्कररूपिणे ॥ ५ ॥

यद्ग्रन्थकवचयोगाद् पक्षो व्यासस्य विजयते जगति ।
विद्रुतविरोधिवर्गो वाचस्पतये नमस्तस्मै ॥ ६ ॥

अक्षुण्णायामरण्यान्यां भामत्यां वर्त्म यो व्यधात् ।
सुगमं प्रणमामस्तं व्यासाश्रममुनीश्वरम् ॥ ७ ॥

व्यक्तः सयत्नकृतः शुद्धः प्रथितार्जवस्सुमर्यादः ।
भामत्यास्तिलकोऽयं विशेषवित्प्रेक्षणीयोऽस्तु ॥ ८ ॥

नैव पदानां पदवीं विद्मो नैव प्रमेयपरिपाटीम् ।
सन्तः क्षान्तिविभूषाः साहसमेतत्क्षमन्तां नः ॥ ९ ॥

भामती

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोऽबवनयः ।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥

श्रीमच्छारीरकभाष्यव्याख्यानस्याभिमतस्य, अन्तरायशान्तिं प्रचयं चाशासानः शिष्टैरिष्टं शास्त्रप्रतिपाद्यदेवताप्रणामरूपमङ्गलमाचरन् विषयप्रयोजने शास्त्रस्य सूचयति—**अनिर्वाच्येति**। तद् ब्रह्म नमाम इति सम्बन्धः ।

तस्यासम्भवमाशङ्क्य कार्यद्वारेण संभावयति यद्वा सर्वतोऽनवच्छिन्नस्य ब्रह्मशब्दत्वात् तस्य वस्त्ववच्छेदपरिहाराय वियदादेस्तद्विवर्ततामाह—**विवर्ता यस्येति** ॥ यस्य एते विवर्ता इत्यन्वयः । के त इति तानाह—**वियदिति** । वियदादीनां सृष्टिक्रमेण द्वन्द्वः । विवर्ता मिथ्योपादेयानि । मिथ्यात्वहेतुं दृश्यत्व सूचयितुमेते इत्युक्तम् । अद्वितीयत्वेनासहायस्य कार्यायोगमाशङ्क्याह—**अविद्येति** । अनादिभावरूप, दण्डायमाना जीवोपाधिभूतैकाविद्या । द्वितीया पूर्वभ्रमवासना । तद् द्वयं सचिवः सहायो यस्येति विग्रहः । अत्र द्वितीयाविद्योक्तिः कार्यवैचित्र्याय । साधारणाविद्यया तदयोगात् । प्राप्तं तर्हि द्वैतमित्यत आह - **अनिर्वाच्येति** । द्वितीयेत्येतच्च न नियमार्थम् । अदृष्टादेरपीष्टत्वात् । कार्यस्य कर्तृनियमात् तेन द्वैतमाशङ्क्य कर्त्रपि ब्रह्मेत्याह—**प्रभवतः** । प्रभोः स्वतन्त्रस्य, कर्तुरिति यावत् । भूतानां ब्रह्मकर्तृकत्वेऽपि भौतिकानां कर्त्रा द्वैतमाशङ्क्य हिरण्यगर्भात्मनस्तस्यैव तत्रापि कर्तृत्वमाह—**यतश्चेति** । इदं विश्वं च यतोऽभवत् । न चात्र विचित्रता कार्याणां कर्तृभेदमावहति कर्तुः सर्वशक्तियोगादिति मत्वाह—**उच्चावचमिति** । चरमचरमित्युच्चावचस्योक्तिः । उपलभ्यमानं ब्रह्मकर्तृत्वादिसाधकं पृथिवीत्वादियोगमभिप्रेत्येदमित्युक्तम् । तदेव जगदुपादानत्वं कथयता जगत्कारणत्वं तटस्थलक्षणं सूचितम् । उपादानत्वं तु न लक्षणे विवक्षितमिति वक्ष्यामः । एवमज्ञानविपर्यासाभ्यां विषयतोक्ता । स्वरूपलक्षणं कथयन् प्रयोजनमाह —**अपरिमितेति** । सातिशयस्याप्रकाशमानस्यानित्यस्यासुखस्य परमपुरुषार्थत्वाभावाद्विशेषणानि । नमाम इत्येकस्मिन् पूजार्थेन बहुवचनेनाचार्यकृयोग्यमात्मानमाह ॥ १ ॥

निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि ।
स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः ॥ २ ॥
षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥ ३ ॥
मार्तण्डतिलकस्वामिमहागणपतीन्वयम् ।
विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः ॥ ४ ॥

ननु विश्वस्यैकः कर्ता कार्यान्तरव्यग्रस्य कार्यान्तरव्याघातात् क्रमेणास्य निर्माणे च युगशतेनापि सृष्टेरसमाप्तेरित्याशङ्क्य ये करादिव्यापारेण कुर्वते तेषामेष दोषः, इच्छामात्रेण सृजतस्तु नेत्याह— **निःश्वसितमिति** । न च वेदाः प्रागनुक्ताः विश्वान्तर्गतत्वात्, पृथगुक्तिस्तु निश्वसितश्रुत्युक्तशक्त्य-तिशयज्ञापनाय, भूतशब्दस्यातीताद्यर्थव्यावृत्त्यै पञ्चेति ग्रन्थकारेणोपयुक्तम् ॥ २ ॥

विशेषविज्ञानमिच्छन् सर्वविज्ञानाकरं वेदम्, "ईश्वरात् ज्ञानमन्विच्छे" दित्यागमसिद्धमहिमान महेश्वरं च प्रणमति—**षड्भिरिति** । वेदस्य *शिक्षादीनि षडङ्गानि । अव्ययाश्वादयः । शाश्वतत्वं प्रवाहरूपेणेति । भवस्य तु

'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥'
'ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥'

इति पुराणोक्तानि । उभये शाश्वतत्वं नित्यत्वं स्वापेक्षितप्रयोजनप्रदानसामर्थ्यमभिप्रेत्य विशेषणानि । ब्रह्मण एव सोपाधिरूपत्वादीश्वरस्य तन्नमस्कारस्य तदानन्तर्यम् ॥ ३ ॥

ततोऽर्वाचीनदेवतात्रयं नमस्यति—**मार्तण्डेति** । तिलकप्रियःस्वामी तिलकस्वामी स्कन्दः, सर्वसिद्धिविधायित्वं विश्ववन्द्यत्वे हेतुः, तदुक्तं याज्ञवल्क्येन—

आदित्यस्य सदा पूजां तिलकस्वामिनस्तथा ।
महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात् ॥ इति ॥ ४ ॥

---

* यद्यपि - क. ख. मातृकयोः "निगमादीनि" इत्येव पाठः उपलभ्यते तथापि तस्यानुपपन्नत्वात् "शिक्षादीनि" इति समुचितः पाठः स्वीकृतः

ब्रह्मसूत्रकृते *तुभ्यं वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥ ५ ॥
नत्वा विशुद्धविज्ञानं शंकरं करुणाकरम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥ ६ ॥
आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥ ७ ॥

देवताः प्रणम्य गुरुनमस्कारावसरे परमगुरुं प्रणमति—**ब्रह्मसूत्रकृतेति** । परमगुरुत्वपरं प्रथमविशेषणम् । वेधसे विधात्रे । सर्गसमर्थाय । अनेन वाङ्मयप्रपञ्चसृष्टिरस्याप्रयासेनेति सूचितम् । विधातृत्वे कारणं विज्ञानातिशयमाह—**ज्ञानशक्त्यवतारायेति** । स्वर्गपथादवतीर्णं रूपमवतारः ज्ञानशक्तिमानवतारो ज्ञानशक्त्यवतारः । हरेर्ज्ञानशक्त्यवतारायेति संबन्धः । सा च शक्तिर्निरतिशयेत्याह—**भगवत इति** । रामादयः हरेः क्रियाशक्त्यवताराः । अयं तु ज्ञानप्रधानोऽवतारः । यथाह पराशरः—

'द्वापरे द्वापरे विष्णुर्ज्ञानरूपी महामुने ।
वेदमेकं सुबहुधा कुरुते जगतो हितम् ॥

इति । स्वकृतौ तस्य दत्तावधानत्वाय तुभ्यमित्याभिमुख्यकरणम् ॥ ५ ॥'

क्रमप्राप्तपरमगुरुनमस्कारपूर्वकं ग्रन्थारम्भं प्रतिजानीते—**नत्वेति** । तस्य भाष्यक्रियाशक्तिमाह—**विशुद्धेति** । भाष्ये प्रवृत्तिरस्य लोकानुग्रहार्था । अतस्तदुक्तिःप्रमाणमूलेत्याह—**करुणाकरमिति** । भाष्यस्य व्याख्यानसाकाङ्क्षत्वमाह—**गम्भीरमिति** । महाभिप्रायम् । न च तद्रचनादोषादत्यन्तदुर्बोधाभिप्रायमित्याह—**प्रसन्नेति** । विभज्यते विविधं व्याख्यायते ॥ ६ ॥

औद्धत्यं परिहरति—**आचार्येति** । आचार्यकृतौ निवेशनं प्रवेशः । (**गुह्यं तत्त्वमिति न ग्राह्यम् । प्रवाहपात इत्युदाहरणात्**) आचार्यकृतिनिवेशनं कर्तृ अवधूतमप्यस्मदादीनां वचः पवित्रयति । बहूनां व्याख्यातृणामिह सावकाशत्वं सूचयति - अस्मदादीनामिति ॥ ७ ॥

---

* "तस्मै" इति कल्पतरुवर्तितः पाठः

अथ - यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः; यथा समनस्केन्द्रियसंनिकृष्टः स्फीतालोकमध्यवर्ती घटः, करटदन्ता वा, तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः। तथाहि - 'बृहत्वाद्बृंहणत्वाद्वात्मैव ब्रह्मेति गीयते', स चायमाकीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेन 'अहं' इत्यसंदिग्धा-

---

साधनचतुष्टयसंपत्त्यनन्तरं ब्रह्मज्ञानेच्छा भवतीति सूत्रवाक्यार्थः। आनन्तर्यादिः पदार्थः। तदुभयास्पर्शाद् युष्मदित्यादेरभाष्यत्वमाशङ्क्य ब्रह्मणो जिज्ञासार्हत्वमुपदिशता सूत्रकारेण विषयप्रयोजने सूचिते। ते चाध्याससिद्ध्यधीनसिद्धिनी। अतोऽध्यासमाक्षेपसमाधानाभ्यां साधयद्भाष्यं जिज्ञासासूत्रेण सङ्गतमेवेत्यभिप्रेत्यात्रतारयति—**अथेत्यादिना परिहरतीत्यन्तेन**। ग्रन्थारम्भार्थोऽथशब्दः। यच्चाप्रयोजनमित्यनुषङ्गः। असन्दिग्धत्वाप्रयोजनत्वयोः प्रत्येकमजिज्ञास्यत्वसाधकत्वात् वार्थो वा चकारः। निश्चितं निष्प्रयोजनमप्यज्ञा जिज्ञासन्ते। अतः **प्रेक्षावदिति**। प्रतिपत्तुमिच्छा प्रतिपित्सा। प्रतिपित्सेति वदन् ज्ञानेच्छैव जिज्ञासापदोक्ता न विचार इति सूचयति। **यथेति**। इन्द्रियसन्निकर्षे मनोऽनवधाने प्रकाशाभावे च न स्पष्टा दृष्टिरिति विशेषणानि। **करटदन्ता इति**। करटः काकः। ननु तस्य दन्ता न सन्तीति - आश्रयशून्यं निदर्शनम्। सत्यं, करटस्य दन्तोचिताः प्रदेशा विवक्षिता इत्यदोषः। तथेत्युपनीतयोः हेत्वोरनुभूयमानत्वमाह—**इदमिति**। अत्र प्रयोगौ—ब्रह्म प्रेक्षावत्प्रतिपित्सागोचरो न भवति, असन्दिग्धत्वात् तादृग्घटवत्। अप्रयोजनत्वात् करटदन्तोचितप्रदेशवत्। अनयोरप्रयोजकत्वमनाशङ्क्यमित्याह—**इति व्यापकेति**। प्रतिपित्सागोचरत्वव्यापके सन्दिग्धत्वसप्रयोजनत्वे, तद्विरुद्धौ तदभावौ, तयोरुपलब्धिः, नहि व्यापकं मास्तु, अस्तु च व्याप्यमिति शङ्का सम्भवतीत्यर्थः। हेत्वोरसिद्धिमाशङ्क्य तदुपपादनमिदंशब्दसूचितं प्रतिजानीते—**तथाहीति**। तदर्थं ब्रह्मशब्दार्थमाह—**बृहत्वादिति**। बृंहणत्वाद्देहादेर्वर्धयितृत्वादात्मा जीवः। **गीयते** तत्र तत्रोच्यते। न चान्यो ब्रह्मशब्दार्थः यो जिज्ञास्यत इत्याह—**एवेति**। उच्यतां ब्रह्मशब्देन जीवः। तावन्मात्रेण कथमसन्दिग्धत्वादिसिद्धिः इत्याशङ्क्य प्रथमहेतुं तावद्विशदयति—**स चेति**। सोऽनुभवसिद्धश्च। न केवलं ब्रह्मशब्देनोच्यत इत्यर्थः। अनुभूतेऽपि परोक्षे साक्षाच्चिकीर्षा सन्दिग्धे निश्चिकीर्षा विपर्यस्ते प्रमित्सा भवतीत्यत उक्तम्—**असन्दिग्धेत्यादि**। भावे निष्ठा ज्ञेया, संशयस्यैव निवार्यत्वात्। विपर्यस्तेऽपि मुखान्तरेण विपर्यस्ततत्त्वावधारणे तत्त्वबुभुत्सा भवति। तेनाविपर्यस्ततत्त्वग्रहणस्य न वृथात्वमाशङ्कनीयम्। कथं विपर्यासाद्यभावः, अत आह— **देहेत्यादि**। **विवेकेन** भेदेन। भेदकमाह—**इदंकारेति**। आत्मनो भेदकमाह—**अहमिति**। येषामेवं नानुभवः तेषां जिज्ञास्योऽस्तु, नेत्याह—

विपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञासास्पदम्। न हि जातु कश्चिदत्र संदिग्धेऽहं वा नाहं वेति। न च विपर्यस्यति नाहमेवेति। न च - अहं कृशः स्थूलो गच्छामीत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहालम्बनोऽयमहंकार इति - सांप्रतम्; तदालम्बनत्वे हि योऽहं बाल्ये पितराऽन्वभवं स एव स्थाविरे प्रणप्तॄननुभवामीति प्रतिसंधानं न भवेत्। न हि बालस्थविरयोः शरीरयोरस्ति मनागपि प्रत्यभिज्ञानगन्धो येनैकत्वमध्यवसीयेत। तस्माद्येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो भिन्नं यथा कुसुमेभ्यः सूत्रम्। तथा च बालादिशरीरेषु व्यावर्तमानेष्वपि

आकीटेति। अस्मदपेक्षया बुद्ध्यपकर्षतारतम्यावधिः कीटादयः। उत्कर्षतारतम्यावधिर्देवादयः तदुभयपर्यन्तम्। **प्राणभृन्मात्रस्य**। समस्तस्य प्राणिनः। न चास्मिन्ननुभवे विगानं युक्तमिति मत्वाह—**अहमिति**। स्वसाक्षिकानुभूतिरित्यर्थः। पूर्वमक्षरतः साध्यानिर्देशात् सिद्धे हेतौ सिध्येत्साध्यमित्याह—**इति नेति**। **इतिः** हेतौ, **आस्पदं** विषयः। कदाचित्कस्यचिदभावेऽप्यन्यदान्यस्य संशयविपर्ययौ भविष्यतः। अत आह—**नहीति**। **अत्र,** आत्मनि अहं वेत्यादिः निषेध्यसंशयविपर्ययोरभिनयः। नन्वात्मन्यभावसंशयविपर्ययाभावेऽपि देहाभेदविपर्ययो दृश्यते। एवं संशयोऽपि संभवतीत्याशङ्क्याह—**नचेति**। **देहालम्बनः** देहविषयः। रजतालम्बनज्ञानस्य शुक्त्यालम्बनत्व इवात्मालम्बनस्याहंप्रत्ययस्य देहालम्बनत्वे विपर्ययत्वमित्यर्थः। देहोऽहमिति न प्रतीतिरत आह—**देहेति**। **तदालम्बनत्वे हीति**। हिर्हेतौ। **प्रणप्तॄन्** पौत्रपुत्रान्। **प्रतिसन्धानं** प्रत्यभिज्ञा। यद्यात्मा देहाद्भेदेन न ज्ञायते बाल्यस्थाविरकालस्थत्वेन न प्रत्यभिज्ञायेत देहवदिति प्रसङ्गः। दृष्टान्तस्य शून्यत्वाद्व्याप्तिशैथिल्यमाशङ्क्याह—**न हीति**। न **प्रत्यभिज्ञानगन्धः**। तद्योग्यत्वम्। सोऽयमित्यत्रैव विरुद्धविशेषणत्यागात्तद्योग्यत्वमत आह—**मनागिति**। विरुद्धयोः परिमाणयोर्दुस्त्यजत्वादित्यर्थः। विवक्षितं बाल्यशरीरपरिमाणं, विवक्षितस्थविरशरीरावृत्ति, तत्परिमाणनिष्ठाभावप्रतियोगिजातिमत्परिमाणत्वात्, घटपरिमाणवदित्यादिभेदप्रयोगो द्रष्टव्यः। महत्त्व-दीर्घत्व- भेदवादे परिमाणस्थाने महत्त्वपदं वाच्यम्। मास्तु प्रत्यभिज्ञायोग्यता किमतः? अत आह—**येनेति**। येन प्रत्यभिज्ञायोग्यत्वेन एकत्वं देहाभेदेन ज्ञातस्याप्यात्मनः उक्तप्रत्यभिज्ञयावसीयेतेत्यर्थः। उपसंहारव्याजेन प्रसङ्गविपर्ययमाह—**तस्मादिति**। **व्यावर्तमानेषु** परस्परसमयास्पर्शिषु। **अनुवर्तते** तान् समयान् स्पृशति। **भिन्नं** पृथक् ज्ञातम्। परस्परं व्यावर्तमानेषु। **भिद्यते** पृथग् ज्ञायते। एतदुक्तं भवति, अपरोक्षावनुवृत्तव्यावृत्तौ पृथगेव प्रथेते इति चैत्रात्मना चैत्रेण तच्छरीरं भेदेनानुभूयते अतदीयसमयस्थलेन, तेनानुभूयमानत्वात्, तादृग्घटवदित्यनुमानरीतिः। न च यथाश्रुतभेदमात्रानुमानमिति भ्रमितव्यम्। अध्यासवादिनोऽपीष्टत्वात्। अत

परस्परमहंकारास्पदमनुवर्तमानं तेभ्यो भिद्यते। अपि च स्वप्नान्ते दिव्यं शरीरभेदमास्थाय तदुचितान्भोगान्भुञ्जान एव प्रतिबुद्धो मनुष्यशरीरमात्मानं पश्यन् नाहं देवो मनुष्य एवेति देवशरीरे बाध्यमानेऽप्यहमास्पदमबाध्यमानं शरीराद्भिन्नं प्रतिपद्यते। अपि च योगव्याघ्रः शरीरभेदेऽप्यात्मानमभिन्नमनुभवतीति नाहंकारालम्बनं देहः। अत एव नेन्द्रियाण्यप्यस्यालम्बनम्; इन्द्रियभेदेऽपि योऽहमद्राक्षं स एवैतर्हि स्पृशामीत्यहमालम्बनस्य प्रत्यभिज्ञानात्। विषयेभ्यस्त्वस्य विवेकः स्थवीयानेव। बुद्धिमनसोश्च करणयोरहमिति कर्तृप्रतिभासप्रख्यानालम्बनत्वायोगः, कृशोऽहमन्धोऽहमित्यादयश्च प्रयोगा असत्यप्यारोपे कथञ्चिन्मञ्चाः क्रोशन्तीत्यादिवदौपचारिका इति युक्तमुत्पश्यामः। तस्मादिदंकारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः;

एवोत्तरग्रन्थे भिन्नं प्रतिपद्यत इति वक्ष्यति। नन्वेकस्य क्रमेणाविरुद्धं परिमाणद्वयमिति मन्यमाना लौकिका व्यावृत्तिं शरीरस्य न जानन्ति अत एवानुवृत्तादप्यात्मनो भेदं न विदन्ति प्रत्यभिजानन्ति चाप्रत्यूहम्। अत आह—**अपि चेति**। अन्तशब्दस्स्वरूपवाची, **मनुष्यशरीरं** मानुषदेहवन्तम्। **देवः** देवदेहभाक्। **मनुष्यः** मनुष्यशरीरवान्। **अहमास्पदम्** अहङ्कारविषयम्। **अबाध्यमानमिति** बाध्यमानाद्भेदकमुक्तम्। प्रथमजागरप्रत्ययस्य सन्निहितस्वप्नबाधकत्वात् सन्निधानाय तदुचितानित्यादि। अयमर्थः। विजातीययोर्देहयोरैक्यमशक्यशङ्कमिति। स्वप्ने देवदेहो नास्ति, यस्य बाध्यस्याबाध्याद्भेदबुद्धिः किन्तु देवदेहभ्रम एव बाध्यते। इष्यते च देवदेहाद् भेदबुद्धिरात्मनो मनुष्यारोपजुषः। नैतावता मनुष्यदेहाद् भेदबुद्धिरात्मनो धीः, बाधेऽपि मनुष्य इति न देहसंबन्धबाधः, किन्तु तादात्म्यस्येति, अत आह—**अपि चेति**। **योगव्याघ्रः** औषधाद्युपायलब्ध व्याघ्रदेहः, योगः उपायः। उक्तं विपर्यासाभावं निगमयति **इतीति**। अत एव भेदवेदनान्न संशयोऽपीति भावः। तथापि इन्द्रियालम्बनोऽहंकारो भविष्यति बाल्यादिभेदाभावात्। अहं बधिर इत्यादि सामानाधिकरण्याच्चेत्यत आह—**अत एवेति**। वैषम्यस्योक्तत्वादत इत्ययुक्तमाशङ्क्य प्रत्यभिज्ञानुपपत्तिमात्रमतश्शब्दपरामृष्टमित्याह—**इन्द्रियेति**। विषयाभेदस्तु न शङ्क्यः। देहादाविव धर्मसामानाधिकरण्याभावादित्याह—**विषयेभ्य इति**। **स्थवीयान्** स्थूलतरः स्फुट इत्यर्थः। ननु मनोबुद्ध्यादिपदास्पदमन्तःकरणमहमालम्बनं भविष्यति एकत्वात् प्रत्यभिज्ञोपपत्तेः बुध्ये इति धर्मसामानाधिकरण्याच्चेत्यत आह—**बुद्धिमनसोरिति**। अवस्थाभेदमात्रेण द्विवचनम्। यद्यपि बुद्धिर्विषयेभ्यः प्रागुपन्यस्ता तथाप्यस्याः शङ्काया विषयादिसर्ववैषम्यगर्भत्वादत्र विषयानन्तर्यम्। यदि न देहाद्यभेदबुद्धिः कथं तर्हि सामानाधिकरण्यव्यपदेश इत्यत आह—**कृशोऽहमिति**। **अभेदे** अभेदबुद्धौ। अतिभूयसां

स्फुटतराहमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति सिद्धम् । अप्रयोजनत्वाच्च । तथाहि— संसारनिवृत्तिरपवर्ग इह प्रयोजनं विवक्षितम् । संसारश्चात्मयाथात्म्याननुभवनिमित्त आत्मयाथात्म्यज्ञानेन निवर्तनीयः । स चेदयमनादिरनादिनात्मज्ञानेन सहानुवर्तते कुतोऽस्य निवृत्तिः; अविरोधात् । कुतश्चात्मयाथात्म्याननुभवः; नह्यहमित्यनुभवादन्यदात्मयाथात्म्यज्ञानमस्ति । न चाहमिति सार्वजनीनस्फुटतरानुभवसमर्थित आत्मा देहेन्द्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैरप्यन्यथयितुम्; अनुभवविरोधात् । न ह्यागमाः सहस्रमपि घटं पटयितुमीशते । तस्मादनुभवविरोधादुपचरितार्था एवोपनिषद इति युक्तमुत्पश्याम इत्याशयवानाशङ्क्य

कथमन्यथानयनम् । अत आह—**युक्तमिति** । प्रबले विरोधिनि प्रभूता अप्यन्यथा नेया इत्यर्थः । एवं निरूपिते हेतावाद्यानुमानं सिद्धमित्युपसंहरति—**तस्मादिति** । द्वितीयं हेतुं विवरीतुमुपक्षिपति—**अप्रयोजनत्वाच्च** । न जिज्ञास्य इति संबन्धः । विवरणं प्रतिजानीते—**तथाहीति** । प्रयोजनं तदभावनिरूपणायानुवदति—**संसारेति** । अपवर्गश्चेत्प्रयोजनं कथमप्रयोजनत्वोक्तिरत आह—**विवक्षितं** । त्वयेति शेषः । तर्हि प्रतिवाद्यसिद्धो हेतुरित्याशङ्कां निवर्तयिष्यन् तदिष्टमर्थान्तरमाह—**संसारश्चेति** । **निवर्तनीयः** विवक्षित इत्यनुषङ्गः । किमतो यद्येवमत आह—**स चेदिति** । सः संसारः । **आत्मज्ञानेन,** अहं प्रत्ययेन आत्मज्ञानेन । अस्य निवृत्तिरिति कुत इत्यर्थः । तत्र हेतुः—**अविरोधादिति** । तत्र हेतुः सहानुवृत्तिः, तत्र हेतुरुभयानादित्वम् । तच्च प्रवाहरूपेण । मयेव त्वयापि तयोः सहानुवृत्तिरनुभवबलादङ्गीकार्या । एवं चेत् कथं तव तयोर्विरोधसिद्धिरिति चेदर्थः । अहमिति स्फुटमनुभूयमाने तत्साहचर्य इत्यर्थः । अननुभवनिमित्तकस्य कथमनुभवसाहचर्यम्, अत आह—**कुतश्चेति** । अनुभूतेरनुभवसिद्धत्वादननुभव एव त्याज्यः इत्यर्थः । नन्वहमित्यात्मविज्ञानं साहचर्यादबाधकमस्तु यस्त्वसहचारी तद्बोधः स निवर्तयिष्यति अत आह – **नहीति** । निपुणनिरूपणेऽप्यदर्शनात् इत्यर्थः । मास्तु लौकिकानामन्यदात्मयाथात्म्यविज्ञानम्, उपनिषत्परामर्शिनां तु भविष्यति । उपनिषद्भिरात्मनो लोकावलोकितरूपविपरीतनिरूपणादित्यत आह—**न चाहमिति** । **अन्यथयितुम्** अन्यथा निरूपयितुम् । **अनुभवविरोधात्** । प्रत्यक्षबाधात् प्रत्यक्षस्य प्राबल्यात् । **सार्वजनीनेत्यादि** । **सार्वजनीनेति** संवादत्वस्योक्तिः । **स्फुटतरे**त्यसन्दिग्धताविपर्यस्तत्वयोः । **अनुभवेति** प्रत्यक्षत्वस्य । **व्यतिरिक्तः** व्यतिरेकमात्रशाली, समर्थित इत्यन्वयः । ननु उपनिषदामपि बहुतरोपनिषदन्तरसंवादोऽस्तीत्यत आह—**नहीति** । **पटयितुम्** पटत्वेन बोधयितुम् । प्रत्यक्षविरोधे तद्बाहुल्यमकिञ्चित्करमित्यर्थः । उपनिषदां तर्हि प्राप्तमप्रामाण्यम् । तच्चायुक्तम् । अध्ययनविधिविरोधात् । अत आह—**तस्मादिति** । एवकारोऽप्रामाण्यव्यावृत्त्यर्थः । अपौरुषेयत्वान्निर्दोषतोपनिषदां, सम्भावितदोषं प्रत्यक्षमेवान्यथाक्रियताम् । अत आह—**इति युक्तमिति** ।

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयो-

परिहरति - युष्मदस्मत्प्रत्ययगोचरयोरिति । अत्र च युष्मदस्मदित्यादिर्मिथ्या भवितुं युक्तमित्यन्तः शङ्काग्रन्थः । तथापीत्यादिः परिहारग्रन्थः । तथापीत्यभिसंबन्धाच्छ-ङ्कायां यद्यपीति पठितव्यम् । इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्ये युष्मद्ग्रहणमत्यन्तभेदो-पलक्षणार्थम् । यथा ह्यहंकारप्रतियोगी त्वंकारो नैवमिदंकारः । 'एते वयमिमे वयमास्महे' इति बहुलं प्रयोगदर्शनादिति । चित्स्वभाव आत्मा विषयी, जडस्वभावा बुद्धीन्द्रियदेहविषया

अपौरुषेयेऽपि "आदित्यो यूपः" इत्यादावुक्तविधप्रत्यक्षविरोधादुपचारदर्शनादित्यर्थः । **आशयवानिति** । अस्य आशङ्क्येत्यनेनैव संबन्धः न परिहरतीत्यनेन । अस्याशयस्य परिहारविरोधित्वात्, आशङ्क्य परिहरतीत्युक्ते बहिराशङ्क्य ग्रन्थेनानेन परिहरतीति प्रतीयेत । तदयुक्तम् । युष्मदित्यादौ परिहाराप्रतीतेरित्याशङ्क्य शङ्कैषा मानसी न भवति । किन्तु ग्रान्थिकीत्याह---**अत्र चेति** । चकारोऽयमेत-च्छङ्काच्छेदी । भाष्यस्थ-इतिशब्दोऽत्र लेखकैर्न लिखितः । इति सुतरामितरेतरभावानुपपत्तिरित्यन्वयः पर्यवसितः । ततः शङ्कायां वाक्यद्वयम् । एवं चादिग्रहणे द्वितीयस्य, अन्तग्रहणे प्रथमस्याग्रहणमिति भ्रमव्युदासायैतदादिरेतदन्त इति ग्रहणम् । तदन्तत्वे ज्ञापकमाह—**तथापीति** । समनन्तरस्य परिहार-त्वात् तदन्तत्वं ज्ञायत इत्यर्थः । शङ्का चेदियं युक्तमिति न युक्तमत आह—**शङ्कायामिति** । शङ्कात्वेनास्माभिरुक्ते ग्रन्थे । किं पाठप्रयासेनेत्यत आह—**तथापीत्यभिसम्बन्धादिति** । उत्तरग्रन्थस्थ-स्तथापियोगः पूर्वं यद्यपियोगमाक्षिपतीत्यर्थः । अचेतने देहादौ चेतनवाचियुष्मच्छब्दायोगात् तत्स्थाने इदमादिपदं प्रयोज्यमित्यत आह—**इदमिति** । इदंग्रहणं तत्पर्यायोपलक्षकम् । अस्यैव वक्तव्यत्वे नियामकाभा-वात् । अत एव वक्ष्यति—**एते वयमिति** । **उपलक्षणार्थं** ज्ञापनार्थम् । नन्विदमादिग्रहणेऽपि प्रत्यक्पराग्भावेन भेदो भात्येव, अत आह—**यथाहीति** । हिः प्रसिद्धे हेतौ वा, हेतोरसिद्धिमुद्धरति **एत इति** । आस्महे इति क्रियापदं वाक्यत्वाय । यूयं वयमित्यपि प्रयोगोऽस्त्येव, औपचारिकः स इति चेत् तुल्यः प्रकृतेऽपीत्यत आह—**बहुलं इति** । सान्द्रं नीरन्ध्रं भेदावभासरहितमिति यावत् । यूयं वयमिति प्रयुञ्जानो हि स्वतो भिन्नं युष्मदर्थं पुरतः स्फुरन्तमवयन्नेव प्रयुङ्क्त इति तत्र भेदतिरोधानम् आत्मनि । केवले पुनरेतदिदं पदे प्रयुञ्जानस्तदर्थमन्यं नावैति । तिरोधीयते भेदस्तत्रेति भावः । प्रयोगसंख्याबाहुल्यं तूभयत्राविशिष्टमिति नोत्तरम् । अक्षरव्याख्यानोपक्रमाय तद्विलक्षणसमाप्तिमितिशब्देन सूचयति । विषयविषयिपदयोर्घटादिष्वर्थेष्विन्द्रियेषु च प्रसिद्धेरसाङ्गत्यमाशङ्क्य पदार्थौ कथयति **चिदिति** । चित्स्व-भावत्वं विषयित्वे हेतुः जडस्वभावत्वं विषयत्वे । यदवोचाम बुद्धिमनसोरित्यत्रान्तःकरणमेकमेवेति तदितः

रितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुप-

---

विषयाः। एते हि चिदात्मानं विसिन्वन्ति अवबध्नन्ति, स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत्। परस्परानध्यासहेतावत्यन्तवैलक्षण्ये दृष्टान्तः तमःप्रकाशवदिति। नहि जातु कश्चित्समुदाचरद्वृत्तिनी प्रकाशतमसी परस्परात्मतया प्रतिपत्तुमर्हति, तदिदमुक्तम् - इतरेतरभावानुपपत्ताविति। इतरेतरभाव इतरेतरत्वम्, तादात्म्यमिति यावत्, तस्यानुपपत्ताविति। स्यादेतत्-माभूद्धर्मिणोः परस्परभावः; तद्धर्माणां तु जाड्यचैतन्यानित्यत्वनित्यत्वादीनामितरेतराध्यासो

समुत्थितम्, अत्र मनसोऽनुपादानात्। ननु विषयाविषयेषु कथं विषयशब्दः अत्राह—**एते हीति**। सिन्वन्तीति षिञो बन्धनकर्मणो रूपमिति ज्ञापयति—**अवबध्नन्तीति**। बन्धोऽपि न मुख्यः, अतो लाक्षणिकमाह **स्वेनेति**। चित् खलु विषयोपरक्ता प्रतीयते इन्द्रियज्ञानमर्थज्ञानमिति। विवक्षितोऽयमर्थः न तु वाच्य इति ज्ञापनाय यावद्ग्रहणम्। आत्मानात्मनोस्तेजस्तमसोरिव वध्यघातकभावरूपविरोधाभावाद्-दृष्टान्तायोगमाशङ्क्य वैलक्षण्यमिह विरोधो विवक्षित इत्याह—[1]**अत्यन्त वैलक्षण्य इति**। अल्पवैलक्षण्येऽपि इतरेतरात्मता नास्त्येव किं! तदात्यन्तिकत्वेनेत्यत आह—**परस्परेति**। इतरेतरभावानुपपत्तिर्हि नेतरेतरात्मत्वस्यानुपपत्तिः किन्त्वितरेतराध्यासस्य स च नाल्पवैलक्षण्येन विरुध्यते। ईषद्विषमेषु परस्पराध्यासदर्शनादित्यर्थः।

नन्वातपक्लान्तिभ्रान्तलोचनस्य पिपासातिशयशालिनः, तेजसि तमोबुद्धिरस्तीत्यत आह—**न हीति**। समुदाचरद्वृत्तिनी समुदाचरन्त्यौ स्वेन रूपेण प्रकाशमाने वृत्ती स्वभावौ ययोस्ते तथा, आतपक्लान्तस्य तेजोनवभासादध्यासस्तामसः पुरः प्रदेशे, न तु स्फुरति तेजसि तमोबुद्धिरित्यर्थः। एवं च विरुद्धस्वभावयोरित्यनेन उपलभ्यमानात्यन्तविलक्षणस्वभावत्वं विवक्षितमित्युक्तम्। यद्यपि भाष्येऽध्यासो न स्फुरति तथापि स एव विवक्षित इति वाच्यम्। अन्यथा सिद्धसाधनत्वादित्याशयेनाह—**तदिदमिति**। यदुक्तमस्माभिः परस्परानध्यास इति तदेवेहोक्तं नेतरेतरात्मत्वानुपपत्तिमात्रं नहि संप्रतिपन्नानुपपत्तिरुद्भाव्येत्यर्थः। नन्वितरेतरस्य भावः सद्भावः तत्कथमितरेतरात्मताध्यासात्मकत्वमित्याशङ्क्य विवक्षिते शब्दं वर्तयति **इतरेति**। त्वार्थो भावशब्दः, न सत्त्वार्थ इत्यर्थः। इतरेतरत्वं नाम परस्परत्वम्। तच्च विविक्तयोरप्यस्तीत्याशङ्क्याह—**तादात्म्यमिति**। इतरस्येतरभाव इति व्युत्पत्त्येत्यर्थः। अस्य चानुभवपर्यन्तत्वं प्रागुक्तमिति नोक्तवान्, इतरेतरभाव इत्यश्रवणात् तद्व्याख्यानायोगमाशङ्क्य समासान्तर्गतस्य व्याख्या इति मत्वाह—**तस्यानुपपत्ताविति**। तद्धर्माणामित्ययुक्तम्। धर्माणां धर्मान्तरैर्धर्म्यन्तरेण वैकृत्याध्यासनिषेधस्येष्टत्वात्। विनिमयाध्यासस्य निषेध्यस्यापि धर्मिणोर्विवेके सत्यप्राप्तशङ्कत्वादित्या-

---

[1] वैलक्षण्य इति। विलक्षणाः स्फुटाः घटादयः किमाभ्यामत आह-अत्यन्तेति, इति क पाठः

पत्तिः, इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च

भविष्यति, दृश्यते हि धर्मिणोर्विवेकग्रहणेऽपि तद्धर्माणामध्यासः, यथा कुसुमाद्भेदेन गृह्यमाणेऽपि स्फटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिम्बोद्ग्राहिण्यरुणः स्फटिक इत्यारुण्यविभ्रम, इत्यत उक्तम् - तद्धर्माणामपीति। इतरेतरत्र धर्मिणि धर्माणां भावो विनिमयस्तस्यानुपपत्तिः। अयमभिसंधिः - रूपवद्धि द्रव्यमतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन-गृह्यमाणस्यापि छायां गृह्णीयात्; चिदात्मा त्वरूपो विषयी न विषयच्छायामुद्ग्राहयितुमर्हति, यथाहुः - शब्दगन्धरसानां च कीदृशी प्रतिबिम्बता' इति। तदिह पारिशेष्याद्विषयविषयिणोरन्योन्यात्मसंभेदेनैव तद्धर्माणामपि परस्परसंभेदेन विनिमयात्मना भवितव्यम्, तौ चेद्धर्मिणावत्यन्तविवेकेन गृह्यमाणावसंभिन्नौ, असंभिन्नाः सुतरां तयोर्धर्माः; स्वाश्रयाभ्यां व्यवधानेन दूरापेतत्वात्, तदिदमुक्तम् - सुतरामिति। तद्विपर्ययेणेति। विषयविपर्ययेणेत्यर्थः। मिथ्या-

---

शङ्कयाह—**दृश्यत इति**। इतरेतरत्त्रानुपपत्तिर्विनिमयशङ्काया नोत्तरमित्याशङ्क्य क्रमान्तरेण व्युत्पादयति—**इतरेतरत्रेति**। धर्माणां धर्मान्तरेष्वध्यासोऽपि नेष्ट एवेत्याशङ्क्याह—**धर्मिणीति**।

ननु यथायथमुभयेऽपि धर्मा इतरेतरत्रैव भवन्तीत्यत आह—**विनिमय इति**। इतरस्य धर्मस्य इतरत्र धर्म्यन्तरे भाव इति व्युत्पत्तेरित्यर्थः। दृष्टान्तस्य दर्शितत्वादनुत्तरत्वमाशङ्क्याह—**अयमिति**। छायां प्रतिबिम्बम्। विषयी तु नीरूपो न विषयच्छायामुद्ग्राहयितुमित्यन्वयः। तस्य नीरूपत्वे चिदात्मत्वं हेतुः। उद्ग्राहयितुमिति स्वार्थण्यन्तः। विषयोऽपि नीरूपस्य तस्य छायां नोद्गृह्णातीत्युक्तप्रायम्। अचाक्षुषस्य प्रतिबिम्बायोगात्। आत्मा न प्रतिबिम्बितः आचाक्षुषत्वात्। न च प्रतिबिम्बं गृह्णाति। नीरूपत्वाच्छब्दादिवदित्याप्तोक्तिव्याजेनाह—**यथेति**। ननु धर्म्यध्यासे काचिदनुपपत्तिः। धर्माध्यासेऽप्यन्या। तावन्मात्रेण कथं तरप्प्रयोग इत्याशङ्क्य प्रकृते धर्माध्यासस्य धर्म्यध्यासोपजीवित्वसद्भावादित्याह—**तदिहेति**। **सम्भेदेन** अध्यासेन। धर्माणां मिथोऽस्त्यसम्भेद इत्यत आह—**विनिमयात्मनेति**। असम्भेदातिशये तरबर्थे हेतुमाह—**स्वाश्रयाभ्यामिति**। स्वाश्रयाभ्यां कृतेन व्यवधानेन। धर्मा हि स्वधर्मिणि सन्तस्तदध्यासं मध्ये निधायेतरत्राध्यस्यन्त इति व्यवधानम्। अतो युक्तस्तरबित्याह—**तदिदमिति**। तच्छब्दः सन्निधानादध्यासपरामर्शी। ततो भाष्यमयुक्तम्। विपर्ययो हि पूर्वोक्तप्रकारात्प्रकारान्तरापत्तिः। न चासावध्यासेऽस्ति। न हि स एवाध्यासो रूपान्तरमापद्यत इत्याशङ्क्य सति बाधे व्यवहितपरामर्शो न दोष इत्याह—**विषयेति**। **विपर्ययेण** पूर्वोक्तारोप्यत्वविपरीतेनाधिष्ठानत्वेनेत्यर्थः। यद्वा विषयोऽचेतन।

विषयेऽध्यासो मिथ्येति भवितुं युक्तम्; तथाप्यन्योन्यस्मिन्नन्योन्यात्म-

शब्दोऽपह्नववचनः। एतदुक्तं भवति - अध्यासो भेदाग्रहेण व्याप्तः, तद्विरुद्धश्चेहास्ति भेदग्रहः, स भेदाग्रहं निवर्तयंस्तद्व्याप्तमध्यासमपि निवर्तयतीति॥ मिथ्येति भवितुं युक्तं यद्यपि, तथापीति योजना॥ इदमत्राकूतम् - भवेदेतदेवं यद्यहमित्यनुभवे आत्मतत्त्वं प्रकाशेत, न त्वेतदस्ति। तथाहि - समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीय-मात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते। न चैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभि-

तद्विपर्ययश्चैतन्यं। तेन यथा अचेतनोऽविषयश्चेतनो भवति तथेत्यर्थः। मिथ्यात्व चेदप्रमाणत्वं इष्टापादनमत आह—**मिथ्येति**।

ननु भेदग्रहे तद्विरोधी भेदाग्रहो माभूत्। अध्यासस्तु कथं न भवेदित्याशङ्क्य विरोधि-व्याप्यत्वादित्याह—**एतदिति**। **निवर्तयन्** प्राप्तिरहितं कुर्वन्। **निवर्तयति** अप्राप्तं करोति। शङ्कायां यद्यपीति पठितव्यमित्युक्तम्। तत्र स पाठः क्वेति न ज्ञायते। अत आह—**मिथ्येति**। यत्र क्वापि पठितस्यैषैव खलु योजना। एवं चेत् स्वाधीनस्याध्याहारस्य सन्निधानायान्ते पाठो युक्त इत्यर्थः। यद्वा यद्यपि पाठे साकाङ्क्षत्वं स्यादित्याशङ्क्य नैष दोषः उत्तरेणैकवाक्यताङ्गीकारादित्याह—**मिथ्येति**। अस्मिन्पक्षे योजना एकवाक्यकरणम्। यद्वा आशङ्क्य परिहरतीति शङ्कापरिहारौ किमिति युगपद-वातारिषाताम्। प्रथमं शङ्कामेवावतार्य व्याख्याय परिहारोऽवतार्यतामित्याशङ्क्य साकाङ्क्षत्वेनैकवाक्य-त्वादित्याह—**मिथ्येति**। किञ्च अजिज्ञास्यत्वमाशङ्क्य तत्समाधानं सूत्रार्थः। अतः सूत्रार्थासंस्पर्शं परिहरता आशङ्क्य परिहरतीत्येवावतार्यम्। शङ्कामात्रस्यासूत्रार्थत्वादित्यपि द्रष्टव्यम्। नन्वध्यासेऽनुप-पत्तिरुक्ता व्यवहारश्चौपचारिक इत्युक्तं कथं सिद्धवदुच्यतेऽध्यस्य व्यवहार इति तत्राह—**इदमत्रेति**। अत्र भाष्ये। आकूतमभिप्रायः। तमाह—**भवेदिति**। प्रकाशेत विषयत्वं गच्छेत्। नन्वहं धीगृहीत-मात्मतत्त्वं तत्रैव न प्रकाशत इति व्याहतम् न चान्यदात्मतत्त्वमस्तीत्युक्तम्। अत आह—**तथाहीति**। अहंधीगृहीताद् भेत्तुं विशेषणानि। उपाध्यनवच्छिन्नम् उपाध्यविशिष्टम। अनन्तं परिच्छेदरहितम् आनन्दचैतन्ययोर्गुणत्वपरिहारायैकरसत्वग्रहणम्। **उदासीनम्** अकर्तृ। **एकं** स्वगतभेदरहितम्।

अद्वितीयं विजातीयभेदरहितम्। **गीयते** बहुधोच्यते। उत्कैरप्रामाणिकत्वं वारयति—**श्रुतीति**। ननु श्रुत्यादीनामुपचारो वर्णितः। अत आह—**न चेति**। **कर्तुम्** वर्णयितुं। पुरुषधौरेयैः शक्येतेत्यत आह—**शक्रेणापीति** तत्र हेतुः तत्पराणीति। तात्पर्ये लिङ्गमाह—**क्रियेति**। **पौनः पुन्यं** क्रियासमभिव्याहारः तमाह—**उपक्रमेति**। **परामर्शो** मध्ये वर्णनम्। **उपसंहारः**, अन्ते कीर्तनम्।

विषयेऽध्यासो मिथ्येति भवितुं युक्तम्; तथाप्यन्योन्यस्मिन्नन्योन्यात्म-

शब्दोऽपह्नववचनः । एतदुक्तं भवति - अध्यासो भेदाग्रहेण व्याप्तः, तद्विरुद्धश्चेहास्ति भेदग्रहः, स भेदाग्रहं निवर्तयंस्तद्व्याप्तमध्यासमपि निवर्तयतीति ॥ मिथ्येति भवितुं युक्तं यद्यपि, तथापीति योजना ॥ इदमत्राकूतम् - भवेदेतदेवं यद्यहमित्यनुभवे आत्मतत्त्वं प्रकाशेत, न त्वेतदस्ति । तथाहि - समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीय-मात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते । न चैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभि-

तद्विपर्ययश्चैतन्यं । तेन यथा अचेतनोऽविषयश्चेतनो भवति तथेत्यर्थः । मिथ्यात्वं चेदप्रमाणत्वं इष्टापादनमत आह—**मिथ्येति** ।

ननु भेदग्रहे तद्विरोधी भेदाग्रहो माभूत् । अध्यासस्तु कथं न भवेदित्याशङ्क्य विरोधि-व्याप्यत्वादित्याह—**एतदिति** । **निवर्तयन्** प्राप्तिरहितं कुर्वन् । **निवर्तयति** अप्राप्तं करोति । शङ्कायां यद्यपीति पठितव्यमित्युक्तम् । तत्र स पाठः क्वेति न ज्ञायते । अत आह—**मिथ्येति** । यत्र क्वापि पठितस्यैषैव खलु योजना । एवं चेत् स्वाधीनस्याध्याहारस्य सन्निधानायान्ते पाठो युक्त इत्यर्थः । यद्वा यद्यपि पाठे साकाङ्क्षत्वं स्यादित्याशङ्क्य नैष दोषः उत्तरेणैकवाक्यताङ्गीकारादित्याह—**मिथ्येति** । अस्मिन्पक्षे योजना एकवाक्यकरणम् । यद्वा आशङ्क्य परिहरतीति शङ्कापरिहारौ किमिति युगपद-वातारिषाताम् । प्रथमं शङ्कामेवावतार्य व्याख्याय परिहारोऽवतार्यतामित्याशङ्क्य साकाङ्क्षत्वेनैकवाक्य-त्वादित्याह—**मिथ्येति** । किञ्च अजिज्ञास्यत्वमाशङ्क्य तत्समाधानं सूत्रार्थः । अतः सूत्रार्थासंस्पर्शं परिहरता आशङ्क्य परिहरतीत्येवावतार्यम् । शङ्कामात्रस्यासूत्रार्थत्वादित्यपि द्रष्टव्यम् । नन्वध्यासेऽनुप-पत्तिरुक्ता व्यवहारश्चौपचारिक इत्युक्तं कथं सिद्धवदुच्यतेऽध्यस्य व्यवहार इति तत्राह—**इदमत्रेति** । **अत्र** भाष्ये । **आकूतमभिप्रायः** । तमाह—**भवेदिति** । प्रकाशेत विषयत्वं गच्छेत् । नन्वहं धीगृहीत-मात्मतत्त्वं तत्रैव न प्रकाशत इति व्याहतम् न चान्यदात्मतत्त्वमस्तीत्युक्तम् । अत आह—**तथाहीति** । अहंधीगृहीताद् भेत्तुं विशेषणानि । उपाध्यनवच्छिन्नम् उपाध्यविशिष्टम् । अनन्तं परिच्छेदरहितम् आनन्दचैतन्ययोर्गुणत्वपरिहारायैकरसत्वग्रहणम् । **उदासीनम्** अकर्तृ । **एकं** स्वगतभेदरहितम् ।

अद्वितीयं विजातीयभेदरहितम् । **गीयते** बहुधोच्यते । उक्तेरप्रामाणिकत्वं वारयति—**श्रुतीति** । ननु श्रुत्यादीनामुपचारो वर्णितः । अत आह—**न चेति** । **कर्तुम्** वर्णयितुं । पुरुषधौरेयैः शक्येतेत्यत आह—**शक्रेणापीति** तत्र हेतुः तत्पराणीति । तात्पर्ये लिङ्गमाह—**क्रियेति** । **पौनः पुन्यं** क्रियासमभिव्याहारः तमाह—**उपक्रमेति** । **परामर्शो** मध्ये वर्णनम् । **उपसंहारः**, अन्ते कीर्तनम् ।

हारेणेदृगात्मतत्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम्; अभ्यासे हि भूयस्त्वमर्थस्य भवति; यथाहो दर्शनीयाहो दर्शनीयेति, न न्यूनत्वं, प्रागेवोपचरितत्वमिति। अहमनुभवस्तु प्रादेशिकमनेकविधशोकदुःखादिप्रपञ्चोपप्लुतमात्मानमादर्शयन्कथमात्मतत्वगोचरः कथं वानुपप्लवः। न च - ज्येष्ठप्रमाणप्रत्यक्षविरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरितार्थत्वं चेति - युक्तम्; तस्यापौरुषेयतया निरस्तसमस्तदोषाशङ्कस्य, बोधकतया स्वतः सिद्धप्रमाणभावस्य, स्वकार्ये प्रमितावनपेक्षत्वात्। प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमप्रामाण्यमिति चेत्, न; उत्पादकाप्रतिद्वन्द्वित्वात्। न ह्यागमज्ञानं सांव्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहन्ति; येन कारणाभावान्न भवेत्, अपि तु तात्त्विकम्; न च तत्तस्योत्पादकम्; अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यवहारिकप्रमाणेभ्यस्तत्त्वज्ञानो-

---

क्रियासमभिव्याहारेणोच्यमानत्वस्य तात्पर्यविषयत्वे लिङ्गत्वं कथमिति। व्याप्तत्वादित्याह—**अभ्यास इति**। **भूयस्त्वं** तात्पर्यविषयत्वम्। अन्वयमुक्त्वा व्यतिरेकमाह—**नेति**। **न्यूनत्वं** तात्पर्यविषयत्वराहित्यम्। सति हेतौ साध्याभावो नास्तीत्युक्तिरेव व्यतिरेकोक्तिः। तदेवानुपचरितत्वेऽपि लिङ्गमित्याह—**प्रागिति**। **प्राक्** पूर्वम् सुतरामित्यर्थः। तात्पर्यविषयत्वव्याप्तस्योपचरितत्वस्य व्यापकनिवृत्तौ निवृत्तिः स्फुटेति तरबर्थः। **अहो** निरवधि सौन्दर्यमित्यर्थः। अभ्यासेन तादृशभूयस्त्वाभावादेवं व्याख्यातः। उक्तं श्रुत्यर्थं विच्छिनत्ति **इति** इति। अस्त्विदमात्मतत्वम् अहंप्रत्ययः कथमतद्गोचरः। कथं वाध्यास इति। तद्विपरीतगोचरत्वादित्याह—**अहमिति**। प्रादेशिकमित्यानन्त्यवैपरीत्यम्। अनेकविधेत्यविशिष्टविशेषणवैपरीत्यम्। उपप्लुतं पीडितम्। तदध्यासवन्तमिति यावत्। अनुपप्लवोऽनध्यासः। तत्परस्यापि प्रमाणविरोधे लौकिकवाक्यवदप्रामाण्यम्, अबाधस्थल एव चाभ्यासस्य तात्पर्यलिङ्गत्वात्, बाधादिहोपचारत्वमित्याशङ्क्याह—**न चेति**।

ज्येष्ठेत्यनुपजातविरोधित्वं प्राबल्ये कारणम्। प्रत्यक्षेत्युपजीव्यत्वे। तदपेक्षस्येति दौर्बल्ये। एवकारोऽहंकारोपप्लवव्यावृत्त्यर्थः॥ आम्नायस्य तदपेक्षा स्वजन्यज्ञानस्य प्रामाण्ये तदुत्पत्तौ वा। आद्येऽपि विपर्ययादिशङ्काशान्तये संवादाय वा न द्वयमित्याह—**तस्येति**। **स्वतः** संवादानपेक्षया प्रमितिलक्षणे स्वकार्ये तत्प्रमितित्व इति यावत्। द्वितीयं शङ्कते—**प्रमिताविति**। एकस्य पक्षस्य दुष्टत्वेऽपि न क्षतिः। पक्षान्तरसंभवादित्याद्यनिराकरणस्यानुज्ञा। **अनुत्पत्तिलक्षणं** प्रमाणज्ञानानुत्पत्तिलक्षणम्। ज्ञानमात्रस्य विरोधसहस्रैरपि दुर्वारत्वात्। उत्पादकाविरोधित्वमसिद्धमित्याह—**नेति**। आगमस्य प्रत्यक्षव्यावहारिकप्रामाण्येन विरोधः तत्त्वावेदकत्वेन वा। नाद्य इत्याह—**नहीति**। तर्हि द्वितीयः पक्ष इति। ओमित्याह—**अपित्विति**। तर्ह्यनुत्पत्तिरिति नेत्याह—**न चेति**। अतात्त्विकं कथमुत्पादयेदत आह—**अतात्त्विकेति**।

त्पत्तिदर्शनात् । तथा च वर्णे ह्रस्वदीर्घत्वादयोऽन्यधर्मा अपि समारोपितास्तत्त्वप्रतिपत्तिहेतवः; नहि लौकिका नाग इति वा नग इति वा पदात्कुञ्जरं वा तरुं वा प्रतिपाद्यमाना भवन्ति भ्रान्ताः । न चानन्यपरं वाक्यं स्वार्थ उपचरितार्थं युक्तम्; उक्तं हि - "न विधौ परः शब्दार्थः" इति । ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुः, न बाधकत्वे; रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात्, तदनपबाधने तदपबाधात्मनस्तस्योत्पत्तेरनुपपत्तेः । दर्शितं च तात्त्विकप्रमाणभावस्यानपेक्षितत्वम् । तथा च पारमर्षं सूत्रं—"पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" (जै. अ. ६ पा. ५ सू. ५४) इति । तथा "पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम् । अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत् ॥" इति । अपि च येऽप्यहंकारास्पदमात्मानमास्थिषत तैरप्यस्य न तात्विकत्वमभ्युपेतव्यम्; 'अहमिहैवास्मि सदने जानानः' इति सर्वव्यापिनः प्रादेशिकत्वेन ग्रहात्, उच्चतरगिरिशिखरवर्तिषु महातरुषु भूमिष्ठस्य दूर्वाप्रवालनिर्भासप्रत्ययवत् । नच—इदं

प्रातीतिकदैर्घ्यादावारोपस्य तत्त्वज्ञानव्यभिचारित्वादुक्तं **सांव्यवहारिकेभ्य इति** । समारोपिताः अपीत्यन्वयः । साध्यतत्त्वप्रतिपत्तिरिति, न बाधाभावादित्याह—**न हीति** । यदुक्तं उपचरितार्थत्वं वेति । तत्राह—**न चेति** । बाधाभावादध्यासस्यानुपद्रवत्वादित्यर्थः । **स्वार्थे** तात्पर्यविषये । तात्पर्यविषयश्चौपचारिकश्चेति व्याहतमितिभावः । तात्पर्यविषयस्यानुपचरितत्वं परैरपीष्टमित्याह—**उक्तमिति** । विधौ विधायके शब्दे, परः लक्ष्यः न्यायसामान्याच्छाबरं वचः पठितम् । प्रकृते विध्यभावात् प्रत्यक्षस्योपजीव्यत्वेन प्राबल्याभावेऽपि प्रागुक्ताद् ज्यैष्ठ्यात्प्राबल्यमत आह—**ज्येष्ठत्वमिति** ॥

अनपेक्षत्वमसिद्धं प्रत्यक्षाधीनोत्पत्तिमत्त्वादिति विस्मरन्तं प्रत्याह—**दर्शितं चेति** । वृद्धोक्तिव्याजेन वैदिकमप्युदाहरति—**तथा चेति** । परमर्षिर्जैमिनिः । ज्योतिष्टोमे परस्परं सम्बध्य यज्ञशालातो निर्गच्छतामृत्विजां विच्छेदे प्रायश्चित्तं श्रुतम् । "यद्युद्गाताऽपच्छिन्द्याददक्षिणेन यजेत, यदि प्रतिहर्ता सर्वस्वदक्षिणेनेति" । तत्र क्रमेण विच्छेदद्वये प्रथमस्यानुपजातविरोधित्वेन प्राबल्यात् तन्निमित्तकं प्रायश्चित्तं प्राप्य द्वितीयस्य निरपेक्षस्य विरोधिनमबाधित्वोदयाभावेन प्राबल्यात् पूर्वबाधकत्वम् । प्रकृतौ क्लृप्तोपकारतया अतिदेशेन प्रथमप्राप्तस्यापि कुशमयबर्हिषो, विकृतौ कल्प्योपकारेण चरमेण शरमयबर्हिषा बाधात् । अतो द्वितीयमेव प्रायश्चितं इति षष्ठे राद्धान्तितम् ॥ सूत्रनैरपेक्ष्यस्यास्फुटत्वाद् वार्त्तिकमुदाहरति— **तथेति** । धियामिति बहुवचनं व्याप्तिज्ञापनाय । भवेदित्यत्रेतिशब्दो द्रष्टव्यः । श्रुत्युक्तात्मतत्त्वागोचरत्वादविविक्तविषयोऽहंप्रत्यय इत्युक्तम् । ये तु स्वसिद्धान्तश्रद्धाजडा न तुष्यन्ति तान्प्रति तदनुसारेणैवाविविक्तविषयत्वमाह—**अपि चेत्यादिना** । **अस्य** अहङ्कारस्य । तात्विकत्वमनध्यासत्वम् । किमात्मा सर्वगत इष्यते

देहस्य प्रादेशिकत्वमनुभूयते नत्वात्मन इति सांप्रतम्; नहि तदैवं भवति—'अहम्' इति; गौणत्वे वा न 'जानानः' इति। अपि च परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्तत इति यत्र प्रयोक्तृ-प्रतिपत्त्रोः संप्रतिपत्तिः स गौणः, स च भेदप्रत्ययपुरःसरः, तद्यथा नैयमिकाग्निहोत्रवचनोऽग्नि-होत्रशब्दः (जै. अ. १ पा. ४सू. ४) प्रकरणान्तरावधृतभेदे कौण्डपायिनामयनगते कर्मणि 'मासमग्निहोत्रं जुहोति' (जै. अ. ७ पा. ३ सू १) इत्यत्र साध्यसादृश्येन गौणः, माणवके चानुभवसिद्धभेदे सिंहात्सिंहशब्दः, नत्वहंकारस्य मुख्योऽर्थो निर्लुठितगर्भतया देहादिभ्यो

प्रादेशिको वा। आद्यं प्रत्याह—**अहमिति**। शिखरस्थस्य तादृग् बुद्ध्यभावात् भूमिष्ठस्येत्युक्तम्। दूर्वाप्रवला इति निर्भासो विषयीकरणं यस्मिन् प्रत्यये स तथा। व्यापिनः प्रादेशिकत्वेन ग्रहासिद्धिमा-शङ्क्याह—**न चेति**। अहमिति देहे गौणमतमाह—**गौणत्व इति**। जानान इति न भवति। उपचरिताहंशब्दस्यापि देहस्याज्ञातृत्वात्। न च जानान इत्यपि गौणं।

स्वज्ञानप्रकटनपरत्वाद्वाक्यस्य। यदि स्वज्ञानप्रकटनपरमेतत् इहैवेति वृथा। यदि प्रदेशसम्भवेऽपि तात्पर्यं, तर्हि तात्पर्यभेदादहमिहेति अहं जानान इति द्वे वाक्ये स्याताम्। तयोरुत्तरस्मिन्न कश्चिद्दोषः। आद्ये तु देहेऽहंशब्दो गौणो भविष्यति। अत आह—**अपि चेति**। देहेऽहंशब्दस्य किं सांप्रतिकी गौणता सिंहो माणवक इतिवत्, निरूढा वा सर्षपतैलवत्। आद्यं प्रत्याह—**परशब्द इति**। प्रयोक्तुः श्रोतुश्चान्यस्य शब्दोऽन्यत्र प्रयुज्यत इति यत्र निश्चिता प्रतिपत्तिः स एव सांप्रतिकगौण इत्यर्थः। अस्तु प्रस्तुते तथात्वमत आह—**स चेति**। **तद्यथेति नैयमिकाग्निहोत्रवचनः** नित्याग्निहोत्रवाची। प्रकरणान्त-रावधृतमेदे नित्याग्निहोत्रप्रकरणादन्यप्रकरणस्थत्वेन निश्चिततद्भेदे। इदं मुख्यार्थे बाधकम्। कुण्डपायि-नामयनं सत्रविशेषः। इदं प्रकरणभेदाय। कर्मणि गौण इत्यन्वयः। गुणयोगमाह—**साध्यसादृश्येन**। अनुष्ठेयधर्मसाम्येन। गौणाग्निहोत्रशब्दयुक्तं वाक्यं पठति—'**मासमग्निहोत्रं जुहोतीति**। अत्र अग्निहोत्रशब्द इति पूर्वेणान्वयः। मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्देन नैयमिकस्य बुद्ध्यारोहात् तत्रैव मासगुणविधिरिति प्राप्ते प्रकरणभेदात् भिन्ने कर्मणि गुणविध्ययोगात् गौणोऽग्निहोत्रशब्द इति द्वितीये स्थितम्। लौकिकमप्युदाहरति—**माणवक इति**। अस्तु प्रस्तुते भेदप्रत्ययोऽपीत्यत आह—**नत्विति**। **अहंकारस्य** अहंशब्दस्य। ननु मम शरीरमिति भेदो भात्येव, अत आह—**निर्लुठितेति**। निष्कृष्य देहादि-भ्योऽपनीय लुठितः प्रकाशितो गर्भो रहस्यमसाधारणं रूपं यस्य स तथा तत्तया। लोकायतमतानुदय-प्रसङ्गात् मम शरीरमिति वदता कस्त्वमित्यनुयुक्तेन हृदयन्यस्तहस्तेनायमहमिति देहस्यैव निर्देशान्मम

भिन्नोऽनुभूयते, येन परशब्दः शरीरादौ गौणो भवेत्। न च अत्यन्तनिरूढतया गौणेऽपि न गौणत्वाभिमानः सार्षपादिषु तैलशब्दवदिति-वेदितव्यम्; तत्रापि स्नेहात्तिलभवाद्भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वाभिमानो नत्वर्थयोस्तैलसार्षपयोरभेदाध्यवसायः। तत्सिद्धं गौणत्वमुभयदर्शिनो गौणमुख्यविवेकविज्ञानेन व्याप्तं; तदिह व्यापकं विवेकज्ञानं निवर्तमानं गौणतामपि निवर्तयतीति। न च-बालस्थविरशरीरभेदेऽपि सोऽहमित्येकस्यात्मनः प्रतिसंधाना-द्देहादिभ्यो भेदेनास्त्यात्मानुभव इति-वाच्यम्; परीक्षकाणां खल्वियं कथा न लौकिकानां परीक्षका अपि हि व्यवहारसमये न लोकसामान्यमतिवर्तन्ते; वक्ष्यत्यनन्तरमेव हि भगवान् भाष्यकारः—'पश्वादिभिश्चाविशेषात्' इति। बाह्या अप्याहुः—शास्त्रचिन्तकाः खल्वेवं विवेचयन्ति, न प्रतिपत्तारः' इति। तत्पारिशेष्याच्चिदात्मगोचरमहंकारमहमिहास्मि सदन इति प्रयुञ्जानो लौकिकः शरीराद्यभेदग्रहादात्मनः प्रादेशिकत्वमभिमन्यते, नभस इव घटमणिकमल्लि-

---

शरीरमित्यस्योपचारत्वमित्यर्थः। द्वितीयमनूद्य दूषयति—**न चेति**। **तत्रापीति**। हि यस्मादर्थे। निरूढलक्षणायामपि यदि भेदसिद्धिः कथं सांप्रतिकवैषम्यमत आह—**सार्षपादीनामिति**। अमुख्ये मुख्यत्वभ्रमो विशेष इत्यर्थः। भेदसिद्धेरविहानमेवकारसूचितमाह— **नत्विति**। **अभेदाध्यवसायः** भेदाध्यवसायाभावः। प्रकृते तु भेदास्फुरणमवोप . . . . र्थः। ननु लक्षणविशेषधर्मभेदावभासायोपलक्षणान्तरे किमित्य . . . . त्वादित्याह—**तत्सिद्धमिति**। निवर्तयतीति सिद्धमित्यन्वयः। विवेकविज्ञानमिति स्फुटीकरणार्थम। **उभयदर्शिन इति**। विवेकज्ञानापेक्षितध(र्मी) र्मिप्रतियोगिज्ञानोक्तिः। चैत्रेण स्वदेहे प्रयुक्तोऽहंशब्दः गौणः, तेनागृहीततद्देहभेदार्थत्वे सति तत्र प्रयुक्तत्वात्। तद्वाचिशब्दवत् इत्यनुमानरीतिः। अभिज्ञया भेदासिद्धावपि प्रत्यभिज्ञया तत्सिद्धेरसिद्धो हेतुः। अत आह—**नचेति**। खलुशब्दो हेतौ। परिमाणभेदे द्रव्यभेद इति कथा न लौकिकानाम। ते हि पाकाच्छ्यामस्य लौहित्यवत् कारणविशेषादल्पस्य महत्परिमाणमविरुद्धं बुध्यन्ते। अतो देहयोर्भेदाज्ञानादनुवृत्तव्यावृत्तभेदवादिनामपि तेषामेषा प्रत्यभिज्ञा देहैक्यविरूद्धेत्यर्थः। परीक्षकाणां तर्हि गौणः सःव्यवहारः जिज्ञासवोऽपि त एवेत्याशङ्कयाह—**परीक्षका इति**। व्यवहारसमये परीक्षेतरव्यवहारसमये।

सामान्यं सादृश्यं। अपरोक्षभ्रमः परोक्षज्ञानान्न निवर्तेत इत्यर्थः। अनतिवृत्तिरसिद्धा - अत-आह—**वक्ष्यतीति**। भगवानिति तदुक्तेर्युक्तत्वमाह। परीक्षकाणां खल्वित्यत्र सम्मतिः—**बाह्या इति**। मास्तु गौणः। लाक्षणिकस्तु स्यात् न, तुल्यन्यायत्वादित्याशयेनाह—**तदिति**। **चिदात्मा** चेतनः।

काद्युपाध्यवच्छेदादिति युक्तमुत्पश्यामः। न च अहंकारप्रामाण्याय देहादिवदात्मापि प्रादेशिक इति - युक्तम्; तदा खल्वयमणुपरिमाणो वा स्याद्देहपरिमाणो वा। अणुपरिमाणत्वे स्थूलोऽहं दीर्घ इति च न स्यात्। देहपरिमाणत्वे तु सावयवतया देहवदनित्यत्वप्रसङ्गः। किञ्चास्मिन्पक्षेऽवयवसमुदायो वा चेतयेत्, प्रत्येकं वावयवाः। प्रत्येकं चेतनत्वपक्षे बहूनां चेतनानां स्वतन्त्राणामेकवाक्यताभावादपर्यायं विरुद्धदिक्क्रियतया शरीरमुन्मथ्येत, अक्रियं वा प्रसज्येत। समुदायस्य तु चैतन्ययोगे वृक्ण एकस्मिन्नवयवे चिदात्मनोऽप्यवयवो वृक्ण इति न चेतयेत्। न च बहूनामवयवानामविनाभावनियमो दृष्टः, य एवावयवो विशीर्णस्तदा तदभावे न चेतयेत्। विज्ञानालम्बनत्वेऽप्यहंप्रत्ययस्य भ्रान्तत्वं तदवस्थमेव; तस्य स्थिरवस्तुनिर्भासत्वादस्थिरत्वाच्च विज्ञानानाम्। एतेन—स्थूलोऽहमन्धोऽहं गच्छामीत्यादयोऽप्यध्यासतया व्याख्याताः।

अहंकार—महंशब्दम्। आद्यपक्षनिरासं निगमयति—इतीति। द्वितीयं निरस्यति—**न चेति**। अहङ्कारप्रामाण्येच्छैव पक्षस्यास्य प्रापिका नोपपत्तिरिति मत्वोक्तम्—**अहंकारेति**। जिनमतानुसारेण द्वितीयः पक्षः। अस्मिन्पक्षे अवयवारब्धः किमात्मा तत्समूहो वा। आद्यं प्रत्याह—**देहेति**। द्वितीयं विकल्पयति—**किञ्चेति**। यथा प्रथमः एवं द्वितीयोऽपि दुष्ट इति किञ्चार्थः। लघुत्वाद् द्वितीयं दूषयति—**प्रत्येकेति**। विरुद्धे दिशौ ययोस्ते विरुद्धदिशौ। ते क्रिये यस्य तस्यभावस्तथा तया, अनेन विरुद्धदिक्क्रियावयवत्त्वं विवक्षितम्। अवयविनो युगपत् क्रियाद्वयायोगादुन्मथनहेत्वसिद्धिप्रसङ्गात्। तत्र हेतुर्बहूनामित्यादिः। एकवाक्यभावः। अन्योन्यानुगुणेच्छत्वम्। स्वामिभृत्यवैषम्यार्थं स्वतन्त्राणामिति स्फुटीकरणार्थम्। इदमिह वाच्यम्। बहुभिश्चेतनैर्नियमेन शरीरमविरुद्धामेव दिशं निनीष्यते, कदाचिद्विरुद्धामपि वा। नाद्यः नियामकाभावात्, द्वितीयेऽपि विरुद्धाशानिनीषाप्रयत्नद्वारेण स्वकार्यं कुर्वते नैव वा। न द्वितीयः। नियामकाभावात्। प्रथमेऽपि किमवयविनि क्रियाः कुर्वते। अवयवेषु वा। नाद्यः। युगपदेकत्र क्रियाद्वयायोगात्। द्वितीये त्वेकस्मिन्नेतच्छरीरावयवे सेतुं गच्छति सत्येतत्संयुक्तोऽन्य एतच्छरीरावयवो वाराणसीं यदि गच्छेत्, अस्माद्विभज्येत, तत्संयुक्तवस्त्रादिवत्। यदि चेमाववयवौ द्रव्यारम्भकसंयोगविरोधिविभागवन्तौ स्यातां, तत्तृतीयक्षणे द्रव्यनाशवन्तौ स्यातामिति प्रसङ्गदुष्ट इति। द्वितीये समुदायापत्तिः शरीरौपाधिकी स्वतो वा यादृच्छिकी वा। आद्यं निरस्यति—**समुदायस्येति**। वृक्णे छिन्ने। द्वितीयं निरस्यति—**न चेति**। न तृतीय इत्याह—**स एवेति**। विज्ञानाहमर्थवादिनां नैव दोषः। विभुत्वसावयवत्वयोरभावादित्यत आह—**विज्ञानेति**। कथं तादवस्थ्यं वैषम्यस्य स्फुटत्वादित्याशङ्क्यान्यस्माद्धेतोरित्याह—**तस्येति**। स्थिरतया वस्तुनिर्भासादित्यर्थः। कृशोऽहमित्यादीनामुपचारतामुक्तामपास्यति—**एतेनेति**। अप्रयोजनत्वाच्चेति यदुक्तं तदुक्तो-

कतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्या -

---

तदेवमुक्तक्रमेणाहंप्रत्यये पूतिकूष्माण्डीकृते भगवती श्रुतिरप्रत्यूहं कर्तृत्वभोक्तृत्वसुखदुःखशोकाद्यात्मत्वमहमनुभवप्रसञ्जितमात्मनो निषेद्धुमर्हतीति। तदेवं सर्वप्रवादिश्रुतिस्मृतीतिहासपुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्य स्वरूपनिमित्तफलैरुपव्याख्यानम्—अन्योन्यस्मिन्नित्यादि। अत्र चान्योन्यस्मिन्धर्मिण्यात्मशरीरादौ अन्योन्यात्मकताम् अध्यस्य– "अहमिदं शरीरादि"—इति। इदमिति च वस्तुतः, न प्रतीतितः। लोकव्यवहारो लोकानां व्यवहारः, स चायमहमिति व्यपदेशः। इतिशब्दसूचितश्च शरीराद्यनुकूलं प्रतिकूलं च प्रमेयजातं प्रमाणेन प्रमाय तदुपादानपरिवर्जनादिः। 'अन्योन्यधर्मांश्चाध्यस्य' अन्योन्यस्मिन्धर्मिणि देहादिधर्माञ्जन्ममरणजराव्याध्यादीनात्मनि

पजीवनेन परिहरति—**तदेवमिति**। . . . . . . परीक्षकाणां वादाः, अपि च येऽप्यहंकारास्पदमित्यारभ्योक्ताः। **उपव्याख्यानम्** प्रपञ्चनम्। न च प्रपञ्चनं वृथा फलेन हेतोरध्यासस्यैव स्थापनात् कारणाभावादभावनिवृत्त्यै निमित्तस्य वक्तव्यत्वात्। अनुभवसिद्धमध्यासस्वरूपं दुस्त्यजमिति तत्स्वरूपस्यापि वक्तव्यत्वादिति भावः। अत्र चेति अक्षरव्याख्यानोपक्रमः, धर्मधर्मिणोरिति वक्ष्यमाणत्वादन्योन्यस्मिन्निति तद्ग्रहो मा भूदित्याह—**धर्मिणीति**। धर्मधर्म्यध्यासयोर्द्वयोरपि व्यवहारद्वयहेतुत्वभ्रममपाकर्तुं विविच्य योजयति—अन्योन्यात्मकतामध्यस्येति। इदमिति पुरोदेशस्थग्राहित्वं वारयति—**शरीरादीति**। अनात्मत्वमिदन्त्वमित्यर्थः। इदमपि इदन्त्वं व्यवहर्तारो न जानन्ति। अत आह—**इदमिति चेति**। शुक्तिं रजतं व्यवहरतीतिवत् तटस्थनिर्देशोऽयं न व्यवहर्तृव्यवहाराभिनय इत्यर्थः। केचिल्लोकशब्देनाहमभिमानभाजं प्राणिनिकायमभिधाय लोक इति व्यवहार इति विग्रहमुक्त्वा मनुष्योऽहमित्यभिमान इत्याहुः। तदयुक्तम्। अध्यस्येति स्वस्यैव स्वस्मात्पूर्वकालत्वाभावात् प्राणिनिकाय इति प्रतीत्यभावाच्चेति मत्वाह—**लोकानामिति**। तथापि ल्यप्प्रत्ययानुपपत्तिरेव, व्यवहारपदेन ज्ञानस्योक्तत्वात्, अत आह **स चेति**। व्यपदेशमभिनयति—**अयमहमिति**। उभयान्ते श्रुतस्येतिशब्दस्योभयसाधारण्यादाकृष्यानेन योजयित्वा व्याचष्टे **इतिशब्देति**। इतिशब्दस्योक्तानुवादित्वेऽप्युपपत्तिर्यद्यपि, तथापि सति व्यवहारान्तरे फले तदुपेक्षा माभूदित्येवं व्याख्यानम् प्रमाणेन प्रमायेत्यन्वयः। आदिशब्देन प्रतिकूलस्योच्छेदः। धर्माध्यासेऽधिष्ठानानुक्तिं परिहरति—**अन्योन्यस्मिन् धर्मिणीति**। नन्वन्यान्यस्मिन् यथास्वमन्योन्यधर्माः सन्त्येव कथमध्यास इत्याशङ्क्य व्यतिहारविवक्षामाह—**देहादीति**। आदिशब्देन इन्द्रियधर्माणां **ग्रहणम्**। अन्येषां च देहधर्माणां। धर्मिणीति स्फुटीकरणं। धर्म्यसम्भेदादुक्तम धर्मासम्भेदं वारयति। **अध्यस्तेति**। इदमर्थः

धर्मिणि अध्यस्तदेहादिभावे समारोप्य, तथा चैतन्यादीनात्मधर्मान्देहादावध्यस्तात्मभावे समारोप्य, ममेदं जरामरणपुत्रपशुस्वाम्यादीति व्यवहारो व्यपदेशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः । अत्र चाध्यासव्यवहारक्रियाभ्यां यः कर्तोन्नीतः, स समान इति समानकर्तृकत्वेनाध्यस्य व्यवहार इत्युपपन्नम् । पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं सूचयति—मिथ्याज्ञाननिमित्तः-व्यवहारः । मिथ्याज्ञानमध्यासस्तन्निमित्तः । तद्भावाभावानुविधानाद्व्यवहारभावभावयोरित्यर्थः । तदेवमध्यासस्वरूपं फलं च व्यवहारमुक्त्वा तस्य निमित्तमाह—इतरेतराविवेकेन । विवेकाग्रहेणेत्यर्थः । अथाविवेक एव कस्मान्न भवति; तथा च नाध्यास, इत्यत आह—अत्यन्तविविक्तयोर्धर्मधर्मिणोः । परमार्थतो धर्मिणोरतादात्म्यं विवेको, धर्माणां चासंकीर्णता विवेकः । स्यादेतत्—विविक्तयोर्वस्तुसतोर्भेदाग्रहनिबन्धनस्तादात्म्यविभ्रमो युज्यते, शुक्तेरिव रजताद्भेदाग्रहे रजततादात्म्यविभ्रमः, इह तु परमार्थसतश्चिदात्मनो न भिन्नं देहाद्यस्ति

पूर्वोक्त इति भ्रममपनयति—जरेति । इदम् इव व्यवहारस्य अर्थान्तरं मा ग्राहीत्याह—व्यपदेश इति । निवृत्तिरादिशब्दार्थः । ननु व्यवहारो भवतीति पूरणीयम् । अन्यथा वाक्यस्य साकाङ्क्षत्वात् तथा चाध्यासभवनयोः कर्तृभेदात् ल्यबयोगः अत आह—अत्रचेति । उन्नीतः आक्षिप्तः । अध्यस्येत्येव निमित्तत्वसिद्धेः पुनरुक्तिरत आह—पूर्वेति । सुप्त्वोत्तिष्ठतीतिवदहेतोः पूर्वत्वं व्यावर्त्य स्फुटयतोऽर्थः । दूरत्वाद्विशेषेण योजयति—व्यवहार इति । अन्यनिमित्तोक्त्या कथमन्यनिमित्तता स्फुटा, अत आह—मिथ्येति । इतरेतराविवेकेनेत्यध्यासज्ञापको हेतुरिव । तथा च कथमुपव्याख्यानान्तर्गतिः अत आह—तस्य निमित्तमिति । इदं स्वरूपं इदं फलं इति भाष्याक्षराभावाद् वृत्तानुवादव्याजेन तदुक्तिः तदेवमिति । नन्वविवेक एवासिद्धः द्वित्वाद्धर्मिणोरत आह—विवेकेति । गौणवादिनोऽपीष्टस्यात्यन्तविवेकस्यानुवादो वृथेत्याशङ्क्याह—अथेति । अविवेकः अभेदः । अध्यासप्रस्तावे न युक्तैक्यशङ्का, अत आह—तथाचेति । देहस्यैवात्मत्वान्नाध्यास इति लोकायतशङ्कानिराकरणमेतदित्यर्थः । तर्हीतरेतराविवेकेनेति व्याख्यातमित्याशङ्क्य इह विवेकशब्दस्तत्स्वरूपमेवाह न तद्ग्रहणमित्याह—परमार्थत इति । अतादात्म्यं चेत् विवेकः धर्मेषु न वाच्यः, असंसर्गश्चेद्धर्मिणोरेव वा वक्तव्यः । निषेध्याप्रसक्तेरित्याशङ्क्य तन्त्रेणोभयोक्तिमाह—धर्मिणोरिति । देहव्यतिरेकयुक्तिसूचनायात्यन्तपदम् । भाष्ये मिथुनीकृत्येति पूर्वकालतया व्यवहार इति संबन्धो भाति । तथा चायुक्तम्, अध्यासस्यैव व्यवहारकारणस्य तत्पूर्वत्वात् व्यर्थश्चायमंश इत्याशङ्क्याह—स्यादेतदिति । शुक्तेरिवेति लोकदृशोदाहरणम् । तत्त्वदृष्ट्या

ज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदं' 'ममेदमिति' नैसर्गि-

---

वस्तुसत्, तत्कुतश्चिदात्मनो भेदाग्रहः, कुतश्च तादात्म्यविभ्रम इत्यत आह-सत्यानृते मिथुनीकृत्य। विवेकाग्रहादध्यस्येति योजना। सत्यं चिदात्मा, अनृतं बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी मिथुनीकृत्य युगलीकृत्येत्यर्थः। न च संवृतिपरमार्थसतोः पारमार्थिकं मिथुनमस्तीत्यभूततद्भावार्थस्य च्वेः प्रयोगः। एतदुक्तं भवति—अप्रतीतस्यारोपायोगायोगादारोप्यस्य प्रतीतिरुपयुज्यते न वस्तुसत्तेति। स्यादेतत्—आरोप्यस्य प्रतीतौ सत्यां पूर्वदृष्टस्य समारोपः समारोपनिबन्धना च प्रतीतिरिति, दुर्वारं परस्पराश्रयत्वमित्यत आह—नैसर्गिक इति। स्वाभाविकोऽनादिरयं व्यवहारः। व्यवहारानादितया तत्कारणस्याध्यासस्यानादितोक्ता, ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेरुत्तरोत्तराध्यासोपयोग इत्यनादित्वाद्बीजाङ्कुरवन्न परस्पराश्रयत्वमित्यर्थः। स्यादेतत्-अद्धा पूर्वप्रतीतिमात्रमुपयुज्यत आरोपे, न तु प्रतीयमानस्य परमार्थसत्ता; प्रतीतिरेव त्वत्यन्तासतो गगनकमलिनीकल्पस्य देहेन्द्रियादेर्नोपपद्यते, प्रकाशमानत्वमेव हि चिदात्मनोऽपि सत्त्वं, न तु तदतिरिक्तं सत्तासामान्यसमवायः, अर्थक्रियाकारिता

शुक्त्यादेरप्यलीकत्वात्। (वस्तुतस्त्वन्मते भेदाग्रहः सत्यात्।) ननु मिथुनीकृत्येत्यस्योत्तरभाविक्रियाभावादयोगः। न चाध्यस्येत्यनेन सम्बन्धः। अविवेकेनाध्यस्येति सम्बन्धादित्याशङ्क्य तेनैव व्यवहितसम्बन्धमाह—मिथुनीकृत्येति। विवेकाग्रहादित्यर्थानुकरणम्। सत्यानृतशब्दयोर्वचोविशेषे प्रसिद्धत्वाद्व्याचष्टे—सत्यमिति। तर्हि सत्यानृतानीति स्यात्, न, राश्यभिप्रायत्वादित्याह ते द्वे। स्त्रीपुंसयोरेव मिथुनशब्दस्य प्रसिद्धेरौपचारिकमर्थमाह—युगलीकृत्य। बुद्ध्यारूढं युगलं कृत्वेत्यर्थः। द्वयोः सत्यत्वनियमशङ्कायाः कथं परिहारः। अत आह—एतदिति। ननु फलं वाच्यं किं विशेषणेन। अत आह—स्यादेतदिति। ननु निसर्गो निश्चयः तथा च नोत्तरमत आह—स्वाभाविकः। तर्हि स्वहेतुकत्वं स्यादत आह—अनादिः। व्यधिकरणोत्तरत्वमाशङ्क्याह—व्यवहारेति। अवैयधिकरण्येऽपि कथमुत्तरता, अनादित्वे वा कथं तस्य निमित्तनोक्तिरित्याशङ्क्य आह—ततश्चेति। अध्यासस्वरूपस्योक्तत्वाद् 'आह कोऽयमिति' अयुक्तमिति आशङ्क्याक्षेपत्वेनावतारयति—स्यादेतदित्यादिना। अद्धा सत्यम्। तदेवाह—पूर्वेति। तर्हि प्रतीतत्वादध्यासोपपत्तिरिति चेत्, अत्र किं परमार्थसत्त्वनिषेधः शून्यत्वमनिर्वाच्यत्वं वा। नाद्य इत्याह—प्रतीतिरेवेति। अपरोक्षे इत्यर्थः। अथ द्वितीयः स न युक्तः, प्रकाशते च न सदिति व्याघातादिति वक्तुं सम्प्रतिपन्नस्थलमाश्रित्य सत्त्वस्वरूपमाह—प्रकाशमानत्वमिति।

कोऽयं लोकव्यवहारः। आह—कोऽयमध्यासो नामेति। उच्यते-स्मृतिरूपः परत्र पूर्वदृष्टावभासः। तं केचित् - अन्यत्रान्यधर्माध्यास - इति

वा; द्वैतापत्तेः, सत्तायाश्चार्थक्रियाकारितायाश्च सत्तान्तरार्थक्रियाकारितान्तरकल्पनेऽनवस्थापातात्, प्रकाशमानतैव सत्ताभ्युपेतव्या। तथा च देहादयः, प्रकाशमानत्वान्नासन्तः, चिदात्मवत्; असत्त्वे वा न प्रकाशमानाः; तत्कथं सत्तानृतयोर्मिथुनीभावः, तदभावे वा कस्य कुतो भेदाग्रहः, तदसंभवे कुतोऽध्यास इत्याशयवान् आह आक्षेप्ता—कोऽयमध्यासो नाम। क इत्याक्षेपः। समाधाता—लोकसिद्धमध्यासलक्षणमाचक्षाण एवाक्षेपं प्रतिक्षिपति-उच्यते- स्मृतिरूपः परत्र पूर्वदृष्टावभासः। अवसन्नोऽवमतो वा भासोऽवभासः। प्रत्ययान्तरबाधश्चास्यावसादोऽवमानो वा। एतावता मिथ्याज्ञानमित्युक्तं भवति। तस्येदमुपव्याख्यानम् 'पूर्वदृष्ट—' इत्यादि। पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः। मिथ्याप्रत्ययश्चारोप-

---

आत्मनः सा सत्तास्तु। अन्यस्य त्वन्या। न। प्रयोजकगौरवापातादित्याह—**प्रकाशमानतैवेति**। व्याघातं व्यनक्ति—**तथेति**। त्यज्यतां तर्ह्येकमत आह—**तत्कथमिति**। सत्यानृतयुगलस्वरूपज्ञानस्य तन्मिथुनीकरणत्वादंशत्यागे तदयोगादित्यर्थः।

आहेत्यतिरिक्तमित्याशङ्क्याक्षेपत्वसूचनायेत्याह—**आहाक्षेप्तेति**। यद्वा आहेति वक्तुरनिर्देशात् साकाङ्क्षत्वमाशङ्क्य पूरयति आक्षेप्तेति। यद्याक्षेपः नेति वाच्यमत आह—**क इति**। युष्मदस्मदित्याद्याक्षेपः वस्तुभेदग्रहमूल इत्यनयोर्भेदः। प्रकृतेऽध्यासो न सम्भवतीत्यस्याक्षेपस्याध्याससामान्यलक्षणोक्तिर्नोत्तरमत आह—**समाधातेति**। लक्ष्यस्य लोकसिद्धिर्लक्षण उपचर्यते। लक्षणं स्वरूपं वा, लक्षणोक्तिरेव परिहारः न पृथक् तत्र यतितव्यमित्यर्थः। यथा चैतत्तथा वक्ष्यति। यद्यप्यत्र वक्ष्यमाणरीत्या पूर्वदृष्टेत्यारोप्यस्य समर्पणं परत्रेत्यधिष्ठानस्य स्मृतिरूप इति प्रत्यभिज्ञातिव्याप्तिपरिहार इति परस्य परत्रासन्निहितविषयोऽवभास इति समुदितलक्षणं भाति, तथापि तत् क्लिष्टमिति मत्वा अपयुत्यावभासपदव्युत्पत्त्या लक्षणं दर्शयति—**अवसन्न इत्यादिना**। नन्ववसादावमानौ सत्यप्रत्ययेऽपि स्तः क्षणिकत्वादत आह—**प्रत्ययेति**। **प्रत्ययान्तरं** प्रत्ययविशेषः। एतच्च बाधकत्वायोक्तम्। अवभासपदस्य वक्तव्ये रूढार्थत्यागे किं प्रयोजनं! लक्षणसिद्धिरित्याह—**एतावतेति**। रूढिस्वीकारेऽतिव्याप्तिः स्यादित्यर्थः। यद्येतावदेव लक्षणं शेषं वृथेत्यत आह—**तस्येदमिति**। उपव्याख्यानं वृत्तिरीत्या समुदितलक्षणत्वेन प्रपञ्चनम्। स्मृतिरूप इत्यादीति वक्तव्ये अवभासेन समस्तत्वात् पूर्वदृष्टेत्यस्यादित्वोक्तिः। कर्मधारयसमासेऽवभासस्य पूर्वदृष्टोक्तिर्वृथा। अतोऽपि गृह्णाति—**पूर्वदृष्टस्येति**। एवमपि किमस्य प्रयोजनमत आह—**मिथ्येति**। विषयः अधिष्ठानं मिथुनैकदेशं

विषयारोपणीयस्य मिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति। तस्य च दृष्टत्वमात्रमुपयुज्यते न वस्तुसत्त्वेति दृष्टग्रहणम्। तथापि वर्तमानं दृष्टं दर्शनं नारोपोपयोगीति पूर्वेत्युक्तम्। तत्र पूर्वदृष्टं स्वरूपेण सदप्यारोपणीयतयानिर्वाच्यमित्यनृतम्। आरोपविषयं सत्यमाह—परत्रेति। परत्र शुक्तिकादौ परमार्थसति, तदनेन सत्यानृतमिथुनमुक्तम्। स्यादेतत्-परत्र पूर्वदृष्टावभास इत्यलक्षणम्; अतिव्यापकत्वात्। अस्ति हि स्वस्तिमत्यां गवि पूर्वदृष्टस्य गोत्वस्य परत्र कालाक्ष्यामवभासः, अस्ति च पाटलिपुत्रे पूर्वदृष्टस्य देवदत्तस्य परत्र माहिष्मत्यामवभासः समीचीनः। अवभासपदं च समीचीनेऽपि प्रत्यये प्रसिद्धम्, यथा नीलस्यावभासः पीतस्यावभास इत्यत आह—स्मृतिरूप इति। स्मृते रूपमिव रूपमस्येति स्मृतिरूपः।

दर्शयतीत्यर्थः। तर्हि पूर्वेत्येव उपस्थाप्यताम् किं दृष्टेति। अत आह—**तस्य चेति**। **न वस्तुसत्त्वेति** ज्ञापयितुमिति शेषः। दृष्टग्रहणमेवास्तूभयार्थमत आह—**तथापीति**। वर्तमानं दर्शनमारोपोपयोगीति, न, दृष्टम् इत्यन्वयः। न च, दृष्टमिति निष्ठैवावर्तमानतां बोधयति। वर्तमानेऽपि संयोगादौ संयुक्तमित्यादि दर्शनादिति द्रष्टव्यम्। ननु वस्तुसत्तानुपरक्ताप्यारोप्यरूप्यादेरस्त्येव, अतोऽनृतमुपस्थापयतीत्ययुक्तमत आह—**तच्चेति**। **आरोपणीयतया** अधिष्ठानसम्भिन्नतया। स्वरूपेणाप्यसत्त्वं मरीचिकाग्रन्थे वक्ष्याम इत्यपिशब्दः। परत्रेति पूर्वदर्शनस्थलभ्रममपनयन्नाह—**आरोपेति**। यत् परत्र पूर्वदृष्टं तस्यावभास इति न, किन्तु यत् पूर्वदृष्टं तस्य परत्रावभास इत्यन्वय इत्यर्थः। युक्तं दृष्टेत्यनृतत्वसूचनम। परत्रेति कथं सत्यस्योक्तिः, परत्रेति शुक्तिकादेर्ग्रहणात्, तस्य च सत्यत्वात्। यद्वा परशब्दस्यैव पूर्वोक्तानृतविपरीतग्राहित्वादित्यभिप्रेत्याह—**परत्रेति**। पदद्वयलब्धमाविष्करोति—**तदनेनेति**। उक्तस्यैव लक्षणस्य पर्याप्तत्वात्, स्मृतिरूपपदवैयर्थ्यमाशङ्क्याह—**स्यादेतदिति**। परस्य पूर्वदृष्टपरतादात्म्यावभास इत्यभिप्रेत्याह—**अस्ति हीति**। अयं गौरिति सामानाधिकरण्यप्रतीतेरेवमुक्तम्। पूर्वदृष्टस्य परसंसर्गावभास इति धर्माध्यासमभिप्रेत्याह—**अस्ति चेति**। इहायं धर्म इतिवदिह देवदत्त इत्याधाराधेयभावरूपसंसर्गप्रतीतेरेवमुक्तम्। समीचीन इत्यलक्ष्यत्वोक्तिः। नन्ववभासपदेनैव समीचीना वृत्तिः सिद्धा न, समुदितलक्षणाश्रयणे तस्यावयवार्थत्यागादित्याह—**अवभासेति**। यद्यप्यन्यस्यान्यैक्यज्ञानं धर्म्यध्यासः। न च जातिव्यक्त्योरनुवृत्तव्यावृत्तयोस्तदस्ति। अन्यस्यान्यधर्मसंसर्गधीर्धर्माध्यासः। न च देवदत्तस्य धर्मत्वमस्तीति परिहारोऽस्ति, तथाप्यभ्युपेत्य विशेषणोपादानं, भ्रमसंस्कारस्मरणादन्यत्र भ्रमे न स्मृतिरूपत्वम्। अत आह—**स्मृतेरिति**। ननु प्रत्यभिज्ञापि स्मृतिरूपा संस्कारजा हि सा, अत आह—**असन्निहितेति**। असन्निधानं परत्रपदनिर्दिष्टार्थतादात्म्यस्य

असंनिहितविषयत्वं च स्मृतिरूपत्वं, संनिहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। नाप्यव्याप्तिः; स्वप्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात्। तत्रापि हि स्मर्यमाणे पित्रादौ निद्रोपप्लववशादसंनिधानापरामर्शे, तत्र तत्र पूर्वदृष्टस्यैव संनिहितदेशकालत्वस्य समारोपः। एवं पीतः शङ्खस्तिक्तो गुड इत्यत्राप्येतल्लक्षणं योजनीयम्। तथाहि—बहिर्विनिर्गच्छदत्यच्छनयनरश्मिसंपृक्तपित्तद्रव्यवर्तिनीं पीततां पित्तरहितामनुभवन्, शङ्खं च [1]द्रव्यमात्रं दोषाच्छादितशुक्लिमानमनुभवन्, पीततायाश्च शङ्खासंबन्धमननुभवन्, असंबन्धाग्रहणसारूप्येण पीतं तपनीयपिण्डं पीतं बिल्वफलमित्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोरारोप्याह पीतः

तत्संसर्गस्य वाभावः। नन्वेतत् स्मृतौ नास्ति। कथमिदं स्मृतिसारूप्यमुक्तं, प्रसिद्धप्रमावैरूप्यस्य स्मृतिसारूप्यस्य निर्वाहकत्वादिति ब्रूमः। तथापि कथमतिव्याप्तिनिवृत्तिरत आह—सन्निहितेति। पूर्वोक्तासन्निधिवैपरीत्यं सन्निधिः अप्यर्थश्चकारः। समीचीनमपि प्रत्यभिज्ञानं सन्निहितविषयमित्यन्वयः। यद्येवं परत्रासन्निहितस्यावभास इत्येतावदेवास्तु लक्षणम्। किं पूर्वदृष्टेति, सत्यम्। आरोप्यस्य स्वरूपसत्ता नोपयुज्यत इति ज्ञापनार्थं न च लक्षणप्रवेशीत्यदोषः स्वप्नभ्रमस्य निरधिष्ठानत्वात् परत्रेति विशेषणाव्याप्तिमाशङ्क्याह—नापीति। स्मर्यत इति स्मृतिः, तत्र विभ्रमः स्वप्नदृष्टद्रव्याणां स्मर्यमाणानामप्यधिष्ठानं नास्तीत्याशङ्क्य तान्येवाधिष्ठानं आरोप्यास्तधर्मा इत्याह—तत्रापीति। यद्यधिष्ठानं स्मर्येत असन्निहितत्वं ज्ञायेत ततश्च सन्निहितभ्रमो न स्यादित्याशङ्क्याह—स्मर्यमाणेऽपीति। स्वरूपमेव स्मर्यते नासन्निधानमित्यर्थः। तत्र हेतुः निद्रेति। पूर्वदर्शनस्थलमाह—तत्र तत्रेति। आरोप्योपनायकसंस्कारदार्ढ्याय वा। नन्वत्यन्तादृष्टस्याप्युपलम्भः स्वप्ने। अत उक्तं एवेति। अन्यार्थं विशेषणतयोक्तपूर्वदृष्टत्वस्य प्रसिद्धगृह्यमाणसमारोपेष्वव्याप्तिमाशङ्क्याऽह—एवमिति। अव्याप्तिशङ्काहेतु गृह्यमाणारोपत्वमपनुदन् योजनाप्रकारमाह—तथाहीत्यादिना। पीततामनुभवन्तीत्यन्वयः। निराश्रया सैव कथमत उक्तं—पित्तद्रव्येति। असंप्रयुक्ता कथमनुभूयेत। अत उक्तं नयनेति। सर्वदा तर्हि गृह्येत। अत आह बहिर्विनिर्गच्छदिति। गोलकान्तरितस्य निर्गमनकारणं अत्यच्छेति। तर्हि पीतं पित्तमिति स्यादत आह—पित्तरहितां अगृहीतपित्ताम्। अग्रहणं च पित्तान्वयदोषात्। द्वयोर्गृह्यमाणत्वं कथमत आह—शङ्खं चेति। शुक्लिमापि प्रतीयेत अत उक्तं द्रव्यमात्रम् शङ्खमात्रम्। संप्रयोगे सति रूपाग्रहः कथमत आह—दोषेति। तर्हि शङ्खः पीतिमा चेति स्यात्। अत आह पीततायाश्चेति। चकारो दोषानुषङ्गसूचकः, तर्ह्युदासीनेति, नेत्याह—सामानाधिकरण्यमित्यादि। यद्वा द्वयोर्गृह्यमाणत्वे पूर्वदृष्टमारोप्य न स्यादत उक्तं सामानाधिकरण्यमित्यादि।

---

[1] द्रव्यमात्रमिति कल्पतरौ न विद्यते।

शङ्ख इति। एतेन तिक्तो गुड इति प्रत्ययो व्याख्यातः। एवं विज्ञातृपुरुषाभिमुखेष्वादर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा सौर्येण तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंयुक्तं मुखं ग्राहयत्; दोषवशात्तस्य तद्देशतामनभिमुखतां च मुखस्याग्राहयत्, पूर्वदृष्टाभिमुखादर्शोदकदेशतामाभिमुख्यं च मुखस्यारोपयतीति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति। एतेन द्विचन्द्रदिङ्मोहालातचक्रगन्धर्वनगरवंशोरगादिविभ्रमेष्वपि यथासंभवं लक्षणं योजनीयम्। एतदुक्तं भवति— न प्रकाशमानतामात्रं सत्वं, येन देहेन्द्रियादेः प्रकाशमानतया सद्भावो भवेत्। न हि सर्पादिभावेन रज्ज्वादयो वा स्फटिकादयो वा रक्तादिगुणयोगिनो न प्रतिभासन्ते, प्रतिभासमाना वा

सामानाधिकरण्यमेकाश्रयत्वम्। ततश्च पीतिम्नः शङ्खत्वजातिमत्संसर्ग इत्युक्तं भवति। तस्य पूर्वदृष्टिस्थलं पीतमिति। इह गृह्यमाणौ गुणगुणिनौ अधिष्ठानम्। आरोप्यस्तु पूर्वदृष्टसंसर्ग इत्यर्थः। तथा चैक्यारोपः कथं न भवति। अत आह—**असंबन्धाग्रहणेति**। पीततपनीयपिण्डादावसंबन्धाग्रहणे गुणगुणिनोः संबन्धप्रत्ययो दृष्टः। तत्सारूप्यादिहापि संसर्गप्रत्यय एवेत्यर्थः। पीतत्वं गुणः। प्रतिबिम्बभ्रमे न मुखं पूर्वदृष्टम्। स्वमुख्यस्या . . . . त्। अत एव न गृह्यमाणयोर्मुखदर्पणयोः संयोगाध्यासोऽपीत्यव्याप्तिरत आह—**एवमिति**। **चाक्षुषं तेजः** आरोपयतीत्यनेन सम्बन्धः। आदर्शोदकयोर्देश एव देशो यस्य तत्तथा। ततः पूर्वदृष्टे . . . . ताम्। ननु दर्पणं ग्राहयति मुखे कथमारोपयति अत आह—**मुखं ग्राहयत्**, प्रमात्रा दर्पणसंयुक्तं कथं मुखं ग्राहयेदत उक्तम्। ननु परागिन्द्रियप्रवृत्तिः कथं मुखसंयोगः। अत आह—**प्रतिस्रोत इति**। प्रवर्तकमाह—**सौर्येणेति**। नायनं ज्योतिरेव सौरं कथं न परावर्तयेदत आह—**बलीयसेति**। बलीयस्त्वे कारणमादर्शादेः स्वच्छत्वम्। स्वच्छेषु सावित्रं तेजो विशेषतः स्फुरतीत्यर्थः। प्रबलत्वेऽप्यसन्निहितं कथं परावर्तयेदत आह—**लग्नमिति**। तल्लग्नमपि तान्येव न गृह्णाति। मुखेऽपि संलग्नत्वादित्यपि शब्दः। आभिमुख्यारोपः कथं, दर्पणादेः पुरुषविशेषं प्रत्यनभिमुखत्वादत उक्तं **विज्ञात्रिति**। मुखग्रहणे ग्रीवास्थत्वादि गृह्येत अत उक्तं— [1]**तस्य तद्देशतामित्यादि**। दोषस्तत्र हेतुः। **एतेनेति**। चन्द्रे द्वित्वं, दिशि दिगन्तरं, भ्रमत्यलाते चक्राकारत्वं, अभ्रवृन्दे नगरं, मण्डूकवसासिक्तचक्षुर्वीक्षितेषु वंशेषु सर्पाकारः, पूर्वदृष्ट आरोप्यते। आदिशब्दात् मरीचिमण्डले केशोण्डुकादिभ्रमः। भवत्वेवं लक्षणम्। तदाख्यानेनैव कथमाक्षेपस्य परिहारः, अत आह—**एतदुक्तमिति**। चिदात्मनः स्वतः प्रकाशमानता सत्तेति हृदि कृत्वा मात्रग्रहणम्। प्रकाशमानत्वं सत्त्वमिति लक्षणे को दोषः, अतिव्याप्तिरित्याह—**नहीति**। रज्ज्वादेः सर्पादिभावोऽपि लक्ष्य एवेति, नेत्याह—**प्रतिभासमाना वेति**।

[1] तस्येति कल्पतरौ न विद्यते।

भवन्ति तदात्मानस्तद्धर्माणो वा । तथा सति मरुषु मरीचिचयं 'उच्चावचमुच्चलत्तुङ्गतरङ्गभङ्गमालेयमभ्यर्णमवतीर्णा मन्दाकिनी' इत्यभिसन्धाय प्रवृत्तस्तत्तोयमापीयापि पिपासामुपशमयेत । तस्मादकामेनाप्यारोपितस्य प्रकाशमानस्यापि न वस्तुसत्त्वमभ्युपगमनीयम् । न च-मरीचिरूपेण सलिलमवस्तुसत्, स्वरूपेण तु परमार्थसदेव, देहेन्द्रियादयस्तु स्वरूपेणाप्यसन्त इत्यनुभवागोचरत्वात्कथमारोप्यत इति—सांप्रतम्; यतो यद्यसन्तो नानुभवगोचराः, कथं तर्हि मरीच्यादीनामसतां तोयतयानुभवगोचरत्वम्, न च स्वरूपसत्त्वेन तोयात्मनापि सन्तो भवन्ति ।

तद्धर्माणो वा नहीति पूर्वेण सम्बन्धः । तथात्वे दोषमाह—**तथा सतीति** । **मरुषु** शर्करादेशेषु । **अयं** वादी । **उच्चावचं** अनेकभेदं । **तरङ्गभङ्गाः** तरङ्गैकदेशाः । उच्चलतो मरीचीन् मन्दाकिनीत्यभिसंधायेति संबन्धः । यद्येवं नेष्येत तदुक्तदोषनिस्तारो न मृग्यः । स नास्तीत्युपसंहरति—**तस्मादिति** । परोक्तव्याघातनिवृत्तिसूचकोऽपिशब्दः । न प्रकाशमानत्वं सत्यत्वमावहेदध्याससामान्यलक्षणस्य प्रकाशगर्भत्वादिति मत्वा लक्षणाख्यानेनैव पर्यहार्षीदिति भावः । ननु परत्रासन्निहितपरावभास इत्यलक्षणम् । असन्निहितशब्देनातदात्मग्रहणे वा लक्षणस्याननुगतेः । परत्र घटे पटाद्यसन्निहितस्य घटरूपादेरवभासेऽपि प्रसङ्गात् । तत्र तदसन्निहितस्यावभास इत्युक्तौ तत्त्वसामान्यस्याभावेन लक्षणाननुगमात् । असन्निहितशब्देनाविद्यमानतामात्रग्रहे घटधर्मस्य तत्रैव पूर्वमसतो ग्रहे प्रसंगात् । सर्वदेत्युक्ते लक्षणस्यासंभवित्वादारोपितस्यापि प्रतिभाससमये सत्त्वात् । असन्निधानशब्देनेन्द्रियासंपर्कोक्तौ परोक्षप्रमायामतिव्याप्तेरसन्निहितपदव्यावर्त्यक्लेशस्य चोक्तत्वादित्यादिदोषग्रस्तत्वादिति । सत्यम् । अत एव क्लिष्टमित्यवयुत्यलक्षणमवोचत् । दृष्टान्तवैषम्यशङ्कामनूद्य परिहरति—**न चेति** । तोयस्य स्वरूपसत्त्वं वैषम्यम् । अवश्याङ्गीकार्यत्वसूचनायैवकारः । सत्त्वे भ्रमो न स्यादत उक्तं—**मरीचीति** । स्वरूपेणापि, न केवलं चिदात्मरूपेण, असन्तः, अपरमार्थाः । **अनुभवागोचरत्वादिति** । परमार्थसत एवानुभाव्यत्वादित्यर्थः । आरोप्यस्य प्रतीतिरेवोपयुक्ता न वस्तुसत्तेति प्रागेवोक्तत्वाद्वृथेयमाशङ्केति चेत् । तन्न, या प्रतीतिरुपयुज्यते सैव केनचिद्रूपेणापरमार्थस्य नास्तीति, इदानीमाक्षेपात् । यदि तोयं स्वरूपेण सत्, तदेव संप्रयोगसमये तोयमिति प्रतीयताम् । न मरीचयः । तेषां तेनाकारेणासत्त्वात्, असत्प्रतिभासानङ्गीकाराच्च त्वयेत्याह—**यत इति** । यद्यसदित्यादेः परिहारो यत्र इत्यर्थः । **असत्** परमार्थसत्त्वरहितम् । तोयतया असतां अपरमार्थसताम् अनुभवगोचरत्वं तोयतया भवत्येव । स्वरूपेण परमार्थसत्त्वादित्याशङ्क्याह—**न चेति** । स्वरूपसत्त्वं मरीचिरूपेण ग्रहणमाधत्ताम् । न तोयरूपेण । तद्रूपासत्त्वमनिवारयतस्तद्रूपग्रहणोपयोगाभावात् । अन्यथातिप्रसङ्गात् । अतः अपरमार्थसदेव तोयं तत्र भातीति वाच्यम् । एवं च देहादिभिरसद्भिः किमपराद्धमित्यर्थः । सत्यमसदेव तोयम् । तत्तु सदभिन्नमिति

यद्युच्येत नाभावो नाम भावादन्यः कश्चिदस्ति, अपि तु भाव एव भावान्तरात्मनाऽभावः स्वरूपेण तु भावः, यथाहुः—'भावान्तरमभावो हि कयाचित्तु व्यपेक्षया' इति, ततश्च भावात्मनोपाख्येयतयास्य युज्येतानुभवगोचरता, प्रपञ्चस्य पुनरत्यन्तासतो निरस्तसमस्तसामर्थ्यस्य निस्तत्वस्य कुतोऽनुभवविषयभावः, कुतो वा चिदात्मन्यारोपः। न च विषयस्य समस्तसामर्थ्यस्य विरहेऽपि ज्ञानमेव तत्तादृशं स्वप्रत्यय[1]सामर्थ्याददृष्टान्तसिद्धस्वभावभेदमुपजातमसतः प्रकाशनं, तस्मादसत्प्रकाशनशक्तिरेवाविद्येति—सांप्रतम्; यतो येयमसत्प्रकाशनशक्तिर्विज्ञानस्य किं पुनरस्याः शक्यं, असदिति चेत्, किं तत्कार्यमाहोस्विदस्या ज्ञाप्यम्। न तावत्कार्यम्; असतस्तत्वानुपपत्तेः। नापि ज्ञाप्यं; ज्ञानान्तरानुपलब्धेः, अनवस्थापाताच्च।

प्रतीतिं निर्वहेत्। न देहादेरत्यन्तासत इत्याशङ्कते—**यद्युच्येतेत्यादिना**। भवतीति भावः सन्। सतः भावात्। अभावोऽन्यो नेत्यन्वयः। तर्ह्यसद्व्यहारलोपः, अत आह—**स्वरूपेणेति**। भावः सन्। भावान्तरमिति सदन्तरम्। सदन्तररूपेण असदित्यर्थः। प्रकृतासङ्गता कथा मा भूदित्याह **ततश्चेति**। भावात्मना मरीचिरूपसदात्मना। **उपाख्येयतया** अनुभवार्हतया। अस्य असतस्तोयस्य। असत्तोयं नाम मरीचय एव। ते च सन्त इति तोयप्रतीतिरिति भावः। सैव विधा प्रकृते अस्तु अत आह—**प्रपञ्चस्येति**। प्रपञ्चस्य शरीरादेः। अत्यन्तासतः किञ्चित्परमार्थभेदशून्यस्य त्वन्मते तत्र हेतुः—**निस्तत्त्वस्य** अप्रामाणिकस्य। प्रामाणिकमेव हि केनचिद्रूपेण सदित्यर्थः। एवमप्यनुभवः कुतो न स्यादत आह **निरस्तेति**। अपरमार्थत्वेन सर्वसामर्थ्यशून्यस्य साक्षात्कारजननेऽप्यसामर्थ्यादित्यर्थः। एवमनिर्वाच्यमतं निरस्य सद्वादी प्रसङ्गाच्छून्यमतमाशङ्क्य निरस्यति—**न चेत्यादिना**। ज्ञानमेवासतः प्रकाशनमित्यन्वयः। एवकारव्यवच्छेदोक्तिर्विषयस्येत्यादिः। तर्हि व्यवहारविशेषः कुतः, अत आह—**तादृशम्** आकारविशेषवत्। विषयाभावे तादृग्ज्ञानमेव कुतः अत आह—**स्वप्रत्ययेति**। किन्तु वासनादिस्वकारणबलादित्यर्थः। नन्वेवमन्यत्र दृष्टम्। सत्यमत्रैवागत्या कल्प्यत इत्याह—**अदृष्टान्तेति**। तस्यासत्प्रकाशनयोग्यं महिमानं सूचयति—**तदिति**। नन्विद्यया असन्तो भान्तीति बौद्धाः। कथं ज्ञानमसत्प्रकाशनमत आह—**तस्मादिति**। शक्याभावे शक्तिरप्ययुक्तेत्याह—**येयमिति**। प्रश्नं मत्वा शङ्कते—**असदिति**। शक्ययोर्द्वैविध्याद्विकल्पः। तत्त्वं कार्यत्वम्। **ज्ञानान्तरेति**। शक्तिमत्त्वेनेष्टाद् ज्ञानादन्यस्य ज्ञानस्यानुपलम्भपराहतत्वादित्यर्थः। धारावाहिनीव नैरन्तर्यात् ज्ञानभेदाभावमाशङ्क्याह—**अनवस्थेति**।

---

[1] सामर्थ्यासादितादृष्टान्त इति निर्णयसागरमुद्रितभामतीपुस्तकस्थः पाठः। तिलकादृतः पाठः भामतीविवरणेऽपि दृश्यते।

विज्ञानस्वरूपमेवासतः प्रकाश इति चेत्, कः पुनरेष सदसतोः संबन्धः । असदधीननिरूपणत्वं सतो ज्ञानस्यासता संबन्ध इति चेत्, अहो बतायमतिनिर्वृतः प्रत्ययतपस्वी यस्यासत्यपि निरूपणमायतते, न च प्रत्ययस्तत्राधत्ते किञ्चित्, असत आधारत्वायोगात् । असदन्तरेण प्रत्ययो न प्रथत इति प्रत्ययस्यैवैष स्वभावो न त्वसदधीनमस्य किञ्चिदिति चेत्, अहो बतास्यासत्पक्षपातो यदयमतदुत्पत्तिरतदात्मा च तदविनाभावनियतः प्रत्यय इति । तस्माद-त्यन्तासन्तः शरीरेन्द्रियादयो निस्तत्त्वा नानुभवविषया भवितुमर्हन्तीति । अत्र ब्रूमः—निस्तत्त्वं चेन्नानुभवगोचरः, तत्किमिदानीं मरीचयोऽपि तोयात्मना सतत्वाः, यदनुभवगोचराः स्युः । न सतत्त्वाः; तदात्मना मरीचीनामसत्त्वात् । द्विविधं च वस्तूनां तत्त्वं सत्त्वमसत्त्वं च । तत्र पूर्वं स्वतः, परं तु परतः । यथाहुः—'स्वरूपपररूपाभ्यां नित्यं सदसदात्मके । वस्तुनि ज्ञायते किञ्चिद्रूपं कैश्चित्कदाचन ॥' इति । तर्किं मरीचिषु तोयनिर्भासप्रत्ययस्तत्त्वगोचरः, तथा च समीचीन इति न भ्रान्तो नापि बाध्येत । अद्धा न बाध्येत, यदि मरीचीनतो-

---

तस्यापि पूर्वतुल्यशक्तियोगादित्यर्थः । तर्हि मास्तु शक्तिः, विज्ञानस्वरूपमेवाविद्या भविष्यतीति शङ्कते—**विज्ञानेति** । षष्ठ्यर्थं विकल्पयति—**क इति** । निरूप्यनिरूपकभावः अविनाभावो वेत्यर्थः । असतो निरूपकत्वमपि नेति सोपहासमाह—**बतेति** । अतिनिर्वृतः अतिसुखितः । अन्येषां सत्येव किञ्चिदायतते उपकृते च, अस्य तु, अनुपकृते, असति चायतते इत्युपहासः । अनुपकृतत्वं व्यनक्ति **न चेति** । द्वितीयं सोपस्कारमाशङ्कते—**असदन्तरेणेति** । प्रत्यय इति ब्रूम इति शेषः । धूमादीनां तदुत्पत्तिः शिंशपादीनां तादात्म्यमविनाभावमूलमिति बौद्धनियमादित्यर्थः । न चान्यः षष्ठ्यर्थः सम्भवतीत्युपसंहरतीति—**तस्मादिति** । शङ्कां पूजयन्नुत्तरं प्रतिजानीते—**अत्रेति** । असत्प्रतीतिवारणं तवायुक्तमिति गूढाभिसन्धिराह—**निस्तत्त्वमिति** । **निस्तत्त्व** सदाकाररहितम् । **सतत्त्वाः** सदाकारसहिताः । किमस्य प्रश्नस्य प्रापकम् ; सत्यनिष्ठोऽनुभव इत्याह—**यदिति** । अभिसन्धिमविद्वान् प्रागुक्तमाशङ्कते—**नेति** । सतत्त्वाः तोयात्मने-त्यनुषङ्गः । सत् कथमसदुच्यते । नैष दोषः सर्वस्यैवं भावस्योक्तत्वादित्याह—**द्विविधमिति** । तत्त्वं अबाध्यं रूपम् । सत्त्वं सदाकारः । असत्त्वं असदाकारः । तर्हि युगपद् द्वयं प्रतीयेत अत आह—**तत्रेति** । **स्वतः**, अनन्यापेक्षया । स्वरूपपररूपाभ्यां यथासंख्यं सदसदात्मके किञ्चिद्रूपं कदाचिज्ज्ञायते । न युगपदपि । एकेनैकं ज्ञायते अन्येनान्यदित्यर्थः । अनुद्घाटयन्नेवाभिप्रायं परिहरति—**तत्किमिति** । इष्टापत्तिमाशङ्क्याह—**नापीति** । बाधो हि दुर्वार इत्यर्थः । अभिसन्धिमविद्वानेव दोषोद्धारं शङ्कते—**अद्धेति** ।

यात्मतत्वानतोयात्मना गृह्णीयात्, तोयात्मना तु गृह्णन्कथमभ्रान्तः कथं वाऽबाध्यः। हन्त तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तावन्न सत्; तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेः। नाप्यसत्; वस्त्वन्तरमेव हि वस्त्वन्तरस्यासत्त्वमास्थीयते 'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्' इति वदद्भिः। न चारोपितं रूपं वस्त्वन्तरम्। तद्धि मरीचयो वा भवेत्, गङ्गादिगतं तोयं वा। पूर्वस्मिन् कल्पे मरीचय इति प्रत्ययः स्यान्न तोयमिति। उत्तरस्मिंस्तु गङ्गायां तोयमिति स्यात्, न पुनरिहेति। देशभेदास्मरणे तोयमिति स्यान्न पुनरिहेति। नच—इदमत्यन्तमसन्निरस्तसमस्तस्वरूपमलीकमेवास्त्विति—सांप्रतम्; तस्यानुभवगोचरत्वानुपपत्तेरित्युक्तमधस्तात्। तस्मान्न सत्; नापि सदसत्; परस्परविरोधादित्यनिर्वाच्यमेवारोपणीयं

अतोयात्मतत्त्वान् तोयात्मना सतत्त्वान्। असत्तोयमित्यगृहीत्वा सत्तोयमिति **ग्रहणात्** भ्रमबाधादित्यर्थः। अभिसन्धिमुद्घाटयन् परिहरति—**हन्तेति**। मरीचिषु स्फुरत्सत्तोयात्मकत्वं सदसद्वेति विकल्प्याद्यं दूषयति **तोयाभावात्मनां** असत्तोयात्मनाम् तोयभावात्मत्वम् सत्तोयरूपत्वं, तोयाभावात् असत्तोयात् कथमसन्न भवति मरीचिनां तोयरूपेणासत्त्वादित्याशङ्क्याह—**वस्त्वन्तरमिति**। असत्त्वं असद्रूपं। **भावान्तरम्** सदन्तरं अभावः। असन्मरीचिनां तोयात्मत्वमपि वस्त्वन्तरमत आह—**न चेति**। उक्तासिद्धिमाशङ्क्याह—**तद्धीति**। तद् वस्त्वन्तरं भवदारोपितं रूपम्। अस्मिन्भ्रमे द्वयोरेव प्राप्तत्वाद्विकल्पः। देशान्तरस्थं तोयमिति, परमज्ञा गङ्गादीति विशेषणम्। द्वितीयेऽपि गङ्गादिगतत्वं किं प्रतीतिनिवेशि, अवस्तुमात्रगतम्, नाद्य इत्याह—**गङ्गायामिति**। आदिशब्दगृहीतस्यैतस्यैतदुपलक्षणम्। इतिशब्दो वा प्रदर्शनार्थः। **इह**। पुरोदेशे। न द्वितीय इत्याह—**देशभेदेति**। देशभेदास्मरणं वस्तुमात्रगतत्वे हेतुः अस्मरणं च दोषात्। स्मर्यमाणे हि देशे तत्सम्भेदो, भायादित्यर्थः। **न पुनरिहेति**। **इह** पुरोदेशे। ततश्चेदमिति न स्यात्, पुरोदेशसम्बन्धस्येदमर्थत्वादित्यर्थः। एवं पूर्वविकल्पेऽपि दोषान्मरीचित्वाग्रहेऽपीदमित्येव स्यात्। न तोयमित्युक्तप्रायम्। तदनेन सत्त्वस्य सदन्तराभिन्नसत्वस्य च दुर्वचत्वादारोप्यमत्यन्तासदिति प्राप्तमित्युक्तं भवति। अस्तु तर्ह्यत्यन्तासदेव नेत्याह—**नचेदमिति**। इदमारोपितम्। तस्यैव विवरणं निरस्तेति। सर्वप्रकारसत्तारहितम्। अलीकं भ्रान्तिदृश्यम्। इदमलीकमत्यन्ततुच्छमेवास्त्विति सम्बन्धः। **अधस्तात्** प्रतीतिरेवत्वत्यन्तासत इत्यादिषु स्थलेषु। ननु सदसत्त्वयोरेकत्र निषेधोऽनुपपन्नः। एक निषेधस्येतरविधिनान्तरीयकत्वादत आह—**तस्मादिति**। सदसन्निषेधोऽनुपपन्नः। अनिर्वाच्यकोटेरन्यस्याः सम्भवादित्यर्थः। तर्हि समुच्चयकोटिरेवास्तु अत आह—**नापीति**। अपिशब्दात्प्रत्येकपक्षदूषणाकर्षणश्रमं नुदति। **परस्परेति**। इतिहेतौ। सच पक्षत्रयाभावः। तोयस्यानिर्वाच्यत्वे पिपासोः

मरीचिषु तोयमास्थेयं, तदनेन क्रमेणाध्यस्तं तोयं परमार्थतोयमिव, अत एव पूर्वदृष्टमिव, तत्त्वतस्तु न तोयं न च पूर्वदृष्टं, किन्त्वनृतमनिर्वाच्यम्। एवं च देहेन्द्रियादिप्रपञ्चोऽप्यनिर्वाच्यः, अपूर्वोऽपि पूर्वमिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्यत इति उपपन्नम्; अध्यासलक्षणयोगात्। देहेन्द्रियादिप्रपञ्चबाधनं चोपपादयिष्यते। चिदात्मा तु श्रुतिस्मृतीतिहासपुराणगोचरः तन्मूलतदविरुद्धन्यायनिर्णीत[1]बुद्धशुद्धमुक्तनित्यस्वभावः सत्त्वेनैव निर्वाच्यः।

कथं प्रवृत्तिरत आह—**तदनेनेति**। परमार्थतोयमिव तोयत्वहेतुकानुमानाभासेन तृष्णाशान्तिहेतुत्वानुमानेन प्रवृत्तिरित्यर्थः। न च प्रवृत्तिसिद्धये सत्यत्वमेवास्त्विति वाच्यमित्याह—**अनेन क्रमेणेति**। **तत्** तत्र मरीचिषु। अध्यस्तं तोयं नूतनम्। पूर्वदृष्टेति भाष्यविरोधः नेत्याह—**अत एवेति**। पूर्वदृष्टसाजात्यं भाष्येऽभिप्रेतमित्यर्थः। किमप्रतीतार्थग्रहणेन, यथाश्रुते दोषादित्याह—तत्त्वतस्त्विति। परमार्थतोयत्वाभावान्मुख्यं पूर्वदृष्टत्वं नेत्यर्थः। न चेत्परमार्थतोयं, अतोयमेव तत् अत आह—**किन्त्वनृतमनिर्वाच्यं** तोयमित्यन्वयः। सत्यानृते इत्यारोप्यस्यानृतत्वोक्तेरित्याह—**अनृतमिति**। इतोऽस्य सत्यदृष्टतोयतुल्यत्वं यदि पूर्वदृष्टत्वं, तर्हि देहादौ तन्नास्ति सत्यदेहाद्यभावात्; अत आह—**एवमिति**। देहेन्द्रियादिप्रपञ्चोऽपि अध्यस्यत-इत्यन्वयः। तत्किं देहादेरपि मरीच्यादिष्वध्यासः नेत्याह—**परत्र चिदात्मनीति**। पूर्वदृष्टिमाह—**पूर्वेति**। पूर्वप्रकृतेन तौल्याभावेऽपि तदा प्रतीतितौल्यमस्तीत्यर्थः। मुख्यां पूर्वदृष्टिं निरस्यति—**अपूर्व इति**। अपिर्विरोधार्थः। अपूर्वत्वे हेतुरनिर्वाच्य इति। ननु सत्येतस्मिन् वैषम्ये कथमेवङ्कारः। अत आह—**अध्यासेति**। लक्षणे हि पूर्वदृष्टस्य न सत्यत्वं विशेषणमित्यर्थः। तथापि कथं तत्र संक्षिप्तलक्षणमत आह—**देहेन्द्रियादीति**। उपपादयिष्यत्याचार्य इति शेषः। तदेवं देहादयो नासन्तः, प्रकाशमानत्वात् चिदात्मवदित्यत्र मरीचितोयेनैकान्त्यमुक्तम्। उपाधिमप्याह—**चिदात्मा त्विति**। निर्वाच्यत्वमुपाधिरित्यर्थः। निरुच्यमानं रूपमाह—**सत्त्वेनेति**। तस्य निरपवादत्वमाह—**एवेति**। न चास्य मिथ्यात्वसाधनं दृश्यत्वमस्तीत्याह—**बुद्धेति**। ज्ञानेत्यर्थज्ञानत्वे स्यादुत्पत्त्यादिदोषः अत आह—**शुद्धेति**। स दोषो वृत्तिज्ञानस्यैवेत्यर्थः। कथं बुद्धता बुद्धेस्तद्गुणत्वादत आह—**मुक्तेति**। मुक्तिः कैवल्यम्। **नित्यः** केवलो निर्गुण इति यावत्। बुद्धत्वादिना निर्वाच्यत्वे मूलमाह—**श्रुतीति**। श्रुत्यादेरर्थान्तरमाशङ्क्याह—**न्यायेति**। ननु न्यायेनान्यथापि निर्णेतुं शक्यते - अत आह—**तदविरुद्धेति**। विरोधिन्यायः

---

[1] शुद्धबुद्धमुक्तस्वभाव इति कल्पतरुधृतः पाठः

अबाधिता स्वयंप्रकाशतैवास्य सत्ता, सा च स्वरूपमेव चिदात्मनः न तु तदतिरिक्तं सत्तासामान्यसमवायोऽर्थक्रियाकारिता वेति सर्वमवदातम्। स चायमेवंलक्षणकोऽध्यासोऽनिर्वचनीयः सर्वेषामेव संमतः परीक्षकाणां, तद्भेदे परं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढयितुमाह - तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति। अन्यधर्मस्य, ज्ञानधर्मस्य, रजतस्य। ज्ञानाकारस्येति यावत्। अध्यासोऽन्यत्र बाह्ये। सौत्रान्तिकनये तावद्बाह्यमस्ति वस्तु सत्, तत्र ज्ञानाकारस्यारोपः। विज्ञानवादिनामपि यद्यपि न बाह्यं वस्तु सत्; तथाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यम्, तत्र ज्ञानाकारस्यारोपः। उपपत्तिश्च यद्यादृशमनुभवसिद्धं रूपं तत्तादृशमेवाभ्युपेतव्यमित्युत्सर्गः। अन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात्, नेदं रजतमिति च

शिरःकपालशुद्ध्यनुमानकल्प इत्यर्थः। ननु तर्काप्रतिष्ठानं वक्ष्यति अत आह —**तन्मूलेति**। केवलस्यैवाप्रतिष्ठानमित्यर्थः। नन्वात्मनः प्रकाशमानतैव सत्ता सा च देहादिषु, अतस्तेऽपि सत्त्वेनैव निर्वाच्या इति साधनव्याप्तिमाशङ्क्याह—**अबाधितेति**। अबाध्यत्वं स्वयंप्रकाशत्वं वा तस्य सत्त्वमित्यर्थः। तदनेनेदमप्युपाधिद्वयं सूचितम्। द्वैतापत्तिं परिहरति—**सा चेति**। यत्तु सत्तासामान्यादिदूषणं तदिष्टमित्याह—**नत्विति**। नन्वबाध्यत्वं साधनव्यापकं स्वयंप्रकाशत्वमात्मन्यप्यसिद्धमित्याशङ्क्याह—**इतीति**। मरीचितोये व्यभिचाराद्देहेन्द्रियादिप्रपञ्चबाधश्च ज्ञात एवेति स्वयंप्रकाशत्वस्य च वक्ष्यमाणत्वादित्यर्थः। नन्वध्यासलक्षणे मतान्तरोपन्यासो न संवादाय, विप्रतिपत्तेः। नापि दूषणाय तदनुक्तेरित्याशङ्क्य परत्र परस्यानिर्वाच्यस्यावभास इत्यंशे संवाद एव क्रियते। विवादस्त्वधिष्ठानारोप्यविशेष एवेत्यभिप्रेत्यावतारयति—**स चेति**। सः पूर्वमाक्षिप्य समाहितः। अयं पुनराक्षिप्तः अनिर्वचनीय एव सम्मत इत्यन्वयः। सम्मतिरप्यापादनद्वारेण। ननु सम्मत्युक्तेः किं फलमत आह—**अनिर्वचनीयतामिति**। कथं तर्हि मतभेदोऽत आह **तद्भेदेति**। **परं** केवलं। धर्म्यध्यासे अव्याप्तिमाशङ्क्य व्याचष्टे—**अन्येति**। एवमप्यपरिहारः। अत आह **रजतस्येति**। ननु रजतं ज्ञानस्य धर्मो नेष्यते अत आह—**ज्ञानाकारस्येति**। उपचाराद्धर्मोक्तिरित्यर्थः। षष्ठ्या कर्मधारयं व्यावर्तयति। अन्यत्र ज्ञानान्तर इति शङ्कां शमयति **बाह्य इति**। ननु ज्ञानाकारत्ववादिनो न बाह्यमिच्छन्ति अत आह —**सौत्रान्तिकेति**। बाह्यमनिच्छतो विज्ञानवादिनः कथं लक्षणसिद्धिरत आह—**विज्ञानेति**। **अलीकं** संवृतिसत्। तत्र हेतुरारोपितमिति। तद्धेतुरविद्यावासनेति। भ्रान्तिवासनेत्यर्थः। अनवस्थां परिहरति **अनादीति**। युक्तिं विना कथमेवं ब्रूते अत आह **उपपत्तिश्चेति**। तां दर्शयितुं सम्प्रतिपन्नमर्थमाह—**यदिति**। उत्सर्गत्वं अपवादेनाह **अन्यथात्वं** इति। बाधकत्वे हेतुः—**बलवदिति**। तर्हि

वदन्ति । केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति ।

बाधस्येदन्तामात्रबाधेनोपपत्तौ न रजतगोचरतोचिता; रजतस्य धर्मिणो बाधे हि रजतं च तस्य च धर्म इदन्ता बाधिते भवेताम् तद्वरमिदन्तैवास्य धर्मो बाध्यतां न पुना रजतमपि धर्मि। तथा च रजतं बहिर्बाधितमर्थादान्तरे ज्ञाने व्यवतिष्ठत इति ज्ञानाकारस्य बहिरध्यासः सिध्यति। केचित्तु ज्ञानाकारख्यातावपरितुष्यन्तो वदन्ति - यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति। अपरितोषकारणं चाहुः—विज्ञानाकारता रजतादेरनुभवाद्वा व्यवस्थाप्येतानुमानाद्वा। तत्रानुमानमुपरिष्टान्निराकरिष्यते। अनुभवोऽपि रजतप्रत्ययो वा स्यात्, बाधकप्रत्ययो वा। न तावद्रजतानुभवः; स हीदमिदंकारास्पदं रजतमावेदयति, न त्वान्तरम्, अहमिति हि तदा स्यात्, प्रतिपत्तुः प्रत्ययादव्यतिरेकात्। भ्रान्तं विज्ञानं स्वाकारमेव बाह्यतया अध्यवस्यति। तथाच नाहकारास्पदमस्य गोचरः। ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीयेति चेत्, हन्त बाधकप्रत्ययमालोचयत्वायुष्मान्। किं पुरोवर्ति द्रव्यं रजताद्विवेचयति, आहो ज्ञानाकारतामप्यस्य दर्शयति। तत्र ज्ञानाकारतोपदर्शनव्यापारं बाधकप्रत्ययस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः। पुरोवर्तित्वप्रतिषेधादर्थादस्य ज्ञानाकारतेति चेन्न; असंनिधानाग्रहनिषेधादसंनिहितो भवति प्रतिपत्तुः, अत्यन्तसंनिधानं त्वस्य प्रतिपत्रात्मकं

नेदमिति बाधितं रूप्यं कथं सत्यज्ञानाभिन्नमत आह—**नेदमिति**। धर्मिमात्रबाधेनाप्युपपत्तिः कुतो न स्यादत आह **रजतस्येति**। अस्तु द्वयं बाध्यं, न, कल्पनागौरवादित्याह—**तद्वरमिति**। अबाधे रजतं सत्यमस्तु कथं ज्ञानाकारता, अत आह—**तथा चेति**। मतद्वयमुपसंहरति—**इतीति**। विवेकाग्रहणेत्येक भेदस्य सिद्धत्वात्तयोर्वैय्यर्थ्यमाशङ्क्याह—**केचित्त्विति**। अपरितोषस्त्वर्थः। युक्तिमत्यपरितोषो न युक्त इत्यत आह—**अपरितोषेति**। **अनुभवात्**प्रत्यक्षात्। लघुत्वाद्द्वितीयमावेदयति—**तच्चेति**। अनुमानं सहोपलम्भनियमादित्येतत्। **उपरिष्टात्** बौद्धाधिकरणे। अतोऽत्र वक्तव्याभावात् लघुत्वम्। **स हीति**। हिः यस्मादर्थे। रजतमिदङ्कारास्पदमावेदयति गोचरयति। **आन्तरं** ज्ञानाकारं स्वाभेदादहमुल्लेखार्हं, रजतं। **बाह्यतया** इदन्तया। तत्र हेतुः **भ्रान्तमिति**। दोषजमित्यर्थः। अस्य गोचरो रूप्यम्। अहङ्कारास्पदमहमुल्लेखविषयो न। **तत्रेति**। रजतविवेकमात्रगोचरस्य ज्ञानाभेदगोचरतोक्तिरनुभूतिभग्नेत्यर्थः। अर्थापत्तिं शङ्कते—**पुरोवर्तित्वेति**। इदन्तानिषेधः अनिदन्तां गमयन् देशान्तरसत्त्वेऽप्युपपद्यत इति। अन्यथोपपत्तिमाह—**नेति**। **असन्निधानाग्रहनिषेधात्** अपुरोवर्तित्वस्य निषेधात् अर्थापत्तेरसम्भवमप्याह—

कुतस्त्यम् । न चैष रजतस्य निषेधः, न चेदन्तायाः, किन्तु विवेकाग्रहप्रसञ्जितस्य रजतव्यवहारस्य । न च रजतमेव शुक्तिकायां प्रसञ्जितं रजतज्ञानेन । न हि रजतनिर्भासस्य शुक्तिकालम्बनं युक्तम्; अनुभवविरोधात् । न खलु सत्तामात्रेणालम्बनम्; अतिप्रसङ्गात्, सर्वेषामर्थानां सत्त्वाविशेषादालम्बनत्वप्रसङ्गात् । नापि कारणत्वेन; इन्द्रियादीनामपि कारणत्वात् । तथा च भासमानतैवालम्बनार्थः । न च रजतज्ञाने शुक्तिका भासते इति कथमालम्बनम्, भासमानताभ्युपगमे वा कथं नानुभवविरोधः । अपि चेन्द्रियादीनां समीचीनज्ञानोपजनने सामर्थ्यमुपलब्धमिति कथमेभ्यो मिथ्याज्ञानसम्भवः । दोषसहितानां तेषां मिथ्याप्रत्ययेऽपि सामर्थ्यमिति चेन्न, दोषाणां कार्योपजननसामर्थ्यविघातमात्रे हेतुत्वात्, अन्यथा दुष्टादपि कुटजबीजाद्वटाङ्कुरोत्पत्तिप्रसङ्गात् । अपि च स्वगोचरव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः । तस्मात्सर्वं ज्ञानं समीचीनमास्थेयम् । तथा च रजतं, इदमिति च द्वे विज्ञाने स्मृत्यनुभवरूपे, तत्रेदमिति पुरोवर्तिद्रव्यमात्रग्रहणं, दोषवशात्तद्गतशुक्तित्वसामान्यविशेषस्याग्रहात्, तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजते स्मृतिं जनयति । सा

न चेति । नेदन्ताया निषेधः । तत् किं रजतस्य, नेत्याह —**रजतस्येति** । निषेध्याभावे निषेधो न स्यादत आह—**किन्त्विति** । रजतज्ञानाभावे कथं तद्व्यवहारः, अत आह—**विवेकाग्रहेति** । व्यवहारनिषेध इत्ययुक्तं भ्रमप्रयुक्तस्य रूप्यस्येदन्तादात्म्यनिषेधे व्यवहारस्य केवलमुच्छेदादित्यन्यथाख्यातिं निरस्यति —**न चेति** । शुक्तिकायां प्रसञ्जितं शुक्तीदमंशात्मना विषयीकृतं रजतं प्रसज्जितमेवेति संबन्धः । **नानुभवविरोधः**, अप्रतीतस्यापि पुरःसत्ताया एवालम्बनशब्दार्थत्वात् अत आह—**न खल्विति** । सदृश्याः शुक्तेः संस्कारोद्बोधद्वारा रजतज्ञानहेतुत्वात्तदालम्बनत्वमत आह—**नापीति** । न च विधान्तरमालम्बनत्वे सम्भवतीत्याह—**तथा चेति** । सैव शुक्तेरस्त्वत आह—**न चेति** । अवभासनमसिद्धमत आह—**भासमानेति** । ननु शुक्त्याकारस्यालम्बनत्वं न, किन्त्विदमाकारस्य स भासत एवेत्याशङ्क्याह—**अपि चेति** । ननु ज्ञानानामपि सम्यग्व्यवहारहेतुत्वमित्यादि तुल्यमित्याशङ्क्याह—**अपि चेति** । स्वगोचरव्यभिचारे अन्यज्ञानानामन्यगोचरत्वे, अनाश्वासस्याप्यभ्युपगमे निरङ्कुशव्यवहारलोप इति मत्वोपसंहरति—**तस्मादिति** । ननु रजतवदिदमंशोऽपि भात्येव । कथं विषयाव्यभिचारो न एकस्मिन्नभानादित्याह—**तथा चेति** । ननु रजतमसम्प्रयुक्तमत आह—**स्मृतीति** । तर्हीदमित्यनुभवः शुक्त्यनुभवान्तरवत् स्वार्थं भिन्द्यादत आह—**तत्रेति** । संयुक्तसमवाये सति कथं शुक्तित्वाग्रहणमत आह—**दोषेति** । अस्तु सम्प्रयोगादग्रहणं स्मृतिः कुतः । संस्कारोद्बोधात् स तुल्यस्वभाव इत्याह—**तन्मात्रं चेति** । सादृश्यात्

च गृहीतग्रहणस्वभावापि दोषवशादगृहीतत्वांशप्रमोषाद्ग्रहणमात्रमवतिष्ठते। तथा च रजतस्मृतेः पुरोवर्तिद्रव्यमात्रग्रहणस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात्, संनिहितरजतगोचरज्ञानसारूप्येण, इदं रजतमिति भिन्नेऽपि स्मरणग्रहणे अभेदव्यवहारं च सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः। क्वचित्पुनर्ग्रहणे एव मिथोऽगृहीतभेदे, यथा पीतः शङ्ख इति। अत्र हि विनिर्गच्छन्नयनरश्मिवर्तिनः पित्तद्रव्यस्य काचस्येव स्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते। शङ्खोऽपि दोषवशाच्छुक्लगुणरहितः स्वरूपमात्रेण गृह्यते। तदनयोर्गुणगुणिनोरसंसर्गाग्रहसारूप्यात्पीततपनीयपिण्डप्रत्ययाविशेषेणाभेदव्यवहारः समानाधिकरणव्यपदेशश्च। भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च नेदमिति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते, तदुपपत्तौ च प्राक्तनस्य प्रत्ययस्य भ्रान्तत्वमपि लोकसिद्धं सिद्धं भवति। तस्माद्यथार्थाः, सर्वे विप्रतिपन्नाः संदेहविभ्रमाः, प्रत्ययत्वात् घटादिप्रत्ययवत्। तदिदमुक्तम् यदध्यास इति यस्मिञ्शुक्तिकादौ यस्य रजतादेरध्यास इति लोकप्रसिद्धिः नासावन्यथाख्यातिनिबन्धना,

---

संस्कारभेदस्यैवोद्बोध इत्यर्थः। तर्हि तद्रूप्यमिति स्यात्, नेत्याह—**सा चेति**। तत्प्रमोषात् ग्रहणवतिष्ठतीत्यर्थः। एकज्ञानसाध्यो विशिष्टव्यवहारः कथं ज्ञानद्वयादत आह—**तथा चेत्यादिना**। **अभेदव्यवहार**मभिन्नोचितव्यवहारं विशिष्टप्रवृत्तिमिति यावत्। तादृग्व्यवहारहेतुत्वे हेतुः **सन्निहिते**। तत्र हेतु**र्मिथ इति**। ज्ञानभेदस्फुरणेऽपि तद्द्वारा विषयभेदःस्फुरेदत आह—**स्वरूपत इति**। घटादेस्तज्ज्ञानाच्च भेदग्रहान्मिथ इत्युक्तम्। **रजतस्मृतेरित्यादि** रजतमात्रस्मृतेरित्यर्थः। तत्किमिदानीमयथाव्यवहारो ग्रहणस्मरणजन्यः। तर्हि पीतः शङ्ख इत्यादौ न स्यादत आह **क्वचिदिति**। अत्राख्यातिवादिनामपि प्रागुक्तैव नीतिः। सामानाधिकरण्यारोपस्तु नेत्याह—**अत्र हीति**। मिथ्याप्रत्ययाभावे नेदं रजतमित्यस्य बाधकत्वप्रसिद्धिर्न स्यादत आह—**भेदेति**। **बाधनादु**च्छेदनात्। चकारः शङ्कोच्छेदी। बाध्यसद्भावात् भवतु तस्य बाधकत्वप्रसिद्धिः मिथ्याव्यवहारहेतुत्वादित्याह—**तदुपपत्तौ चेति**। प्रसिद्धेर्निर्वाह्यत्वं सूचयति **लोकेति**। ननु प्रक्रियामात्रमेतत्, न, प्रमाणवत्त्वादित्याह—**तस्मादिति**। **सन्देहविभ्रमा इति**। सन्देहा इति विभ्रमा इति प्रसिद्धा इत्यर्थः। तदसम्भवस्फुटीकरणाय **सर्व इति**। [अयथाव्यवहारहेतूनां वा पक्षत्वं विगीतनानापेक्षत्वमिति नाश्रयासिद्ध्यादि !] नन्वख्यातिपरं नैतद्भाष्यं यत्र यदध्यास इति भ्रम इति चायोगादित्याशङ्क्याह—**तदिदमिति**। अस्मदुक्तमेवोक्तं भाष्ये इत्यर्थः। यत्रेति पुरोदेशशङ्कां परिहरति **यस्मिन्निति**। कर्मधारयशङ्कां वारयति **यस्येति**। प्रमातृव्यवच्छेदाय यच्छब्दार्थैक्यभ्रमव्यावृत्त्यै वा **रजतेति**। तर्हि तयैव प्रसिद्ध्या पक्षोऽयं दुष्ट इति मा शङ्कीत्याह—**नासाविति**। **अन्यथाख्यातिः**

अन्ये तु - यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनां - आचक्षते इति ।

किन्तु गृहीतस्य रजतादेस्तत्स्मरणस्य च गृहीततांशप्रमोषेण, गृहीतमात्रस्य य इदमिति पुरोवस्थितादूद्रव्यमात्रात्तत्प्रज्ञानाच्च विवेकः, तदग्रहणनिबन्धनो भ्रमः। भ्रान्तत्वं च ग्रहणस्मरणयोरितरेतरसामानाधिकरण्यव्यपदेशो रजतादिव्यवहारश्चेति। अन्ये तु अत्राप्यपरितुष्यन्तः, यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते। अत्रेदमाकूतम्-अस्ति तावद्रजतार्थिनो रजतमिदमिति प्रत्ययात्पुरोवर्तिनि द्रव्ये प्रवृत्तिः, सामानाधिकरण्यव्यपदेशश्चेति सार्वजनीनम्। तदेतन्न तावद्ग्रहणस्मरणयोस्तद्गोचरयोश्च मिथो भेदाग्रहमात्राद्भवितुमर्हति। ग्रहणनिबन्धनौ हि चेतनस्य व्यवहारव्यपदेशौ कथमग्रहणमात्राद्भवेताम्। ननूक्तं नाग्रहणमात्रात्, किन्तु ग्रहणस्मरणे एव मिथः स्वरूपतो विषयतश्चागृहीतभेदे समीचीनपुरस्थितरजतविज्ञानसादृश्येनाभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः इति। अथ समीचीनज्ञानसारूप्यमनयोर्गृह्यमाणं वा व्यवहारप्रवृत्तिहेतुः, अगृह्यमाणं वा सत्तामात्रेण। गृह्यमाणेऽपि, 'समीचीनज्ञानसारूप्यं अनयोरिदमिति रजतमिति च ज्ञानयोः' इति ग्रहणं, अथवा 'तयोरेव स्वरूपतो विषयतश्च मिथो भेदाग्रहः' इति ग्रहणम्? तत्र न तावत् समीचीनज्ञानसदृशी इति ज्ञानं

अतस्मिंस्तद्बुद्धिः। निर्निबन्धना प्रसिद्धिः कुतः अत आह—किन्त्विति। [ताभ्याम् किन्तु नान्वयः] ननूक्तापरितोषस्त्वर्थः। तर्हि विज्ञानवादः स्वीकार्यः न, उभयापरितोषस्य त्वर्थत्वादित्याह—अत्रापीति। नन्वख्यातिः सुनिरूपिता। अत आह—अत्रेदमिति। रजतमिदमिति प्रत्ययात् इदंप्रत्ययागृहीतभेदाद् रजतप्रत्ययात्। एतच्च ज्ञानैक्यवादिनोऽप्यस्ति। भेदस्याभावादेवाग्रहणात्। एवं च प्रत्ययादित्येकवचनं कथं परं प्रतीति शान्तम्। व्यपदेशश्चेति सार्वजनीनम्। सत्यं को वान्यथाऽहेत्यत आह—नन्विति। तथाप्यभ्युपगमे प्रवृत्तिरग्रहादेवेति मतभङ्ग इत्यर्थः। सर्वजनप्रसिद्धिर्व्यवहारात्पूर्वं तादृक्प्रत्ययसत्तामात्रेण, न हेतुत्वेनेत्यत आह—ग्रहणेति। ग्रहणनिबन्धनत्वमिच्छाप्रयत्नद्वारा, व्यवहारहेतुत्वानुमेयं ग्रहणत्वमित्यर्थः। मात्रपदत्यागान्न प्रसिद्धिबाधः। अनुमानं च सिद्धसाधनमिति शङ्कते—नन्विति। यद्येवं दोषान्तरं ब्रूम इति मत्वा विकल्पयति—अथेति। हेतुः ज्ञानसहकारत्वेन अग्रहणेऽपि स्वरूपस्यानपायाद्धेतुत्वाच्युतिरिति दर्शयितुं सत्तामात्रेणेति। आद्यं विकल्पयति गृह्यमाणेऽपीति। सादृश्यमिति ग्रहणमित्यन्वयः। इह भेदाग्रहो हि समीचीनज्ञानसारूप्यम्। स किं तेनैव विशेषाकारेण गृह्यते सारूप्यमिति। सामान्याकारेण वा इति विकल्पार्थः। तत्रेति। समीचीनज्ञानोचितव्यवहारप्रवर्तकं न हि गोसदृशो गवय

समीचीनज्ञानवद्व्यवहारप्रवर्तकम् ; न हि गोसदृशो गवय इति ज्ञानं गवार्थिनं गवये प्रवर्तयति । अनयोरेव भेदाग्रह इति तु ज्ञानं पराहतं, न हि भेदाग्रहेऽनयोरिति भवति, अनयोरितिग्रहे भेदाग्रहणमिति च भवति । तस्मात्सत्तामात्रेण भेदाग्रहोऽगृहीत एव व्यवहारहेतुरिति वक्तव्यम् । तत्र किमयमारोपोत्पादक्रमेण व्यवहारहेतुः, आहोऽनुत्पादितारोप एव स्वत इति । वयं तु पश्यामः—चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेः, आरोपज्ञानोत्पादक्रमेणैवेति । ननु सत्यं चेतनव्यवहारो नाज्ञानपूर्वकः, किंत्वविदितविवेकग्रहणस्मरणपूर्वक इति । मैवम्—नहि रजतप्रातिपदिकार्थमात्रस्मरणं प्रवृत्तावुपयुज्यते । इदंकारास्पदाभिमुखी खलु रजतार्थिनां प्रवृत्तिरित्यविवादम् । कथं चायमिदंकारास्पदे प्रवर्तेत । यदि तु न तदिच्छेत् । अन्यदिच्छत्यन्यत्करोतीति व्याहतम् । नचेदिदंकारास्पदं रजतमिति जानीयात्कथं रजतार्थी तदिच्छेत् । यद्यतथात्वेनाग्रहणादिति ब्रूयात्स च प्रतिवक्तव्योऽथ तथात्वेनाग्रहणात्कस्मान्नोपेक्षेतेति । सोऽयमुपादानो-

---

इति (कृत्वा ज्ञानं) गवयज्ञानं गवयस्थगोसादृश्यद्वारकगोज्ञानसादृश्यवत्तया गृह्यमाणं गवयज्ञानं गोज्ञानोचितां प्रवृत्तिं न प्रसूत इत्यर्थः । कथं पराहतिः तत्र किं भेदग्रहणम्, योऽनयोर्भेदः स न गृह्यते इति वा ग्रहणम् । क्रमेण द्वयं दूषयति—**न हीत्यादिना** । नन्वस्य रूप्यज्ञानस्यास्मादिदंग्रहात् भेदो न गृह्यत इति ग्रहे न दोषः । अयमस्मादगृहीतभेदो घट इति ज्ञानवत् । सत्यं सति ज्ञाने तद्भेदाग्रहे च तद्ग्रहः केवलव्यतिरेकशून्यो वृथेति मत्वा द्वितीयं परिशिनष्टि—**तस्मादिति** । भेदाग्रहः भेदाग्रहलक्षणं सारूप्यम् । तथैव ब्रूम इत्याशङ्क्य विमृशति—**तत्रेति** । केवलस्य सामर्थ्यसूचनाय **स्वत इति** । ननु द्वितीय एव पक्षो युक्तः । तावतैव व्यवहारोपपत्तावारोपस्य गौरवोपहतत्वादित्याशङ्क्याह—**वयं त्विति** । परदृष्टे दुष्टता त्वर्थः । ज्ञानं विशिष्टमभिप्रेतम् । न ज्ञानपूर्वकत्वम् **अज्ञानपूर्वकत्वम्** । विशिष्टव्यवहारस्य विशिष्टज्ञानजत्वाभावानुपपत्तेरित्यर्थः । क्रमेणैव व्यवहारहेतुरित्यनेनान्वयः । अभिसन्धिमविद्वान् यथाश्रुति गृहीत्वा पूर्वोक्तं शङ्कते—**नन्विति** । इति उक्तमिति शेषः । **प्रातिपदिकार्थमात्रस्य** इदमसम्भिन्नस्य । स्मरणं ग्रहणाविविक्तमपीति शेषः । प्रतिज्ञामात्रत्वं परिहर्तुं सम्प्रतिपन्नमर्थमाह—**इदमिति** । किमतो यद्येवमत आह—**कथमिति** । तस्य ज्ञातत्वात् प्रवृत्तिः । न इच्छां विना । ज्ञानस्याप्रवर्तकत्वादित्याह—**यदीति** । यदि तदिच्छेत् तर्ह्येव तत्र प्रवर्तेतेत्यर्थः । नन्विच्छाज्ञानाभ्यामलम्, किं तदिच्छया अत आह **अन्यदिति** । अन्यत् करोति अन्यविषयं व्यवहरणम् । अस्त्विच्छा अत आह—**न चेति** । रजतं रजतत्वेन गृहीतम् । अस्तूपेक्षापीत्यत आह—सोऽयमिति यद्वा किं पुरोवर्तिनीच्छया इष्यमाणभेदाग्रहात् प्रवृत्तिरस्तु । मैवम् तदभेदाग्रहात् निवृत्तेरपि प्राप्तेरित्याह —**सोऽयमिति** । उपादानं तद्धेतुः इच्छा । निवर्ततां तर्हि द्वयम् अत आह—

पेक्षाभ्यामभित आकृष्यमाणश्चेतनोऽव्यवस्थित इदंकारास्पदे रजतसमारोपेणोपादान एव व्यवस्थाप्यत इति भेदाग्रहः समारोपोत्पादक्रमेण चेतनप्रवृत्तिहेतुः। तथाहि—भेदाग्रहादिदंकारास्पदे रजतत्वं समारोप्य, तज्जातीयस्योपकारहेतुभावमनुचिन्त्य, तज्जातीयतयेदंकारास्पदे रजते तमनुमाय, तदर्थी प्रवर्तत इत्यानुपूर्व्यं सिद्धम्। न च तटस्थरजतस्मृतिरिदंकारास्पदस्योपकारहेतुभावमनुमापयितुमर्हति; रजतत्वस्य हेतोरपक्षधर्मत्वात्। एकदेशदर्शनं खल्वनुमापकं नत्वनेकदेशदर्शनम्। यथाहुः—ज्ञातसम्बन्धस्यैकदेशदर्शनात् इति। समारोपे त्वेकदेशदर्शनमस्ति। तत्सिद्धमेतद्विवादाध्यासितं रजतविज्ञानं, पुरोवर्तिवस्तुविषयं, रजतार्थिनस्तत्र नियमेन प्रवर्तकत्वात्, यद्यदर्थिनं यत्र नियमेन प्रवर्तयति, तज्ज्ञानं तद्विषयं;

उपादान एवेति। प्रवृत्तावेव। प्रवृत्तिरनुभवसिद्धा न हेयैवेत्यर्थः। हेत्वविशेषे कथं विशेषव्यवस्था, सत्यम्, अत एवारोपविशेषोऽभ्युपेय इत्याह—इदंकारेति। न चान्यद्व्यवस्थापकं सम्भवतीति मत्वा निगमयति—इतीति। नन्वारोपवादिनः किं भेदाग्रहेण क्रमेणेति च कथम् आरोपानन्तरमेव प्रवृत्तेरित्याशङ्क्याह—तथा हीति। अनुचिन्त्य स्मृत्वा। रजते रजतत्वेन गृहीते। नन्वस्मिन्मतेऽपि धर्मिभेदाग्रहादुपकारहेतुत्वानुमाद्वारेच्छया प्रवृत्तिरित्याशङ्क्य आह—न चेति। अपक्षधर्मत्वात् पक्षधर्मत्वेनागृहीतत्वात्। व्याप्तिरेवालम् किं पक्षधर्मत्वेनात आह—एकदेशेति। लिङ्गविशिष्टधर्म्येकदेशस्य दर्शनं लिङ्गविशिष्टधर्म्येकदेशान्तरानुमापकम्, एवमप्यस्तु अन्यथाप्यस्तु—अत आह नत्विति। पक्षधर्मस्यैव लिङ्गत्वं नियतमित्यर्थः। "ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरे बुद्धिरनुमान" मिति शाबरं वचः। पक्षधर्मतामात्रमपर्याप्तमिति ज्ञातसम्बन्धस्य पुंस इति। सम्बन्धो व्याप्तिः। ननु तन्मतेऽपीदमर्थस्य रजतत्वं नैकदेशः सत्यम्, अनुमित्याभासे एकदेशतया दर्शनमेवालमित्याह—समारोपे त्विति। तर्कात्समारोपं प्रसाध्य तदनुग्राह्यं प्रमाणमाह—तदिति। सिद्धसाधनतापरिहाराय विवादाध्यासितमिति। सर्पादिज्ञाने तादृग्विवादविषये भागासिद्धिनिवृत्त्यै रजतविज्ञानमिति। परेणापि वस्तुविषयस्येष्टत्वात्—पुरोवर्तीति। वस्तुग्रहणं स्फुटत्वाय। बलवत्यनिले पुरोवर्तिनि प्रवर्तके रजतस्मरणे चाव्यभिचाराय अर्थिन इत्यादीनि विशेषणानि। इच्छोपहारमुखेन पुरोवर्तिन्यपाक्षिकप्रवृत्तिहेतुत्वादित्यर्थः। न चार्थिन इत्यसिद्धम्, रजतं खल्वर्थयमानः प्रवर्तत इति दर्शयितुं रजतेति। न तु हेतुगतम् दृष्टप्रवृत्तिहेत्वदृष्टव्यावृत्त्यै ज्ञानत्वं वाच्यम्। ननु प्रवर्तकत्वं न तावत् साक्षात्। व्याप्तिस्मृतीष्टोपायतानुमितीच्छाप्रयत्नव्यवधानात्प्रवृत्तेः। नापि परम्परया, तस्या व्याप्तिस्मृतौ व्यभिचारात्। प्रकृतरजतज्ञानस्यापि कस्यचिदपुरोवर्तिनि रजतज्ञानव्यक्तिः पुरोवर्तिन्येव प्रवर्तयति सैव पक्ष इति चेत्, तर्हि या रजतस्मरणव्यक्तिः पुरोवर्तिन्येव साधने

यथोभयसिद्धसमीचीनरजतज्ञान, तथा चेदं, तस्मात्तथेति। यच्चोक्तमनवभासमानतया न शुक्तिरालम्बनमिति, तत्र भवान्पृष्टो व्याचष्टां, किं शुक्तिकात्वस्य इदं रजतमिति ज्ञानं प्रत्यनालम्बनत्वं; आहोस्विद्द्रव्यमात्रस्य पुरः स्थितस्य सितभास्वरस्य। यदि शुक्तिकात्वस्यानालम्बनत्वम्, अद्धा। उत्तरस्यानालम्बनत्वं ब्रुवाणस्य तवैवानुभवविरोधः। तथाहि—रजतमिदमित्यनुभवन्ननुभविता पुरोवर्ति वस्त्वङ्गुल्यादिना निर्दिशति। दृष्टं च दुष्टानां कारणानामौत्सर्गिककार्यप्रतिबन्धेन कार्यान्तरोपजननसामर्थ्यम्; यथा दावाग्निदग्धानां वेत्रबीजानां कदलीकाण्डजनकत्वम्, भस्मकदुष्टस्य चौदर्यस्य तेजसो बह्वन्नपचनमिति। प्रत्यक्षबाधापहृतविषयं च विभ्रमाणां यथार्थत्वानुमानमाभासः, हुतवहानुष्णत्वानुमानवत्।

प्रवर्तयति, तत्र व्यभिचारो दुर्वारः। सिद्धसाध्यता च, रजतस्मृतेर्ग्रहणकालीनपुरोवर्तिवस्तुविषयात्। अधुनापि पुरुषान्तरपुरोवर्तिवस्तुविषयत्वात्। अस्येदानीमित्यादि विशेषणे दृष्टान्ताभावादिति। सत्यम्। तथापि यः पूर्वं प्रदेशविशेषे रजतदृष्ट्या तत्र शुक्तिं दृष्ट्वा रजतेच्छया प्रवर्तते, तस्य सा प्रवृत्तिस्तत्प्रदेशस्थगोचररजतज्ञानजा, तत्प्रदेशस्थगोचरत्वे सति रजतेच्छाजप्रवृत्तित्वात्, पुरुषान्तरस्य समीचीनतादृक्प्रवृत्तिवत्। इच्छाजत्वं च समीचीनस्थले यावता व्यवधानेन तावतेति विवक्षितत्वाददोषः। इहान्योऽपि शङ्क्यमानः क्षुद्रोपद्रवोऽनया मुद्रया विद्राव्यः। यद्यप्यत्र विशेषव्याप्तिः सम्भवति तथापि पुरोवर्तिनि प्रवर्तयतामन्येषामपीदृशी दशेति मतिस्थैर्यार्थमेवमवोचत्। **शुक्तिकात्वस्य** तदालिङ्गितद्रव्यस्य। **इदं** त्वयोच्यमानमनालम्बनत्वं, अस्मादिव्यावृत्तये **सितभास्वरेति**। सर्वत्रैवं बुद्ध्यभावात् पुरस्थितस्य, न च निर्देशोऽपि विवेकाग्रहादिति वाच्यम्। एतावन्तं कालं इयं शुक्तिः रजतमित्यभादिति प्रत्यभिज्ञाविरोधादिति भावः। दोषाणां निजकार्यप्रतिबन्धित्वमेव न कार्यान्तरहेतुत्वमित्युक्तं परिहरति—**दृष्टं चेति**। वेत्रबीजादन्यत्रायं नियम इति माशङ्कीत्युदाहरणान्तरं **भस्मकेति**। भस्मकः व्याधिविशेषः। इहाल्पमात्रस्य शनकैः पचनं औत्सर्गिककार्यम्। सहसा महतः पचनं तु कार्यान्तरम्। इतिशब्देन सम्यग्व्यवहारहेतोः ज्ञानस्यायथाव्यवहारहेतुत्वं सूचयति। अस्त्वेवमन्यत्र किमतः। अत्रापि तथात्वनिश्चय इति चेत्, न, दुष्टकुटजबीजादौ व्यभिचारात् संशयात्। तर्हि तवापि निराकरणासिद्धिरिति चेत् न, प्रत्यययाथार्थ्यस्यानुमानस्योक्तत्वादित्याशङ्क्याह—**प्रत्यक्षेति**। प्रत्यक्षं पूर्वोक्तं प्रत्यभिज्ञानम्, नेदं रजतमिति ज्ञानस्य विवेकाग्रहिणः परमतेऽप्यविरोधित्वात् **विभ्रमाणामिति**। स्वमत्या मिथ्याप्रत्ययस्य पराभिमतस्य तद्बोधकत्वेनेति। ज्ञानान्तरात् प्रामाण्यनिश्चये अनवस्था, अन्ते कस्यचित् स्वतस्त्वे प्रथमे कः प्रद्वेष इति। स्वतः

सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथा च लोकेऽनुभवः—

यच्चोक्तं मिथ्याप्रत्ययस्य व्यभिचारे सर्वप्रमाणेष्वनाश्वास इति; तत् बोधकत्वेन स्वतः—प्रामाण्यं नाव्यभिचारेणेति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिकायामिति नेह प्रतन्यते। दिङ्मात्रं चास्य स्मृतिप्रमोषभङ्गस्योक्तम्। विस्तरस्तु ब्रह्मतत्वसमीक्षायामवगन्तव्य इति, तदिदमुक्तम्—'अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति।' यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्मकल्पनां रजतत्वधर्मकल्पनामिति योजना। ननु सन्तु नाम परीक्षकाणां विप्रतिपत्तयः, प्रकृते तु किमायतमित्यत आह—सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। अन्यस्यान्यधर्मकल्पनाऽनृतता, सा चानिर्वचनीयतेत्यधस्तादुपपादितम्। तेन सर्वेषामेव परीक्षकाणां मतेऽन्यस्यान्यधर्मकल्पनानिर्वचनीयतावश्यंभाविनीत्यनिर्वचनीयता सर्वतन्त्राविरुद्धार्थः इत्यर्थः। अख्यातिवादे-

---

प्रामाण्यं न्यायकणिकायामुक्तम्। नन्वन्यैः सर्वं सर्वत्रोक्तमत आह—**अस्माभिरिति**। नन्विहापि तदपेक्षितत्वाद्वाच्यम्! (सत्यं सम्प्रदायिकारात्तु ?) नोच्यत इत्याह—**इति नेहेति**। तत्राशमोषात् स्मृतिः स्वार्थं न विविनक्तीत्यादेः पूर्वोक्तस्यापरिहरणं त्यक्तमाशङ्क्याह—**दिङ्मात्रं चेति**। ज्ञानभेदस्योक्तत्वात् न स्मृतिः स्वार्थं न तत्तांशमोष इति दिङ्मात्रम्। नन्वेतावदेव नान्यदस्ति कथं दिङ्मात्रता, अत आह—**विस्तर इति**। ब्रह्मतत्त्वसमीक्षा स्वकृता ब्रह्मसिद्धिटीका। इतिरख्यातिभङ्गसमाप्तेः सूचकः। उक्तस्य अर्थस्य भाष्यासंस्पर्शित्वशङ्कामपास्यति—**तदिति**। पूर्ववदिहापि लोकप्रसिद्धिरित्यध्याहारं परिहरन्नाह—**यत्रेति**। पूर्ववत्तच्छब्दस्य सन्निहितग्राहित्वं मा भूदित्याह—**शुक्तिकादेरिति**। रजतविपरीत धर्मकल्पने भ्रमभङ्गः। अकल्प्यश्च स धर्मः, शुक्तित्वादेः सिद्धत्वादत आह—**रजतधर्मत्वेति**। योजना स्वत्वेन घटना व्याख्येति यावत्। सर्वथेति भाष्यं सन्निधानादनन्तरविषयमिव भाति। तथा चायुक्तम् उक्तत्वात्, अविवादाच्चेत्याशङ्क्याह—**नन्विति**। कल्पनामिति भाष्यस्थावभासपदव्याख्या। भाष्ये अन्यथाख्याति—स्वीकारभ्रमं नुदन् व्याचष्टे—**अन्यस्येति**। अस्त्वेवं, अनिर्वचनीयता तु कथं दृढा अत आह—**सा चेति**। अनिर्वचनीयतेत्यर्थः। अधस्तात्, मरीचिग्रन्थे। उपपादनसाकाङ्क्षत्वे सर्वतन्त्रसिद्धान्तत्वेनानिर्वचनीयत्वदार्ढ्यं कथमिति, अवश्यम्भावित्वस्योक्तत्वादवश्यभाविनश्च सिद्धान्तत्वादिति मत्वाह—**तेनेति**। सर्वेषु मतेषु अवश्यमिति चार्थद्वये सर्वथेति तन्त्रेणोक्तमित्युभयमत्रोचत्। अन्यस्यान्यधर्मकल्पना चेदनिर्वचनीयत्व—मवश्यंभाव्यस्तु। कल्पनैव तु येषां नास्ति कथमत आह—**अख्यातीति**। तथा चेति भाष्यमयुक्तमिव

शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति । कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम् ? सर्वो हि पुरोऽवस्थिते विषये

भिरक्षामैरपि सामानाधिकरण्यव्यपदेशप्रवृत्तिनियमस्नेहादिदमभ्युपेयमिति भावः । न केवलमियमनृतता परीक्षकाणां सिद्धा, अपि तु लौकिकानामपीत्याह—तथा च लोकेऽनुभवः—शुक्तिका हि रजतवदवभासत इति । न पुना रजतमिदमिति शेषः । स्यादेतत्—अन्यस्यान्यात्मताविभ्रमो लोकसिद्धः, एकस्य त्वभिन्नस्य भेदभ्रमो न दृष्ट इति कुतश्चिदात्मनोऽभिन्नानां जीवानां भेदविभ्रम इत्यत आह—एकश्चन्द्रः सद्वितीयवदिति । पुनरपि चिदात्मन्यध्यासमाक्षिपति—कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम् । अयमर्थः—चिदात्मा प्रकाशते, न वा । न चेत्प्रकाशते, कथमस्मिन्नध्यासो विषयतद्धर्माणाम् ? न खल्वप्रतिभासमाने पुरोवर्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वा समारोपः संभवतीति । प्रतिभासे वा न तावदयमात्मा जडो घटादिवत्पराधीनप्रकाश इति युक्तम् । न खलु स एव कर्ता च कर्म च भवति; विरोधात् । परसमवेतक्रियाफलशालि हि कर्म, न च ज्ञानक्रिया परसमवायिनीति कथमस्यां कर्म । न च तदेव स्वं च परं च; विरोधात् । आत्मान्तरसमवायाभ्युपगमे तु ज्ञेयस्या-

---

अनिर्वचनीयता सर्वतन्त्रसिद्धान्त इति लोकेऽननुभवात् - अत आह—न केवलमिति । तथा चेति । मृषात्वमेव परामृष्टमिति भावः । लोके च तथेत्यन्वयः । ननु वद्ग्रहणेन सारूप्यमुच्यते, मुखं चन्द्रवदितिवत्, अतः कथं मृषात्वानुभवः, अत आह—न पुनरिति । यथा रजतं रजतमिति प्रतीयते एवं रजतमिदमप्येवं भासत इति वतेरर्थ इत्यर्थः । शेष इति । भाष्योक्तलोकानुभवविषयशेषः, तत्तुल्यार्थबाध्यशेषो वा । द्वितीयदृष्टान्तवैयर्थ्यमाशङ्क्याह—स्यादेतदिति । एकस्य कस्यचिदाक्षेपे पुनश्शब्दाधिकृयमाशङ्क्य तद्रीत्यन्तरत्वं पुनश्शब्दार्थ इत्याह—पुनरपीति । पूर्वमारोप्यस्य देहादेरसत्वेन प्रतिभासायोगादाक्षेपः अयं तु आत्मनोऽधिष्ठानत्वानुपपत्त्या । तदिदमुक्तम्—चिदात्मनीति । विषयतद्धर्माणामिति द्वन्द्वः । अरजतेऽपि रजतस्येव अविषये विषयस्याविवेकात् अध्यासो युक्तः अत आह—अयमर्थ इति । न खल्वित्यन्वयः । प्रतिभासोऽपि परतः स्वतो वा नाद्य इत्याह—न तावदिति । अयम् अधिष्ठानत्वेनेष्टः । पराधीनप्रकाशत्वे हेतुः-जड-इति । जडत्वमस्वप्रकाशत्वम् । तत्र कर्मता घटते नत्विहेति मत्वोक्तं घटादिवत् । अस्मिन्पक्षे आत्मग्राहिज्ञानं किं स्वसमवेतं परसमवेतं वा, आद्यं प्रत्याह—न खल्विति । तस्यामेव क्रियायामिति शेषः । विरोधात् व्याघातात् । तं व्यनक्ति परेति । ननु स्वगतं ज्ञानमेव परसंवेदनमस्तु अत आह—न च तदेवेति । विरोधात् व्याघातस्य स्फुटत्वादित्यर्थः । द्वितीयं प्रत्याह—आत्मान्तरेति । यद्ययं

त्मनोऽनात्मत्वप्रसङ्गः, एवं तस्य तस्येत्यनवस्थाप्रसङ्गः । स्यादेतत्—आत्मा जडोऽपि सर्वार्थज्ञानेषु भासमानोऽपि कर्तैव न कर्म, परसमवेतक्रियाफलशालित्वाभावात्, चैत्रवत्। यथा हि चैत्रसमवेतक्रियया चैत्रनगरप्राप्तावुभयसमवेतायामपि क्रियमाणायां नगरस्यैव कर्मता; परसमवेतक्रियाफलशालित्वात्, न तु चैत्रस्य क्रियाफलशालिनोऽपि, चैत्रसमवायाद्गमनक्रियाया इति—तन्न; श्रुतिविरोधात्। श्रूयते हि 'सत्यं ज्ञानमनन्तं ब्रह्म' इति। उपपद्यते च। तथाहि—योऽयमर्थप्रकाशः फलं, यस्मिन्नर्थश्च आत्मा च प्रथेते, स किं जडः, स्वयंप्रकाशो वा। जडश्चेद्विषयात्मानावपि जडाविति कस्मिन्किं प्रकाशेताविशेषात्, इति प्राप्तमान्ध्यमशेषस्य

ज्ञानकर्म स्यात्, आत्मा न स्यात्, घटवदिति। प्रसङ्गरूपमिष्टापत्तिं परिहरति—**एवमिति**। तस्य तस्य पूर्वपूर्वात्मसाक्षात्कारिणस्तस्य तस्यापि देहाद्यध्यासवत्तया पूर्वसमानयोगक्षेमत्वादनवस्था। आत्मतत्त्वस्य क्वापि स्वरूपालाभ इत्यर्थः। पराधीनप्रकाशत्वेऽपि न कर्तृकर्मविरोधः संविदाश्रयता प्रकाशमानस्य कर्मत्वाभावादिति शङ्कते—**स्यादेतदिति**। आत्मा जडो विज्ञानेषु भासते भासमानोऽपि कर्तैव न कर्मेति योजना। ननु ज्ञानस्य कर्मान्तरमाह—**सर्वार्थेति**। ननु ज्ञानाधीनप्रकाशत्वेऽर्थवत् कर्मता प्राप्नोति। न, तल्लक्षणाभावा—दित्याह—**परेति**। ननु क्रियाफलशालित्वादेव कर्मत्वम्, न, व्यभिचारादित्याह—**चैत्रवदिति**। ननु चैत्रस्यापि ज्ञानाकर्मत्वमसम्प्रतिपन्नमिति, नैष दोषः प्रकारान्तरेण दृष्टान्तत्वादित्याह—**यथाहीति**। स्वक्रियाफलशालित्वं दर्शयितुं, उभयसमवेतग्रहणम्। ननु चैत्रोऽपि मैत्रक्रियाकर्मैव अत्राह—**चैत्रसमवेतक्रिययेति**। परसमवेतविशेषणाभावादित्यर्थः। ज्ञानाश्रयतया सिद्धिरयुक्ता ज्ञानाभेदश्रुतिबाधादित्याह—**तन्नेति**। ननु सामानाधिकरण्यं गुणगुणिभावात्, सिद्धे च श्रुतिः? . . . प्रमाणमत आह—**उपपद्यते च**। आत्मनः स्वप्रकाशसंविदभेदः इति शेषः। स्वप्रकाशायाः संविदोऽवान्तरभेदनिषेधे सति आत्मत्वं पर्यवस्यतीति मन्वानः संवित्स्वप्रकाशतां प्रकाशयति—**तथाहीत्यादिना**। यद्यपि स्वप्रकाशता परैरपीष्टा तथापि तद्विप्रपत्तिनिरासाय तन्निरूपणम्। किन्तु वक्ष्यमाणोपयोगिन्यास्तस्या बुद्धिसमाधानायेत्यदोषः। **योऽयमर्थप्रकाशः** किमित्यन्वयः। वस्तूनामन्येषां जाड्यदर्शनाज्जड इति पक्षः प्राप्तिमानस्तु, द्वितीयस्य का प्राप्तिरत आह—**यस्मिन्निति**। **प्रथते**। अपरोक्षीभवति। अर्थात्मप्रथासिद्धिस्तत्प्रापिकेत्यर्थः। अन्यस्मिन् प्रथा तयोरस्त्विति माशङ्कीति फलमित्युक्तम्। अयमेव हि प्रमाणफलं नान्यदित्यर्थः। प्रथमे किमयं स्वसत्तामात्रेण साक्षादर्थादेः प्रथां व्यवहार्यताख्यामावहेत्, ज्ञानद्वारेण वा नाद्य इत्याह—**जडश्चेदिति**। यथा, अर्थात्मानौ जडौ न किञ्चित् प्रथयतः, एवं यदि सोऽपि जडः स्यात्, न किञ्चित्प्रथयेदित्यर्थः। इष्टापत्तिमाशङ्क्याह—**प्राप्तमिति**। आन्ध्यं व्यवहारवैकल्यम्। अत्राप्रकाशमानत्वात् कदाचित केनचिद-

जगतः । तथा चाभाणकः—'अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे । ' न च—निलीनमेव विज्ञानमर्थात्मानौ ज्ञापयति—चक्षुरादिवदिति; वाच्यम् । ज्ञापनं हि ज्ञानजननम्, जनितं च ज्ञानं जडं सन्नोक्तदूषणमतिवर्तेतेति । एवमुत्तरोत्तराण्यपि ज्ञानानि जडानीत्यनवस्था । तस्मादपराधीनप्रकाशा संविदुपेतव्या । तथापि किमायातं विषयात्मनोः स्वभावजडयोः ? एतदायातं यत्तयोः संविदजडेति । तत्किं पुत्रः पण्डित इति पितापि पण्डितोऽस्तु । स्वभाव एष संविदः

व्यवहार्यं किञ्चिद्दूरीकृत्य तद्वदन्यस्य तथाविधस्याव्यवहार्यत्वमापाद्यम् । अशेषग्रहे दृष्टान्ताभावात्, अविशिष्टे हि नैकेनेतरकार्यसिद्धिरित्युदाहरति—तथा चेति । आभाणकः प्रसिद्धा लोकगाथा । अस्तु तर्हि द्वितीयः न च जाड्यादेव तदभावोऽप्यापाद्यः । इन्द्रियादिषु व्याप्तिभङ्गादिति मन्वानस्य शङ्कां निरस्यति—न चेति । यद्वा ननु जडत्वेनाप्रकाशमानापि संविदिन्द्रियवत्, स्वभावभेदात्प्रकाशिका भविष्यति । तथा च जडत्वादर्थात्मनाविशेषोपपादनं शिथिलव्याप्तिकम् । अन्यथा स्वप्रकाशत्वेऽपि वस्तुत्वादिभिरापततोऽर्थात्मसाम्यस्य दुरुत्तरत्वादित्याशङ्कयाह—न चेति । हिर्हेतौ । जन्यतां ज्ञानम्, अत आह—जनितमिति । तच्चेत्स्वप्रकाशं प्रथते कः प्रद्वेषः । जडं चेद् अर्थात्मतुल्यं कथं तौ प्रथयेदिति शङ्कां नातिक्रामतीत्यर्थः । सा शङ्का पूर्ववन्निलीनस्य ज्ञापकतया शाम्यति अत आह—एवमिति । विषयान्तरसञ्चारविरोधाच्चानवस्थानं दूषणम् । ननु निलीनत्वात्—स्वयमव्यवह्रियमाणापि, संविदर्थात्मप्रकाशतया तौ व्यवहारयति, न तु ज्ञापयति कुतोऽनवस्थेति चेत् । अथ कथं संविदस्तीति व्यवह्रियेत । तद्गोचरसंविदन्तरादिति चेत् । कात्र सामग्री, मनस्संयुक्तात्मसमवाय इति चेत्, स तर्हि संविदां सर्वासामविशिष्ट इति संविद्गोचरसंविदामनुपरमप्रसङ्गः । विलक्षणसंवित्सामग्रीप्रतिबन्धादुपरम इति चेत्, हन्त अनया सामग्र्या प्रतिबद्धा विलक्षणसामग्री किं नोदासीत । प्रबला दुर्बलां प्रतिबध्नातीति चेत् किं प्राबल्यं दौर्बल्यं च । अदृष्टभेदसम्भेदस्तदभावश्चेति चेत् । न अदृष्टस्य सामग्रीमात्रसम्पादकत्वात् । अन्यथा योग्यानुपलम्भात्, अभावानिर्णयप्रसङ्गात् । स्वभावभेद एव प्राबल्यं दौर्बल्यं चेति चेत् । अहो महानस्य स्वप्रकाशवादे प्रद्वेषः, यत् सत्यां गतौ ज्ञानान्तराभ्युपगमे गौरवमपश्यन् स्वभाववादपादसेवां वरीयसीमाशास्ते । तदेतदभिसन्धाय द्वितीयं परिशिनष्टि—तस्मादिति । अपराधीनप्रकाशा अनन्याधीनापरोक्ष्या । नन्विष्यते संवित् स्वप्रकाशा, आत्मा तु जडस्तदधीनप्रकाश इति मन्वानं संविदाश्रयत्ववादिनं प्रत्यात्मस्वप्रकाशत्वबाधाह—तथापीति । स्वप्रकाशत्वात् संविदपरोक्षास्तु जडयोरापरोक्ष्यं तु निर्हेतुकमित्यर्थः । प्रकाशमानसंवित्संबन्धस्तद्धेतु[1]रिति शङ्के—एतदिति । सम्बन्धिनो यो धर्मः तत्तुल्यो धर्मः सम्बन्धमात्रेण नायातीत्याह—तत्किमिति ।

1 'मि' क- पाठः

स्वयं प्रकाशायाः यदर्थात्मसंबन्धितेति चेत्, हन्त पुत्रस्यापि पण्डितस्य स्वभाव एष यत्पितृसंबन्धितेति समानम्। सहार्थात्मप्रकाशेन संवित्प्रकाशो न त्वर्थात्मप्रकाशं विनेति तस्याः स्वभाव इति चेत्, तत्किं संविदो भिन्नौ संविदर्थात्मप्रकाशौ ? तथा च न स्वयंप्रकाशा संवित्, न च संविदर्थात्मप्रकाश इति। अथ संविदर्थात्मप्रकाशौ न संविदो भिद्येते, संविदेव तौ। एवं चेत् यावदुक्तं भवति संविदात्मार्थौ सहेति तावदुक्तं भवति संविदर्थात्मप्रकाशौ सहेति, तथा च न विवक्षितार्थसिद्धिः। न चातीतानागतार्थगोचरायाः संविदोऽर्थसहभावोऽपि। तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहभाव इति चेन्न; अर्थसंविद इव हानादिबुद्धीनामपि

ननु सम्बन्धमात्रेणान्यधर्मकल्पनमन्यत्र न ब्रूमः किंतु स्वाभाविकसम्बन्धेन। न च पितापुत्रयोः सम्बन्धः स्वाभाविकः। असत्यपि पितरि पुत्रदर्शनादिति शङ्कते—**स्वभाव इति**। यथा संविदर्थमात्मानं चान्तरेण न ज्ञायत इति तस्याः स्वभावः एवं विना पित्रा पुत्रोऽपि न जायत इत्यविशिष्टम्। एककालत्वं तु संविद्यपि नास्ति। नश्यदगोचरसाक्षात्कृत्यादौ व्यभिचारादित्याशयेनाह —**हन्तेति**। वैषम्यान्तरं शङ्कते—**सहेति**। पितृपाण्डित्येन सहैव पुत्रस्य पाण्डित्यमिति तु न तस्य स्वभाव इति भावः। **तत्किमिति**। संविदर्थात्मनां प्रकाशौ संवित्प्रकाशस्यार्थात्मप्रकाशादन्यत्वात्। संवित्प्रकाशस्य संविदोऽन्यत्वादस्वयं प्रकाशता। अर्थात्मप्रकाशस्य संविदन्यत्वसंविदो नार्थात्मप्रकाशत्वम्। [1]तथा च ज्ञापिका स्यात् तत्र चोक्तानवस्थितिरिति भावः। द्वयोः कथमेकस्मादभेदः अत आह—**संविदेवेति**। प्रकाश्यभेदाद्भेदोपचार इत्यर्थः। संविद एव संविदर्थात्मप्रकाशत्वे संविच्चार्थात्मानौ च साहित्यं चेत्यवशिष्यते। तत्र दोषं दर्शयितुं वाक्य वृत्तिमाह—**एवञ्चेदिति**। संविदा सहात्मार्थाविति गिरा यावदुक्तं भवतीति योजना। इह तु पूर्वोक्तवाक्यस्यार्थतोऽनुक्रमणम्। तावदेवोक्तमस्तु अत आह—**तथा चेति**। ज्ञानेनार्थात्मनोः प्रकाशमानत्वं विवक्षितोऽर्थः। रूपसंवित्सहभुवामपि रसादीनां तथा प्रकाशमानत्वादर्शनादित्यर्थः। न कालैक्यं साहित्यम्। किन्तु सम्बन्धः। स चात्मना समवायः, अर्थेन तु विषयविषयिभावः। स च रूपज्ञानेन रसादेर्नास्ति अत आह—**न चेति**। सहभावः सम्बन्धरूपः। संबन्धस्य द्विनिष्ठत्वादन्यतराभावेऽप्यभावादित्यर्थः। अतीतादौ संबन्धं शङ्कते—**तद्विषयेति**। तद्विषयहानादि बुद्धिजननादर्थसहभाव इत्युच्यत इति शेषः। अतीतादिविषयहानादिबुद्धिजनकत्वमेवातीतादिबुद्धेस्तद्विषयत्वं गीयते। तेनेह साक्षादसम्बन्धेऽपि व्यवहितः सम्बन्धोऽस्ति। स च सम्बन्धिनोः न यौगपद्यमाशास्ते, कारणकारणेनेव [2]कार्यकार्यस्येत्यर्थः। हानादिबुद्धावपि व्यवहितं संबन्धं शङ्कते—**हानादीति**। अत्र तद्विषयहानादिति पठितव्यम्। तद्विषयहानादिजनकत्वं तद्विषयत्वव्यभिचारी-

---

1 'पि' ख पाठः 2 'र्यं' ख पाठः

तद्विषयत्वानुपपत्तेः । हानादिजननाद्धानादिबुद्धीनामर्थविषयत्वम् ; अर्थविषयहानादिबुद्धिजननाच्च अर्थसंविदस्तद्विषयत्वमिति चेत्, तर्हि देहस्य प्रयत्नवदात्मसंयोगो देहप्रवृत्तिनिवृत्तिहेतुरर्थ इत्यर्थप्रकाशोऽस्तु । जाड्याद्देहात्मसंयोगो नार्थप्रकाश इति चेत्, नन्वयं स्वयंप्रकाशोऽपि स्वात्मन्येव खद्योतवत्प्रकाशः, अर्थे तु जड इत्युपपादितम् । न च प्रकाशस्यात्मानो विषयाः; ते हि विच्छिन्नदीर्घस्थूलतयानुभूयन्ते, प्रकाशश्चायमान्तरोऽस्थूलोऽनणुरहस्वोऽदीर्घश्चेति प्रकाशते । तस्माच्चन्द्रेऽनुभूयमान इव द्वितीयश्चन्द्रमाः स्वप्रकाशादन्योऽर्थोऽनिर्वचनीय एवेति—युक्तमुत्पश्यामः । न चास्य प्रकाशस्याज्ञानतः स्वलक्षणभेदोऽनुभूयते । न चानिर्वाच्यार्थभेदः

त्याह—तर्हीति । अर्थे घटादौ प्रकाशस्य सतः तद्विषयहानादिजनकत्वं तद्विषयत्वमिति शङ्कते—जाड्यादिति । परिहरति—नन्विति । अयं हानादिजनकः प्रकाशः । प्रकाशोऽपि प्रकाशत्वेन संयोगविलक्षणोऽपि । अर्थे तु जडः अर्थविषयस्तु न भवति । उपपादितं उपपादितकल्पम् । हानादिबुद्धावुक्तन्योयेन हानादेरप्यतीतादिविषयत्वानुपपत्तेरित्यर्थः । मा भूदर्थस्य संविद्भेदपक्षे प्रकाशमानत्वं, तदभेदं तु ब्रूम इति बौद्धगन्धिनमेकदेशिनमाक्षेप्ता दूषयति— न चेति । विच्छिन्नत्वं मानान्तरत्वम । दीर्घस्थूलतयेति । अणुत्वहृस्वत्वोपलक्षणम् । तर्हिमर्थप्रकाशत्वयाज्यः, तथा च अनुभवविरोध इत्याशङ्क्य सैद्धान्तिकीं संविद्विवर्ततया तदभेदेनार्थसिद्धिमध्याससम्भवं वक्ष्यामीति मन्वानोऽनुवदति—तस्मादिति । इह चन्द्रगतं द्वित्वमेवोदाहरणम् । ननु माभूदर्थस्य संवित्सम्बन्धः मा च भूत्तद्भेदः । तथापि किमनिर्वाच्यतया, संविद एव स्वपरप्रकाशत्वेनार्थस्य प्रकाशमानतोपपत्तेः । अत एव च न पुत्रपाण्डित्यतुल्यता । किन्तु पितापुत्रसाधारणद्वारकथनत्वतुल्यतैव । सम्बन्धाभावाविशेषे घटादिज्ञानस्य सर्वार्थाविशेषप्रसङ्ग इति चेत् न, तत्कारणेन्द्रियलिङ्गादिप्रतिनियमाद् विशेषसिद्धेः । अत एव नातीतादौ सम्बन्धाभावो दोषाय, पक्षद्वयसाधारत्वाच्च । न हि विवर्तं जपता विध्वस्तादौ सम्बन्धः, न चार्थस्य प्रकाश इति षष्ठ्ययोगः । घटस्याभावो रूपस्य समवायः तादात्म्यं वेतिवत् स्वभावसम्बन्धादित्याशङ्क्य जनकसंप्रयो[1]गानियमे, वायुस्पर्शगोचरप्रत्यक्षसाधनसंयुक्तसमवायविशेषणसंयोगबलादनिलस्यापि तत्प्रत्यक्षताप्रसङ्गात् अनिर्वाच्यवादे[2]ऽतीतादौ सम्बन्धाभावेऽपि तदसम्बद्धे[3] वर्तमाने संवेदने तत्सम्बन्धित्वारोपेण प्रतिनियमोपपत्तेः । अत एवाभावतादात्म्ययोः षष्ठीसम्भवात् । समवायस्यानङ्गीकारात् यत्किञ्चिदेतदित्याशयेनाह—इति युक्तमिति । संविदोऽन्यस्य चेदनिर्वाच्यत्वं, आत्मनोऽपि तत्स्यात् । न स्यात् सत्यज्ञानादिवाक्ये तस्य ज्ञानरूपतायाः प्रागुक्तत्वादिति चेत्, न, बहूनां एकेनात्मना ऐक्यानुपपत्तेरत आह—न चास्येति । नानात्वस्य किं प्रापकम्, तदनुभव

---

1 "गानि"! ख पाठः 2 "वे" क पाठः 3 "न्धे" क पाठः

प्रकाशं निर्वाच्यं भेत्तुमर्हति; अतिप्रसङ्गात् । न चार्थानामपि परस्परं भेदः समीचीनज्ञानपद्धति-मध्यास्ते इत्युपरिष्टादुपपादयिष्यते । तदयं प्रकाश एव स्वयंप्रकाश एकः कूटस्थनित्यो निरंशः प्रत्यगात्मा अशक्यनिर्वचनीयेभ्यो देहेन्द्रियादिभ्य आत्मानं प्रतीपं निर्वचनीयमञ्चति जानातीति प्रत्यङ्, स चात्मेति प्रत्यगात्मा, स चापराधीनप्रकाशत्वात्, अनंशत्वाच्च अविषयः, तस्मिन्न-ध्यासो विषयधर्माणां, देहेन्द्रियादिधर्माणां, कथम्, किमाक्षेपे । अयुक्तोऽयमध्यास इत्याक्षेपः । कस्मादयमयुक्त इत्यत आह—सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति । एतदुक्तं भवति—यत्पराधीनप्रकाशमंशवच्च तत्सामान्यांशग्रहे कारणदोषवशाच्च विशेषाग्रहेऽन्यथा

इति चेत् सः किं संविन्मात्रस्पर्शी, अर्थभेदोपहिततदाकारस्पर्शी वा, आद्यस्यासिद्धिमुक्त्वा द्वितीयं निरस्यति—न चेति । उपहिततदाकारस्पर्शी भेदप्रत्ययस्तस्य निजं रूपं न भिनत्तीत्यभिसन्धाय निर्वाच्यमित्युक्तम् । अतिप्रसङ्गादिति । नानाशरावप्रतिबिम्बितस्य चन्द्रमसोऽपि स्वरूपभेदप्रसङ्गादित्यर्थः । [1]आजानत एव भेदोऽनुभूयत इत्यनुशयानं प्रत्याह—न चार्थानामपीति । काममनुभूयतां संवित्स्वरूपभेदः, स तु वक्ष्यमाण-भेदमात्रखण्डनग्रस्त इत्यर्थः । एवं चात्मनो ज्ञानरूपत्वमविरुद्धमिति फलमाह—तदयमिति । अयं प्रकाश एव प्रत्यगात्मेत्यन्वयः । एक इति । नानात्वप्रयुक्तदोषाभावज्ञापनम् । अथाप्यनित्यस्य कथं नित्याभेद-इत्यत उक्तम्—नित्येति । नित्यस्यापि परिणामित्वेन स्यादपरिणाम्यभेदः । अत उक्तम्—कूटस्थेति । वक्ष्यमाणाध्यासाभावहेतुत्वसूचनाय स्वयं प्रकाशो निरंश इति । सर्वाणि प्रकाशविशेषणानि । प्रत्यगात्मेति पदं व्युत्पादयति—अशक्येति । प्रतीपं प्रतिकूलम् क्रियाविशेषणम् । निर्वचनीयमनिर्वचनीयेभ्य इति प्रातिकूल्योक्तिः । विभोर्गत्यभावमाशङ्क्याह—विजानातीति । प्रत्यगिति पृथक्पदत्वभ्रमं नुदति । स चेति । अविषयत्वं यदि विषयशून्यत्वं तदध्यासानुकूलम् । अतस्मिंस्तद्बुद्धित्वात्तस्येत्याशङ्क्याह—देहेति । नन्वाक्षिपतीति कुतः, कथमिति प्रश्नप्रतीतेः न । आक्षेपेऽप्यस्य तुल्यत्वादित्याह—किमिति । थमुप्रत्ययान्तः किंशब्दः । ननु संविद्वर्तितया सिद्धिरुक्ता । सत्यम् । सैव युक्त्यन्तरहतेत्याक्षेपाभिप्राय इत्याह—अयुक्त इति । अविषयत्वादध्यासाक्षेपे कृते परिहार एव कर्तव्यः । तत्र लोकप्रसि[2]द्धिकथा वृथे-त्याशङ्क्याह—कस्मादिति । अविषयत्वेऽप्ययुक्तिः कुत इति शङ्कायाः परिहार्यत्वादाक्षेपोऽसमाप्तः । हिशब्दश्च हेतौ, न प्रसिद्धावित्यर्थः । ननु पूर्वदृष्टारोप्यसंस्कारः, अधिष्ठानस्फुरणं विवेकाग्रहश्चेति भ्रमसामग्री । सा चेदस्ति स्वप्रकाशत्वेन किमपराद्धमित्याशङ्क्यास्मिन् पक्षे विवेकाग्रहो दुर्लभ इत्याह—एतदिति । अंशवत् अंशद्वयवत् । निरंशेऽपि सरूपत एव ग्रहणाग्रहणविभागोऽस्तु, न, व्याघातादित्याह

---

1 ' अ '' क पाठः 2 ' ' द्ध ' ' क पाठः

विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते—न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात्, अपरोक्षत्वाच्च

प्रकाशते। प्रत्यगात्मा त्वपराधीनप्रकाशतया न स्वज्ञाने कारणान्यपेक्षते, येन तदाश्रयैर्दोषैर्दूष्येत। न चांशवान्; येन कश्चिदस्यांशो गृह्येत कश्चिन्न गृह्येत। न हि तदेव तदानीमेव तेनैव गृहीतमगृहीतं च संभवतीति न स्वयंप्रकाशपक्षेऽध्यासः। सदातनेऽप्यप्रकाशे पुरोऽवस्थितत्वस्यापरोक्षत्वस्याभावान्नाध्यासः। न हि शुक्तावपुरःस्थितायां रजतमध्यस्यतीदं रजतमिति। तस्मादत्यन्तग्रहेऽत्यन्ताग्रहे च नाध्यास इति सिद्धम्। स्यादेतत्—अविषयत्वे हि चिदात्मनो नाध्यासः, विषय एव तु चिदात्मास्मत्प्रत्ययस्य, तत्कथं नाध्यास इत्यत आह—युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। विषयत्वे हि चिदात्मनोऽन्यो विषयी भवेत्। तथा च यो विषयी स एव चिदात्मा। विषयस्तु ततोऽन्यो युष्मत्प्रत्ययगोचरोऽभ्युपेयः। तस्मादनात्मत्वप्रसङ्गादनवस्थापरिहाराय युष्मत्प्रत्ययापेतत्वम्, अत एवाविषयत्वमात्मनो वक्तव्यम्, तथा च नाध्यास इत्यर्थः। परिहरति—उच्यते—न तावदयमेकान्तेनाविषयः। कुतः, अस्मत्प्रत्यय-

—न हीति। व्यक्तिकालग्रहीतृभेदेन ग्रहणाग्रहणसंभवात् विशेषणानि। तर्हि पुरोवस्थित इत्यधिकम्। न। अप्रतीतिपक्षे पूर्वमस्मदुक्तदोषार्थत्वादित्याह—सदातन इति। न खल्वप्रतिभासमान इत्यत्र पूर्वोक्तमर्थं स्मारयति—न हीति। आत्मा न भ्रमाधिष्ठानं तत्प्रयोजकशून्यत्वात् व्यतिरेकेण शुक्तिवदित्यभिप्रेत्योपसंहरति तस्मादिति सिद्धं, इतिरध्याहार्यः। नन्वविषयत्वाङ्गीकारमाश्रित्य दूषणमुक्तम् किम्पुनस्तदङ्गीकारानुवादेन। नैवम्। स्वीकृतत्यागशान्त्यर्थत्वादित्याह—स्यादेतदिति। युष्मत्प्रत्ययापेतत्वे तद्विषयत्वं व्यावर्तताम् कथं सामान्येनाविषयत्वं तद्विलक्षणास्मत्प्रत्ययविषयत्वस्योक्तत्वादत आह—विषयत्वे हीति। अन्यो विषयी भवेत्। विषयविषयिभावस्यैकत्र विरोधादित्यर्थः। अस्त्वेवमत आह—तथा चेति। कथं स एव विषयोऽप्यात्मास्तु न, तस्येदम्प्रत्ययापत्तेरित्याह—विषयस्त्विति। इष्टापत्तिं परिहरति—तस्मादिति। विषयस्य घटवदनात्मतां विषयिणोऽप्यधिष्ठानत्वायाङ्गीकार्यविषयत्वद्वारामनवस्थां च परिहर्तुमित्यर्थः। यद्यविषयत्वमापाद्यं, ब्रवीषीत्यनुपपन्नम्, अत आह—अत एवेति। मदुक्तदूषणभिया अवश्यं ब्रवीषीति वक्तव्यतामाहेत्यर्थः। उच्यत इत्यस्य ब्रवीषीत्यनेन पौनरुक्त्यमाशङ्क्योत्तरेण सम्बन्धमाह—परिहरतीति। एकान्तेनेत्यविषयत्वनिषेधे, न हेतुः किन्तु निषेध्यविशेषणमिति ज्ञापयन्नवतारयति—कुत इति। विषयत्वोक्तौ स्वप्रकाशत्वविरोधः।

विषयत्वात् । अयमर्थः—सत्यं प्रत्यगात्मा स्वयंप्रकाशत्वाद्विषयोऽनंशश्च; तथाप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनः-सूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेनानवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इव, अभिन्नोऽपि भिन्न इव, अकर्तापि कर्तेव, अभोक्तापि भोक्तेव, अविषयोऽप्यस्मत्प्रत्ययविषय इव, जीवभावमापन्नोऽवभासते, नभ इव घटमणिकमल्लिकाद्यवच्छेदभेदेन भिन्नमिवानेकविधधर्मकमिवेति । न हि चिदेकरसस्यात्मनः चिदंशे गृहीते अगृहीतं किञ्चिदस्ति । न खल्वानन्दनित्यत्वविभुत्वादयोऽस्य चिद्रूपाद्वस्तुतो भिद्यन्ते, येन तद्ग्रहे न गृह्येरन् । गृहीता एव तु कल्पितेन भेदेन न विवेचिता इत्यगृहीता इवाभान्ति । न चात्मनो बुद्ध्यादिभ्यो भेदस्तात्त्विकः येन चिदात्मनि गृह्यमाणे सोऽपि गृहीतो भवेत्; बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याप्यनिर्वचनीयत्वात् । तस्माच्चिदात्मनः स्वयंप्रकाशस्यैव अनवच्छिन्नस्य अवच्छिन्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात्, तदध्यासेन जीवभाव इति । तस्य चानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते । तथाहि—कर्ता भोक्ता चिदात्माहंप्रत्यये प्रत्यवभासते । न चोदासीनस्य तस्य

तत्रापि निरंशत्वप्रयुक्तदोषानुद्धारः । अनात्मत्वप्रसङ्गानवस्थयोश्चापरिहार इत्याशङ्क्याह—**अयमर्थ इत्यादिना** । अविषयः असंवेद्यः । स्वप्रकाशत्वमनंशत्वे हेतुः । ज्ञानाभावादव्यवच्छिन्नत्ति—**अनिर्वचनीयेति** । जीवाविद्ययोः परस्पराश्रयाभावं सूचयति—**अनादीति** । बुद्धिमनसी एव सूक्ष्मं शरीरं इन्द्रियाणि बाह्यानि वस्तुतोऽनवच्छिन्नोऽपीत्यन्वयः । अभिन्नोपीत्यनेन सांशत्वमुक्तम् । यथा तस्मिन्नविद्याध्यासान्तरं एवमंशित्वविषयत्वारोपोऽपि सोढव्य इत्यारोपान्तरोक्तिः । जीवभावमित्यविद्याश्रयत्वाय । **अवभासते** । अनुभूतं दुर्वारमित्यर्थः । भिन्नमिवानेकविधधर्मकमिव भासमानं नभ इवेति योजना । ननु किमुपाध्युक्तिक्लेशेन, यथावभासं वस्तुतो गृहीतागृहीतांशत्वमस्तु, अत आह—**न हीति** । चिदंशे भासमानेऽप्यनवभासमानमानन्दाद्यंशमाशङ्क्याह—**न खल्विति** । तद्ग्रहे तदग्रहाभिमानः कथमत आह—**गृहीता इति** । गृहीत एवागृहीतत्वारोप इत्यर्थः । आरोपे मूलम् अविवेचिताः वाचकशब्दोल्लेखरहिताः । तत्र हेतुः भेदकल्पना । निरंशत्वभङ्गभिया आनन्दादेश्चिन्मात्रत्वेन तद्ग्रहे ग्रहश्चेत्तत एव बुद्ध्यादिभेदस्यापि स्यादित्यध्यासविरोधोऽत आह—**न चेति** । आरोपितं न सांशत्वमावहतीति तात्पर्यम् । भेदस्यानन्दात्को विशेष अत आह—**बुद्ध्यादीनामिति** । **तस्मादिति** । स्वयं प्रकाशस्येत्यधिष्ठानस्फुरणोक्तिः । जीवभाव इति सांशत्वसिद्धिरिति शेषः । निरंशत्वदोषं निरस्य विषयत्वोक्तदोषमुद्धरति—**तस्य चेति** । अनिदन्त्वादस्मदुल्लेखः, इदमंशावेशाद्विषयत्वमित्यर्थः । उभयधर्मान्वयेनोभयात्मकत्वमाह—**तथा हीत्यादिना** । न चौदासीन्यमसिद्धम् । असङ्गादिश्रुतिसिद्धत्वादिति

क्रियाशक्तिर्भोगशक्तिर्वा संभवति। यस्य च बुद्ध्यादेः करणसंघातस्य क्रियाभोगशक्ती न तस्य चैतन्यम्। तस्माच्चिदात्मैव कार्यकरणसंघातेन ग्रथितो लब्धक्रियाभोगशक्तिः, स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात्, कथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदं जीव इति च, जन्तुरिति च क्षेत्रज्ञ इति चाख्यायते। न खलु जीवश्चिदात्मनो भिद्यते। तथा च श्रुतिः— 'अनेन जीवेनात्मना' इति। तस्माच्चिदात्मनोऽव्यतिरेकाज्जीवः स्वयंप्रकाशोऽप्यहंप्रत्ययेन कर्तृभोक्तृतया व्यवहारयोग्यः क्रियत इत्यहंप्रत्ययालम्बनमुच्यते। न च अध्यासे सति विषयत्वं विषयत्वे चाध्यास, इत्यन्योन्याश्रयत्वमिति—सांप्रतं; बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधादित्युक्तम्—' नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यग्रन्थेन। तस्मात् सुष्ठूक्तम्—न तावदयमेकान्तेनाविषय इति। जीवो हि चिदात्मतया स्वयंप्रकाशतयाऽविषयोऽप्यौपाधिकेन रूपेण विषय इति भावः। स्यादेतत्—न वयमपराधीनप्रकाशतयाऽविषयत्वेनाध्यासमपाकुर्मः, किन्तु प्रत्यगात्मा न स्वतो नापि परतः प्रथत इत्यविषय इति ब्रूमः। तथा च सर्वथाप्रथमाने प्रत्यगात्मनि कुतोऽध्यास इत्यत आह—

मत्वोपसंहरति—**तस्मादिति**। **ग्रथितः** तदैक्याध्यासवान्। तत्फलं लब्धेति। **स्वयंप्रकाशो**ऽप्यस्मत्प्रत्ययविषयः। व्याघातं निरस्यति **कथञ्चिदिति**। उपाधित इत्यर्थः। तदाह—**बुद्ध्यादीति**। **विच्छुरणं** सम्भेदः अस्मादित्यहंशब्दोपलक्षणमित्याह—**अहङ्कारेति**। अहङ्कार आस्पदं प्रतिभासस्थानं यस्य स तथा। ननु जीवादिव्यवहारवदहंव्यवहारोऽप्यनुपाधिरस्तु। न खलु जीवादिभावे कश्चिदुपाधिरुपलभ्यत इत्याशङ्क्य तत्रापि त एवोपाधयः इत्याह—**जीव इति**। चकारादाख्यानान्तरम्। ननु किमुपाद्यवच्छेदेन, तत्त्वतः परमात्मनोऽन्य एव जीवोऽहंप्रत्ययविषयोऽस्तु। नेत्याह—**न खल्विति**। अहम्प्रत्ययविषयत्वमपि जीवस्याहंवृत्तिमत्यन्तःकरणे व्यवहारयोग्यतैव। न कर्मता संविदनन्यस्य घटादिवत् संविद्विषयत्वाभावात्। अतो न कर्मकर्तृत्वविरोधः। न च विषयभूतस्यानात्मत्वमनवस्था च प्रसज्ज्यत इत्युपसंहरन्निवाह—**तस्मादिति**। अध्यस्तविषयत्वसांशत्वबलादधिष्ठानतोक्ता। तत्र अन्योन्याश्रयतामाशङ्क्याह—**न चेति**। विषयत्वमधिष्ठानत्वं सांशत्वस्योपलक्षणम्। न चेह दोषान्तरावकाश इत्युपसंहरति—**तस्मादिति**। एकान्तेनाविषयत्वनिषेधे विषयत्वं चाविषयत्वं चेति स्यात्। तच्च नित्यत्वानित्यत्ववत् परस्परपरिहारात्मनोर्व्याहतमित्याशङ्क्य रूपभेदेनाविरोधमेकान्तपदाभिप्रेतमाह—**जीवो हीति**। अपरोक्षत्वाच्चेति युक्त्यन्तरमिव, तदयुक्तम्, अस्मत्प्रत्ययत्वेन गतत्वात् स्वप्रकाशत्वेनाध्यासमाक्षिपतापीष्टत्वाच्चात आह—**स्यादेतदिति**। **प्रथते** अपरोक्षीभवति। **अप्रथमाने** आपरोक्ष्यरहिते। परोक्षे नापरोक्षाध्यास इत्यर्थः। चिदात्मानुमेय

प्रत्यगात्मप्रसिद्धेः। न चायमस्ति नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति; अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति।

अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेरिति। प्रतीच आत्मनः प्रसिद्धिः प्रथा; तस्या अपरोक्षत्वात्। यद्यपि प्रत्यगात्मनि नान्या प्रथास्ति, तथापि भेदोपचारः, यथा पुरुषस्य चैतन्यमिति। एतदुक्तं भवति—अवश्यं चिदात्माऽपरोक्षोऽभ्युपेतव्यः, तदप्रथायां सर्वस्याप्रथनेन जगदान्ध्यप्रसङ्गादित्युक्तम्। श्रुतिश्चात्र भवति—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति। तदेवं परमार्थपरिहारमुक्त्वाऽभ्युपेत्यापि चिदात्मनः परोक्षतां प्रौढवादितया परिहारान्तरमाह—न चायमस्तीति। पुरोऽवस्थित एव अपरोक्ष एव। कस्मादयं न नियम इत्यत आह—अप्रत्यक्षेऽपीति। हिर्यस्मादर्थे। नभो हि द्रव्यं सत् रूपस्पर्शविरहान्न बाह्येन्द्रियप्रत्यक्षम्। नापि मानसम्। मनसोऽसहायस्य बाह्येऽप्रवृत्तेः। तस्मादप्रत्यक्षम्। अथ च तत्र बाला अविवेकिनः परदर्शितदर्शिनः कदाचित्पार्थिवच्छायां श्यामतामारोप्य कदाचित्तैजसं शुक्लत्वमारोप्य नीलोत्पलपलाशश्याममिति वा राजहंसमालाधवलमिति वा निर्वर्णयन्ति। तत्रापि पूर्वदृष्टस्य तैजसस्य वा तामसस्य वा रूपस्य परत्र नभसि स्मृतिरूपोऽवभास इति। एवं

इति मतानुसारेणेयं शङ्का। प्रत्यगात्मप्रसिद्धेरित्यापरोक्ष्ये हेतुरिव। तन्न, परोक्षेऽपि प्रसिद्धिदर्शनादत आह—**प्रतीच** इति। षष्ठ्ययोगं निरस्यति—**यद्यपीति**। अपरोक्षत्वासिद्धिं निरस्यति—**एतदिति**। चिदात्मनोऽस्वप्रकाशत्वे सुखमहमस्वाप्समिति परामर्शो न स्यात्। नहि सुप्तावन्यः प्रकाशोऽस्ति। सुप्तिव्याघातात्। न चासत्यनुभवे परामर्शः। अतो गत्यन्तराभावात् स्वप्रकाशत्वेनापरोक्ष इति। तदप्रथायामित्येतदुपोद्बलनमुक्ततर्कानुग्राह्यं प्रमाणमाह—**श्रुतिश्चेति**। भान्तमिति प्रकाशमानस्यैवार्थप्रकाशत्वमित्युक्तम्। आपरोक्ष्योक्त्या सिद्धे परिहारे न चायमित्यस्य वृथात्वशङ्कायां पूर्वत्रारुचिशङ्कामपसिद्धान्तभ्रमावहां निरस्यन्नाह—**तदेवमिति**। अनभ्युपगमेऽपि सुघटमिदं भाष्यं आत्मा नापरोक्षभ्रमाधिष्ठानं, परोक्षत्वाद् अदृष्टादिवदिति पराभिप्रेतानुमानव्यभिचारमात्रपरत्वादिति मत्वोक्तम् **अभ्युपेत्यापीति**। नन्वनियमादेव शङ्का परिहृता। सत्यम्। अनियमस्तु साध्यत इत्याह—**कस्मादिति**। नन्वत्र हेत्वर्था विभक्तिर्नास्ति। अत आह—**हिरिति**। भट्टमतेन नभसश्चाक्षुषत्वाददृष्टान्तत्वमाशङ्क्याह—**नभो हीति**। रूपविरहात्स्पर्शविरहादिति द्वौ हेतू। तयोरेव व्यभिचारमाशङ्क्योक्तं **द्रव्यं सत्** इति। ननु वृद्धा अप्यध्यस्यन्ति। अत आह—**अविवेकिनः**। ननु ते नभोनुमितिरीतिं न जानते। कथं नभो नीलमिति व्यवहरेयुरत आह—**परेति**। नभस्यन्यप्रसिद्ध्युपजीविनः इत्यर्थः। **निर्वर्णनं** दर्शनम्। नन्वधिष्ठानास्फूर्तौ कथमध्यासः। अध्यासलक्षणयोगादित्याह—**तत्रापीति**।

एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः । तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते; तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः । तत्रैवं

तदेव तलमध्यस्यन्ति अवाङ्मुखीभूतं महेन्द्रनीलमणिमयमहाकटाहकल्पमित्यर्थः । उपसंहरति-एवमिति । एवम् उक्तेन प्रकारेण सर्वाक्षेपपरिहारात्, अविरुद्धः प्रत्यगात्मन्यप्यनात्मनाम्-बुद्ध्यादीनाम्, अध्यासः । ननु सन्ति च सहस्रमध्यासाः, तत्किमर्थमयमेवाध्यास आक्षेपसमाधानाभ्यां व्युत्पादितः, नाध्यासमात्रमित्यत आह—तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । अविद्या हि सर्वानर्थबीजमिति श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धम् । तदुच्छेदाय वेदान्ता प्रवृत्ता इति वक्ष्यति । प्रत्यगात्मन्यनात्माध्यास एव सर्वानर्थहेतुः न पुना रजतादिविभ्रमा इति स एवाविद्या, तत्स्वरूपं चाविज्ञातं न शक्यमुच्छेत्तुमिति तदेव व्युत्पाद्यं नाध्यासमात्रम् । अत्र च ‘ एवंलक्षणम् ’ इत्येवंरूपतयाऽनर्थहेतुतोक्ता । यस्मात्प्रत्यगात्मन्यशनायादिरहितेऽशनायाद्युपेतान्तःकरणाद्यहितारोपेण प्रत्यगात्मानमदुःखं दुःखाकरोति, तस्मादनर्थहेतुः । न चैवं पृथग्जना अपि मन्यन्तेऽध्यासं, येन

तमश्शब्देन नीलत्वात् पृथिवी लक्षिता । पूर्वदृष्टस्थलान्तरं वा । नीलं नभस्थलमित्यत्र विशेषणभूतं वर्णाध्यासमुदाहृत्य विशेष्याध्यासमुदाहरति—**एवमिति** । तत् गगनं । तलं तलात्मक[1] कटाहकल्पं[2] तत्त्वं तलविशेषणम् नायं नियमः नभसि व्यभिचारादित्युक्त्यैव तद्वदविरोधस्य स्फुटत्वात् । पौनरुक्त्यमांशङ्क्याह—**उपसंहरतीति** । कथं तर्ह्येवमिति नभस्साम्योक्तिः, न, तस्यान्यार्थत्वादित्याह—**एवमुक्तेनेति** । कथं पुनरित्यादेरेव नायमुपसंहार इति सूचयति—**सर्वेति** । अनात्मन्यध्यास इति भ्रमं नुदति-**अनात्मनामिति** । तत्किं सर्वेषां नेत्याह—**बुद्ध्यादीनामिति** । प्रमेयनिरूपणे वार्त्तामात्रोक्तिरयुक्ता अत आह—**नन्विति** । नन्वनविद्यां कथमविद्याम्मन्यन्ते । तत्कार्यत्वादिति चेत्, न, रजतादिविभ्रमसामान्यादित्याशङ्क्याह—**अविद्या हीति** । किं तत इत्याह—**प्रत्यगिति** । नन्वनर्थहेतोः निरूपणं वृथा अत आह—**तत्स्वरूपं चेति** । ननु नायमुच्छेद्यः । स्वर्गादिपुरुषार्थहेतुकर्मोपयोगित्वादत आह—**तदुच्छेदायेति** । उपनिषद्दर्शिनामयमुच्छेद्य इत्यर्थः । नन्वयमस्तु परिहारः, भाष्यं त्वनुत्तरम् तत्रैवंलक्षणकमिति रजतादिविभ्रमाविशिष्टस्यैवाविद्यात्वहेतोरुपादानादित्यत आह—**अत्र चेति** । एवमित्यनुभवारूढ[3]मनर्थहेतुत्वमुच्यते । लक्षणशब्दश्च स्वरूपपरः । न वैधर्म्यपर इत्याह—**एवं रूपतयेति** । तमनुभवमाह—**यस्मादिति** । दुःखाकरोति प्रातिलोम्येन दुःखिनं करोति । तर्हि सोऽयमेवंलक्षणकोऽध्यासोऽविद्येति वाच्यम् । किम्पण्डिता इत्यत आह—**न चैवमिति** । एनं पृथग्जना अप्यध्यासं मन्यन्त इति, न, येन पृथग्जनैरपि मतत्वेन

---

1 “ कं ” कपाठः   2 “ ल्पत्वं ” क पाठः   3 “ ढहे ” ख पाठः

न व्युत्पाद्येतेत्यत उक्तम्—पण्डिता मन्यन्ते। नन्वियमनादिरतिनिरूढनिबिडवासनानुबद्धाऽविद्या न शक्या निरोद्धुं; उपायाभावादिति यो मन्यते तं प्रति तन्निरोधोपायमाह—तद्विवेकेन च वस्तुस्वरूपावधारणं—निर्विचिकित्सं ज्ञानं विद्यामाहुः, पण्डिताः। प्रत्यगात्मनि खल्वत्यन्तविविक्ते बुद्ध्यादिभ्यः बुद्ध्यादिभेदाग्रहनिमित्तो बुद्ध्याद्यात्मत्वतद्धर्माध्यासः। तत्र श्रवणमननादिभिर्यद्विवेकविज्ञानं तेन विवेकाग्रहे निवर्तिते, अध्यासापबाधात्मकं वस्तुस्वरूपावधारणं विद्या। चिदात्मरूपं स्वरूपे व्यवतिष्ठत इत्यर्थः। स्यादेतत्—अतिनिरूढनिबिडवासनानुविद्धाऽविद्या विद्ययापबाधितापि स्ववासनावशात्पुनरुद्भविष्यति, प्रवर्तयिष्यति च वासनादि कार्यं स्वोचितमित्यत आह—तत्रैवं सति एवंभूतवस्तुतत्त्वावधारणे सति, यत्र यदध्यासस्तत्कृतेन

न व्युत्पाद्येतेत्यर्थः। अस्मादभिप्रायात् कारणादुक्तमिति योजना। तदनेन भाष्येण पण्डितेतराज्ञातत्वादिहाध्यासत्वस्याहंप्रत्यययाथार्थ्यदर्शिनामविषयत्वशङ्काशान्तये, सर्वानर्थहेतोरस्य ज्ञात्वोच्छेदाय चाध्यासनिरूपणमिति विषयप्रयोजनविध्यर्थतोक्ता। अस्यैव निरूपणायाविद्योक्तिर्युक्ता, विद्या कया तु वृत्त्येत्याशङ्क्याह—**नन्विति**। अनादित्वाद्वासना निरूढा लब्धप्रतिष्ठा। निबिडा वासनाहेतुभ्रमबाहुल्यात्। निरोधाशक्यत्वशङ्का शक्यतयैव परिहार्या न विद्योक्तया अत आह **उपायेति**। ननु तरति शोकमात्मविदित्युपायः श्रुतः। अत आह—**योऽमन्यत इति**। उक्तानुपपत्त्या श्रुतिमन्यार्थां मन्यते। परोक्षावधारणं न निरोधोपायः। अत आह—**निर्विचिकित्सम्** असन्दिग्धम्। एतच्चाविपर्यस्तत्वोपलक्षणम्। न च परोक्षज्ञानेऽपि सर्वविचिकित्साशान्तिरित्यनेनापरोक्ष्यमुक्तम्॥ कर्त्रनुक्त्या साकांक्षत्वमनुषङ्गेण निरस्यति **पण्डिता इति**। विद्यास्वरूपोक्त्यैव विद्याविवेके सिद्धे तद्विवेकेनेति किमित्याशङ्क्य तच्छब्दः अध्यस्तपरामर्शीत्याह—**प्रत्यगात्मनीति**। विवेकेन चेद्वस्तुस्वरूपावधारणं नित्यं, विविक्तत्वादध्यासो न स्यादित्याशङ्क्य विवेको न भेदः, किन्तु विविक्तस्वरूपज्ञानमित्याह—**तत्रेति**। तत्र प्रत्यगात्मनि। यद् विवेकज्ञानम्। नन्वेतदप्युपायशून्यमत आह—**श्रवणेति**। मननिदिध्यासनमादिशब्दार्थः। तेन भावनाप्रकर्षजो वृत्तिसाक्षात्कारो विवेकज्ञानमित्युक्तं भवति। ननु तर्हि तदेव वस्तुस्वरूपावधारणं नान्यत्, अन्यत्वेऽपि न द्वयोः प्रयोजनमत आह—**तेनेति**। ननु विवेकज्ञानवस्तुस्वरूपावधारणयोः को विशेषः येन फलव्यवस्था अत आह—**चिदात्मेति**। वस्तुस्वरूपं च तदवधारणं चेति वृत्तिव्यक्तं चैतन्यमुच्यते। विवेकविज्ञानं तु वृत्तिरिति भेद इत्यर्थः। आध्यासिकगुणदोषास्पर्शस्य सुप्रसिद्धत्वादवक्तव्यत्वमाशङ्क्याह—**स्यादेतदिति**। पुनरुद्भूतापि शिथिला सती, स्वयमेव शाम्यतीत्यत आह—**प्रवर्तयिष्यति चेति**। पुनरुद्भूतिशङ्काया[1] निरासोऽयं नारोप्यगुणादिस्पर्शशङ्काया इत्यर्थः। **एवं सतीति**। विद्यात्वोक्तौ सत्यामिति भाति। ततश्च न परिहारः,

---

1 "यां" इव पाठः

सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते।

दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते अन्तःकरणादिदोषेणाशनायादिना चिदात्मा, चिदात्मनो गुणेन चैतन्यानन्दादिनान्तःकरणादि न संबध्यते। एतदुक्तं भवति—तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स तादृशः, यदनादिमपि निरूढनिबिडवासनमपि मिथ्याप्रत्ययमपनयति। तत्त्वपक्षपातो हि स्वभावो धियाम्। यथाहुर्बाह्या अपि—'निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः। न बाधोऽयत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः॥' इति। विशेषतस्तु चिदात्मस्वभावस्य तत्त्वज्ञानस्यात्यन्तान्तरङ्गस्य कुतोऽनिर्वाच्ययाऽविद्यया बाध इति। यदुक्तं—सत्यानृते मिथुनीकृत्य विवेकाग्रहादध्यस्याहमिदं ममेदमिति लोकव्यवहार—इति। तत्र

अत आह—एवं भूतेति। अध्यासस्यानर्थहेतुत्वात् गुणेनेत्ययुक्तमत आह—चिदात्मन इति। न तर्हि तस्य दोषः अत आह—अन्तःकरणादीति। चैतन्यादेर्गुणत्वं मनोवृत्त्युपाधिभेदेन, कथं न संबध्यते। उक्ता हि संबन्धहेतुर्वासना, अत आह—एतदिति। तत्त्वावधारणाभ्यासस्य। परोक्षज्ञानमूलनिदिध्यासनस्य। अपनयति साक्षात्कारजननेन सवासनमुच्छिनत्ति। प्रबलविरोधिवासनाजन्यः साक्षात्कारो विपरीतवासनानिरासेऽपि शक्त इत्यर्थः। प्रतीतिकलहं परिहरति—तत्त्वेति। चिरानुवृत्तस्यापि भ्रमस्य तत्त्वज्ञानेन निश्शेषनिवृत्तिर्गान्धर्वाभ्यासादौ दृष्टेत्यर्थः। एवं हि बुद्धेस्तत्त्वपक्षपातः प्रसिद्धः, यत् प्रसिद्धविप्लावकाः बौद्धा अपि तमिच्छन्तीत्याह—यथाहुरिति। भावनाप्रकर्षाद्विशदं यत् सर्वविषयं ज्ञानं जायेत तद्विषयीकृतस्य निरुपद्रवस्यारोपशून्यस्य भूतस्य सत्यस्य अर्थस्व[1]भावस्य। विपर्ययैर्न बाधः, न स्वरूपतिरोधानम्। विपर्ययोऽनादिकालप्रवृत्तो वासनादार्ढ्यात्प्रबलः, तत्त्वबुद्धिः आगन्तुकत्वात् शिथिला अत उक्तम्—[2]अभिनवत्वेऽपीति। तत्त्वबुद्धेरभिनवत्वेऽपि बुद्धीनां तत्त्वपक्षपातस्वभावः दृढाभ्यासवासनाजा, सैव, सवासनविपर्यासमुच्छिनत्तीत्यर्थः। किञ्च स्वरूपाच्छिन्ने क्षणिके तत्त्वज्ञाने अनुवर्तमानेऽपि बुद्धेस्तत्पक्षपातादेव न पुनर्भ्रमा भवन्ति। किमु वक्तव्यं वृत्तिव्यक्ते, त्यक्ताविद्ये, स्वरूपज्ञाने नित्यानुवृत्तिभाजीत्याह—विशेषतस्त्विति। अत्यन्तान्तरङ्गस्य भेदलवशून्यस्य। तत्र हेतुश्चिदात्मस्वरूपत्वं। अविद्यया भ्रमेण, बाधः उपप्लुतत्वम्। तमेव तमित्यस्य लोकव्यवहार इत्यनेन पौनरुक्त्यमाशङ्क्याह—यदुक्तमिति। सूचितस्य कण्ठोक्तिर्न पौनरुक्त्यायेत्यर्थः। व्याख्योपेक्षाहेतुमाह—निगदेति। उक्तत्वात् प्रश्नायोगमाशङ्क्याह—आक्षि-

---

1 "स्व" ख पाठः 2 अयत्नवत्त्वेपि इति पाठः मुद्रितभामतीग्रन्थे दृश्यते। कल्पतरुसम्मतश्च।

तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि। कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति। उच्यते—देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाण-

---

व्यपदेशलक्षणो व्यवहारः कण्ठोक्तः। इतिशब्दसूचितं लोकव्यवहारमादर्शयति—तमेतमविद्याख्यमिति। निगदव्याख्यातम्। आक्षिपति—कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि। तत्त्वपरिच्छेदो हि प्रमा विद्या, तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि। नाविद्यावन्तं प्रमाणान्याश्रयन्ति, तत्कार्यस्य विद्याया अविद्याविरोधित्वादिति भावः। सन्तु वा प्रत्यक्षादीनि संवृत्त्यापि यथातथा, शास्त्राणि तु पुरुषहितानुशासनपराण्यविद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हन्तीत्याह - शास्त्राणि चेति। समाधत्ते - उच्यते - देहेन्द्रियादिष्वहंममाभिमानहीनस्य तादात्म्यतद्धर्माध्यासहीनस्य प्रमातृत्वानुपपत्तौ सत्यां प्रमाणप्रवृत्त्यनुपपत्तेः। अयमर्थः—प्रमातृत्वं हि प्रमां प्रति कर्तृत्वं, तच्च स्वातन्त्र्यम्। स्वातन्त्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वम्। तदनेन प्रमाकरणं प्रमाणं प्रयोजनीयम्। न च स्वव्यापारमन्तरेण करणं प्रयोक्तुमर्हति। न च कूटस्थनित्यश्चिदात्माऽपरिणामी स्वतो व्यापारवान्। तस्माद्व्यापारवद्बुद्ध्यादितादात्म्याध्यासात् व्यापारवत्तया प्रमाणमधिष्ठातुमर्हतीति

पतीति। हेत्वनुक्तौ कथमक्षेपोऽत आह—तत्त्वेति। विरोधद्योतनायाह—विद्येति। विद्याविद्ययोस्तु विरोधः प्रमाणे किमायातमत आह—तत्साधनानीति। विद्यासाधनस्याविद्यावद्गोचरत्वे का व्याहतिरत आह—नाविद्यावन्तमिति। तत्कार्यस्येत्यनेन साक्षादविरोधेऽपि कार्यद्वारा विरोध इत्युक्तम्। पूर्वभाष्ये लौकिका इति विशेषणाच्छास्त्रस्य पृथक्कथा युक्ता नत्विह, प्रमाणपदेन सङ्ग्रहादित्याशङ्क्य प्रत्यक्षादिभ्यो विशेषात् पृथगुक्तिरित्याह—सन्तु वेति। उच्यत इत्यस्य पूर्वान्वये वैयर्थ्यादुत्तरासम्भवत्वमाह—समाधत्त इति। अहम्ममशब्दयोरसमस्तत्वेनान्वयभ्रमं नुदति तादात्म्येति। अनुपपत्ताविति विषयसप्तम्यां प्रतिकूलो हेतुः अत आह—सत्यामिति। प्रमातृत्वानुपपत्तिः असङ्गता, अत आह—अयमिति। समस्तकारकेति। स्वेतरसम्भवत्समस्तकारकेति। तत् तस्मात्। अनेन प्रमात्रा। प्रमाणस्य प्रयोज्यत्वे हेतुः प्रमाकरणमिति। कारकविशेषत्वादित्यर्थः। निर्व्यापारत्वे हेतुरपरिणामित्वम्। व्यापारो हि परिणामः। तद्धेतुः कौटस्थ्यम् सर्वदैकरूप्यम्। परिणामित्वे स्यादनित्यतेति मत्वा नित्यग्रहणम्। शान्तस्तर्हि प्रमाणप्रयोगः अत आह—तस्मादिति। प्रमाणप्रवृत्त्यनुपपत्तेरित्यस्य हेतोः प्रतिज्ञावैधुर्यमाशङ्क्या-

प्रवृत्त्यनुपपत्तेः। नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति। न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः संभवति। न चानध्यस्तात्मभावेन देहेन कश्चि-

भवत्यविद्यावत्पुरुषविषयत्वमविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति। अथ मा प्रवर्तिषत प्रमाणानि, किं नश्छिन्नमित्यत आह—न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति। व्यवह्रियतेऽनेनेति व्यवहारः फलं, प्रत्यक्षादीनां प्रमाणानां फलमित्यर्थः। 'इन्द्रियाणि' इति इन्द्रियलिङ्गादीनीति द्रष्टव्यम्, दण्डिनो गच्छन्तीतिवत्। एवं हि 'प्रत्यक्षादि' इत्युपपद्यते। व्यवहारक्रियया च व्यवहार्याक्षेपात्समानकर्तृकता। अनुपादाय यो व्यवहार इति योजना। किमिति पुनः प्रमातोपादत्ते प्रमाणानि? अथ स्वयमेव कस्मान्न प्रवर्तत इत्यत आह—न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः—प्रमाणानां व्यापारः संभवति। न हि जातु करणान्यनधिष्ठितानि

क्षेपस्थेन सम्बध्नाति—**इति भवतीति**। विषयपदस्यैवाक्षेपस्थत्वात्तेनैव सम्बन्धोक्तिः। अविरोधशङ्काशान्त्यै विषयत्वस्य व्याख्यानमिति पदद्वयस्यार्थवत्त्वम्। नहीति हियोगात्पूर्वत्र हेतुरिव तथा चायुक्तं नहि प्रत्यक्षादिप्रवृत्तेरिन्द्रियोपादानमूलत्वमात्रेण प्रमाणानामविद्यावदाश्रयत्वं वा निरध्यासस्य प्रमातृत्वानुपपत्तिर्वा सिद्ध्यति। कौटस्थ्याद्युपजीवने तु पूर्वेण गतमत आह—**अथेति**। इन्द्रियोपादानं, इन्द्रियप्रेरणम्। प्रत्यक्षादिव्यवहारोऽपि तदेवेति आपाद्यापादकाभेदमाशङ्क्याह—**व्यवह्रियत इति**। कर्मधारयभ्रमं नुदति **प्रत्यक्षादीनामिति**। इन्द्रियप्रेरणेऽप्यनुमित्यादि फलं दृष्टम् अत आह—**इन्द्रियलिङ्गेति**। कथमन्यशब्देनान्यदर्शनमत आह—**दण्डिन इति**। अजहल्लक्षणयेत्यर्थः। मुख्ये को बाध इत्याशङ्कां निरस्यति—**एवं हीति**। व्यवहार इति क्रियामात्रोक्तौ कर्त्रैक्यापेक्षिल्यबयोगमाशङ्क्याह—**व्यवहारेति**। व्यवहारिण आक्षेपात्। नन्वस्नात्वा चैत्रो न भुङ्क्ते इतिवदसम्भवानुपादनयोर्व्यवहारेणैवान्वयात् कर्त्राक्षेऽपि दोषस्तदवस्थः। अतोऽन्वयान्तरमाह—**अनुपादायेति**। यो व्यवहारो व्यवहर्तुरिति शेषः। न चाधिष्ठानमिति चकाराद्युक्त्यन्तरमिति तावदयुक्तम्। इन्द्रियानुपादाने तत्फलाभावप्रसङ्गवत्। प्रमाणप्रवृत्तिं प्रत्यहेतुत्वात्। नापि शङ्कोत्तरमिन्द्रियाणि प्रतिदेहेन्द्रियव्यापारं प्रति तेषामाश्रयत्वस्य स्फुटत्वेन शङ्कानुदयादित्याशङ्क्य अधिष्ठानशब्देनाधिष्ठानव्यापारं गृहीत्वा शङ्कामाह—**किमिति**। उक्तव्यावृत्तिः पुनः शब्दार्थः। उपादत्त इत्यधिष्ठानक्रियोक्तिः न तु तेषां प्रवृत्तये, अत आह—**अथेति**। कस्मादित्युक्तप्रश्नोपोद्बलनार्थोऽथशब्दः। प्रमाणोपादानाक्षेपस्येन्द्रियव्यापारासम्भवमात्रं नोत्तरम् अत आह—**प्रमाणानामिति**। प्रतिज्ञामात्रत्वं परिहरति—**न हीति**। जात्विति व्याप्तेरभङ्गं सूचयति। न चाध्यासमन्तरेणाधिष्ठातृत्वमिति वक्तव्ये न

द्व्याप्रियते । न चैतस्मिन्सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति । तस्मादविद्यावद्विषयाण्येव प्रत्य-

---

कर्त्रा स्वकार्ये व्याप्रियन्ते, मा भूत्कुविन्दरहितेभ्यो वेमादिभ्यः पटोत्पत्तिरिति । अथ देह एवाधिष्ठाता कस्मान्न भवति, कृतमत्रात्माध्यासेनेत्यत आह — न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते । सुषुप्तेऽपि व्यापारप्रसङ्गादिति भावः । स्यादेतत् । यथानध्यस्तात्मभावं वेमादिकं कुविन्दो व्यापारयन्पटस्य कर्ता, एवमनध्यस्तात्मभावं देहेन्द्रियादि व्यापारयन्भविष्यति तदभिज्ञः प्रमातेत्यत आह—न चैतस्मिन्सर्वस्मिन्—इतरेतराध्यासे इतरेतरधर्माध्यासे च असति, आत्मनोऽसङ्गस्य—सर्वथा सर्वदा सर्वधर्मधर्मिविमुक्तस्य प्रमातृत्वमुपपद्यते । व्यापारयन्ति, अनध्यस्तात्मभावस्य तु देहादिष्वात्मनो न व्यापारयोगोऽसङ्गत्वादित्यर्थः । आतश्चाध्यासाश्रयाणि प्रमाणानीत्याह—न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति । प्रमायां

चानध्यस्तात्मभावेन देहेनेत्ययुक्तम् । देहमात्राध्यासस्येहासाध्यत्वादित्याशङ्क्य विधान्तरेण शङ्कामाह—**अथेति** । **अत्र** इन्द्रियाधिष्ठाने । **देहेन** अधिष्ठात्रा । **कश्चित्** प्रमाता । **व्याप्रियते** व्यापारवान् भवति, व्यापारोऽत्र प्रयोजनम् । देहेन्द्रियादिष्वहम्ममाभिमानहीनस्येति, न चानध्यस्तात्मभावेनेति च ग्रन्थाभ्यामुत्तरस्य पौनरुक्त्यमाशङ्क्याह—**स्यादेतदिति** । दृष्टान्तावष्टम्भान्नानन्तरेण पौनरुक्त्यम् । देहेन्द्रियादिष्वित्यत्र हेतोरकण्ठोक्तत्वात्, तदज्ञानात् शङ्का संभवतीति न तेनापि पौनरुक्त्यमिति भावः । **देहेन्द्रियादीति** । देहेन्द्रियाधिष्ठानक्रियायां तद्द्वारा चेन्द्रियाणि स्वकार्ये व्यापारयन्नित्यर्थः । सुषुप्तेऽतिप्रसङ्गं वारयति—**तदभिज्ञ इति** । देहाद्यभिज्ञः । सुषुप्ते देहाद्यदर्शनादव्यापरः । नाध्यासाभावादित्यर्थः । एतस्मिन् सर्वस्मिन् इति देहादाविति भाति, तथा च नोत्तरं देहादिकमङ्गीकृत्यैवाध्यासाभावस्य शङ्कितत्वादित्याशङ्क्याह—**इतरेतराध्यास इत्यादि** । अनयैवानुपपत्त्या "अहम्ममाभिमानहीनस्येति" "अनध्यस्तात्मभावेने"ति चोपसर्जनतयोक्तोप्यध्यास एवैतच्छब्देन [1]गृह्येत इत्यर्थः । असङ्गत्वहेतोः साक्षात् साध्यसम्बन्धद्योतनाय आत्मन इति व्यत्ययपाठः । [2]असङ्गत्वस्याध्यासासत्त्वहेतुकत्वभ्रमशान्त्यै च असङ्गस्य सङ्गिता व्याहता न प्रमातृत्वमत आह—**सर्वधर्मेति** । कदाचिदभावेऽप्यन्यदा, कथञ्चिद् भावेऽपि अन्यथा धर्मयोगमाशङ्क्योक्तं **सर्वथा सर्वदेति** । दृष्टान्त विघटयति—**व्यापारवन्त इति** । न चैतस्मिन्नित्यनेनाध्यासस्य स्थापितत्वात् न च प्रमातृत्वमिति वृथा, प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरित्यनेन पुनरुक्तं चेत्याशङ्क्य प्रमाणप्रेरकत्वेनाध्यासं प्रसाध्य प्रमाश्रयत्वेनापि तत्साधनाददोष इत्याह—**आतश्चेति** । अवश्यं च । अध्यासाश्रयाणि तदुपजीवीनि । नन्वनेन

---

1 'गृहीतः' ख पाठः   2 'त्वध्या' क पाठः

क्षादीनि प्रमाणानि शास्त्राणि च। पश्वादिभिश्चाविशेषात्। यथा हि

खलु फले स्वतन्त्रः प्रमाता भवति। अन्तःकरणपरिणामभेदश्च प्रमेयप्रवणः कर्तृस्थश्चित्स्वभावः प्रमा। कथं च जडस्यान्तःकरणस्य परिणामश्चिद्रूपो भवेत्, यदि चिदात्मा तत्र नाध्यस्येत। कथं चैष चिदात्मकर्तृको भवेत्, यद्यन्तःकरणं व्यापारवच्चिदात्मनि नाध्यस्येत्। तस्मादितरेतराध्यासाच्चिदात्मकर्तृस्थं—प्रमाफलं सिध्यति। तत्सिद्धौ च प्रमातृत्वम्, तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः, प्रमातृत्वेन च प्रमोपलक्ष्यते। प्रमायाः फलस्याभावे प्रमाणं न प्रवर्तेत। तथा च प्रमाणमप्रमाणं स्यादित्यर्थः। उपसंहरति—तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि। स्यादेतत्—भवतु पृथग्जनानामेवम्। आगमोपपत्तिप्रतिपन्नप्रत्यगात्मतत्त्वानां व्युत्पन्नानामपि पुंसां प्रमाणप्रमेयव्यवहारा दृश्यन्त इति कथमविद्यावद्विषयाण्येव प्रमाणानीत्यत आह—पश्वादिभिश्चाविशेषादिति। विदन्तु नामागमोपपत्तिभ्यां देहेन्द्रियादिभ्यो भिन्नं

प्रमातृत्वमेव साध्यते नाध्यासाश्रयत्वं प्रमाणानाम्, अत आह—**प्रमायामिति**। प्रमातृशब्दार्थकथनं वक्ष्यमाणप्रमोपलक्षणे सम्बन्धावगमाय। किं ततः अत आह—**अन्तःकरणेति**। प्रमा चेत्यन्वयः। परिणामभेदः, उद्भूतसत्त्वः। सुखादेर्व्यवच्छिनत्ति **प्रमेयेति**। **कर्तृस्थश्चित्स्वभाव इति**। जानामीत्येवं प्रमायामनुभूयमानरूपद्वयं वक्ष्यमाणोपयोगितयोक्तम्। प्रमाफलस्य कर्तृस्थत्वेऽपि चिदात्मकर्तृस्थता कथमित्याशङ्क्य प्रमाश्रयत्वरूपस्य प्रमातृत्वस्य चिदात्मनि अनुभवादित्याह—**तत्सिद्धौ चेति**। फलस्य चिदात्म-[1]कर्तृस्थत्वसिद्धौ प्रमातृत्वम्। चकार एवकारार्थः। प्रमातृत्वं चिदात्मनि, अनुभूयमानं सिध्यतीति शेषः। ननु प्रमा विद्या सा कथमविद्यारूपाध्यासगर्भा, विद्याविद्याविरोधस्योक्तत्वादित्यत आह—**तामेव चेति**। विद्या स्वविषयेऽध्यासेन सह विरुध्यते न स्वात्मनीति भावः। ननु भाष्ये प्रमातृत्वानुपपत्तिः प्रतिभाति, कथं प्रमानुपपत्तिरुक्ता अत आह—**प्रमातृत्वेनेति**। अनुपलक्षणे प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति अनेन पूर्वोक्तं पौनरुक्त्यं स्यादित्यर्थः। यद्येवं कार्याभावे कारणं न स्यादित्युक्तं स्यात् अत आह—**प्रमाया इति**। फलत्वादुद्देश्यायाः प्रमाया असम्भावने तदर्थं प्रमाणं न प्रवर्तेतेत्यर्थः। विनैव प्रमाणफलं प्रमाणं प्रवर्ततामत आह – **तथा चेति**। तस्मादिति भाष्यमनन्तरोक्तयुक्तेः[2] [3]साध्यनिर्देशादेव तत्रैवकारो वृथेत्याशङ्क्योक्ता युक्तिश्चकारादेव पूर्वसाध्येन सम्बध्यते। इदं तु सर्वयुक्तिनिगमनमित्येवकारो युक्त इत्याह—**उपसंहरतीति**। यद्ययं सर्वोपसंहारः पश्वादिभिश्चेति कथं युक्त्यन्तरमिति। न शङ्कोत्तरत्वादित्याह—**स्यादेतदिति**। परोक्षज्ञानमपरोक्षभ्रमनिवर्तकं न भवतीति विस्मृतिरेतच्छङ्काबीजम्। अविशेषादिति कथं, विशेषस्योक्तत्वात्, सत्यम् अङ्गीकृत्यैव तं विशेषं अन्यत्राविशेषमाहेत्याह – **विदन्त्विति**। हेतोरसिद्धि-

1 'तृत्वसि' ख पाठः 2 "क्तं" ख-पाठः 3 "ध्या" ख पाठः

पश्वादयः शब्दादिभिः श्रोत्रादीनां संबन्धे सति, शब्दादिविज्ञाने प्रतिकूले जाते, ततो निवर्तन्ते अनुकूले च प्रवर्तन्ते; यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमागच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति; एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरी-

---

प्रत्यगात्मानम्। प्रमाणप्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मान्नातिवर्तन्ते। यादृशो हि पशुशकुन्तादीनामविप्रतिपन्नमुग्धभावानां व्यवहारस्तादृशो व्युत्पन्नानामपि पुंसां दृश्यते। तेन तत्सामान्यात्तेषामपि व्यवहारसमयेऽविद्यावत्त्वमनुमेयम्। चशब्दः समुच्चये। उक्तशङ्कानिवर्तनसहितपूर्वोक्तोपपत्तिः अविद्यावत्पुरुषविषयत्वं प्रमाणानां साधयतीत्यर्थः। एतदेव विभजते-यथा हि पश्वादय इति। अत्र च शब्दादिभिः श्रोत्रादीनां संबन्धे सति इति प्रत्यक्षं प्रमाणं दर्शितम्। शब्दादिविज्ञाने इति तत्फलमुक्तम्। प्रतिकूले इति चानुमानफलम्। तथाहि शब्दादिस्वरूपमुपलभ्य तज्जातीयस्य प्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य प्रतिकूलतामनुमिमीत इति। उदाहरति-यथा दण्डेति। शेषमतिरोहितार्थम्। स्यादेतत् - भवन्तु प्रत्यक्षादीन्यविद्या-

---

मनुभवेन परिहरति—**यादृशो हीति**। आदिशब्दार्थमाह—**शकुन्तेति**। [1]ननु पृथग्जनैरविशेषादिति वाच्यम्। पश्वादीभिरिति किमिति, अविगीतसाध्यत्वात् पश्वादीनामित्याह—**अविप्रतिपन्नेति**। **मुग्धभावः** अज्ञत्वम्। तेन तत्कार्याध्यासत्वमुक्तम्। दृश्यतां व्यवहारसाम्यम् अध्यासस्तु न दृश्यते। अत आह—**तेनेति**। स्वमानसावसेयं व्यवहारविशेषं पक्षीकृत्य तथात्वादध्यासमूलत्वमनुमेयम्। किन्तर्हि चकारेणात आह—**शब्द इति**। यदि समुच्चयः कथं शङ्कोत्तरत्वमत आह—**उक्तेति**। अविद्यावद्विषयाण्येवेत्यवधारयतीत्यर्थः। पौनरुक्त्यमाशङ्क्य विवरणत्वाददोष इत्याह—**एतदेवेति**। ननु पूर्वोक्तविभजने यथा पश्वादीनामनुकूलप्रतिकूलयोः प्रवृत्तिनिवृत्ती एवं व्युत्पन्नानामिति, एतावद्वाच्यम्। किमर्थं शब्दादिभिरित्यादिकथेत्याशङ्क्य प्रमाणप्रमेयव्यवहारे साम्यं दर्शयितुं दृष्टान्ते प्रमाणसद्भावं दर्शयतीत्याह—**अत्र चेति**। चकारः शङ्काशान्तौ। प्रतिकूल इत्यनुमानफलोक्तिः। **कथमिति**। प्रातिकूल्यस्य व्याप्त्यनुसन्धानगम्यत्वादित्याह—**तथा हीति**। अनुमिमते पश्वादयः। पौनरुक्त्यं परिहरति—**उदाहरतीति**। पश्वादीनां च प्रसिद्ध इति दृष्टान्तस्य साध्यवैकल्योद्धारः। तत्काल इति चाध्याससमानकालत्वेन साम्यकीर्तनम्। साम्यस्वरूपनिर्देशात्मकमतिसुग्रहमित्याह—**शेषमिति**। पुत्रकामादिवाक्येषु परलोकानपेक्षणात्, ज्योतिष्टोमादिफलस्यापि पुरुषान्तरगामितोपपत्तेर्यद्यपीत्यङ्गीकारायोगमाशङ्क्याह—**स्यादेतदिति**। शास्त्रीये त्विति तुशब्दाभिप्रायमाह—**भवन्त्विति**।

---

[1] "नुप्र" ख पाठः

तान्प्रति प्रवर्तन्ते, अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनां च प्रसिद्धोऽविवेकपुरःसरः प्रत्यक्षादिव्यवहारः, तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते। शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः

वद्विषयाणि, शास्त्रं तु 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादि न देहात्माध्यासेन प्रवर्तितुमर्हति। अत्र खल्वामुष्मिकफलोपभोगयोग्योऽधिकारी प्रतीयते। तथा च पारमर्षं सूत्रम्—'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात् स्वयं प्रयोगे स्यात्' (अ. ३ पा. ७ सू. १८) इति। न च देहादि भस्मीभूतं पारलौकिकाय फलाय कल्पत इति देहाद्यतिरिक्तं कंचिदधिकारिणमाक्षिपति शास्त्रं, तदवगमश्च विद्येति कथमविद्यावद्विषयं शास्त्रमित्याशङ्क्याह-शास्त्रीये त्विति। तुशब्दः प्रत्यक्षादिव्यवहाराद्भिनत्ति शास्त्रीयम्। अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबन्धं विना न निर्वहतीति तावन्मात्रमाक्षिपेत्, न त्वस्यासंसारित्वमपि, तस्याधिकारेऽनुपयोगात्। प्रत्युत औपनिषदस्य पुरुषस्याकर्तुरभोक्तुरधिकारविरोधात्। प्रयोक्ता हि

आदिशब्देन काम्यान्तरस्य "न हन्यादि"त्यादेश्च सङ्ग्रहः। **तथा चेति**। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"त्यत्र साङ्गे प्रधाने यजमान एव कर्त्ता अङ्गेषु यथास्वमृत्विजोऽपि चेति सन्देहे पूर्वपक्षसूत्रं "शास्त्रफलम्" (जै-३-९-१८) इति। यजमान एव सर्वत्र कर्ता स्यात्, यतः शास्त्रगम्यं फलं प्रयोक्तरि कर्तरि प्रतीयते। कुतः तल्लक्षणत्वाच्छब्दप्रमाणकत्वादस्यार्थस्य स्वर्गोद्देशेन भावनां विदधताख्यातेन भावनाक्षिप्तस्य कर्तुः फलसम्बन्धावगमात्। आत्मनेपदेन च फलस्य कर्तृगामिताप्रतीतेरिति। राद्धान्तस्तु ऋत्विजां दक्षिणाभिः परिक्रयाम्नानात् स्वस्मिंश्च तद्विप्रतिषेधाद् ऋत्विजामपि यथास्वं कर्तृत्वम् प्रयोजककर्तृत्वात्, यजमानः फलभागिति तृतीये स्थितम्। कर्तृगामि फलमित्यंशे पूर्वोत्तरपक्षयोरविगानात् पूर्वपक्षसूत्रमुदाहृतम्। तोवैंयर्थ्यं निरस्यति—**तु शब्द इति**। भवन्त्वित्यादिना तुशब्दाभिप्राय उक्तः। अयन्त्वक्षरार्थः। ननु परस्त्रीकामः प्रायश्चित्तं कुर्यादितिवत् स्वर्गकामवाक्येपि फलसम्बन्धो नास्तीति शक्यते वक्तुम्। कथमभ्युपगम्योत्तरमत आह—**अधिकारेति**। पूर्वतन्त्रसिद्धस्याविरुद्धस्य विप्लवो न कार्य इत्यर्थः। वेदान्तवेद्यतत्त्वानपेक्षायामप्यधिकारिणः स्वात्मतत्त्वापेक्षत्वाद्विद्यावत्त्वमक्षतमिति न वेदान्तवेद्यमित्यादि परिहारस्य वैय्यधिकरण्यमित्याशङ्क्य, वेदान्तवेद्यं प्रत्यगात्मन एव तत्त्वं नान्यस्येत्याह—**न त्वस्येति**। असंसारित्वम् असंसारिस्वरूपम्। अनुपयोगादित्ययुक्तम् तथासति वेदान्ताप्रामाण्यापत्तेरत आह—**तस्याधिकार इति**। विरोधासिद्धिं परिहरति—**प्रत्युतेत्यादिना**। अकर्तुरभोक्तुरिति विरोधोक्तिः। न चाकर्तृत्वाद्यसिद्धम उपनिषद्भि-

परलोकसंबन्धमाधिक्रियते; तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्म-क्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते; अनुपयोगादधिकारविरोधाच्च। प्राक्च तथा भूतात्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते।

कर्मणः कर्मजनितफलभोगभागी कर्मण्यधिकारी स्वामी भवति। तत्र कथमकर्ता प्रयोक्ता, कथं वाऽभोक्ता कर्मजनितफलभोगभागी। तस्मादनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते। एवं वेदान्ता अप्यविद्यावत्पुरुषविषया एव। नहि प्रमात्रादिविभागादृते तदर्थाधिगमः। ते त्वविद्यावन्तमनुशासन्तो निर्मृष्टनिखिलाविद्यमनुशिष्टं स्वरूपे व्यवस्थापयन्तीत्येतावानेषां विशेषः। तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धम्। स्यादेतत्—यद्यपि विरोधानुपयोगाभ्यामौपनिषदः पुरुषोऽधिकारे नापेक्ष्यते; तथाप्युपनिषद्भ्योऽवगम्यमानः शक्नोत्यधिकारं निरोद्धुम्। तथा च परस्परापहतार्थत्वेन कृत्स्न एव वेदः प्रामाण्यमपजह्यादित्यत आह—प्राक् च तथाभूतात्मेति। सत्यमौपनिषदपुरुषाधिगमोऽधिकारविरोधी, तस्मात्तु पुरस्तात्कर्मविधयः स्वोचितं व्यवहारं निर्वर्तयन्तो नानुपजातेन ब्रह्मज्ञानेन

स्तथोक्तेरित्याह—**औपनिषदेति**। प्रत्युतेति पूर्वस्माद्धेतोरतिशयोक्तिः। अकर्तृत्वाभोक्तृत्वयोरधिकार-विरोधमाविष्करोति—**प्रयोक्तेति**। कर्मणः प्रयोक्ता अनुष्ठाता। कर्मजनितफलभोगभागी खलु तत्र स्वामी भवति। स एवाधिकारीति व्यपादिश्यत इत्यर्थः। ननु यथा तत्त्वं नापेक्षते एवं अध्यासमपि नापेक्षते। कथमविद्यावद्विषयत्वमत आह—**तस्मादिति**। अधिकारशास्त्रस्याविद्यावद्विषयत्वेऽपि तत्त्वगोचरस्य मोक्षशास्त्रस्य तदभावान्मोक्षपराणीति भाष्यायोगमाशङ्क्याह—**एवमिति**। तर्हि शास्त्रान्तरवन्मोक्षोपयोगिनो न स्युरत आह—**तत्विति**। अनुशिष्टस्य, उपदिष्टस्य अविद्यावतोऽधिकारिणः स्वरूपं निर्मृष्टनिखिलाविद्यं व्यवस्थापयन्तीत्यन्वयः। अविद्यावन्तमाश्रित्याविद्याविरोधि विज्ञानं जनयन्तो मोक्षं साधयन्तीत्यर्थः। एवं च सर्वाणीति मोक्षपराणीति चोपपन्नमित्याह—**तस्मादिति**। अविद्यावद्विषयत्वस्योक्तत्वात् प्राक्चेति पौनरुक्त्यमाशङ्क्याह—**स्यादेतदिति**। विरुध्यतामधिकारः को दोष इत्याशङ्क्य आह—**तथा चेति**। अधिकारशास्त्रस्य प्रवृत्तेः प्रागेव तथाभूतस्य आत्मनो विज्ञानादिति भाष्ये भाति, एवं च नाधिकार-विरोधस्योत्तरम्, अथैतद्भयादधिकाराविरोधित्वमुच्येत तर्ह्यधिकारविरोधाच्चेति भग्नमित्याशङ्क्याह—**सत्यमिति**। **तस्मात्त्विति**। आत्मविज्ञानात्प्रागित्यन्वये न दोष इत्यर्थः। चकारस्त्वर्थः। अन्यथा ज्ञानस्योपरिष्टादपि प्रवृत्तिप्राप्तेरिति मत्वाऽऽह—**पुरस्तादिति**। प्रवर्तमानपदव्याख्यानं स्वोचितमित्यादि।

तथाहि-'ब्राह्मणो यजेत' इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादि-

शक्या निरोद्धुम् । न च परस्परापहतिः, विद्याविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेः । यथा 'न हिंस्यात्सर्वा भूतानि' इति साध्यांशनिषेधेऽपि 'श्येनेनाभिचरन् यजेत' इति शास्त्रं प्रवर्तमानं न हिंस्यादित्यनेन न विरुध्यते, तत्कस्य हेतोः, पुरुषभेदादिति । अवर्जितक्रोधारातयः पुरुषा निषेधेऽधिक्रियन्ते, क्रोधारातिवशीकृतास्तु श्येनादिशास्त्र इति । अविद्यावत्पुरुषविषयत्वं नातिवर्तेत इति यदुक्तं तदेव स्फोरयति—तथाहीति । वर्णाध्यासः—'राजा राजसूयेन यजेत' इत्यादिः । आश्रमाध्यासः—'गृहस्थः सदृशीं भार्यां विन्देत्' इत्यादिः । वयोऽध्यासः—'कृष्णकेशोऽग्नीनादधीत इत्यादिः । अवस्थाध्यासः— 'अप्रतिसमाधेयव्याधीनां जलादिप्रवेशेन प्राणत्यागः' इति । आदिग्रहणं महापातकोपपातकसंकरीकरणापात्रीकरणमलिनीकरणाद्यध्यासोपसंग्रहार्थम् । तदेवमात्मानात्मनोः परस्पराध्यासमाक्षेपसमाधानाभ्यामुपपाद्य प्रमाण-

तथापि परस्परविरुद्धार्थाभिधायित्वादप्रामाण्यं तदवस्थमत आह—न चेति । इह विद्यावान् वैराग्याद्युपेतनित्यानित्यविवेकविद्यावान् । अतस्ते ह्यविद्यावन्तमनुशासन्त इति न पूर्वोक्तविरोधः । अविद्यावानपि तद्विपरीतः । इदं रजतं नेदं रजतमिति पुरुषभेदेऽपि न व्यवस्था दृष्टा सत्यम् । वेदे तु व्यवस्थैव युक्तेत्युदाहरति—यथेति । नन्वत्र विरोधप्राप्तिर्नास्ति । हिंस्यान्नहिंस्यादिति वा यजेत न यजेतेति वा अश्रवणादित्याशङ्क्याह—साध्यांश्चेति । श्येनयागसाध्यांशः प्राणिहिंसा न हिंस्यादिति निषिध्यत इति विरोधप्राप्तिरित्यर्थः । अन्योन्यविपरीतार्थत्वे कथं न विरोध इति शङ्कते—तत्कस्येति । प्रमेयविरोधेऽपि प्रमातृभेदादित्याह —पुरुषेति । ब्रूम इति शेषः । नन्विह विद्याविद्यावत्पुरुषभेदो नास्ति । उभयोरविद्यावत्त्वादित्याशङ्क्य रीत्यन्तरेण [1]तद्भेदमाह—वर्जितेति । तदनेन तादृगात्मविज्ञानात्पूर्वं प्रवर्तमानं शास्त्रमविद्यावत्पुरुषविषयत्वं संसाराभिरतपुरुषाधिकारकत्वं नातिवर्तेते अत्रैव व्यवतिष्ठते । अतो न वेदान्तान् पराहन्ति । न चैतैः पराहन्येतेति भाष्यार्थः कथितो भवति । तमेतमविद्याख्यमिति ग्रन्थे अध्यासं पुरस्कृत्य[2] विधिप्रतिषेधशास्त्राणि प्रवृत्तानीत्युक्तत्वात् पौनरुक्त्यमाशङ्क्याह—अविद्यावदिति । अयं तमेतमविद्याख्यमिति ग्रन्थोक्तस्याक्षरान्तरैरनुवादः । अत एव यदुक्तमिति व्यवहितपरामर्शः । भाष्ये चाध्यासं पुरस्कृत्येत्यध्यासमाश्रित्येति प्रत्यभिज्ञानम् । भाष्यस्थादिशब्दो वर्णान्तरावलम्बिनां च वाक्यानां ग्राहक इत्याह—वर्णाध्यास इत्यादि । गृहस्थःगृहस्थो बुभूषुः । द्वितीयादिशब्दार्थमाह—आदिग्रहणमिति । उक्तस्योक्तावादो वृथा अत आह—तदेवमित्यादिना । अनर्थहेतुत्वप्रतिपादनमादौ

1 इ अवर्जितो ? पाठः 2 "स्येत्यध्यास" ख पाठः

विशेषाध्यासमाश्रित्य प्रवर्तन्ते। अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा - पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति। तथा देहधर्मान् - स्थूलोऽहं,

---

प्रमेयव्यवहारप्रवर्तनेन च दृढीकृत्य तस्यानर्थहेतुतामुदाहरणप्रपञ्चेन प्रतिपादयितुं तत्स्वरूपमुक्तं स्मारयति-अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम । 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इत्यस्य संक्षेपाभिधानमेतत् । तत्राहमिति धर्मितादात्म्याध्यासमात्रं ममेत्यनुत्पादितधर्माध्यासं नानर्थहेतुरिति धर्माध्यासमेव ममकारं साक्षादशेषानर्थसंसारकारणमुदाहरणप्रपञ्चेनाह— तद्यथा पुत्रभार्यादिष्विति । देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्रकलत्रादिस्वाम्यं च कृशत्वादि-वदारोप्य आह —अहमेव विकलः सकल इति। स्वस्य खलु साकल्येन स्वाम्यसाकल्यात् स्वामीश्वरः सकलः संपूर्णो भवति। तथा स्वस्य वैकल्येन स्वाम्यवैकल्यात् स्वामीश्वरो विकलोऽसंपूर्णो भवति। बाह्यधर्मा ये वैकल्यादयः स्वाम्यप्रणालिकया संचारिताः शरीरे तानात्म-न्यध्यस्यतीत्यर्थः । यदा च परोपाध्यपेक्षे देहधर्मे स्वाम्ये इयं गतिः, तदा क्व कथानौपाधिकेषु देहधर्मेषु कृशत्वादिष्वित्याशयवानाह—तथा देहधर्मानिति । देहादेरप्यन्तरङ्गाणामिन्द्रियाणा-

---

कुतो न स्यात् । आक्षेपसमाधानानन्तरं वा कथं भवेदित्याशङ्क्यानिरूपितरूपस्यानर्थहेतुताया दुर्वचत्वात्, कार्यद्वारा दृढीकरणस्य च स्वरूपनिरूपणान्तर्गतत्वाद् अयमेवास्यावसर इत्यभिप्रायेण वृत्तानुवादः । ननु न नैवं पूर्वमुक्तम् । कथमवोचामेति स्मारणमत आह—स्मृतीति । तत्र हि परत्रेत्यतस्मिन्निति लभ्यते । पूर्वदृष्टावभास इति च तद्बुध्यंश इत्यर्थः । अभ्यर्हितधर्म्यध्यासमुक्त्वादौ धर्माध्यासोदाहरणायोगमाशङ्क्याह—तत्रेति । ज्ञातविवेकस्य पुत्रादेः, धर्मं कथमात्मन्यध्यस्येदित्याशङ्क्य देहधर्माध्यासपरत्वेन व्याचष्टे—देहेति । कुरूपत्वं वैकल्यम् आदिशब्दार्थः साकल्यम् तदारोपे कारणं स्वाम्यारोपः । देहधर्म इत्युभयविशेषणम् । धर्माध्यासहेतुः देहतादात्म्याध्यासः, आरोपकार्यव्यवहारेणारोपमभिनयति— अहमेवेति । ननु साकल्यादि न स्वरूपेऽस्ति । कथं तदारोप अत आह—स्वस्येति। स्वस्य धनस्य स्वाम्यस्य साकल्यात् सकलशब्दव्याख्या, पूर्ण इति। यद्येवं साकल्यादिर्देहधर्मः कथं बाह्यग्रहणं भाष्ये । अत आह—बाह्येति। बाह्यधर्मः पुत्रादिधर्मः । देहे बाह्यधर्मसमानधर्मोदयात्तत्सञ्चारोपचारः । ननु 'तथा देहधर्मानि'त्युत्तरत्रारम्भात् पूर्वस्यादेहधर्मत्वं भातीत्याशङ्क्य निरुपाधिदेहधर्माणामिह विवक्षितत्वाददोष इत्याह—यदा चेति। स्वाम्ये तद्द्वारक-वैकल्यादौ च । इन्द्रियधर्मेषु त्वप्रत्ययाश्रवणाद् धर्माः अव्यक्ताः तान्निर्दिशन्नन्तरोदाहरणे क्रमादाह—

कृशोऽहं, गौरोऽहं, तिष्ठामि, गच्छामि, लङ्घयामि चेति । तथेन्द्रियधर्मान्—मूकः, काणः, क्लीबः, बधिरः, अन्धोऽहमिति । तथाऽन्तःकरणधर्मान्—कामसंकल्पविचिकित्साध्यवसायादीन् । एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं

मध्यस्तात्मभावानां धर्मान्मूकत्वादीन् ततोऽप्यन्तरङ्गस्यान्तःकरणस्य अध्यस्तात्मभावस्य धर्मान्कामसंकल्पादीन् आत्मन्यध्यस्यतीति योजना । तदनेन प्रपञ्चेन धर्माध्यासमुक्त्वा तस्य मूलं धर्म्यध्यासमाह —एवमहंप्रत्ययिनम्—अहंप्रत्ययो वृत्तिर्यस्मिन्नन्तःकारणादौ सोऽयमहंप्रत्ययी तम् । स्वप्रचारसाक्षिणि—अन्तःकरणप्रचारसाक्षिणि, चैतन्योदासीनताभ्यां, प्रत्यगात्मन्यध्यस्य । तदनेन कर्तृत्वभोक्तृत्वे उपपादिते । चैतन्यमुपपादयति—तं च प्रत्यगात्मानं सर्वसाक्षिणं । तद्विपर्ययेण अन्तःकरणादिविपर्ययेण, अन्तःकरणाद्यचेतनं तस्य विपर्ययः चैतन्यं तेन ।

देहादपीति । बहिरङ्गस्य स्थूलतया सुग्रहत्वेन प्रथमोपन्यास इत्यर्थः । अध्यस्तात्मभावानामिति । धर्माध्यासहेतुक्तिः । वाक्यस्य साकाङ्क्षतां वारयति आत्मनीति । योजना अनुषङ्गः । नन्वन्योऽपि धर्माध्यासोऽस्ति । स कथं नोच्यते । किंच साक्षादनर्थहेतुत्वाद् धर्माध्यासोक्त्यैवालमित्याशङ्क्य धर्माध्यासस्य प्रपञ्चितत्वाद्विस्तरभयाच्चान्यस्यानुपन्यासः । उक्तो धर्ममात्राध्यास इति भ्रान्तिशान्त्यै तन्मूलस्यानुवादो युक्त इत्याह—तदनेनेति । सर्वधर्माध्यासे वाच्येऽहंप्रत्ययिनोऽन्तःकरणस्यैवाध्यासोक्तिरयुक्ता, न, अहम्प्रत्ययिशब्देनैव सर्वसङ्ग्रहादित्याह—अहंप्रत्यय इति । यस्मिन्निति विषयसप्तमी । प्रत्यगात्मनः प्रचाराभावात् स्वशब्दस्यार्थन्तरमाह—अन्तःकरणेति । एतदिन्द्रियादेरप्युपलक्षणम् । विवादनिर्णायकमानुषप्रमाणभेदस्य साक्षिशब्दस्यात्राभावात् तद्गतचैतन्यौदासीन्यगुणयोगादुपचार इत्याह—चैतन्योदासीनतेति । ननु तंच प्रत्यगात्मानमित्येतदेवास्तु, एवमहम्प्रत्ययिनमित्यनेन किम्, अथवा तदेवास्तु किमुत्तरेण । एकोदाहरणेनापि धर्म्यध्याससिद्धेरित्याशङ्क्याध्यासे विशेषस्फुरणस्य आरोप्यत्वप्रयुक्तत्वादिह कर्तृत्वादेश्चैतन्यादेश्च द्विविधस्य विशेषस्य स्फुरणादन्योन्याध्यास एव वाच्य इत्याह—तदनेनेति । कर्तृत्वं भोक्तृत्वं प्रत्यगात्मनि स्फुरदित्यर्थः । चैतन्यमन्तःकरणादौ भासमानम् । तच्छब्दस्य प्रत्यगात्मग्राहित्वे चैतन्यविपर्ययेणेति प्राप्तौ न चैतन्योपपादनं स्यात् । अतोऽन्यग्राहितामाह—अन्तःकरणादीति । विपर्ययस्यैवाध्यासत्वात् विपर्ययेणाध्यस्यन्तीत्ययुक्तमित्याशङ्क्य व्यत्ययो विपर्ययो नाध्यास इत्याह—अन्तःकरणादीति । ननु चैतन्यं प्रत्यगात्मारोपे[1] न निमित्तम् ।

---

1 "पे नि ।" ख पाठः

तद्विपर्ययेणान्तःकरणादिष्वध्यस्याति । एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थ-

---

इत्थंभूतलक्षणे तृतीया । अन्तःकरणादिष्वध्यस्यति । तदनेनान्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदरूपश्चेतनः कर्ता भोक्ता कार्यकारणाविद्याद्वयाधारोऽहंकारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मा इतरेतराध्यासोपादानः, तदुपादानश्चाध्यास इत्यनादित्वाद्बीजाङ्कुरवन्नेतरेतराश्रयत्वमित्युक्तं भवति । प्रमाणप्रमेयव्यवहारदृढीकृतमपि शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतयाऽध्यासं सुदृढीकरोति—एवमयमनादिरनन्तः—तत्त्वज्ञानमन्तरेणाशक्यसमुच्छेदः । अनाद्यनन्तत्वे हेतुरुक्तः—नैसर्गिक इति । मिथ्याप्रत्ययरूपः—मिथ्याप्रत्ययानां

कथं तृतीया, अत आह—**इत्थं भूते**ति । अन्तःकरणादिष्विति भाष्यशेषपाठः । साक्षिणीत्युक्तत्वाच्छुद्धे चिदात्मन्ययमनर्थाध्यास इति भाति, तदयुक्तम् । परमात्मनः सांसारिकानर्थसम्बन्धानभ्युपगमादित्याशङ्क्य, अनर्थसम्बन्धोऽयं जीवभावापन्ने चिदात्मन्युक्तः न शुद्ध इत्याह—**तदनेने**ति । प्रत्यगात्मा जीवात्मा सन् सर्वानर्थसम्भारभाजनम् । जीवत्वापादकमाह—**इतरेतरे**ति । **अध्यासोपादानः** तद्धेतुकः तन्मूलजीवभावः । ऐक्याध्यासहेतुमारोप्य संसर्गमाह—**अन्तःकरणाद्यवच्छिन्नः** । अनेन शुद्धे परस्पराध्यासो नेत्युक्तम् । शुद्धस्यान्तःकरणादिस्वरूपमात्राध्यासाधिष्ठानत्वात् । अन्योन्याध्यासज्ञापकमाह—**इदमनिदमि**ति । तद्रूपत्वमपि तदर्थद्वययोगादाह—**चेतनः कर्ता भोक्ते**ति । अथ शुद्धे कुतो न स्यादध्यासः, तस्य जीववदविद्याभावादित्याह—**कार्ये**ति । कार्याविद्या भ्रमसंस्कारः, कारणाविद्या अनादिभावरूपा । नन्वहं कर्तेति केवलस्वयैव कर्तृत्वादि भाति । न, संवलितस्यैवाहंधीविषयत्वादित्याह—**अहंकारास्पदम्** । अनर्थोऽप्ययमकस्मादेव कदाचिच्छाम्यति किन्तत्रोद्यमेनेति मा शङ्कीत्याह—**संसारी**ति । [1]संसरणशीलः । स्वाभाविकत्वादनर्थस्य तत्त्वज्ञानं विना नोच्छित्तिरित्यर्थः । यद्वा अनवच्छिन्नादेकरसादनुभयधर्मकादनविद्यादहन्धीगम्यादसंसृति[2]शीलाच्छुद्धरूपाद् भेत्तुं विशेषणानि । यद्ययमध्यासहेतुकस्तर्हि तस्य प्रमातृत्वादध्यासोऽपि तद्धेतुक इति परस्पराश्रयता अत आह—**तदुपादानश्चेत्यादिना** । उक्तविधो जीवात्मा सर्वानर्थसम्भारभाजनमित्युक्तं भवतीति योजना । न चैवं परस्पराश्रयतेत्युक्तं भवति । पौनरुक्त्यमाशङ्क्याह—**प्रमाणे**ति । विषमे प्रमेये शिष्याणां दृढतमप्रत्ययाय युक्ता पुनरुक्तिरित्यर्थः । यद्यपि अध्यासं न लौकिका जानन्ति, तथापि चैतन्यकर्तृत्वाद्यावेशं वदन्तीति सर्वलोकप्रत्यक्षतोक्ता । अनन्तत्वे अनिर्मोक्षः स्यादित्यत आह—**ज्ञानमि**ति । अनादित्वेन पौनरुक्त्यं वारयति—**अनादी**ति । नैसर्गिकः प्रत्यक् चैतन्यस्वभावानु-

---

1 "चारशी" ख पाठः 2 "तिस्वरूपाच्छु" ख पाठः

हेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये वेदान्ता आरभ्यन्ते। यथा

रूपमनिर्वचनीयत्वं तद्यस्य स तथोक्तः। अनिर्वचनीय इत्यर्थः। प्रकृतमुपसंहरति—अस्यानर्थहेतोः प्रहाणाय। विरोधिप्रत्ययं विना कुतोऽस्य प्रहाणमित्यत उक्तम्—आत्मैकत्वविद्याप्रतिपत्तये। प्रतिपत्तिः प्राप्तिः तस्यै, न तु जपमात्राय, नापि कर्मसु प्रवृत्तये, आत्मैकत्वं विगलितनिखिलप्रपञ्चत्वं आनन्दरूपस्य सतः, तत्प्रतिपत्तिं निर्विचिकित्सां भावयन्तो वेदान्ताः समूलघातमध्यासमुपघ्नन्ति। एतदुक्तं भवति—अस्मत्प्रत्ययस्यात्मविषयस्य समीचीनत्वे सति ब्रह्मणो ज्ञातत्वान्निष्प्रयोजनत्वाच्च न जिज्ञासा स्यात्। तदभावे च न ब्रह्मज्ञानाय वेदान्ताः पठ्येरन्। अपित्वविवक्षितार्था जपमात्रे उपयुज्येरन्। न हि तदौपनिषदात्मप्रत्ययः प्रमाण-

---

बन्धीत्यर्थः। स्मृतिरूप इतिवन्मिथ्याप्रत्ययरूपत्वे भ्रमत्वं न स्यादतो व्याचष्टे—**मिथ्याप्रत्ययानामिति**। असमर्थबहुव्रीहिरित्यर्थः। मिथ्याप्रत्ययत्वमेवैतद्रूपं कयाचित्प्रणाडिकयैतत्सम्बद्धमिति शङ्कां वारयति—**अनिर्वचनीय इति**। कर्तृत्वभोक्तृत्वप्रवर्तक[1] इत्यनर्थहेतुतोक्ता। सा व्यक्तेत्युपेक्षिष्ट। उत्तरभाष्यमध्यासानुपयोगात् कथामात्रमाशङ्क्याह—**प्रकृतमिति**। उपोद्घातत्वेनाध्यासं साधयतो भाष्यकारस्य प्रथमं बुद्ध्यारोहात्प्रकृतं विषयप्रयोजनम्। नास्ति विषयप्रयोजनमित्याशयेनाध्यासाक्षेपाद्, अस्तीत्याशयेन समाधानाद् निरूपितं विषयप्रयोजनमुपसंहरतीत्यर्थः। प्रयोजनद्वयशङ्कां नुदन्नाह—**विरोधीति**। अत्रानर्थनिवृत्तिः कण्ठोक्तं प्रयोजनं। आत्मैकत्वविद्येति वेद्यं जीवस्य ब्रह्मरूपत्वं विषय इत्युक्तम्। विद्याशब्देन पौनरुक्त्यं परिहरति **प्रतिपत्तिरिति**। ननु[2] न तदर्थं वेदान्तारम्भः। किन्तु ब्रह्मयज्ञजपाय कर्माङ्गभूतकर्तृस्तुतिद्वारा वा कर्मसु प्रवृत्तये, अत आह—**न त्विति**। अध्ययनविध्यापादितफलवदर्थपरत्वविरोधान्न जपार्थाः प्रकरणभेदाच्च न स्तुत्या कर्मान्वयिन इत्यर्थः। नन्वेकोऽहमित्यात्मैकत्वं विनापि वेदान्तान्विदन्ति अत आह—**आत्मैकत्वमिति**। निष्प्रपञ्चपरमानन्दरूपत्वमात्मैकत्वं नत्वेकत्वसंख्येत्यर्थः विरोधिप्रत्ययद्वारानर्थनिवृत्त्यै वेदान्तारम्भ इत्यप्ययुक्तम्। श्रुतेऽपि तत्त्वेऽनर्थतादवस्थ्यादत आह—**तत्प्रतिपत्तिमिति**। तद्विद्यां निर्विचिकित्साम्। भावयन्तः मनननिदिध्यासनद्वारा जनयन्तः। **समूलघातम्** अविद्याद्वयमुपमृद्य। ननु विषयप्रयोजनसिद्धये, किमध्यासवर्णनेन। विधान्तरेणैव विषयादिकमुच्यताम्। उपसंहारे वेदान्ता आरभ्यन्त इति चाधिकमिति। न, प्रकारान्तरेण विषयाद्यसिद्धेः। वेदान्तवैयर्थ्यप्रसङ्गसूचकत्वाच्चाधिकोक्तिरित्याह—**एतदुक्तमिति**। **पठ्येरन्निति** आरभ्यन्त इति भाष्यस्य प्रदव्याख्या। तत्किमप्रयोजनं वेदान्ताध्ययनमत आह—**अविवक्षितेति**। प्रतिभासमानस्य कथमविवक्षा, विरोधिभावादित्याह—**न हि तदेति**। नन्वप्रमाणमपि सन्प्रत्ययोऽभ्यस्यमानः कर्तृत्वाद्यपनेष्यतीति

---

[1] "न" ख पाठः [2] "नु त" ख पाठः

चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः । वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्—

तामश्नुते । न चासावप्रमाणमभ्यस्तोऽपि वास्तवं कर्तृत्वभोक्तृत्वाद्यात्मनोऽपनेतुमर्हति । आरोपितं हि रूपं तत्त्वज्ञानेनापोह्यते, न तु वास्तवमतत्त्वज्ञानेन । नहि रज्जवो रज्जुत्वं सहस्रमपि सर्पधाराप्रत्ययाअपवदितुं समुत्सहन्ते । मिथ्याज्ञानप्रसञ्जितं च स्वरूपं शक्य तत्त्वज्ञानेनापवदितुम् । मिथ्याज्ञानसंस्कारश्च सुदृढोऽपि तत्त्वज्ञानसंस्कारेणादरनैरन्तर्यदीर्घकालतत्त्वज्ञानाभ्यासजन्मनेति । स्यादेतत् - प्राणाद्युपासना अपि वेदान्तेषु बहुलमुपलभ्यन्ते, तत्कथं सर्वेषां वेदान्तानामात्मैकत्वप्रतिपादनमर्थ इत्यत आह—यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः । शरीरमेव शरीरकं तत्र निवासी शारीरको जीवात्मा, तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयपरमात्मरूपतामीमांसा या सा तथोक्ता । एतावानत्रार्थसंक्षेपः—यद्यपि च स्वाध्यायाध्ययन-

प्रयोजनसिद्धिः । तादृगकर्तृत्वादिमद्रूपं च विषयो भविष्यति । अत आह—न चासाविति । विषयाद्यसिद्धितौल्यं परिहरति—मिथ्याज्ञानेति । अपवदितुं निवर्तयितुं । अपोदितमपि वासनादाढ्र्याद् पुनर्भविष्यतीति प्रयोजनभङ्गमाशङ्क्याह—मिथ्याज्ञानसंस्कारश्चेति । असत्यादरे, सत्यपि तस्मिन् मध्ये विच्छित्तावविच्छित्तावपि कालात्मकत्वेन पटुःसंस्कार इति विशेषणानि । यथा चायमर्थ इति वेदान्तारम्भात्मा वाक्यार्थ इति शङ्का स्यात् ततश्च तेषामारम्भानभिधायित्वादयोगमाशङ्क्याह—स्यादेतदिति । वाक्यार्थस्य प्राधान्यादभ्यर्हितत्वेऽपि योग्यांशस्यैवायमिति परामर्श इत्यर्थः । शारीरकी चासौ मीमांसा चेति भ्रमं नुदन् व्युत्पादयति—शरीरमिति । ननु जैवं रूपं निश्चितममीमांस्यमत आह—तस्येति । सती खलु परमात्मरूपता मीमांस्येत सैव कुतः?, तत्त्वमसीति शास्त्रादित्यभिप्रेत्याह—त्वंपदाभिधेयस्य तत्पदाभिधेयेति । परमात्मरूपतायाः मीमांसेति विग्रहः । शारीरजीवमात्रमीमांसा पक्षप्राप्ता, तत्प्रसिद्धिशान्तिसूचनाय प्रसिद्धयर्थौ यत्तच्छब्दौ ।

इत्यध्यासभाष्यभामतीतिलकः समाप्तः

वेदान्तमीमांसाशास्त्रस्येति भाष्यं वृथा, आदिसूत्रत्वस्य सुग्रहत्वादित्याशङ्क्य, आदित्वादिदं सूत्रं, विषयप्रयोजनाभावादजिज्ञास्यत्वपूर्वपक्षं निराकृत्य विषयप्रयोजनसत्तया, जिज्ञास्यत्वनिरूपकत्वेन जिज्ञासापूर्वं विचारारम्भं सम्भावयितुं प्रवृत्तमित्यभिप्रायो भाष्यस्येति ज्ञापयन् व्याकीर्णमधिकरणार्थं मितोक्त्या बुद्धौ निवेशयन्नाह—एतावानिति । ब्रह्म जिज्ञास्यं न वेति तज्ज्ञानस्य विषयप्रयोजना[1]भाव[2] भावाभ्यां

1 "न" 2 "वा" ख पाठः

विधिना स्वाध्यायपदवाच्यस्य वेदराशेः फलवदर्थावबोधपरतामापादयता कर्मविधिनिषेधानामिव वेदान्तानामपि स्वाध्यायशब्दवाच्यानां फलवदर्थावबोधपरत्वमापादितं; यद्यपि च 'अविशिष्टस्तु वाक्यार्थः' इति न्यायात् मन्त्राणामिव वेदान्तानामर्थपरत्वमौत्सर्गिकं; यद्यपि च वेदान्तेभ्यश्चैतन्यानन्दघनः कर्तृत्वभोक्तृत्वरहितो निष्प्रपञ्च एकः प्रत्यगात्मावगम्यते; तथापि कर्तृत्वभोक्तृत्वदुःखशोकमोहमयमात्मानमवगाहमानेनाहंप्रत्ययेन संदेहबाधविरहिणा विरुध्यमाना वेदान्ताः स्वार्थात्प्रच्युता उपचरितार्था वा जपमात्रोपयोगिनो वेत्यविवक्षितस्वार्थाः । तथा च तदर्थविचारात्मिका चतुर्लक्षणी शारीरकमीमांसा नारब्धव्या । न च सर्वजनीनाहमनुभवसिद्ध आत्मा संदिग्धो वा सप्रयोजनो वा, येन जिज्ञास्यः सन् विचारं प्रयुञ्जीतेति पूर्वः पक्षः । सिद्धान्तस्तु—भवेदेतदेवं यद्यहंप्रत्ययः प्रमाणम् । तस्य तूक्तेन

संशयः । अस्याधिकरणस्य वेदान्तैरध्ययनविधिसिद्धप्रयोजनवदर्थैः सन्दिग्धार्थविशेषैः तद्विचाराक्षेपात् तैरेव सङ्गतिः न पूर्वेण आदित्वात् । समन्वयादिसर्वविचारहेतुत्वात्[1] शास्त्रप्रथमाध्यायप्रथमपादसङ्गतयः । ब्रह्म जिज्ञासानर्हमिति पूर्वः पक्षः । विचारासिद्धिस्तु तत्फलम् । जिज्ञासार्हमिति सिद्धान्तः तत्फलं विचारसिद्धिः । अहमनुभवसिद्धत्वादसन्दिग्ध आत्मा न जिज्ञास्य [2]इत्ययुक्तम् औपनिषदात्मतत्त्वस्य अहम्प्रत्ययाविषयत्वात् , न चोपनिषदामविवक्षितार्थत्वम् अध्ययनविधिसिद्धार्थवत्त्वात् न च कार्यपरत्वाद् वेदराशेः सिद्धे ब्रह्मण्यप्रामाण्यं, लोकवेदयोर्वाक्यार्थस्य अविशेषेण देवतादौ मन्त्राणामिवोपनिषदां ब्रह्मणि प्रामाण्यसम्भवात् । न चाबोधकत्वलक्षणमप्रामाण्यं ब्रह्मस्वरूपस्यौपनिषदस्यावगमात् इत्याशङ्क्य तन्निरासेन पूर्वपक्षयति **यद्यपीति** । **स्वार्थात्प्रच्युताः** बाधितस्वार्थाः । **सन्देहबाधविरहिणेति** बाधकत्वे हेतुः । **कर्तृत्वभोक्तृत्वेति** विरोधहेतुः । स्वार्थबाधे स्यादप्रामाण्यमत आह—**उपचरितेति** । स्तावका इत्यर्थः । स्तुतेरन्यत्रानुपयोगमाशङ्क्याह—**जपेति** । अविवक्षितस्वार्थाः स्वार्थतात्पर्यरहिताः । तथा चोपनिषदर्थस्यात्मनोऽविषयत्वाज्जिज्ञासेत्ययुक्तमिति शेषः । पूर्वपक्षे फलमाह—**तथा चेति** । **चतुर्लक्षणी** चतुरध्याया । एतच्च सर्वस्यैव विचारस्यानारम्भणीयत्वाय विशेषणम् । वेदान्तानामविवक्षितार्थत्वेऽपि अहंधीगम्यस्यात्मनो वेदान्तार्थवद् बाधाभावाज्जिज्ञासा अत आह—**न चेति** । मा भूत्सन्देहादिकमत आह—**येनेति** । जिज्ञास्यः सन् स्वज्ञानाय विचारं प्रयुञ्जीत अनुष्ठापयेत् । यदवोचाम विचारः फलमिति तदितः समुत्थितम् । सूत्रे जिज्ञासायाः प्राधान्यावगमः । 'न तत्प्रेक्षावत्प्रतिपित्सागोचरः' इति 'संशयाभावादजिज्ञास्य इति सिद्धम्' इत्याद्यपि ज्ञापकं सिद्धमेव । कथमयमधिकरणार्थसंक्षेपः विपरीतत्वादत आह—**इति पूर्व इति** । संक्षिप्यमाणेऽधिकरणार्थे पूर्वपक्षभागस्य सङ्ग्रहोऽयं न तु सर्वस्येत्यर्थः । **तस्य तु**

1 "स्वाचात्र प्र" ख पाठः 2 "त्युक्त" ख पाठः

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

क्रमेण श्रुत्यादिबाधकत्वानुपपत्तेः, श्रुत्यादिभिश्च समस्ततीर्थकरैश्च प्रामाण्यानभ्युपगमादध्यासत्वम्। एवं वेदान्ता नाविवक्षितार्थाः, नाप्युपचरितार्थाः किंतूक्तलक्षणाः। प्रत्यगात्मैव तेषां मुख्योऽर्थः। तस्य च वक्ष्यमाणेन क्रमेण संदिग्धत्वात्, प्रयोजनवत्त्वाच्च युक्ता जिज्ञासा, इत्याशयवान्सूत्रकारः तज्जिज्ञासामसूत्रयत्—

अथातो ब्रह्मजिज्ञासेति। जिज्ञासया संदेहप्रयोजने सूचयति। तत्र साक्षादिच्छाव्याप्यत्वाद्ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम्। न च कर्मज्ञानात्पराचीनमनुष्ठानमिव ब्रह्मज्ञानात्पराचीनं किंचिदस्ति, येनैतदवान्तरप्रयोजनं भवेत्, किंतु ब्रह्ममीमांसाख्यतर्केतिकर्तव्यतानुज्ञातविषयैर्वेदान्तैराहितं निर्विचिकित्सं ब्रह्मज्ञानमेव समस्तदुःखोपशमरूपमानन्दैकरसं-

---

अध्यासत्वमित्यन्वयः। अथ बाधकाभावे कथमध्यासत्वमत आह—**श्रुत्यादिभिश्चेति**। श्रुत्यादिभिर्बाधकैरित्यर्थः। चकारो वक्ष्यमाणसमुच्चयार्थः। ननु श्रुत्यादयः कथं बाधकाः अहंधीबाध्यत्वात्, अत आह—**श्रुत्यादीति**। आदिशब्दः स्मृत्यादिसङ्ग्राहकः। अध्यासत्वे हेत्वन्तरमाह—**समस्तेति**। तीर्थकरैः प्रामाण्यानभ्युपगमाच्चेत्यन्वयः। सर्वमेतत् कुत अत आह—**उक्तेन क्रमेणेति**। तर्हि वेदान्तैरेव सिद्धत्वात्, सिद्धौ सत्यामपि फलादर्शनाच्चाजिज्ञास्यत्वमत आह—**तस्य चेति**। **वक्ष्यमाणेन** तत्पुनः ब्रह्मेत्यादौ। युक्ता जिज्ञासा ततश्च तत्फलं विचारोऽपि युक्तः। एतावतोऽर्थस्य अथात इत्यस्फुरणमाशङ्क्याह—**आशयवानिति**। किमनेनातिसंक्षेपेण व्यक्तमेवोच्यतामत आह—**सूत्रकार इति** ॥ **अथातो ब्रह्मजिज्ञासेति**॥ असति ज्ञापके कथमेतावानाशयः कल्प्यते अत आह—**जिज्ञासयेति**। अल्पाक्षरत्वाद् द्वन्द्वे पूर्वोक्तं संशयमुक्त्वा स्फुटत्वात्प्रयोजनं सूत्रेण प्रथयन्नाह—**तत्रेति**। **साक्षादिच्छाव्याप्यत्वात्** अनन्यार्थे ज्ञानेच्छाविषयत्वात्। **कण्ठोक्तं** स्पष्टोपदिष्टम्। साक्षादिच्छाविषयत्वं हि परमप्रयोजनलक्षणमित्यर्थः। कर्मणीव ब्रह्मण्यपि ज्ञानादन्यत्फलं, तेन साक्षादिच्छाव्याप्यत्वमसिद्धमत आह—**न चेति**। **अनुष्ठानमिति**। तत्पूर्वकस्वर्गाद्युपलक्षणम्। ननु ज्ञानमात्रस्यासुखत्वाददुःखनिवृत्तित्वाच्च न फलत्वमिति शङ्कते—**किन्त्विति**। परिहरति **ब्रह्मेति**। ब्रह्मात्मरूपकं ज्ञानमेव नः अस्माकं प्रयोजनमित्यन्वयः। ननु सत्येव ब्रह्मणि दुःखानुवृत्तेः कथं तदुपशमरूपता अत उक्तं **निर्विचिकित्सम्**। अपरोक्षप्रवृत्तिव्यक्तम्। अपरोक्षप्रवृत्तौ हेतुमाह—**वेदान्तैरिति**। **आहितं** मननादिद्वारेणाहितमिव। किन्तर्हि मीमांसया अत आह—**मीमांसेति**। ननु तर्कः प्रमाणानुग्राहकः न मीमांसा, अत आह—**आख्यतर्केति**। तर्क एवेतिकर्तव्यता उपकरणम्। **अनुज्ञातः** स्थिरीकृतः। नन्वेतद्विमुखाः सहस्रशो दृश्यन्ते, नैष दोषः, अधिकारिणां

परमं प्रयोजनम् । तमर्थमधिकृत्य हि प्रेक्षावन्तः प्रवर्तन्तेतराम् । तच्च प्राप्तमप्यनाद्यविद्यावशादप्राप्तमिवेति प्रेप्सितं भवति । यथा स्वग्रीवागतमपि ग्रैवेयकं कुतश्चिद्भ्रमान्नास्तीति मन्यमानः परेण प्रतिपादितमप्राप्तमिव प्राप्नोति । जिज्ञासा तु संशयस्य कार्यमिति स्वकारणं संशयं सूचयति । संशयश्च मीमांसारम्भं प्रयोजयति । तथा च शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयोजनसूचनात् युक्तमस्य सूत्रस्य शास्त्रादित्वमित्याह भगवान्भाष्यकारः—वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्य अस्माभिः इदमादिमं सूत्रम् । पूजितविचारवचनो मीमांसाशब्दः, परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता विचारस्य पूजितता । तस्या मीमांसायाः शास्त्रम्, सा ह्यनेन शिष्यते शिष्येभ्यो यथावत्प्रतिपाद्यत इति । सूत्रं च बह्वर्थसूचनात् भवति । यथाहुः—'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च । सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥'

प्रयोजनत्वादित्याह—तमर्थमिति । अधिकृत्य उद्दिश्य । हिर्यस्मादर्थे । स्वरूपस्य सिद्धत्वादिच्छाभावेनाप्रयोजनत्वमाशङ्क्याह—तच्चेति । प्राप्तं सिद्धम् । अविद्यायाः को हेतुरिति शङ्कां शमयति—अनादीति । प्रेप्सितमिष्टम् । नन्वप्राप्तत्वादिच्छा न त्वप्राप्तसारूप्यादत आह—यथेति । नास्तीति मन्यमान इति अप्राप्तमिवेति प्राप्तावप्राप्त्यारोपः नाप्राप्तसारूप्यमिति भावः ॥ सूचयत्येव जिज्ञासा प्रयोजनं, कथं संशयसूचिका । नहि जिज्ञासापदे विविच्यमाने संशयो भातीति अत आह—जिज्ञासेति । संशयस्य तु जिज्ञासा कार्यमित्यर्थः । एवं संशयप्रयोजनसूचनाद्युक्ता जिज्ञासेत्याशयः सिद्धः । जिज्ञासोपपादनस्य किं फलमत आह—संशयश्चेति । सप्रयोजनेऽर्थे संशयः स्वकार्यजिज्ञासाद्वारा विचारारम्भं प्रयोजयतीत्यर्थः । एवं च भाष्यमुपपन्नमित्याह—तथा चेति । शास्त्रादावाचार्यं पूजयति—भगवानिति ॥ शास्त्रं सूत्रकृता चिकीर्षितं न तु व्याचिख्यासितमत आह—अस्माभिरिति । सूत्रमिति । अत्रेतिशब्दो द्रष्टव्यः । सन्प्रत्ययादिच्छाभ्रमे शास्त्रस्यातद्रूपत्वादयोगमाशङ्क्य व्युत्पादयति—पूजितेति । विचारः तर्कः । ननु तर्कोऽपि न शास्त्रं शास्त्रस्य शब्दत्वादत आह—तस्या इति । षष्ठ्यर्थं सम्बन्धं कथयन् शास्त्रशब्दार्थमाह—सा हीति । अनेन ग्रन्थेन । ननु शिष्या एव शिष्यन्ते न मीमांसा अत आह—शिष्येभ्य इति । प्रतिपाद्यते ज्ञाप्यते । इदमादिवाक्यमित्युच्यतां सूत्रमिति किं, नैष दोषः बह्वर्थसूचकत्वज्ञापनार्थत्वादित्याह—सूत्रं चेति । अध्यास-विषय-प्रयोजन-विचाररूपबह्वर्थसूचनादित्यर्थः । लघूनि, असन्दिग्धार्थानि सन्दिग्धार्थं हि नानाकोटिस्पृक्त्वेन गुरु, बह्वक्षरपदं पर्यायं मुक्त्वा अल्पाक्षरमेवोपादीयते । बहूनि पदान्यनुपादाय मितैरेव तैर्वाक्यं क्रियत इति स्वल्पाक्षरपदता । सर्वतस्सारभूतत्वं निर्दोषत्वम् । असूत्रार्थकथनात् पूर्वस्या-

त्राथशब्द आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः; ब्रह्मजिज्ञासाया अनधि-

इति। तदेवं सूत्रतात्पर्यं व्याख्याय तस्य प्रथमपदमथेति व्याचष्टे—तत्राथशब्द आनन्तर्यार्थः परिगृह्यते। तेषु सूत्रपदेषु मध्ये योऽयमथशब्दः स आनन्तर्यार्थ इति योजना। नन्वधिकारार्थोऽप्यथशब्दो दृश्यते, यथा 'अथेष ज्योतिः' इति वेदे, यथा वा लोके 'अथ शब्दानुशासनम्' 'अथ योगानुशासनम्' इति, तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह—नाधिकारार्थः; कुतः? ब्रह्मजिज्ञासाया अनधिकार्यत्वात्। जिज्ञासा तावदिह सूत्रे ब्रह्मणश्च तत्प्रज्ञानाच्च शब्दतः प्रधानं प्रतीयते। न च--यथा 'दण्डी प्रैषानन्वाह, इत्यत्राप्रधानमपि दण्डशब्दार्थो विवक्ष्यते, एवमिहापि ब्रह्मतज्ज्ञाने इति—युक्तम्; ब्रह्ममीमांसाशास्त्रप्रवृत्त्यङ्गसंशयप्रयोजनसूचनार्थत्वेन जिज्ञासाया एव विवक्षितत्वात्। तदविवक्षायां तदसूचनेन काकदन्तपरीक्षायामिव ब्रह्ममीमांसायां न प्रेक्षावन्तः प्रवर्तेरन्। नहि तदानीं ब्रह्म वा

भाष्यत्वशङ्कां नुदन् प्रधानभूतजिज्ञासापदापेक्षया अथशब्दव्याख्याने कारणमाह—**तदेवमिति**। **तत्रेति** तथासतीति यदि स्वीक्रियेत, आदिसूत्रत्वादस्यानन्तर्यार्थत्वे हेतुत्वाभावादसङ्गतम्। तत्र सूत्र इति यद्यपि शक्यते वक्तुं, तथापि, इदमादिसूत्रमितीदमानिर्देशाद् अत्रेति वक्तव्ये विलक्षणपरामर्शस्यास्वारस्यमित्याशङ्क्याह—**तेष्विति**। अधिकरणत्वभ्रमं नुदति **मध्ये इति**। आनन्तर्यार्थोऽथशब्दस्तत्र परिगृह्यत इत्यन्वयः। भ्रान्त्या प्राप्तं दोषं वारयति—**योऽयमथशब्दः स इति**। आनन्तर्यार्थत्वोक्त्यैवार्थान्तरनिरासान्नाधिकारार्थ इत्यस्य वैयर्थ्यमाशङ्क्याह—**नन्विति**। "अथैष ज्योति" रित्यत्र विधास्यमानकर्मप्रारम्भार्थोऽथशब्दः, ब्रह्मजिज्ञासाया इत्यस्याधिक्रियमाणसमर्पणेन प्रतिज्ञायां न प्रवेशः, किन्तु हेताविल्याह—**कुतः ब्रह्मेति**। शास्त्रप्रतिपाद्यत्वेनोपक्रमायोग्यत्वादित्यर्थः। तर्हि प्रतिपाद्यस्य ब्रह्मणः तज्ज्ञानस्य वा प्रारम्भार्थोऽस्तु, अत आह—**जिज्ञासेति**। ननु पुरुषार्थत्वादुभयं प्रधानमत आह—**शब्दत इति**। शब्दप्रधानान्वितार्थत्वमेव युक्तमित्यर्थः। "दण्डी प्रैषा"नित्यत्र दण्डस्येव शब्दतोऽप्रधानयोरपि ब्रह्मतज्ज्ञानयोर्विवक्षितत्वात् तदारम्भार्थत्वमाशङ्क्याह—**न चेति**। 'मैत्रावरुणः प्रैष्यति चान्वाहे'ति प्रैषानुवचनस्य प्राप्तत्वं विवक्षाहेतु "दण्डी प्रैषानि" त्यत्र, नैवमिह प्रस्तुतविवक्षाकारणमस्तीत्याह—**ब्रह्मेति**। **काकदन्तेति**। स्फीतालोकमध्यवर्तिघटोपलक्षणम्। ननु न संशयो विचारप्रवृत्त्यङ्गं किंतु विषयप्रयोजने। ते चात्र ब्रह्मज्ञाने स्वपदोपात्तत्वेन चासन्दिग्धत्वाद् अविषयत्वं, क्वचित्सन्दिग्धस्य विषयत्वेप्यन्यत्र तथात्वनियमाभावाद् विषयाणां स्वभाववैचित्र्यात्। अतः संशयादिसूचनस्यानावश्यकत्वेन जिज्ञासाया विवक्षितत्वमपि नावश्यकमिति मन्यमानस्य बुद्धिमनुसृत्य संशयासूचने विषयादिस्वरूपमपि न सिध्यतीत्याह—**न हीति**।

तज्ज्ञानं वाभिधेयप्रयोजने भवितुमर्हतः; अनध्यस्ताहंप्रत्ययविरोधेन वेदान्तानामेवंविधेऽर्थे प्रामाण्यानुपपत्तेः, कर्मप्रवृत्त्युपयोगितयोपचरितार्थानां वा जपोपयोगिनां वा 'हुम्' इत्येवमादीनामविवक्षितार्थानामपि स्वाध्यायाध्ययनविध्यधीनग्रहणत्वस्य संभवात् । तस्मात्संदेहप्रयोजनसूचनी जिज्ञासा इह पदतो वाक्यतश्च प्रधानं विवक्षितव्या । न च तस्या अधिकार्यत्वम्; अप्रस्तूयमानत्वात्, येन तत्समभिव्याहृतोऽथशब्दोऽधिकारार्थः स्यात्, जिज्ञासाविशेषणं तु ब्रह्म तज्ज्ञानमधिकार्यं भवेत् । न च तदप्यथशब्देन संबध्यते; प्राधान्याभावात् । न च जिज्ञासा मीमांसा, येन योगानुशासनवदधिक्रियेत; नान्तत्वं निपात्य 'माङ्माने' इत्यस्माद्वा 'मान पूजायाम्' इत्यस्माद्वा धातोः 'मान्वध'—इत्यादिनाऽनिच्छार्थे सनि व्युत्पादितस्य मीमांसाशब्दस्य पूजितविचारवचनत्वात् । ज्ञानेच्छावाचकत्वाज्जिज्ञासापदस्य, प्रवर्तिका हि मीमांसायां जिज्ञासा स्यात् नच प्रवर्त्यप्रवर्तकयोरैक्यम्,

---

तदानीं संशयासूचने । चार्थौ वाकारौ । **अभिधेयप्रयोजने** विषयप्रयोजने । आत्मतत्त्वसंशयासूचने अहन्धीनिश्चितमेवात्मतत्त्वमिति तद्विरोधाद् अप्रमाणं वेदान्ता इत्यर्थः । अध्ययनविधिबोधितत्वात् प्रयोजनवतां कथमप्रामाण्यशङ्का तदानीं क्रमान्तरेण प्रयोजनवत्तायाः शङ्कितुं शक्यत्वादित्याह—**कर्मेति** । न च क्रमान्तरेण प्रवृत्त्युपपादनमित्यभिप्रेत्योपसंहरति—**तस्मादिति** । यथा पदतःप्रधानं प्रतीयते एवं वाक्यतश्च प्रधानमिति कृत्वा विवदितव्येत्यर्थः । अनधिकार्यत्वमसिद्धमत आह—**न चेति** । **अप्रस्तूयमानत्वात्** उपरिष्टादप्रतिपाद्यमानत्वात् । ननु ब्रह्मजिज्ञासाया अनधिकार्यत्वेऽपि, अधिकारार्थोऽथशब्दो दृष्टः । "अथ शब्दानुशासन"मिति । तत्राह—**येनेति** । तस्याधिकार्यानुशासनसमभिव्याहारादधिकारार्थता युक्ता । अनधिकार्यसमभिव्याहारस्तु प्रकृते तद्विरोधीत्यर्थः । नन्विहाप्यधिकार्यब्रह्मतज्ज्ञानसमभिव्याहारोऽस्ति । सत्यं, दत्तं तूत्तरमत्रेत्याह—**जिज्ञासेति** । शब्दतोऽप्राधान्यादविवक्षितत्वाच्चेत्यर्थः । जिज्ञासापदस्य मीमांसार्थत्वान्मीमांसायाश्च प्रस्तूयमानत्वाद् योगानुशासनादितौल्यमाशङ्क्याह—**न चेति** । जिज्ञासापदस्य मीमांसा किं वाच्योऽर्थो लक्ष्यो वा, नाद्य इत्याह—**नान्तत्वमिति** । माङ्माने इत्यस्माद्वा मानपूजायामित्यस्माद्वा धातोर्व्युत्पादितस्येत्यन्वयः । ननु सन्योगादिच्छा भाति नेत्याह—**अनिच्छार्थ इति** । अनिच्छार्थे सनि क्रियमाणे तद्विधायि सूत्रमाह—**'मान्वधेत्यादिना** । "मान्वधदान्शान्भ्यो दीर्घश्चाभ्यासस्य" । मानित्यादि धातुभ्यः सन्भवति अभ्यासस्य दीर्घश्चेत्यर्थः । "धातोः कर्मण" इत्युत्तरत्र सूत्र इच्छार्थसन्विधानादस्यानिच्छार्थत्वं गम्यते । यद्येवं माङ्माने इत्यस्माद्वेति कथं तस्य नान्तत्वाभावादत आह—**नान्तत्वं निपात्येति** । ननु जिज्ञासापदमपि विचारणवाचि नेत्याह—**ज्ञानेति** । कार्यकारणार्थत्वाच्च भिन्नार्थत्वमनयोरित्याह—**प्रवर्ति-**

कार्यत्वात् । मङ्गलस्य च वाक्यार्थे समन्वयाभावात् । अर्थान्तरप्रयुक्त

एकत्वे तद्भावानुपपत्तेः । नच स्वार्थपरत्वस्योपपत्तौ सत्यामन्यार्थपरत्वकल्पना युक्ता; अतिप्रसङ्गात् । तस्मात् सुष्ठूक्तं 'जिज्ञासाया अनधिकार्यत्वात्' इति । अथ मङ्गलार्थोऽथशब्दः कस्मान्न भवति ॥ तथा च मङ्गलहेतुत्वात् प्रत्यहं ब्रह्मजिज्ञासा कर्तव्येति सूत्रार्थः संपद्यत इत्यत आह-मङ्गलस्य च वाक्यार्थे समन्वयाभावात् । पदार्थ एव हि वाक्यार्थे समन्वीयते, स च वाच्यो वा लक्ष्यो वा । न चेह मङ्गलमथशब्दस्य वाच्यं वा, लक्ष्यं वा, किंतु मृदङ्गशङ्खध्वनिवदथशब्दश्रवणमात्रकार्यम् । नच कार्यज्ञाप्ययोर्वाक्यार्थे समन्वयः शब्दव्यवहारे दृष्ट इत्यर्थः । तत्किमिदानीं मङ्गलार्थोऽथशब्दस्तेषु तेषु न प्रयोक्तव्यः—तथाच 'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥' इति स्मृतिव्याकोप इत्यत

केति । न द्वितीय इत्याह—न चेति । न च विचारे पुंसामप्रवृत्तिप्रसङ्गे मुख्ये बाधः । विषय प्रयोजनज्ञानादेव विचारप्रवृत्तिसिद्धेरिति मत्वोपसंहरति—तस्मादिति । मङ्गलस्य चेति चकारान्नाधिकारार्थ इत्यत्र हेत्वन्तरमिव, तद्व्यधिकरणमित्याशङ्क्य शङ्कोत्तरत्वमाह—अथेति । तत्किं मङ्गलचरणार्थः तथा च न जिज्ञासावाक्येनैक्यमत आह—तथा चेति । जिज्ञासायाः सुखदुःखप्राप्तिपरिहाररूपत्वाभावान्न मुख्यमङ्गलत्वमिति तद्धेतुत्वमुक्तं । प्रत्यहं ब्रह्मजिज्ञासेति । ब्रह्मजिज्ञासाहेतौ प्रत्यहं यतितव्यमिति सूत्रार्थः । सूत्रतात्पर्यार्थः । असिद्धो हेतुः देवदर्शनं मङ्गलमित्यादौ वाक्यार्थसमन्वयदर्शनादित्याशङ्क्याह—पदार्थ इति । ननु मङ्गलमप्यथपदस्यार्थ एव अत आह—स चेति । पदार्थो लोके वाच्यो वा लक्ष्यो वा भवति, नान्यथेत्यर्थः । प्रकृतस्यान्यतरत्वमाशङ्क्याह—न चेति । इहाथशब्दवत्सु वाक्येषु । ननु मङ्गलार्थं अथशब्दं निघण्टुकारा इच्छन्ति । अत आह—किन्त्विति । मङ्गलहेतुत्वात्तदुक्तिरित्यर्थः । मृदङ्गध्वनिवत् मृदङ्गध्वनेरिव कार्यमेव वाक्यार्थेऽन्वेतु, किं वाच्यलक्ष्यनियमेन, अत आह—न चेति । कार्यज्ञाप्ययोरिति । पदान्तरकार्यस्य मुख्यवृत्त्या लक्षणया वा पदान्तरबोध्यस्य चैकस्मिन् वाक्यार्थे न प्रवेशो दृष्ट इत्यर्थः । अन्यथा शाब्दिकपरिपाटीभङ्ग इति सूचयितुं शब्दव्यवहार इत्युक्तम् । यद्वा, कार्यस्यार्थान्तराभिधानसामर्थ्यज्ञाप्यस्य च वाक्यार्थे समन्वयो न दृष्ट इत्यर्थः । दृष्टान्ताय ज्ञाप्यग्रहणम् । ननु वाक्यार्थे समन्वयाभावस्य प्रतिज्ञातस्य, अथशब्दोऽयं मङ्गलप्रयोजन इत्येतावदलम् तावता वाचकत्वलक्षकत्वाभावाद् वाक्यार्थासमन्वयप्रतीतेः अर्थान्तरेत्यादि तु व्यर्थं न सर्वस्यास्य ग्रन्थस्याशङ्कोत्तरत्वादित्याह—तत्किमिति । मङ्गलार्थः मङ्गलप्रयोजनः । तेषु तेषु वाक्येषु । माङ्गलिकौ मङ्गलकारिप्रयोगौ ।

एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति । पूर्वप्रकृतापेक्षायाश्च फलत

आह—अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति। अर्थान्तरेष्वानन्तर्यादिषु प्रयुक्तोऽथशब्दः श्रुत्या श्रवणमात्रेण वेणुवीणाध्वनिवन्मङ्गलं कुर्वन्, मङ्गलप्रयोजनो भवति, अन्यार्थमानीयमानोदकुम्भदर्शनवत्, तेन न स्मृतिव्याकोपः। न चेहानन्तर्यार्थस्य सतो न श्रवणमात्रेण मङ्गलार्थतेत्यर्थः। स्यादेतत्—पूर्वप्रकृतापेक्षोऽथशब्दो भविष्यति, विनैवानन्तर्यार्थत्वम्। तद्यथेममेवाथशब्दं प्रकृत्य विमृश्यते किमयमथशब्द आनन्तर्ये अथ अधिकार इति। अत्र विमर्शवाक्येऽथशब्दः पूर्वप्रकृतमथशब्दमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं पक्षान्तरोपन्यासे। नचास्यानन्तर्यमर्थः; पूर्वप्रकृतस्य प्रथमपक्षोपन्यासेन व्यवायात्, न च प्रकृतानपेक्षा; तदनपेक्षस्य तद्विषयत्वाभावेनासमानविषयतया विकल्पानुपपत्तेः, न हि जातु भवति किं नित्य आत्मा, अथ अनित्या बुद्धिरिति; तस्मादानन्तर्यं विना पूर्वप्रकृतापेक्ष इहाथशब्दः कस्मान्न भवतीत्यत आह—पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्। अस्यार्थः—न वयमानन्तर्यार्थितां

अस्तु मङ्गलं कार्यमेवाथशब्दस्य, तथापि महतो ग्रन्थस्यादौ तदर्थः[1] प्रयोज्यः, ततश्चानन्तर्यार्थत्वभङ्गः। मङ्गलसिद्धिलोभाच्चैकवाक्यतोपेक्षेति शङ्कितुरभिमानः। द्वयोर्वाच्ययोरिव कार्यवाच्ययोर्यौगपद्यविरोधाभावादानन्तर्यमत्याज्यमिति परिहारार्थः। अर्थान्तरेति प्रयोजनान्तरत्वशङ्कां वारयति—**आनन्तर्यादिष्विति**। श्रुत्या वेदेनेति माशङ्कीत्याह—**श्रवणेनेति**। आनन्तर्यगर्भवाक्यार्थधीप्रयोजनोऽथशब्दः कथमन्यप्रयोजनः अत आह—**अन्यार्थेति**। पानाद्यर्थानीयमानोदकुम्भदर्शने सति अन्यार्थ उदकुम्भः, दर्शनेन यथा मङ्गलार्थः तद्वदित्यर्थः। अर्थान्तरेति भाष्यस्थसामान्योक्तिं प्रकृते विशेषे पर्यवसाययन् आनन्तर्यार्थत्वभङ्गशङ्का शान्तेत्याह—**तेन चेति**। पूर्वप्रकृतेति नारब्धव्यम्। तदपेक्षाया एवानन्तर्यरूपत्वे व्यतिरेकाप्राप्तौ तन्निषेधायोगादित्यत आह—**स्यादेतदिति**। एतदुदाहृत्य प्रतिपादयति—**तद्यथेति**। सूत्रस्थाथशब्दभ्रमं नुदति—**विमर्शवाक्य इति**। अस्यानन्तर्यार्थत्वे किं विमृश्यमानाथशब्दानन्तर्यं, आद्यपक्षानन्तर्यं वा, नाद्य इत्याह—**पूर्वप्रकृतस्येति**। **व्यवायात्** व्यवधानात्। द्वितीयेऽपि प्रकृतमथशब्दमपेक्ष्य प्रथमपक्षानन्तर्यं ब्रूयात्, अनपेक्ष्य वा, आद्येऽवश्यापेक्षणीयत्वात् पूर्वप्रकृतापेक्षायाः स एवार्थ इति नार्थान्तरकल्पनावकाशः। द्वितीयं प्रत्याह—**न चेति**। क्वचिदेवमर्थत्वेपि, अथशब्दस्य प्रकृते कस्तादर्थ्यहेतुरित्याशङ्क्य अतादर्थ्यहेत्वभावेन शङ्केत्याह—**कस्मादिति**। फलत आनन्तर्याव्यतिरेके तदनिरासादानन्तर्यावधारणभङ्गः अत आह—**अस्यार्थ इति**। जिज्ञासाहेतुः पूर्वप्रकृतं प्रकृतापेक्षायामपि सिध्यतीति भाष्यभावः कथं

---

1 "र्थं" ख पाठः

आनन्तर्याव्यतिरेकात् । सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षत एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते, तद्वक्तव्यम् । स्वाध्यायानन्तर्यं तु समानम् । नन्विह कर्मावबोधानन्तर्यं

व्यसनितया रोचयामहे, किंतु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये । सा च पूर्वप्रकृतार्थापेक्षत्वेऽप्यथशब्दस्य सिद्ध्यतीति व्यर्थ आनन्तर्यार्थत्वावधारणाग्रहोऽस्माकमिति । तदिदमुक्तं 'फलतः' इति । परमार्थतस्तु कल्पान्तरोपन्यासे पूर्वप्रकृतापेक्षा, नचेह कल्पान्तरोपन्यास इति पारिशेष्यादानन्तर्यार्थ एवेति युक्तम् । भवत्वानन्तर्यार्थः, किमेवं सतीत्यत आह—सति चानन्तर्यार्थत्व इति । न तावद्यस्य कस्यचिदत्रानन्तर्यमिति वक्तव्यं; तस्याभिधानमन्तरेणापि प्राप्तत्वात्, अवश्यं हि पुरुषः किंचित्कृत्वा किंचित्करोति । न चानन्तर्यमात्रस्य दृष्टमदृष्टं वा प्रयोजनं पश्यामः । तस्मात्तस्यात्रानन्तर्यं वक्तव्यं यद्विना ब्रह्मजिज्ञासा न भवति, यस्मिन्सति तु भवन्ती भवत्येव, तदिदमुक्तम्—यत्पूर्ववृत्तं नियमेनापेक्षत इति । स्यादेतत्— । धर्मजिज्ञासाया इव ब्रह्मजिज्ञासाया अपि योग्यत्वात् स्वाध्यायानन्तर्यं; धर्मवद्ब्रह्मणोऽप्याम्नायैकप्रमाणगम्यत्वात्, तस्य चागृहीतस्य स्वविषये विज्ञानाजननात्, ग्रहणस्य च स्वाध्यायोऽध्येतव्य इत्यध्ययनेनैव नियतत्वात् । तस्माद्वेदाध्ययनानन्तर्यमेव ब्रह्मजिज्ञासाया अप्यथशब्दार्थ इत्यत आह—स्वाध्यायानन्तर्यं तु समानं धर्मब्रह्मजिज्ञासयोः । अत्र च स्वाध्यायेन विषयेण

व्यज्ञायि, अत आह—**तदिदमिति** । अन्यथा फलैक्यं नोच्यतेत्यर्थः । [1]तर्हि प्रकृतापेक्षत्वमुक्त्वानन्तर्यस्य फलतः तदव्यतिरेकः कथं नोक्तः अत आह—**परमार्थत इति** । यद्वा पूर्वप्रकृतापेक्षायां विषयभूतस्य प्रकृतस्य सिद्धिः आनन्तर्यहेतुभूतस्येतिस्वरूपमतः फलतश्चानयोः पक्षयोर्भेद इत्याशङ्क्याह—**परमार्थत इति** । एवमप्यर्थान्तरमस्तु, तदप्रसक्तेरित्याह—**इति पारिशेष्यादिति** । ननु निर्णीतेऽथशब्दार्थेऽतश्शब्दो व्याख्येयः । किमिदमन्यदुच्यत इत्याशङ्क्य आनन्तर्यस्य प्रतियोगिविशेषाज्ज्ञाने पर्यवसानाभावात् तदर्थोऽयमारम्भ इत्याह—**भवत्विति** । किं नियमापेक्षिताग्रहेण, यत्किञ्चिदानन्तर्यमस्तु अत आह—**न तावदिति** । **भवन्ती** स्वहेतुभिरन्यैः प्राप्तजन्मा । **यस्मिन्सति भवत्येव** न पश्चादुदीक्षत इत्यर्थः । स्वाध्यायानन्तर्यं तु समानमित्ययुक्तम् । असमानत्वशङ्कानुदयादित्याशङ्क्य शङ्कान्तरमाह—**स्यादेतदिति** । ब्रह्मजिज्ञासायाः स्वाध्यायाध्ययनानन्तर्यमस्ति । तस्माद्वेदाध्ययनानन्तर्यमेव ब्रह्मजिज्ञासाया अप्यथशब्दार्थ इति सम्बन्धः । आनन्तर्ये हेतुः **योग्यत्वादिति** । योग्यत्वे हेतुः **धर्मवदिति** । तर्हि वेदानन्तर्यमेव अध्ययनानन्तर्यन्तु कुतः अत आह—**तस्य चेति** । तर्हि ग्रहणं लेखनादिनाप्यस्तु किमप्यध्ययनेन अत आह—**ग्रहणस्येति** । समानमित्यस्य साकाङ्क्षतां वारयति—**धर्मेति** । स्वाध्यायपदमेव भाष्येऽध्ययनानन्तर्य-

---

1 "न हि प्र" क पाठः

तद्विषयमध्ययनं लक्षयति । तथा च 'अथातो धर्मजिज्ञासा' इत्यनेनैव गतमिति नेदं सूत्रमारब्धव्यम् । धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया धर्मवद्ब्रह्मणोऽपि वेदार्थत्वाविशेषेण वेदाध्ययनानन्तर्योपदेशसाम्यादित्यर्थः । चोदयति—नन्विह कर्मावबोधानन्तर्यं विशेषः, धर्मजिज्ञासातो ब्रह्मजिज्ञासायाः । अस्यार्थः—'विविदिषन्ति यज्ञेन' इति तृतीयाश्रुत्या यज्ञादीनामङ्गत्वेन ब्रह्मज्ञाने विनियोगात्, ज्ञानस्यैव कर्मतयेच्छां प्रति प्राधान्यात्, प्रधानसंबन्धाच्चाप्रधानानां पदार्थान्तराणाम् । तत्रापि च न वाक्यार्थज्ञानोत्पत्तावङ्गभावो यज्ञादीनां; वाक्यार्थज्ञानस्य वाक्यादेवोत्पत्तेः । न च - वाक्यं सहकारितया कर्माण्यपेक्षत इति – युक्तम्; अकृतकर्मणामपि विदितपदतदर्थसंगतीनां समधिगतशाब्दन्यायतत्त्वानां गुणप्रधानभूतपूर्वापरपदार्थाकाङ्क्षासंनिधियोग्यतानुसंधानवतामप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः । अनुत्पत्तौ वा विधिनिषेधवाक्यार्थ-

---

शङ्का कथमत आह—अत्र चेति । स्वाध्यायस्य नित्यत्वान्मुख्यतदानन्तर्यानुपपत्तिरित्यर्थः । समान आनन्तर्येऽथशब्दयोरपि तदर्थसाम्यं युक्तमत आह—तथाचेति । तत्र ब्रह्मशब्दाश्रवणात् कथं तेन गतत्वमत आह—धर्मशब्दस्यचेति । किमुपलक्षणेन [1]मुख्ये बाधाभावादत अह—अधर्मवदिति । धर्मशब्दस्य मुख्यार्थत्वे अधर्मविचारस्तत्रत्यो न स्यादित्यर्थः । न चातश्शब्दस्य [2]नूतनार्थत्वादगतत्वमिति शङ्कनीयम् अध्ययनानन्तर्येऽथशब्दार्थेऽतःशब्दार्थस्यापि तत्रत्यस्यैव ग्राह्यत्वात् । यद्यपि धर्ममीमांसासूत्रे जिज्ञासा विचारः इह तु ज्ञानेच्छा, तथापि ज्ञानेच्छापूर्वकविचारस्याध्ययनानन्तर्योक्त्यैव ज्ञानेच्छाया अपि तदानन्तर्यमुक्तमिति द्रष्टव्यम् । ननोः प्रश्नादिनानार्थत्वादाह—चोदयतीति । यद्वा अवधारणानुज्ञयोरपि नन्वर्थत्वात्पूर्ववाक्ये तुशब्दयोगात् कर्मावबोधानन्तर्यमेव विशेषः । स्वाध्यायानन्तर्यन्तु समानमित्येकग्रन्थत्व[3] प्रतीतिकृतं दोषं परिहरन्नाह—चोदयतीति । इह अनयोर्जिज्ञासयोः कर्मावबोधानन्तर्यं विशेष इत्युक्ते द्वयोः कर्मावबोधानन्तर्यमिति स्यात् ततश्चान्ते आत्माश्रयत्वम्, अतः पूरयति—धर्मजिज्ञासात इति । इहानयोर्जिज्ञासयोर्मध्ये ब्रह्मजिज्ञासायाः कर्मावबोधानन्तर्यं धर्मजिज्ञासातो विशेष इत्येतदर्थं भाष्यमित्यर्थः । अयं विशेषोऽसिद्धः अत आह—अस्यार्थ इत्यादिना । इच्छायां विनियोगः न ज्ञाने अत आह—ज्ञानस्य चेति । अश्वेन जिगमिषतीत्यश्वस्य गमनेनेष्यमाणेन ज्ञानेन यज्ञादेरन्वय इत्यर्थः । किं वाक्यमात्रस्य कर्मापेक्षत्वात् प्रकृतेऽप्युच्यते, प्रकृतस्यैवायं विशेषः । नाद्य इत्याह—अकृतेति । श्रुतेऽपि वाक्ये सङ्गत्यग्रहे तदर्थधीर्न, अत उक्तं विदितेति । सङ्गतिग्रहेऽपि, ईदृशि, स्थले मुख्यता ईदृशि गौणत्वमित्यादिशब्दप्रक्रियानवगमे ज्ञानासिद्धिरत उक्तं-समधिगतेति । एवमपि तत्तत्प्रकृतस्याकाङ्क्षाद्यज्ञाने स एव दोष अत उक्तम्—गुणेति । सत्येतावति कर्माभावाद् विघ्नो न दृष्ट इत्युक्तम —अप्रत्यूहमिति ।

---

1 'ख्य' ख पाठः 2 'सूच' क पाठः 3 'न्थप्र' कपाठः

प्रत्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावप्रसङ्गः। तद्बोधतस्तु तदर्थानुष्ठानपरिवर्जने परस्पराश्रयः, तस्मिन्सति तदर्थानुष्ठानपरिवर्जनं ततश्च तद्बोध इति। न च—वेदान्तवाक्यानामेव स्वार्थप्रत्यायने कर्मापेक्षा न वाक्यान्तराणामिति–सांप्रतम्; विशेषहेतोरभावात्। ननु—'तत्त्वमसि' इति वाक्यात् त्वंपदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो नित्यशुद्धबुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मनैक्यमशक्यं द्रागित्येव प्रतिपत्तुम्; आपाततोऽशुद्धसत्त्वैर्योग्यताविरहनिश्चयात्। यज्ञतपोदानतनूकृतान्तर्मलास्तु विशुद्धसत्त्वाः श्रद्दधाना योग्यतावगमपुरःसरं तादात्म्यमवगमिष्यन्तीति–चेत्, तत्किमिदानीम् प्रमाणकारणं योग्यतावधारणमप्रमाणात्कर्मणो वक्तुमध्यवसितोऽसि, प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणम्। वेदान्ताविरुद्धतन्मूलन्यायबलेन तु योग्यतावधारणे कृतं कर्मभिः। तस्मात् 'तत्त्वमसि' इत्यादेः श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा तन्मूलया चोपपत्त्या व्यवस्थाप्य तदुपासनायां भावनापराभिधानायां दीर्घकालनैरन्तर्यवत्यां ब्रह्मसाक्षात्कारफलायां यज्ञादीनामुपयोगः। यथाहुः—'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः' इति। ब्रह्मचर्यतपःश्रद्धायज्ञादयश्च सत्काराः। अत एव श्रुतिः—

कर्मसहकृतवाक्याद् ज्ञानं ज्ञानाद्यनुष्ठानमित्याशङ्क्याह—तद्बोधत इति। तस्माद्बोधात् कर्मसचिववाक्यजात् बोधादित्यर्थः। न द्वितीय इत्याह—न चेति। विशेषहेत्वभावोऽसिद्ध इति शङ्कते—तत् त्वमसीति। योग्यतावधारणे किमप्रमाणतया कर्मोपयोगि प्रमाणतया वा, नाद्यः। अप्रमाणात् प्रमाणकार्योत्पादव्याहतेरित्याह—तत्किमिति। प्रमाणकारणमिति बहुव्रीहिः। न द्वितीयः कर्मणः [2]प्रसिद्धप्रमाणान्तर्भावस्य दुर्वचत्वादित्याह—प्रत्यक्षादीति। प्रमाणं वक्तुमध्यवसितोऽसि, इत्यनुषङ्गः। न केवलात्कर्मणो योग्यत्वावधारणम् किन्तु प्रमाणतन्न्यायोपेतात्। ततश्च न प्रमित्युदयव्याघात इत्याशङ्क्याह—वेदान्तेति। एवं कर्मणां वाक्यार्थज्ञानानुपयोगमुक्त्वा तदुत्तरभाविमननाद्युपयोगभ्रमं नुदन् साक्षात्कारोपयोगं परिशिनष्टि—तस्मादिति। 'तत्त्वमसी'त्यादेर्वाक्यस्य श्रवणजनितज्ञानेनेत्यर्थः। यद्वा तत्त्वमसीत्यादेर्वाक्याज्जातेन श्रवणापरनाम्ना ज्ञानेनेत्यर्थः। गृहीत्वा विषयीकृत्य। व्यवस्थाप्य अनुपपत्तिं निरस्य, तदुपासनायामुपयोग इत्यन्वयः। ननूपासनापि कर्मभिर्विना सुशक्या, अत आह—ब्रह्मेति। साक्षात्कारोत्पत्तौ सहकारित्वेनोपासनायां यज्ञादीनामुपयोग इत्यर्थः। सत्यामप्युपासनायां क्वचित्साक्षात्कारो न दृष्टः। अत आह—दीर्घेति। ननु भावनायामुपयोगं वर्णयन्ति। कथमुपासनोपयोगः अत आह—भावनेति। नैरन्तर्याद्येवालं किं कर्मणेत्याशङ्क्य तस्याप्युपयोगाभिधायि पातञ्जलं सूत्रं पठति—यथाहुरिति। स इति प्रकृतश्चित्तवृत्तिनिरोधः। भावनेति यावत्। दृढभूमिः दृढसाक्षात्कारोपायः। नन्वत्र कर्म नोक्तम्। अत आह—ब्रह्मचर्येति। सत्काराश्च

---

1 'नाद' ख पाठः 2 'द्धा' ख पाठः

'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति। विज्ञाय तर्कोपकरणेन शब्देन, प्रज्ञां भावनां कुर्वीतेत्यर्थः। अत्र च यज्ञादीनां श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारेणोपयोग इति केचित्। पुरुषसंस्कारद्वारेणेत्यन्ये। यज्ञादिसंस्कृतो हि पुरुष आदरनैरन्तर्यदीर्घकालैरासेव्यमानो ब्रह्मभावनामनाद्यविद्यावासनां समूलकाषं कषति, ततोऽस्य प्रत्यगात्मा सुप्रसन्नः केवलो विशदीभवति। अत एव स्मृतिः—'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः' यस्यैतेऽष्टाचत्वारिंशत्संस्काराः' इति च। अपरे तु, ऋणत्रयापाकरणेन ब्रह्मज्ञानोपयोगं कर्मणामाहुः। अस्ति हि स्मृतिः—'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्' इति। अन्ये तु 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इत्यादिश्रुतिभ्यस्तत्तत्फलाय चोदितानामपि कर्मणां संयोगपृथक्त्वेन ब्रह्मभावनां प्रत्यङ्गभावमाचक्षते, क्रत्वर्थस्यैव खादिरत्वस्य

ब्रह्मचर्यादयः इत्यन्वयः। प्रथमं श्रुतमयं ज्ञानम् अथोपपत्त्या व्यवस्थापनम् पश्चाद्भावनेति पूर्वोक्त[1] क्रमे श्रुतिसंवादमाह—अत एवेति। यतोऽयमेव क्रमः अत एव अत्र श्रवणमननस्वरूपं तत्क्रमश्च न प्रतीयते। किन्तु 'विज्ञाय प्रज्ञा' मित्येकस्यैव विरुद्धं पौर्वापर्यं भाति। अत आह विज्ञाय तर्केति। शब्देन विज्ञायेत्यन्वयः। शब्देन ज्ञानमात्रम् तदेव तर्कादिविशिष्टं भवतीति श्रवण-मनन-तत्क्रमसिद्धिः। प्रकर्षार्थ-प्रशब्दयोगाद् ज्ञानप्रकर्षात्मिका भावना प्रज्ञापदेन भातीति भावः। कर्मसाध्यकिञ्चिदभावे कथं तदपेक्षा भाव[2]नेत्याशङ्क्य मतभेदेन किञ्चिदाह— अत्र चेति। अत्र भावनायाम्। श्रेयः साक्षात्काररूपम्। प्रमातृ-गुणाधान-तद्दोषापायाभ्यां मतभेदः। अविद्यावासनां भ्रमसंस्कारम्। समूलकाषं अविद्याद्वयमूलं कषित्वा कषति अपरोक्षवृत्तिद्वारेणेत्यर्थः। तस्या अपि क्षणिकत्वेनाफलत्वात् तत्र व्यक्तं स्वरूपसाक्षात्कारमाह—तत इति। प्रसन्नः संसारकालुष्यरहितः केवलः। विशदीभवति एक एव स्फुरतीत्यर्थः। यज्ञादेः पुरुषसंस्कारत्वे प्रमाणमाह—अत एवेति। इयं तनुः अयं तनुस्थ आत्मा ब्राह्मी ब्रह्मविद्यासम्बन्धयोग्या। संस्कारस्याकण्ठोक्तत्वात् स्मृत्यन्तरपाठः। न च दुरितनिवृत्तिपुरुषसंस्कारपक्षे वक्ष्यमाणसमुच्चयविरोधः। पापस्यानन्तत्वेन यावत्साक्षात्कारं शनैर्निवर्त्यत्वात्। संस्कारस्यापि क्रमेणातिशयितस्याधेयत्वात्। ऋणापाकरणपक्षे तु न समुच्चयः, ल्यप्प्रयोगात्। तस्मिन्नपि पक्षे कर्माण्यनुष्ठेयान्येवेति तदवबोधानन्तर्यसम्भवादुपन्यासः। नित्यानामेव संस्कारद्वारा भावनाङ्गतोक्ता। सम्प्रति सर्वकर्मणां तदङ्गत्वमिति मतान्तरमाह—अन्ये त्विति। अन्ये तु तत्तत्फलाय तस्मै तस्मै स्वर्गादिफलाय चोदितानाम् काम्या[3]नाम् अपिशब्दान्नित्यानामपि कर्मणाम्, ब्रह्मभावनां प्रत्यङ्गभावमाचक्षत इत्यन्वयः। तत्र प्रमाणोक्तिः "तमेतमि"त्यादि। फलान्तरे विहितस्य कथमन्यफलत्वम् अत उक्तं—संयोगपृथक्त्वेनेति (व)। संयोगः शेषत्वबोधनम्। तत्पृथक्त्वेन (व) भेदेन

---

[1] 'क्रमेकश्रु' क पाठः [2] 'वे' क पाठः [3] 'स्यान्यानाम्'? ख पाठः

वीर्यार्थिताम्, 'एकस्य तूभयार्थत्वे संयोगपृथक्त्वम्' इति न्यायात्। अत एव पारमर्षं सूत्रम्—'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र. अ. ३ पा. ४ सू. २६) इति। यज्ञतपोदानादि सर्वं तदपेक्षा ब्रह्मभावनेत्यर्थः। तस्माद्यदि श्रुत्यादयः प्रमाणं, यदि वा पारमर्षं सूत्रं, सर्वथा यज्ञादिकर्मसमुच्चिता ब्रह्मोपासना विशेषणत्रयवती अनाद्यविद्यातद्वासनासमुच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पत इति तदर्थं कर्माण्यनुष्ठेयानि। न चैतानि दृष्टादृष्टसामवायिकारादुपकारहेतुभूतौपदेशिकातिदेशिकक्रमपर्यन्ताङ्गग्रामसहितपरस्परविभिन्नकर्मस्वरूपतदधिकारिभेदपरिज्ञानं विना

भिन्नाभ्यां वाक्याभ्यां पृथग्भूतफलशेषत्वबोधनादित्यर्थः। एकस्य उभयार्थत्वमदृष्टम् अत आह—**क्रत्वर्थस्येति**। **खादिरत्वस्य** यूपीयस्य। तत्राप्यसङ्गतिं वारयति—**एकस्येति**। 'खादिरे पशुं बध्नाति' 'खादिरं वीर्यकामस्य यूपं कुर्वीते'ति च श्रवणे काम्यत्वेनानित्यखादिरत्वस्य नित्यप्रयोगाङ्गत्वे नित्यानित्यसंयोगविरोधात् काम्यत्वमेवेत्याशङ्क्य एकस्य खादिरत्वस्य क्रत्वर्थपुरुषार्थरूपोभयात्मकत्वे क्रतुशेषत्वफलशेषत्वलक्षणसंयोगभेदावगमान्न नित्यानित्यसंयोगविरोध इत्युभयार्थत्वं चतुर्थे चिन्तितम्। संयोगपृथक्त्वेन विविदिषायां वा विनियोगः [1]वेदने वा कुतो निश्चीयत इत्याशङ्क्य सूत्रकारेण वक्ष्यमाणत्वादित्याह—**अत एवेति**। न तत्र कर्मापेक्षा भाति, नापि ज्ञाने विनियोगः अत आह—**यज्ञेति**। तमेतमित्यादि वर्तमानापदेशात् केवलार्थवादः। ततो मूलाभावात्सूत्रमपि कथञ्चिदन्यथा[2] नेयमित्याशङ्क्य, सम्भवति रात्रिसत्रन्यायेनापूर्वार्थविधाने स्वार्थे प्रामाण्यं न त्याज्यम्। सति च मूले न सूत्रमन्यथा नेयमिति उपसंहारव्याजेनाह—**तस्मादिति**। विशेषणत्रयवती, आदर-नैरन्तर्य-दीर्घकालवती। **समुच्छेदक्रमेण** वृत्तिसाक्षात्कारद्वारा। मोक्षापरनाम्ने इति फलोक्तिः। अस्तु कर्मानुष्ठानापेक्षा, तदवबोधापेक्षा तु कुतः अत आह—**न चेति**। दृष्ट उपकारस्तुषमोक्षादिः, अदृष्टः प्रोक्षणप्रयाजादिजः। स चासौ यथार्हं सामवायिकः क्रतुरूपसमवायी। आरात् दूरे। फलापूर्वसिद्धावुपकारश्च। तस्य हेतुभूतानि औपदेशिकानि प्रत्यक्षविधिविहितानि। आतिदेशिकानि प्रकृतेः सकाशाद् विकृतावतिदेशतः प्राप्तानि। क्रमपर्यन्तानि परिसरस्थक्रमकाणि। तदवच्छिन्नानीति यावत्। तथाविधान्यङ्गानि। तद्ग्रामः तत्समूहः। तत्सहितं परस्परविभिन्नं कर्मरूपं च। तदधिकारिभेदश्च। तयोः परिज्ञानं विना एतान्यनुष्ठातुं न शक्यानीत्यन्वयः। औपदेशिकेति शेषलक्षणादारभ्य पूर्वषट्के[3] शेषापेक्षा। आतिदेशिकेत्युत्तरषट्कापेक्षा। क्रमेति पञ्चमस्य, अङ्गग्रामेति तृतीयस्य सहितेति प्रयोज्यप्रयोजकविचारस्य चातुर्थिकस्य परस्परविभिन्नेति द्वितीयस्य अधिकारीति षष्ठस्य दृष्टादृष्टेति द्वितीयैकदेशस्यापेक्षोक्ता। ननु दुस्साधमिदम्परिज्ञानं कथं तदानन्तर्यमित्याशङ्क्य कर्मावबोधानन्तर्यमिति

---

1 'देन वा', ख पाठः 2 'न्यदाने', क पाठः 3 'पक्षे शे' ख-पाठः

शक्यान्यनुष्ठातुम्। न च धर्ममीमांसापरिशीलनं विना तत्परिज्ञानं। तस्मात्साधूक्तं कर्मावबोधानन्तर्यं विशेषः' इति। कर्मावबोधेन हि कर्मानुष्ठानसाहित्यं भवति ब्रह्मोपासनाया इत्यर्थः। तदेतन्निराकरोति—न। कुतः, कर्मावबोधात् प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। इदमत्राकूतम्—ब्रह्मोपासनया भावनापराभिधानया कर्माण्यपेक्ष्यन्त इत्युक्तं, तत्र ब्रूमः—क्व पुनरस्याः कर्मापेक्षा, किं कार्ये, यथाग्नेयादीनां परमापूर्वे चरमभाविफलानुकूले जनयितव्ये समिदाद्यपेक्षा। स्वरूपे वा, यथा तेषामेव द्विरवत्तपुरोडाशादिद्रव्याग्निदेवताद्यपेक्षा। न तावत्कार्ये; तस्य विकल्पासहत्वात्। तथाहि—ब्रह्मोपासनाया ब्रह्मस्वरूपसाक्षात्कारः कार्यमभ्युपेयः, स चोत्पाद्यो वा स्यात्, यथा संयवनस्य पिण्डः। विकार्यो वा, यथावघातस्य व्रीहयः। संस्कार्यो वा, यथा प्रोक्षणस्योलूखलादयः। प्राप्यो वा, यथा दोहनस्य पयः। न तावदुत्पाद्यः; न खलु घटादिसाक्षात्कार इव जडस्वभावेभ्यो घटादिभ्यो भिन्न इन्द्रियाद्याधेयो ब्रह्मसाक्षात्कारो भावनाधेयः

वदता धर्ममीमांसाभ्याससहितबोधानन्तर्यमभिप्रेतमित्याह . . . **न चेति**। तत्परिज्ञानम्। अत्रेतिशब्दं कृत्वास्यार्थ इति पूर्वेणान्वयः। अत्र भाष्ये त्वदुक्तसमुच्चयः कथं गम्यत इत्याशङ्क्य अवबोधपदाद् विज्ञायते। अन्यथा हि कर्मानुष्ठानानन्तर्यं विशेष इत्येवावक्ष्यदित्यभिसन्दधानो विस्तरोक्तमभिप्रायं संक्षिप्य कथयन्निवाह—**कर्मेति**। नेत्यस्य विशेष इत्यनेनैव सम्बन्धे कर्मावबोधानन्तर्यं विशेषो न भवतीत्युक्तं भवति, तदयुक्तम्। तदा जिज्ञासाद्वयसाधारणताभावादित्याशङ्क्य तस्य विशेषत्वं न निराक्रियते किन्तु कर्मावबोधानन्तर्यस्य विशेषस्य ब्रह्मजिज्ञासासम्बन्धो निराक्रियत इत्याह—**तदेतदिति**। उपपत्तेरिति षष्ठीत्वं निराकुर्वन्नाह—**कुत इति**। पाठान्तरानुसारेण कर्मावबोधादित्युक्तम्। प्रागपीत्य[1]युक्तं समुच्चयाय कर्मज्ञानापेक्षाया उक्तत्वादत आह—**इदमिति**। क्वेतिसूचितं विकल्पं करोति—**किमित्यादिना**। **कार्ये** साध्ये। किं परमापूर्वजननेन, स्वयमेव फलाय कल्पताम् अत उक्तं **चिरेति**। कर्मणः क्षणिकत्वात् कालान्तरस्थफलाया पूर्वकल्पनेत्यर्थः। "द्व्यवदानं जुहोति" इति वचनादाग्नेययागः। स्वोत्पत्तौ द्विरवत्तपुरोडाशद्रव्यापेक्षा इत्यर्थः। आदिशब्देन हविरन्तरदेवतान्तरसङ्ग्रहः। विकल्पयितुं पराङ्गीकृतं कार्यमाह—**तथा हीति**। स्वरूपं चासौ साक्षात्कारः। कार्यं साध्यम्। "पिष्टान्युत्पूय प्रणीताभिः संयौतीति विहितं मिश्रणं संयवनम्। गोदोहनस्य "गां दोग्धि" इति विहितस्य। घटादिसाक्षात्कार इति वैधर्म्योदाहरणम्। इन्द्रियाद्याधेयः संप्रयोगादिरादिशब्दार्थः। आधेयत्वे हेतुः **घटादिभ्यो भिन्न इति**। ईदृक्साक्षात्कारापेक्षायां कारणं **जडेति**। तत्स्वाभाव्ये हेतुरपराधीनप्रकाशत्वम्। ब्रह्मणोऽन्यस्य वृत्तिसाक्षात्कारस्योत्पाद्यत्वादुक्तविक-

---

[1] 'त्युक्तं'। ख पाठः

संभवति; ब्रह्मणोऽपराधीनप्रकाशतया तत्साक्षात्कारस्य तत्स्वाभाव्येन नित्यतयोत्पाद्यत्वानुपपत्तेः, ततो भिन्नस्य वा भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत्संशयाक्रान्ततया प्रामाण्यायोगात्, तद्विधस्य तत्सामग्रीकस्यैव बहुलं व्यभिचारोपलब्धेः। न खल्वनुमानविबुद्धं वह्निं भावयतः शीतातुरस्य शिशिरभरमन्थरतरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षात्कारः प्रमाणान्तरेण संवाद्यते; विसंवादस्य बहुलमुपलम्भात्। तस्मात् प्रामाणिकसाक्षात्कारलक्षणकार्याभावान्नोपासनाया उत्पाद्ये कर्मापेक्षा। नच कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो विकारसंस्कारप्राप्तयः संभवन्ति। स्यादेतत् - मा भूद्ब्रह्मसाक्षात्कार उत्पाद्यादिरूप उपासनायाः, संस्कार्यस्तु अनिर्वचनीयानाद्यविद्याद्वयपिधानापनयनेन भविष्यति, प्रतिसीरापिहिता नर्तकीव प्रतिसीरापनयद्वारा रङ्गव्यापृतेन। तत्र च कर्मणामुपयोगः। एतावांस्तु विशेषः—

त्पानवकाशमाशङ्क्यैकदेशि[1]कमतेन परिहरति—तत इति। प्रतिभाप्रत्ययवत् भावनाजन्यभ्रान्तप्रत्ययस्येव। प्रतिभामात्रप्रत्ययवदर्थाभाववत्। प्रामाण्यायोगात् प्रामाण्यनिश्चयायोगादित्यन्वयः। तत्र हेतुः किमिदं प्रमाणमप्रमाणं वेति संशयाक्रान्ततयेति। संशयश्चायं अभ्यासजसाक्षात्कारस्य। षड्जादिभेदे प्रामाण्यस्यान्यत्राप्रामाण्यस्य च दर्शनादित्याह—तद्विधस्येति। साक्षात्कारत्वं ताद्विध्यम। बहुलमिति कचिद्व्यभिचारोऽपि सूचितः। अनुमानेति परोक्षज्ञानमूलभावनाजसाक्षात्कृतेरलीकत्वसूचनायोक्तम्। इदं च स्मृत्याद्युपलक्षणम्। मन्थरो मन्दः। कायशब्देनावयवलक्षणकाण्डग्रहणात्। काय एव काण्डो दण्ड इति। विसंवादस्य बाधस्य। बहुलं व्यभिचारोपलम्भादित्यत्र भावनाजन्यानां व्यभिचारिणां भूयस्त्वमुक्तम्। इहत्वनलसाक्षात्कारबाधकानां भूयस्त्वम्। तर्हि स्वरूपस्यैव विकाराद्यन्यतमः पक्षोऽस्तु तत्राह—न चेति। कूटस्थत्वं विकारसंस्कारयोरभावे हेतुः। कौटस्थ्याद् गुणाधानसंस्कारो मा भूत्। दोषापनयात्मा तु भविष्यतीति शङ्कते—स्यादेतदिति। अत्रशिष्टपक्षद्वयं नात्यन्तदुष्ट इति दर्शयितुं तद्दोषाभ्यनुज्ञा। अपनेयत्वद्योतनायानिर्वचनीयपदम्। अपिधानापनयनं संस्कारो न दृष्टः अत आह—प्रतिसीरेति। जवनिका [भावना। रङ्गव्यापृतस्थानीया?]। रङ्ग[2]व्यापृतो नटः। एवञ्च विभक्तिभेदेऽप्यर्थाभेदायोपासनाया इति पञ्चमी ग्राह्या। यदीमं संस्कारमुपासना करोति किं कर्मणा। न, कर्मसमुच्चिताया एव तत्साधनत्वादित्याह—तत्र चेति। ननु दृष्टान्ते संस्कारसाध्यं नर्तकीसाक्षात्करणं फलमस्ति। इहाफलः कथं संस्कारोऽभ्युपेयः इत्याशङ्क्य प्रकृते भिन्नस्य फलस्याभावेऽपि तिरोधिभङ्गे प्रागप्राप्तमिव स्वरूपं प्राप्तमिव भवत्फलमिव भवति कण्ठगतचामीकरन्यायेनेत्याशयेनाह—एतावानिति। शब्दज्ञानमात्रसन्ततिः।

---

1 ‘ शिम ’ ख पाठः 2 ‘ ङ्गस्य व्या? ’ क. पाठः

प्रतिसीरापनये पारिषदानां नर्तकीविषयसाक्षात्कारो भवति, इह तु अविद्यापिधानापनयमात्रमेव नापरमुत्पाद्यमस्ति, ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभावस्य नित्यत्वेन अनुत्पाद्यत्वात् । अत्रोच्यते— का पुनरियं ब्रह्मोपासना। किं शाब्दज्ञानमात्रसंततिः, आहो निर्विचिकित्सशाब्दज्ञानसंततिः। यदि शाब्दज्ञानमात्रसंततिः, किमियमभ्यस्यमानाप्यविद्यां समुच्छेत्तुमर्हति । तत्त्वविनिश्चयस्तदभ्यासो वा सवासनं विपर्यासमुन्मूलयेत्, न संशयाभ्यासः, सामान्यमात्रदर्शनाभ्यासो वा। नहि स्थाणुर्वा पुरुषो वेति वा आरोहपरिणाहवत् द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्याप्तं, ऋते विशेषदर्शनात् । ननूक्तं श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा युक्तिमयेन च व्यवस्थाप्यत इति । तस्मान्निर्विचिकित्सशाब्दज्ञानसंततिरूपोपासना कर्मसहकारिण्यविद्याद्वयोच्छेदहेतुः ॥ नचासावनुत्पादितब्रह्मानुभवा तदुच्छेदाय पर्याप्ता; साक्षात्काररूपो हि विपर्यासः साक्षात्काररूपेणैव तत्त्वज्ञानेनोच्छिद्यते, नतु परोक्षावभासेन; दिङ्मोहालातचक्रचलद्वृक्षमरुमरीचिसलिलादिविभ्रमेष्वपरोक्षावभासिषु अपरोक्षावभासिभिरेव दिगादितत्त्वप्रत्ययैर्निवृत्तिदर्शनात्, नो खल्वाप्तवचनलिङ्गादिनिश्चितदिगादितत्त्वानां दिङ्मोहादयो निवर्तन्ते । तस्मात् त्वंपदार्थस्य तत्पदार्थत्वेन साक्षात्कार एषितव्यः । एतावता हि त्वंपदार्थस्य

विचारविधुरशब्दजापातप्रतिपत्तिसन्ततिः । **निर्विचिकित्सेति** । विचाराद्युत्तरभाविन्यसन्दिग्धशब्दज्ञानसन्ततिरित्यर्थः । आपातधीरप्यनवधारितानेकविशेषगोचरा वा, सामान्याकारमात्रगोचरा वा, नोभयमित्याह— **किमियमिति** । **अभ्यस्यमाना** विरुद्धबुद्धिव्यवधिं विना क्रियमाणा । किमाक्षेपे । नार्हतीत्यर्थः । कथं नार्हति तद्विलक्षणस्यैव तदवगमत्वावगमादित्याह—**तत्त्वेति**। यत्र द्राग् भ्रमशान्तिस्तत्र निश्चयः। यत्र पुनरनुवृत्तिः, तत्र तदभ्यासः । **पुरुष एवेति निश्चयाय** तद्वारा स्थाण्वविद्यापनयाय। ननु तत्र अभ्यासान्ते क्वचित् पुरुषनिश्चयो दृष्टः ? सत्यं। स तु विशेषदर्शनजो नाभ्यासजः इत्याह- **ऋत इति** । द्वितीयं शङ्कते—**नन्विति** । दूषणभिया नैतत्स्वीकारः किन्तु नः सिद्धान्त इति द्योतयितुं पूर्वोक्तत्वकथनम् । ननूपासना चेदविद्योच्छेदहेतुः किं कर्मणा, न चाविद्योच्छेद एव कर्मसाचिव्यम्, अविद्याया विद्यैकनिवर्त्यत्वादिति, सत्यं, विद्यैवाविद्यानिवर्तिका । सा तु न परोक्षरूपा किन्त्वपरोक्षात्मा। तदुत्पादने कर्मापेक्षोपासनाया इत्याह—**न चासावित्यादिना** । अनुभवः साक्षात्कारः । नौस्थस्य तटस्थवृक्षेषु चलनभ्रमः । एवकारमसहमानं प्रत्याह—**नो खल्विति** । जीवस्य दुःखित्वादिभ्रमनिवृत्तिः साक्षात्कारजा अपरोक्षभ्रमनिवृत्तित्वात् दिङ्मोहनिवृत्तिवदिति, पूर्वोक्तव्याप्तेः फलमाह—**तस्मादिति** ।

दुःखिशोकित्वादिसाक्षात्कारनिवृत्तिः नान्यथा। नचैष साक्षात्कारो मीमांसासहितस्यापि शब्दस्य प्रमाणस्य फलं अपि तु प्रत्यक्षस्य; तस्यैव तत्फलत्वनियमात्। अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात्। तस्मान्निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम्। न चायमनुभावो ब्रह्मस्वभावो, येन न जन्येत, अपि त्वन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः। न चैतावता ब्रह्मणोऽपराधीनप्रकाशता। नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वयंप्रकाशं न भवति; सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि। यथाह स्म भगवान् भाष्यकारः—

अत्यन्तोच्छेदः सवासनोच्छेदो वा निवृत्तिः। तेन न व्यभिचारशङ्का। **तत्पदार्थरूपेण साक्षात्कारः**। आरोपविपरीतविषयज्ञानयोरेकविषयत्वाय पदार्थद्वयोक्तिः। क्लृप्तहेत्वभावे कार्यभङ्गं बाधकमाह—**एतावतेति**। भावना साक्षात्कारकारिणीत्ययुक्तम् शब्दादेव साक्षात्कृतेरित्येकदेशिमतमाशङ्क्याह—**न चेति**। केवलस्यासामर्थ्येऽपि मीमांसितः शब्दः शक्तः साक्षात्कृतौ, अत उक्तं—**मीमांसेति**। तत्किं तदनन्तरभाविमननसाहित्यस्य नेत्याह—**अपि त्विति**। **प्रत्यक्षस्य** प्रमाणस्येत्यनुषङ्गः। **तस्य** प्रत्यक्षस्य। **तत्फलत्वनियमात्** साक्षात्कृतिफलत्वनियमात्, नियमं नेच्छामीति चेत् न, अन्वयव्यतिरेकावभासितकार्यकारणनियमस्य स्वेच्छया भङ्गाङ्गीकारेऽतिप्रसक्तेरित्याह—**अन्यथेति**। न चापरोक्षे ब्रह्मणि परोक्षज्ञानस्य भ्रमत्वापातः स्मृतिवदुपपत्तेः। किंच अपरोक्षे परोक्षज्ञानं भ्रमः। न तु स्वयंपरोक्षं स्वयं प्रकाशतयापरोक्षं ब्रह्मेत्येवमाकारैव हि शाब्दी स्वयं परोक्षत्वशालिनी धीरुदेतीत्यविरोधः। दशमस्त्वमसीत्यादावपि शब्दात्परोक्षधीरेव। तत्रापरोक्षधीरिन्द्रियादेवेत्यनुदाहरणम्। यदि प्रत्यक्षफलं साक्षात्कारः तर्हि शब्दवदुपासनापि न तत्कुर्यात्। अन्तःकरणेन कारयतीति चेत् तर्हि किं तया? अन्तःकरणसहकार इति चेत् तर्हि प्रत्ययश(ता)ब्दावृत्त्यापि साक्षात्कृतिप्रसङ्ग इत्याशङ्क्याह—**तस्मादिति**। नायमदृष्टादिवत्परोक्षस्वभावः येन भावनोपेतेनाप्यन्तःकरणेन न साक्षात्क्रियेत्युक्तम्—**अपरोक्षस्येति**। **अन्तर्भावयति** स्ववृत्तिविषयं करोति। एवं च स्वरूपस्य संस्कार्यत्वमेव न, किन्तु वृत्तेरुत्पाद्यत्वपक्षोऽपि सिध्यतीत्याह—**न चेति**। कथं तर्हि ब्रह्मसाक्षात्कार इति षष्ठीसमासादित्याह—**ब्रह्मविषय इति** अन्तःकरणग्राह्यत्वे स्वप्रकाशत्वभङ्गमाशङ्क्य शब्दसाक्षात्कार्यत्वेऽपि तुल्यत्वान्नैष दोष इत्याह—**न चेत्यादिना**। वृत्तिविषयत्वेऽपि संविदविषयत्वं स्वप्रकाशत्वमक्षतमित्यर्थः। स्वप्रकाशतया स्फुरत्यात्मनि नान्या वृत्तिरिति वार्त्ता तर्हि कथमत आह—**सर्वोपाधीति**। स्वयंज्योतिः वृत्त्यविषयः। किमनेन सङ्कोचेनात आह—**नत्विति**। उपहितस्य वृत्तिविषयत्वदर्शनात् सङ्कोच इत्यर्थः। दर्शनमेव सम्मतिव्याजेनाह—**यथेति**। नन्वविद्यानिरासिसाक्षात्कारविषयो

'नायमेकान्तेनाविषयः' इति । नचान्तःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः; तस्यैव तदुपाधेर्विनश्यदवस्थस्य स्वपरोपाधिविरोधिनो विद्यमानत्वात् । अन्यथा चैतन्यच्छायापत्तिं विनाऽन्तःकरणवृत्तेः स्वयमचेतनायाः स्वप्रकाशत्वानुपपत्तौ साक्षात्कारत्वायोगात् । न चानुमितभावितवह्निसाक्षात्कारवत् प्रतिभात्वेनास्याप्रामाण्यं, तत्र वह्निस्वलक्षणस्य परोक्षत्वात्, इह तु ब्रह्मरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षत्वात् । नहि शुद्धबुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यन्ते, जीव एव तु तत्तदुपाधिरहितः शुद्धबुद्धादिस्वभावो ब्रह्मेति गीयते । नच तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यते । तस्माद्यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिवश्रोत्रेन्द्रियेण षड्जादिस्वरग्राममूर्च्छनाभेदमध्यक्षमनुभवति, एवं वेदान्तार्थज्ञानाभ्यासाहितसंस्कारो जीवस्य ब्रह्मभावमन्तःकरणेनेति । अन्तःकरणवृत्तौ ब्रह्मसाक्षात्कारे जनयितव्येऽस्ति तदुपासनायाः कर्मापेक्षेति चेत्, न; तस्याः कर्मानुष्ठानेन सहभावाभावेन तत्सहकारित्वानुपपत्तेः । न खलु 'तत्त्वमसि' इत्यादेर्वाक्यान्निर्विचिकित्सं शुद्धबुद्धोदासीनस्वभावं अकर्तृत्वाद्युपेतं

निरुपाधिरेव । अन्यथा निरासानुपपत्तेः एवं च वृत्तेः सोपाधिविषयत्वनियमः कथमित्यत आह—**न चेति** । उपाधौ सत्यनिर्मोक्षमाशङ्क्य आह—**विनश्यदिति** । नाशकासन्निधौ कथं विनश्यत्ता, अत आह—**स्वपरेति** । उपाधिसम्बन्धवत्तया सोपाधिगोचरत्वं वृत्तेः, न तूपाधिग्राहित्वेनेति भावः । ननूपाधिसम्बन्धे विषयत्वं विषयत्वे चोपाधिसम्बधो विषयविषयिभावात्मेत्यन्योन्याश्रय अत आह **अन्यथेति** । अन्योन्याश्रयणोपाधिसम्बन्धप्रतिक्षेप इत्यर्थः । न विषयत्वप्रयुक्तश्चित्सम्बन्धो वृत्तेः । किन्तु स्वतः घटादिवृत्तिष्वतद्गोचरास्वपि सत्त्वात् । चिद्रूपं च ब्रह्मेति स्वाभाविकस्तस्य वृत्तिसम्बन्ध-इत्यर्थः । **वह्निस्वलक्षणेति** । वह्नेरदृष्टादिवत्स्वभावपारोक्ष्याभावेऽपि तदा सम्प्रयोगाभावात् पारोक्ष्यम् । अनेन साक्षात्कारो यदि भावनाजः स्यात् अप्रमा स्यादिति प्रसङ्गे प्रमासामग्र्यजन्यत्वमुपाधिरिति उक्तं भवति । साधनव्यापकत्वं परिहरति—**इह त्विति** । ब्रह्मस्वरूपस्य प्रागप्यापरोक्ष्यं कथमुपनिषदेकवेद्यत्वादत आह—**जीवस्येति** । किन्तर्हि श्रवणादिना अत आह—**उपाधीति** । जीवचैतन्यमात्रापरोक्ष्येऽपि शुद्धानन्तत्वादेर्वह्निस्वलक्षणतुल्यता अत आह—**न हीति** । अनतिरेकहेतुमाह—**जीव एवेति** । उपाधिविरहस्तर्हि वह्निस्वलक्षणतुल्योऽत आह—**न चेति** । तेनेह विषयस्य स्वाभाविकमागन्तुकं वा पारोक्ष्यं नास्तीत्युक्तम् । अस्ति चान्तःकरणेन्द्रियेण सम्बन्ध इति साक्षात्कृतेर्न प्रमासामग्र्यजन्यत्वमित्युक्तं भवति । प्रसङ्गस्य व्यभिचारमपि दर्शयन्नुपसंहरति—**तस्मादिति** । संस्कारसहितः पुरुषः । तत्सहकारि यस्याः सा तथा, तत्त्वानुपपत्तेरित्यर्थः । ननूपपादितः सहभावः अत आह—**न खल्विति** । आत्मानं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुं नार्हति । नन्वात्मानमेव

अपेतब्राह्मणत्वादिजातिं देहाद्यतिरिक्तं एकमात्मानं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुमर्हति। अनर्हश्च कथं कर्ता वाधिकृतो वा। यद्युच्येत - निश्चितेऽपि तत्त्वे विपर्यासनिबन्धनो व्यवहारोऽनुवर्तमानो दृश्यते, यथा गुडस्य माधुर्यविनिश्चयेऽपि पित्तोपहतेन्द्रियाणां तिक्तावभासानुवृत्तिः; आस्वाद्य थूत्कृत्य त्यागात्, तस्मादविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानं, तेन च विद्यासहकारिणा तत्समुच्छेद उपपत्स्यते। नच—कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति, कर्मणो वा तदुच्छेदकस्य कुत उच्छेदक इति - वाच्यम्, सजातीयस्वपरविरोधिनां भावानां बहुलमुपलब्धेः। यथा पयः पयोऽन्तरं जरयति, स्वयं च जीर्यति। यथा विषं विषान्तरं शमयति, स्वयं च शाम्यति। यथा वा कतकरजो रजोऽन्तराविले पाथसि प्रक्षिप्तं रजोऽन्तराणि भिन्दत् स्वयमपि भिद्यमानमनाविलं पाथः करोति। एवं कर्माविद्यात्मकमपि अविद्यान्तराण्यपगमयत् स्वयमप्यपगच्छतीति। अत्रोच्यते—सत्यं, 'सदेव सोम्येदम्' इत्युपक्रमात् 'तत्त्वमसि' इत्यन्ताच्छब्दात्, ब्रह्ममीमांसोपकरणादसकृदभ्यस्तात्, निर्विचिकित्सेऽनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्तावनुवर्तन्ते सांसारिकाः प्रत्ययास्तद्व्यवहाराश्च; तथापि तानप्ययं

बुद्ध्यैवाधिक्रियतेऽत आह—**तत्त्वमसीति**। वाक्यप्रतिपन्नेऽप्यात्मन्यापातदशायामधिकारो दृष्टः अत आह—**निर्विचिकित्समिति**। नन्वधिकारिणो निर्विचिकित्सं स्वज्ञानं नाधिकारविरोधि अत आह—**शुद्धेति**। **शुद्धः** कामादिरहितः, **बुद्धः**, अपराधीनप्रकाशः, **उदासीनः** क्रियाशक्तिशून्यः स्वभावो यस्य। **अकर्तृत्वाद्युपेतं**। कर्तृत्वभोक्तृत्वाद्यनुपेतम्। तदनेनाधिकारिविरुद्धरूपमुक्तम्। **अनर्हश्च** अवबोद्धुमिति शेषः। अनर्हः कथमधिकृतः, अनधिकृतःकथं कर्ता परोक्षनिश्चयस्य कर्तृत्वादिभ्रमानुच्छेदित्वादधिकार इति शङ्कते—**यदीति**। अविद्याभ्रमः तत्संस्कारेण भ्रमान्तरस्यानुवृत्त्येत्यर्थः। स्यादेवमनिर्मोक्षः अत आह—**तेन चेति**। **विद्यासहकारिणा** भावनासमुच्चितेन। तस्य भ्रमस्य सम्यक् सवासनमुच्छेदनं साक्षात्कारद्वारा, नन्वेवं सजातीयनिवर्तकत्वमयुक्तमापतेत् कर्मणश्चानिवृत्तावमुक्तिः, निवृत्तौ निवर्तकानवस्थेत्यत आह—**न चेति**। सजातीयानां निवर्त्यजातीयानाम् पयःउष्णम् बहुलग्रहणात् बहूदाहरणम्। तच्च क्वचिदेवैवमिति शङ्काशान्त्यै। परोक्षनिश्चयेऽपि भ्रमानुवृत्तिमूरीकृत्य समाधत्ते—**अत्रोच्यत इत्यादिना**। 'न खलु तत्त्वमसि' इति ग्रन्थे निर्विचिकित्सज्ञानोपायानुक्तेरनुवादव्याजेनेदानीमाह—**सदेवेत्यादिना**। अत्रोपक्रमोपसंहाराभ्यास इति तात्पर्यलिङ्गद्वयमुक्तम्। अनादिरविद्या उपादानं कारणमस्य देहादेः। एतच्च मनुष्यो ब्राह्मण इत्याद्यभिमानस्य कर्मप्रवर्तकस्य तत्त्वज्ञाननिवर्त्यत्वज्ञापनाय, अविद्यासंस्कारो भ्रमसंस्कारः **सांस्कारिकाः प्रत्ययाः** मनुष्यः ब्राह्मणः कर्ता भोक्तेत्यादयः **व्यवहारप्रत्ययानिति** द्वन्द्वः। तदनुरूपं व्यवहरति

व्यवहारप्रत्ययान्मिथ्येति मन्यमानो विद्वान्न श्रद्धत्ते पित्तोपहतेन्द्रिय इव गुडं थूत्कृत्य त्यजन्नपि तस्य तिक्तताम्। तथा चायं क्रियाकर्तृकरणेतिकर्तव्यताफलप्रपञ्चमतात्त्विकं विनिश्चिन्वन्कथमधिकृतो नाम, विदुषो ह्यधिकारः, अन्यथा पशुशूद्रादीनामप्यधिकारो दुर्वारः स्यात्। क्रियाकर्त्रादि-स्वरूपविभागं च अविध्वंसमानः इह विद्वानभिमतः कर्मकाण्डे। अत एव भगवानविद्वद्विषयत्वं शास्त्रस्य वर्णयांबभूव भाष्यकारः। तस्माद्यथा राजजातीयाभिमानकर्तृके राजसूये न विप्रवैश्यजातीयाभिमानिनोरधिकारः। एवं द्विजातिकर्तृक्रियाकरणादिविभागाभिमानिकर्तृके कर्मणि न तदनभिमानिनोऽधिकारः। न चानधिकृतेन समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते; वैश्यस्तोम इव ब्राह्मणराजन्याभ्याम्। तेन दृष्टार्थेषु कर्मसु शक्तः प्रवर्तमानः प्राप्नोतु फलं; दृष्टत्वात्, अदृष्टार्थेषु तु शास्त्रैकसमधिगम्यं फलमनधिकारिणि न युज्यत इति नोपासनाकार्ये कर्मापेक्षा। स्यादेतत्—मनुष्याभिमानवदधिकारिके कर्मणि विहिते यथा तदभिमानरहितस्यान-

न श्रद्धत्त इति कथमत आह—**पित्तेति**। **नामेति** सम्भावनायां, कथमधिकृतो नाम अधिकृत इत्यसम्भावितमित्यर्थः। नन्वधिकारकारणमुक्तं भ्रमानुवृत्तिरत आह—**विदुष इति**। प्राणिमात्रस्य मनुष्यमात्रस्य वाधिकारो न विदुष इत्यत आह—**अन्यथेति**। अस्तु वैदुष्यं, प्रकृतस्यापि तदस्त्येव। भ्रमवासनया कर्त्रादिविभागदर्शनादत आह—**क्रियेति**। ***अविध्वंसमानः**। अबाधमानः नतु केवलं जानन्। [न!?] तेन जानन्नपि, अविद्वानेवेत्यर्थः। उक्तविध एव कर्मण्यधिकारीति कथमिति प्राक्प्रतिपादितत्वादित्याह—**अत एवेति**। 'प्राक् च तथाभूतात्मे'त्यत्र निर्विचिकित्सौपनिषदात्मभानात्प्राक् कर्मशास्त्रं प्रवृत्तं, अविद्यावद्विषयत्वं नातिवर्तते इत्यभिदधत् भाष्यकारः कर्मोपयोगि वैदुष्यं कर्त्रादिविभागसत्यत्वाभिमानरूपमेवाहेत्यर्थः। सर्वमिद समुच्चयद्वेषायैव कल्पितं भाष्येऽपि विज्ञानं साक्षात्कारः न परोक्षनिश्चय इत्यपि शक्यत एव वक्तुम् अनादरणीयं वा भाष्यमस्माभिरिति आशङ्क्य समुच्चयवादिनाप्यभिमानशून्यस्याप्यनधिकारोऽङ्गीकृत एवेति दर्शयन्नाह—**तस्मादिति**। अनधिकृतोऽपि साक्षात्कारफललोभेन करिष्यति शक्तत्वादत आह—**न चेति**। वैदिकमिति किं विशेषाभिधानेन, अभिमानभावेऽपि तृप्त्यादिफलप्रदस्य लौकिकस्य भोजनादिकर्मणो व्यावृत्तिरिति दर्शयन्नुपसंहारव्याजेन सङ्ग्रहं विवृणोति—**तेनेति**। **शक्तः** शक्त इत्यभिमन्यमानः दृष्टत्वात्तावन्मात्रेण फलस्येति शेषः। **कार्ये** उत्पाद्ये। वृत्तिरूपे सत्यपि क्रियाकर्त्रादिज्ञाने तत्सत्यताभिमानाभावादनधिकार इत्ययुक्तम् तत्रातिप्रसङ्गं शङ्कते—**स्यादेतदिति**। इतिर्हेतौ। भिन्नम्

* ''विद्वस्यमानः'' इति कल्पतरुसम्मतः पाठः 'लोहितादिडज्भ्यः क्यष्' इति क्यषन्तं रूपम्

धिकारः, एवं निषेधविधयोऽपि मनुष्याधिकारा इति तदभिमानरहितस्तेष्वपि नाधिक्रियेत पश्वादिवत्। तथाचायं निषिद्धमनुतिष्ठन् न प्रत्यवेयात्, तिर्यगादिवदिति भिन्नकर्मतापातः। मैवम्; न खल्वयं सर्वथा मनुष्याभिमानरहितः, किं त्वविद्यासंस्कारानुवृत्त्यास्य मात्रया तदभिमानोऽनुवर्तते। अनुवर्तमानं च मिथ्येति मन्यमानो न श्रद्धत्त इत्युक्तम्। किमतो यद्येवम्, एतदतो भवति—विधिषु श्राद्धोऽधिकारी नाश्राद्धः। ततश्च मनुष्याद्यभिमानेनाश्रद्दधानो न विधिशास्त्रेणाधिक्रियते। तथाच स्मृतिः—'अश्रद्धया हुतं दत्तम्' इत्यादिका। निषेधशास्त्रं तु न श्रद्धामपेक्षते, अपि तु निषिध्यमानक्रियोन्मुखो नर इत्येव प्रवर्तते। तथाच सांसारिक इव श्रद्धावगत-ब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्तमानः प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः। तस्मान्नोपासनायाः कार्ये कर्मापेक्षा। अत एव नोपासनोत्पत्तावपि; निर्विचिकित्सशाब्दज्ञानोत्पत्त्युत्तरकालमनधिकारः कर्मणीत्युक्तम्। तथा च श्रुतिः—'न कर्मणा न प्रजया धनेन

लङ्घितं शास्त्रं येन स तथा तत्ता अतिक्रान्तनिषेधता। यथेष्टचारित्वमिति यावत्। तथा च लोकायतदर्शनस्याभ्युपगमः स्यादिति तात्पर्यम्। निगूढाभिसन्धिर्मिथ्याप्रत्ययानुवृत्त्या अधिकारमुपपादयन् परिहरति—मैवमिति। यद्येवं विधिष्वप्यधिक्रियेत अत आह—अनुवर्तमानमिति। अभिमानमित्यनुषङ्गः। अश्रद्धातौल्याद् निषेधेऽपि अनधिकारस्तदवस्थ इति शङ्कते—किमत इति। अभिसन्धिमुद्घाटयन् परिहरति—एतदिति। श्राद्धः श्रद्धावान्। न च श्रद्धा पाक्षिकीत्याह—नाश्राद्धः। श्रद्धापेक्षायां किं प्रमाणमत आह—तथा चेति। निषेधोऽपि शास्त्रत्वाविशेषात् श्रद्धावदधिकारः नेत्याह—निषेधेति। श्रद्धाभावे किमधिकारनिमित्तमत आह—अपि त्विति। निषेध्योन्मुखतैव निषेधाधिकारहेतुः न श्रद्धेति कुतः, अन्यस्यापि नास्तिकस्य निषेधाधिकारादित्याशयेनाह—तथा चेति। क्व पुनरस्याः कर्मापेक्षेत्यत्र किं कार्य इति प्रथमपक्षं विकल्पासहत्वेन दूषयित्वोपसंहरति—तस्मादिति। यस्माद् ब्रह्मण्युत्पाद्यादिचतुष्टयवृत्तानुत्पाद्यत्वं च न घटते तस्मादित्यर्थः। कार्ये साध्ये, स्वरूपे वेति तत्र द्वितीयपक्षमतिदेशेन दूषयति—अत एवेति। कर्मापेक्षेत्यनुषङ्गः। साध्येऽनपेक्षा स्वरूपेऽनपेक्षायां न हेतुः। द्विरवत्तपुरोडाशादौ व्यभिचारादित्याशङ्क्यातः शब्देन कार्यानपेक्षा न परामृष्टा किन्तु तत्रोक्ता युक्तिरित्याह—निर्विचिकित्सेति। उक्तं यत इति शेषः। उक्तस्य भावनासाध्यस्वरूपयोः कर्मानपेक्षासाधकतर्कस्यानुग्राह्यं प्रमाणमाह—तथा चेति। एके अत्राधिकारिणः। त्यागेन कर्मत्यागसाध्यज्ञानेनामृतत्वं प्रापुः। न तु कर्मणा यज्ञादिना न प्रजया। पुत्रादिकया न धनेनापरविद्ययेत्यर्थः। अत एव श्रुत्यन्तरं "पुत्रेणैवायं लोको जय्यः विद्यया

त्यागेनैके अमृतत्वमानशुः'। तत्किमिदानीमनुपयोग एव सर्वथेह कर्मणाम्, तथाच 'विविदिषन्ति यज्ञेन' इत्याद्याः श्रुतयो विरुध्येरन्। न; आरादुपकारकत्वात्कर्मणां यज्ञादीनाम्। तथाहि - तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणा विविदिषन्ति वेदितुमिच्छन्ति, न तु विदन्ति। वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वात्, इच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधानेन च कार्यसंप्रत्ययात्। नहि राजपुरुषमानयेत्युक्ते वस्तुतः प्रधानोऽपि राजा पुरुषविशेषणतया शब्दत उपसर्जन आनीयतेऽपितु पुरुष एव, शब्दतस्तस्य प्राधान्यात्। एवं वेदानुवचनस्येव यज्ञस्यापीच्छासाधनतया विधानम्। एवं तपसोऽनाशकस्य। कामानशनमेव तपः, हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति, न तु सर्वथाऽनश्नतो

देवलोकः कर्मणा पितृलोकः" इति एकशब्दोपात्ताधिकारिणां कर्मत्यागश्रवणात् भावनोत्पत्तावप्यधिकारानन्तरभाविन्यामनपेक्षोक्ता। समुच्चयपूर्वपक्षबीजमुद्धर्तुं शङ्कते—**तत्किमिति**। तद्वाक्यस्थमनुवचनाद्यादिशब्दार्थ इति द्योतयितुं कर्मग्रहणम्। आरादुपकारकत्वमत्राप्रतीतं किमित्यङ्गीक्रियत इत्याशङ्क्य तत्प्रतीतिप्रकारं श्रुत्यर्थकथनेनाह—**तथा हीति**। "तमेतमिति प्रकृतोक्तिं विशेषे पर्यवसाययति—**आत्मानमिति**। अनुवचनमध्यापनम् तद्वृत्त्यर्थमित्याशङ्क्य व्याचष्टे—**नित्यस्वाध्यायेन** ब्रह्मयज्ञेन। प्रसिद्धमपि प्रकृतोपयोगात् व्याचष्टे—**वेदितुमिति**। तावता कथमारादुपकारकत्वमत आह—**नत्विति**। वेदनेनानन्वयादित्यर्थः। नन्वर्थप्राधान्यात् ज्ञानेनानन्वय उक्तः। अत आह—**वस्तुत इति**। ननु पयसा भुङ्क्ते इति प्रकृत्यर्थेनाप्यन्वयो दृष्टः सत्यं, तत्रान्वयार्हशब्दप्रधानान्तराभावात् न तथेह, प्रधानान्तरस्य सत्त्वादित्याह— **इच्छायाश्चेति**। द्वयोर्यथास्वं प्रधानत्वे को विनिगमः अत आह—**प्रधानेनेति**। शब्दप्रधानेन कार्यस्याद्यातोपायभावनायाः सम्प्रत्ययादन्वयात् प्रति अयनं गमनं प्रत्यय इति व्युत्पत्त्या। ननु शाब्दे प्रधानेनैव कार्यसम्प्रत्यय इति कुतः, व्यतिरेकस्यान्वयस्य च दर्शनादित्याह—**न हीत्यादिना**। विविदिषन्तीत्यस्यानुवचनसम्बन्धे यज्ञेनेत्यादितृतीयानां साकाङ्क्षत्वमाशङ्क्यानुषङ्गात् तत्सम्बन्धं मत्वाह—**एवमिति**। एवं चानुवचनस्य शब्दप्रधानसम्बन्धोपपत्तौ। एवं यज्ञवत् मुख्यतपसो जिज्ञासाविरोधं हृदि कृत्वैकीकरोति— **तपसोऽनाशकस्येति**। नाशकत्वरहितस्येति भ्रमं नुदन्, मुख्यानशनत्वप्रयुक्तं जिज्ञासाविरोधमप्यपास्यन् अतपसि कथं तपश्शब्द इति शङ्कां वारयति—**कामेति**। अशनं आशः स एवानाशकः सोपि नात्यान्तकः। किन्तु कामेनेच्छयाहिताहितमेध्यामेध्यविभागं परिमाणं चानादृत्य क्रियमाणाशननिवृत्त्यात्मा स चोत्कृष्टधर्महेतुत्वात्तप इत्युपचर्यत इत्यर्थः। तस्य विविदिषान्वयः कथं योग्यत्वादित्याह—**हितेति**। नन्वनशनमात्यन्तिकं तपश्च चान्द्रायणाद्यमस्तु इत्यभिसन्धिमविदुषः शङ्कां तदाविष्कारेण परिहरति—**नत्वित्यादिना**। यदि

मरणात् । नापि चान्द्रायणादितपःशीलस्य; धातुवैषम्यापत्तेः । एतानि च नित्यान्युपात्तदुरितनिबर्हणेन पुरुषं संस्कुर्वन्ति । तथा च श्रुतिः—'स ह वा आत्मयाजी यो वेद इदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयते' इति । अनेनेति प्रकृतं यज्ञादि परामृशति । स्मृतिश्च-'यस्यैतेऽष्टाचत्वारिंशत्संस्काराः' इति । नित्यनैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य च विशुद्धसत्त्वस्याविदुष एव उत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी श्रुतिः—'विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' इति । स्मृतिश्च—'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इत्यादिका । क्लृप्तेनैव च नित्यानां कर्मणां नित्येहितेनोपात्तदुरितनिबर्हणेन पुरुषसंस्कारेण ज्ञानोत्पत्तावङ्गभावोपपत्तौ न संयोगपृथक्त्वेन साक्षादङ्गभावो युक्तः; कल्पनागौरवापत्तेः ।

कर्मणां विविदिषयान्वयः एकानुष्ठानेऽपि सा स्यात् न इच्छाया अपि कर्मभिः पापनिवृत्तिद्वारा साध्यत्वात् पापस्य च विविधत्वाद् यावत्तन्निवृत्ति नित्यानामनुष्ठानोपपत्तेरित्याह—**एतानीति** । काम्यानामनीदृक्फलत्वाद् नित्यानीत्युक्तम् ॥ स्वजन्यधर्मद्वारा दुरितनिबर्हणात्मकं दोषापनयसंस्कारं पुरुषे कुर्वन्तीत्यर्थः नित्यानां संस्कारत्वे प्रमाणमाह—**तथा चेति** । अनेन कर्मणा, इदं मे अङ्गं अन्तःकरणम् संस्क्रियते अपापं क्रियते उपधीयते पापनिवृत्तिहेतुपुण्योपचितश्च क्रियते इति । श्रुत्या यः कर्म करोति स आत्मशुद्ध्यर्थं यजन् आत्मयाजीत्यर्थः । नन्वत्र कर्म न भाति अत आह—**अनेनेति** । **प्रकृतं** स यजेतेति वाक्य इत्यर्थः । सर्वनित्यकर्मग्राहिणीं स्मृतिमाह—**स्मृतिश्चेति** । वेदनविविदिषान्वयकलहरहितां व्यक्तपारम्पर्यां श्रुतिमाह—**नित्येति** । **आथर्वणी** च श्रुतिरित्यन्वयः । श्रुतेः कल्पितत्वशङ्का मा भूदिति आथर्वणीत्युक्तम् । एवमन्यत्रापि कल्मषक्षयरूपायाः सत्त्वशुद्धेः नित्यादिजन्यत्वस्य प्रसिद्धत्वाद् विशुद्धसत्त्व इति ब्रुवाणा श्रुतिर्नित्याद्यनुष्ठानेनैव तामाहेति मत्वा नित्यनैमित्तिककर्मानुष्ठानप्रक्षीणकल्मषस्येत्युक्तम् । नैसर्गिककल्मष एव सत्त्वस्याशुद्धिरिति दर्शयितुं विशुद्धसत्त्वस्येत्युक्तम । **अविदुष** इति ज्ञानासमुच्चयाय । **उत्पन्नविविदिषस्येति** पारम्पर्याय । अत्र तत इत्यधिकारात् सत्त्वशुद्ध्या जिज्ञासाश्रवणमननानन्तरं ध्यायमान इति लभ्यते । श्रुतौ पापक्षयस्याकण्ठोक्तत्वात् स्मृतिमाह—**स्मृतिश्चेति** । पापस्य कर्मणः क्षयात् जिज्ञासाद्वारेण ज्ञानमुत्पद्यत इत्यर्थः । यदुक्तं नित्यकाम्यानां सर्वेषां कर्मणां भावनाफले साक्षात्समुच्चयः संयोगपृथक्त्वेनेति तत्रास्तु संयोगपृथक्त्वम् साक्षात्त्वं तु न युक्तमित्याह **क्लृप्तेनेति** । दुरितनिवृत्तेः फलत्वे कथं काम्यवैषम्यमत उक्तं **नित्ये विहितेनेति** । **कल्पनागौरवेति** प्रकृतावुत्पन्नानामतिदेशाद् विकृतिं गतानामङ्गानां क्लृप्तोपकारकल्पन इव स्ववाक्येषूत्पन्नानां ज्ञाने विनियुक्तानां क्लृप्तपापक्षयातिरेकेण काम्यसाधारण भावनाफलोपयोग्युपकारकल्पने गौरवमित्यर्थः । नित्येभ्यः पापक्षयस्य, तस्मात् ज्ञानोदयस्य चान्यतः सिद्धौ किं यज्ञेनेत्यादिनेति चेत्, न,

तथाहि—नित्यकर्मानुष्ठानाद्धर्मोत्पादः, ततः पाप्मा निवर्तते, स ह्यनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्यातिलक्षणेन विपर्यासेन चित्तसत्त्वं मलिनयति, अतः पापनिवृत्तौ प्रत्यक्षोपपत्ति-द्वारापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्य अनित्याशुचिदुःखरूपतामप्रत्यूहमवबुध्यते, ततोऽस्य अस्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते, ततस्तज्जिहासोपावर्तते, ततो हानोपायं पर्येषते, पर्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इत्युपश्रुत्य तज्जिज्ञासते, ततः श्रवणादिक्रमेण तज्जानाती-त्यारादुपकारकत्वं तत्त्वज्ञानोत्पादं प्रति चित्तसत्त्वशुद्धया कर्मणां युक्तम्। इममेवार्थमनुवदति भगवद्गीता—'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते॥' एवं चाननुष्ठितकर्मापि प्राग्भवीयकर्मवशाद्यो विशुद्धसत्त्वः संसारासारतादर्शनेन निष्पन्नवैराग्यः, कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पादोपयोगिना; प्राग्भवीयकर्मानुष्ठानादेव तत्सिद्धेः। इममेव च पुरुषधौरेयभेदमधिकृत्य प्रवर्तते श्रुतिः—'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्' इति। तदिद-

---

शास्त्रान्तरान्नित्यानां ज्ञानविरोधिपापक्षयहेतुत्वस्य विशेषतोऽसिद्धेः ज्ञानोद्देशेन विनियोगे सति तदर्थं नित्यान्यनुतिष्ठतोऽवश्यं ज्ञानं भवति। अन्यथा तु शुद्धिमात्रमिति यज्ञादिश्रुतेः साफल्यम्। काम्यानां तु सर्वापेक्षाधिकरणे यद्यपि संयोगपृथक्त्वं वक्ष्यते तथापि विविदिषाया वेदनस्य वा स्वर्गादिवत् फलत्वात् तस्य व्यवधानेऽप्यविरोधाद् न समुच्चयसिद्धिरिति द्रष्टव्यम्। यद्यपीच्छान्वयोक्त्यैव ज्ञानसमुच्चयः परिहृतः। तथापि क्लृप्तेनैवेत्यादिना दूषणान्तरोक्तिः परम्पराङ्गभावोपपत्तिमाविष्करोति—**तथा हीत्यादिना**। वक्ष्यमाण-प्रत्यक्षोपपत्तिप्रसरस्य पापनिवृत्त्यन्वेषणे हेतुमाह—**स हीति**। **उपपत्तिरनुमानं द्वारं** प्रसरोपायः (चित्तसत्त्वं?) **अपावरणं** तिरोधानभङ्गः। **उपश्रुत्य** अध्ययनकालोपश्रुतमनुस्मृत्य। विचारिताद् वाक्यात् **चित्तसत्त्वं** चित्तगतः सत्त्वगुणः एवं सप्रमाणं पारम्पर्यवर्णनेन समुच्चयमपाकृत्य योगिनः कर्मत्यागवादिनी स्मृतिरप्य-समुच्चयं स्पष्टमाचष्ट इत्याह—**इममिति। भगवद्गीता** चेत्यन्वयः श्रुतिन्यायसिद्धसमुच्चयं, अनुवदतीत्यर्थः। योगं ध्यानं कारणं सत्त्वशुद्धिवैराग्यादिद्वारा, योगारूढस्य मुनेरित्यनुषङ्गः। तस्यैव कर्मण एव शमः उपशमः कारणं ज्ञानस्येत्यर्थः। ननु सत्त्वशुद्धिद्वारा वैराग्यार्थमपि कर्मानुष्ठेयमेव। तच्च ज्ञातमनुष्ठातुं शक्यमिति तदवबोधानन्तर्यं दुर्वारमत आह—**एवं चेति। अननुष्ठितकर्मापि** अस्मिन् जन्मनि। ऐहिकमेव कर्म सत्त्वशुद्ध्यादिहेतुर्नेतरदत आह—**प्राग्भवीयेति**। नियमे प्रमाणाभावादित्यर्थः। अनियमेऽपि प्रमाणाभावमाशङ्क्याह—**इममेवेति। इमं** प्राक्तनकर्मजशुद्ध्यादिपुरुषधौरेयभेदं पुरुषश्रेष्ठ-विशेषम्, **इतरथा** वैराग्यसम्पत्तौ प्रव्रज्या सन्यासः। जन्मान्तरकर्मणा कस्यचिच्छुद्धसत्त्वस्य

विशेषः । न धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः ।

मुक्तम्—कर्मावबोधात्—प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति । अत एव न ब्रह्मचारिण ऋणानि सन्ति; येन तदपाकरणार्थं कर्मानुतिष्ठेत् । एतदनुरोधाच्च ‘जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान्जायते’ इति, गृहस्थः संपद्यमान इति व्याख्येयम्; अन्यथा ‘यदि वेतरथा ब्रह्मचर्यादेव’ इति श्रुतिर्विरुध्येत । गृहस्थस्यापि च ऋणापाकरणं सत्त्वशुद्ध्यर्थमेव । जरामर्यवादो भस्मान्ततावादोऽन्त्येष्टयश्च कर्मजडानविदुषः प्रति, न त्वात्मतत्त्वपण्डितान् । तस्मात्तस्यानन्तर्यमथशब्दार्थः, यद्विना ब्रह्मजिज्ञासा न भवति यस्मिंस्तु सति भवन्ती भवत्येव । न चेत्थं कर्मावबोधः । तस्मान्न कर्मावबोधानन्तर्यमथशब्दार्थ इति सर्वमवदातम् । स्यादेतत् । मा भूदग्निहोत्रयवागूपा-

---

विनापि कर्मज्ञानं ब्रह्मजिज्ञासेति भाष्ये न भातीत्याशङ्क्यापिशब्दाद् भातीत्याह—**तदिदमिति** । विरक्तस्याप्यनधीतवेदान्तस्य तदर्थजिज्ञासानुदयात् उक्तम्—**अधीतवेदान्तस्येति** । ऋणापाकरणायावश्यमिहैव कर्मानुष्ठानमित्युक्तमत आह—**अत एवेति** । “ब्रह्मचर्यादेव प्रव्रजे”दिति शास्त्रात् । एतद्विरोधात् ऋणानीत्यपस्मृतिः, अविरक्तविषया वेत्यर्थः । ननु “जायमान” श्रुत्या सत्त्वमृणानां निश्चितम् अत आह—**एतदनुरोधादिति** । ‘यदि वे’ति श्रुत्यनुरोधादित्यर्थः । गृहस्थस्यापि “ब्रह्मचार्येव पर्वणी”त्यादिषूक्तं ब्रह्मचर्यमस्त्येव । नन्वृणश्रुत्या प्रव्रज्याश्रुतेर्व्याख्यास्त्वत आह—**अन्यथेति** । एवमव्याख्यान इत्यर्थः । योग्यस्यार्थस्याभावादप्रमाणं स्यादित्यर्थः । अस्मिन्नपि व्याख्याने गृहाद्वेति श्रुतिविरोध इत्यन्यस्य शङ्कां परिहरति—**गृहस्थस्यापीति** । अशुद्धसत्त्वगृहस्थविषया श्रुतिरित्यर्थः । तर्ह्यशुद्धसत्त्व-जायमानमात्रविषयास्तु किं गृहस्थविषयत्वेन । मैवम् । अशुद्धसत्त्वस्यापि नैष्ठिकब्रह्मचारिणः प्रजायज्ञयोरभावादिति द्रष्टव्यम् । आजरसः, आमृत्योरादेहभस्मीभावात् कर्मानुष्ठेयम् अन्त्येष्टयश्च कार्या इति । विधीनां तर्ह्यप्रामाण्यमत आह—**जरेति** । अविदुषामपि नास्तिकानामनधिकारात् **कर्मजडानित्युक्तम्** । किमनेन सङ्कोचेन अत आह—**नत्विति** । ननु विदुषोऽधिकार इत्युक्तम् । सत्यम् अविदुष इति, आत्मज्ञानायोग्यानिति विवक्षितत्वाददोष इति मत्वाह—**नत्विति** । उक्तन्यायेन विरक्तविषयत्वानुपपत्तेरित्यर्थः । ननु प्राक्तनकर्मभिः शुद्धसत्त्वस्य कर्मज्ञानतदनुष्ठानानपेक्षास्तु जिज्ञासा । अतद्विधस्य तु कर्मबोधाद्यपेक्षेति तदानन्तर्यमथशब्दार्थः इत्याशङ्क्याह—**तस्मादिति** । अत्रेदृगानन्तर्यमथशब्दार्थः यस्माद् व्यतिरेकराहित्ये कर्मावबोधस्य युक्तिरुक्ता तस्मात् कर्मावबोध इत्थं न भवति यस्मात् तस्मात् कर्मावबोधानन्तर्यमिति योजना । नन्वन्वयादेवानन्तर्यमुच्यताम् । किं व्यतिरेकेण, न, सर्वाधिकारिसाधारणे जिज्ञासासूत्रे, अथशब्दार्थस्य काश्चित्प्रतिवृत्तिरन्यान् प्रत्यवृत्तिरिति वैरूप्यापत्तेरितिमत्वाऽऽह—**सर्वमिति** । पूर्वग्रन्थे क्रमस्य निराकृतत्वात् पुनः

यथा च हृदयाद्यवदानानामानन्तर्यनियमः; क्रमस्य विवक्षितत्वान्न तथेह,

कवदार्थः क्रमः, श्रौतस्तु भविष्यति; 'गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्' इति जाबालश्रुतिर्गार्हस्थ्येन हि यज्ञाद्यनुष्ठानं सूचयति। स्मरन्ति च—'अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥' निन्दन्ति च—'अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान्। अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः' इत्यत आह—यथा च हृदयाद्यवदानानामानन्तर्यनियमः कुतः, 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः' इत्यथाग्रशब्दाभ्यां क्रमस्य विवक्षितत्वात्। न तथेह क्रमो विवक्षितः; श्रुत्या तयैवानियमप्रदर्शनात्, 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति। एतावता हि वैराग्यमुपलक्षयति। अत एव यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति श्रुतिः। निन्दावचनं चाविशुद्धसत्त्वपुरुषाभिप्रायम्। अविशुद्धसत्त्वो हि मोक्षमिच्छन्नालस्यात्तदु-पायेऽप्रवर्तमानो गृहस्थधर्ममपि

क्रमस्याविवक्षोक्तिः अयुक्ता, न, प्रागर्थक्रमस्यैव निराकृतत्वात् श्रौतक्रमशङ्कापरिहारत्वाच्चास्येत्याह—स्यादेतदिति। अर्थक्रमस्य ग्राह्यत्वे हि तन्निषेधेऽभ्यनुज्ञा तदेव कुत इति माशङ्कीत्युदाहरणमग्निहोत्र इति। 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इत्यत्र पाठक्रमादग्निहोत्रद्रव्यान्तरसाध्यत्वं यवागुपाकस्यादृष्टार्थत्वमाशङ्क्य दृष्टे सम्भवत्यदृष्टकल्पनायोगाद् यवाग्वा होमसाधनतोपपत्तेस्तत्प्राथम्यं चिन्तितं पञ्चमे। श्रौतक्रमोदाहरणं भाष्ये व्यक्तत्वात् अनुक्तम्। नन्वत्र कर्म न प्रतीयते अत आह—गार्हस्थ्येनेति। यज्ञादिसूचने ज्ञापकमाह—स्मरति चेति। ज्ञापकान्तरमाह—निन्दन्ति चेति। विवक्षितत्वादित्यानन्तर्यावधिशङ्कां नुदन् हेतुत्वेनावतारयति—कुत इति। ननु तद्विवक्षया कथमानन्तर्यनियमः अत आह—हृदयस्येति। तत्किमथाग्रशब्दराहित्यादविवक्षितत्वम्, न, श्रुतिविवक्षामात्रराहित्यस्यैवात्रोच्यमानत्वादित्याह—श्रुत्येति। ननु क्वाश्रुतिरुक्ता, अत आह—तयैवेति। सैवानियमं प्रतिपादयतीति व्याहतम्। सत्यं, तयेति तत्रत्या जाबालश्रुतिरुच्यत इत्यदोष इत्याह—यदि वेति। ननु परस्परविरोधाद् द्वयोर्वाक्ययोरप्रामाण्यम्, न, वैराग्योपलक्षकत्वात् द्वयोरित्याह—एतावतेति। क्रमाक्रमकथनेनेत्यर्थः। यदा न मध्ये वैराग्यं, भवति चान्ते। तदा क्रमेणैव प्रव्रज्या यदा मध्ये, तदा तदैवेति विवक्षितत्वान्न विरोधो वाक्ययोरित्यर्थः। न चानियमवाक्ये वनाद्वेति वृथा, वनीभूत्वेति गतत्वादिति वाच्यम्। "ब्रह्मचर्यं समाप्येति प्रक्रमेण वनीभूत्वेति वानप्रस्थ्यं समाप्येत्यर्थत्वात् वैराग्यमेवोपलक्ष्यत इति कुतो ज्ञायते, श्रुत्यन्तरादित्याह—अत एवेति। तत्किं निन्दावचनं प्रमाणं नेत्याह—निन्देति। यथा कथंचित्, मोक्षं चेदिच्छेत् श्रवणाद्यनुतिष्ठेत् तत्फलं च प्राप्नुयात्। कथं तद्विषयत्वमधःपातोक्तेरित्यत आह—अविशुद्धेति। अनाचरन् मुमुक्षुत्वाभिमानात्। तयैवानियमप्रतिपाद-

नित्यनैमित्तिकमनाचरन्प्रतिक्षणमुपचीयमानपाप्माधोगतिं गच्छतीत्यर्थः । **स्यादेतत्—मा भूच्छ्रौत आर्थो वा क्रमः, पाठस्थानमुख्यप्रवृत्तिप्रमाणकस्तु कस्मान्न भवतीत्यत आह - शेषशेषित्वे प्रमाणाभावात् । शेषाणां समिदादीनां, शेषिणां चाग्नेयादीनां एकफलवदुपकारोपनिबद्धानां एकफलावच्छिन्नानां एकप्रयोगवचनोपगृहीतानां एकाधिकारि-कर्तृकाणां एकपौर्णमास्यमावस्याकालसंबद्धानां युगपदनुष्ठानाशक्तेः, सामर्थ्यात्क्रमप्राप्तौ,**

नादितिहेतुर्यदि विवक्षितस्तर्हि शेषशेषित्वे प्रमाणाभावादितिहेतुना किम् । न चाभ्युच्चयः, अशेषशेषिणोरपि दर्शपूर्णमास-सोमयोः क्रमदर्शनादित्याशङ्क्य शङ्कोत्तरत्वमाह—**स्यादेतदिति** । 'समिधो यजती'त्यादिषु वाक्यानां स्वार्थमात्रोपलक्षणत्वात् क्रमावबोधकत्वेनानियमप्राप्तौ वाक्यानां क्रमाम्नातानां तथैवार्थस्मारकत्वात् स्मृतीनां चानुष्ठानोपयोगात् पाठक्रमेणैवानुष्ठानमिति राद्धान्तितम् । ज्योतिष्टोमविकृतौ साद्यस्केऽतिदेशप्राप्तानां, अग्निषोमीयसवनीयानबन्ध्यानां "सह पशूनालभते" इति सवनीयस्थाने सहत्वविधानात् । प्राकृतक्रमनि-वृत्तावत्यन्तसाहित्ये चानुपपन्ने कःक्रम इति चिन्तायां नियामक श्रुत्याद्यभावादनियमे प्राप्ते सवनीयस्य विकृतावपि स्वस्थानाचलनात् प्राबल्येन प्राथम्यम् इतरयोस्तु तदानन्तर्यमिति वर्णितम् 'सारस्वतौ भवतः' इति सरस्वत्सरस्वतीदेवते कर्मद्वये याज्यानुवाक्याक्रमावगतक्रमे हविर्निर्वापाद्यङ्गानामनियमनियमसंशये याज्यानु-वाक्याक्रमस्य प्रधानमात्रोपक्षयादङ्गेषु नियामकाभावात्, अनियमे प्राप्ते प्रधानार्थत्वादङ्गानां तत्क्रमेण क्रम इति स्थापितम् । वाजपेये 'सप्तदश प्राजापत्यान् पशूनालभते' इति सप्तदशानां यागानां 'सहचरन्ती'ति साहित्यविधानैकोपक्रमोपसंहारताप्राप्तौ अनेकस्याङ्गस्य सर्वेष्वनुष्ठेयतायां प्रथमाङ्गे पशुक्रमनियामकाभावादिच्छ-यानुष्ठानम्, द्वितीयाङ्गेषु तु किं स एव क्रमः अथानियम इति संशये, प्रथमप्रवृत्तेः पौरुषेय्या वैदिकनियामकत्वाभावाच्छ्रुत्याद्यभावात् प्रथममाश्रितेच्छयैव प्रयोगप्राप्तौ प्रयोगविधेरङ्गानामवर्जनीयातिरिक्तव्य-वधानासहत्वात् पूर्वक्रमे च द्वितीयाद्यङ्गानां षोडशभिरेव प्रधानव्यवधानानियमे ततोऽधिकव्यवधानस्यापि प्राप्तेस्तत्परिहाराय पूर्वप्रवृत्त्यैव क्रम इति सिद्धान्तितं पञ्चमे ॥ पाठादिशङ्कायां किमत्र प्रापकमित्याशङ्क्य अन्यत्र दर्शनमात्रं न तु विशेषतस्तदस्तीति सूचयति—**कस्मान्न भवतीति** । वाकाराद् वाक्यद्वयमिदम्, अतः प्रमाणाभावादित्याकृष्य योजयति **प्रमाणेति** । क्रमे प्रमाणेषु शङ्कितेषु शेषशेषित्वे प्रमाणाभावादिति व्यधिकरणमित्याशङ्क्य पाठादयो न क्रमस्य प्रापकाः । किन्तु प्राप्तस्य विशेषनियामकाः । न चेह प्राप्तिः शेषशेषिभावस्य क्रमप्रापकस्याभावादिति विवक्षितत्वाददोष इत्याह—**शेषाणामित्यादिना** । क्रमप्राप्तौ कारणमाह—**सामर्थ्यादिति** । अन्यथानुपपत्तेरित्यर्थः । तामाह—**युगपदिति** । युगपदनुष्ठानप्राप्तौ तदशक्त्या क्रमःस्यात् सैव कुतोऽत आह—**एकपौर्णमासीति** । षट्सु त्रयः पौर्णमास्या त्रयोऽमावास्यया

क्रमो विवक्षितः शेषशेषित्वेऽधिकृताधिकारे वा प्रमाणाभावात्, धर्म-

तद्विशेषापेक्षायां पाठादयस्तद्भेदनियमाय प्रभवन्ति। यत्र तु न शेषशेषिभावः, नाप्येकाधिकारावच्छेदः, यथा सौर्यार्यमणप्राजापत्यादीनां; तत्र क्रमभेदापेक्षाभावान्न पाठादिः क्रमविशेषनियमे प्रमाणम्, अवर्जनीयतया तस्य तत्रागतत्वात्। न चेह धर्मब्रह्मजिज्ञासयोः शेषशेषिभावे श्रुत्यादीनामन्यतमं प्रमाणमस्तीति। ननु शेषशेषिभावाभावेऽपि क्रमनियमो **दृष्टः, यथा गोदोहनस्य पुरुषार्थस्य दर्शपौर्णमासिकैरङ्गैः सह, यथा वा 'दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति दर्शपौर्णमाससोमयोरशेषशेषिणोरित्यत आह—अधिकृताधिकारे वा प्रमाणाभावात्। इति योजना। स्वर्गकामस्य हि दर्शपौर्णमासाधिकृतस्य पशुकामस्य सतो दर्शपौर्ण-**

सम्बद्धाः अङ्गानि तु द्वाभ्याम्- एतच्च कर्मान्तरस्याभिन्नकालस्योपलक्षणम्। कालैक्येऽपि कर्तृभेदे क्रमाभावादाह—**एकाधिकारीति**। स्वामित्वेनाधिकारी भूत्वा। प्रयोक्तृत्वेन कर्ता भवति। अधिकार्यैक्ये हेतुः **एकप्रयोगेति**। अनुष्ठापकत्वावस्थो विधिः प्रयोगवचनः शेषिणामेकप्रयोगवचनग्रहे हेतुः **एकफलेति**। शेषाणां तादृक्त्वे हेतुः—**एकफलवदिति**। एकश्चासौ फलवतो दर्शादेः प्रधानस्योपकारकश्च। तेनोपनिबद्धानाम् आग्नेयादीनामित्यादिशब्देन अग्निषोमीयादीनां पञ्चानां शेष्यन्तराणां सङ्ग्रहः एवं समिधादीत्यादिशब्दार्थो ग्राह्यः। अन्वयमुक्त्वा व्यतिरेकमाह—**यत्रत्विति**। न **शेषशेषिभावः** अत एवैकाधिकारावच्छेदोऽपि नेत्यर्थः। एतच्चैककर्तृत्वाभावाद्युपलक्षणम्। "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः" "आर्यमणं चरुं निर्वपेत् स्वर्गकामः" "प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्कामः" इति क्रमपरिपठितेषु सौर्यादिषु प्रयाजादिवत् पाठात् क्रमानुष्ठानप्राप्तौ तद्भेदकप्रयोगवचनग्रहाभावात् क्रमानाकाङ्क्षायां न पाठो नियामक इति स्थापितमेकादशे*। क्रमभेदापेक्षाभावात् क्रममात्रस्याप्राप्तत्वादित्यर्थः। किमर्थस्तर्हि सौर्यादिषु पाठक्रमः युगपदुच्चारणाशक्तेरध्ययनार्थं इत्याह—**अवर्जनीयतया**। पूर्वहेतुनैव परिहृते अधिकृताधिकार इति वृथा। न, शङ्कान्तरोत्तरत्वादित्याह—**नन्विति**। गोदोहनस्य शेषशेषिभावाभावे हेतुः—**पुरुषार्थस्येति**। अङ्गैः सह क्रमो दृष्ट इत्यन्वयः। अशेषशेषिभावस्थलेऽङ्गापेक्षं क्रममुक्त्वा तादृशि स्थले प्रधानक्रममुदाहरति—**यथा चेति** विकल्पस्यानपेक्षितत्वात् भाष्यस्थो वाकारश्चार्थं इत्याह—**अधिकृताधिकारे चेति**। प्रमाणाभावादिति

* "एकादश" इति कल्पतरुमनुसृत्याभिहितं तिलके। अत्र श्रीमदप्पयदीक्षितैः परिमले यदुक्तं तदवधानमर्हति। "'एकादश इति प्रामादिकः पाठः। अङ्गवत्क्रतूनाम् (जै-अ-५-पा-३-सूत्र-३२-अधि-११) इत्यधिकरणं हि पाञ्चमिकम् अथवा—पञ्चमतृतीयपादगतमेकादशमिदमधिकरणमित्यभिप्रायमेकादश इत्येतद्योज्यम्' (ब्र. सू. १-१-१-) (निर्णयसागरमुद्रितपुस्तके ६७ पुटे)

ब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च । अभ्युदयफलं धर्मज्ञानं, तच्चानुष्ठाना-

---

मात्रक्रत्वर्थाप्प्रणयनाश्रिते गोदोहनेऽधिकारः । नो खलु गोदोहनद्रव्यमव्याप्रियमाणं साक्षात्पशून् भावयितुमर्हति । न च व्यापारान्तराविष्टं श्रूयते, यतस्तदङ्गक्रममतिपतेत् , अप्प्रणयनाश्रितं तु प्रतीयते; चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य' इति समभिव्याहारात् , योग्यत्वाच्चास्यापां प्रणयनं प्रति । तस्मात्क्रत्वर्थाप्प्रणयना-श्रितत्वाद्गोदोहनस्य, तत्क्रमेण पुरुषार्थमपि गोदोहनं क्रमवदिति सिद्धम् । श्रुतिनिराकरणेनैव इष्टिसोमक्रमवदपि क्रमोऽप्यपास्तो वेदितव्यः । शेषशेषित्वाधिकृताधिकाराभावेऽपि क्रमो विवक्ष्येत, यद्येकफलावच्छेदो भवेत् । यथाग्नेयादीनां, षण्णामेकस्वर्गफलावच्छिन्नानां, यदि वा जिज्ञास्यब्रह्मणोंऽशो धर्मः स्यात् , यथा चतुर्लक्षणी-व्युत्पाद्यं ब्रह्म केनचित्केनचिदंशेनैकेन लक्षणेन व्युत्पाद्यते, तत्र चतुर्णां लक्षणानां जिज्ञास्याभेदेन परस्परसंबन्धे सति क्रमो विवक्षितः, तथेहाप्येकजिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्ष्येत, न चैतदुभयमप्यस्तीत्याह—फलजिज्ञास्यभेदाच्च । फलभेदं विभजते—अभ्युदयफलं धर्मज्ञान-

---

पूर्वेण योजितत्वात्साकाङ्क्षत्वं परिहरति—**प्रमाणाभावादिति योजना** । पुनरपीति शेषः । सोदाहरणं क्रमे शङ्किते तत्रैव प्रमाणाभावो वाच्यः । अधिकृताधिकारे प्रमाणाभावादित्यसङ्गतम् । न, उदाहरणे क्रमप्रापकस्याधिकृताधिकारस्य प्रकृते अभावादित्यभिप्रेतत्वादित्याह—**स्वर्गकामस्येति** । अधिकृतस्यैवाधि-कारहेतुः **क्रत्वर्थाप्प्रणयनेति** । अधिकाराद्[1] गोदोहनं क्रमवदित्युपसंहारस्थमेवानेयम् । अप्प्रणयनाश्रितत्वं कथं, येन क्रत्वङ्गक्रममनुसरेत् अत आह—**गोदोहनमिति** । द्रव्यान्तराव्यवधानात् साक्षादेव भावकत्वमा-शङ्क्य व्यापाराव्यवधानं साक्षात्त्वमित्याह—**अव्याप्रियमाणमिति** । व्यापारतौल्यमाशङ्क्याह—**द्रव्यमिति** । क्रियैकसाध्यत्वात्फलस्येत्यर्थः । व्यापारान्तरेण क्रमोल्लङ्घनमाशङ्क्याह—**न चेति** । **व्यापाराविष्टं** व्यापारान्तराविष्टम् । प्रणयनाविष्टमपि न श्रूयते । सत्यम् । प्रणयेदिति सन्निहितमनुषङ्गात् सम्बध्यते साकाङ्क्षत्वादित्याह—**प्रणयनेति** । आकाङ्क्षासन्निधिमात्राद् न सम्बन्ध इत्यत आह—**योग्यत्वाच्चेति** । न च प्रणयेदित्यनुषज्य स्वतन्त्रप्रणयनविशिष्टविधिः फलायेति वाच्यम् । सन्निहितलाभे विशिष्टविधिगौरवा-योगादिति मत्वा आह—**तस्मादिति** । द्वितीयोदाहरणं विघटयति—**श्रुतीति** । जाबालश्रुतिनिराकरणेन, फलजिज्ञास्यभेदाच्चेत्ययुक्तम्, भिन्नफलस्य गोदोहनस्य क्रमदर्शनाद्, जिज्ञास्याभेदस्य क्रमविरोधित्वेन तद्भेदस्य तदनुकूलाच्चेत्याशङ्क्य शेषशेषित्वाधिकृताधिकाराभावेऽपि फलैक्यप्रयुक्ताया एकजिज्ञास्यांशभेदगो-चरत्वप्रयुक्तायाश्च क्रमशङ्कायाः परिहारत्वान्नायुक्तमित्याह—**शेषशेषित्वेति** । अभ्युदयफलमित्यादि फलप्रति-

---

[1] 'न्' क-पाठः

पेक्षम् । निःश्रेयसफलं तु ब्रह्मविज्ञानं न चानुष्ठानान्तरापेक्षम् । भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात् । इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम् । चोदनाप्रवृत्तिभेदाच्च ।

मिति । जिज्ञासाया वस्तुतो ज्ञानतन्त्रत्वात् ज्ञानफलं जिज्ञासाफलमिति भावः । न केवलं स्वरूपतः फलभेदः, तदुत्पादनप्रकारभेदादपि तद्भेद इत्याह—तच्चानुष्ठानापेक्षम् । ब्रह्मज्ञानं च नानुष्ठानान्तरापेक्षम् । *अत एव शाब्दज्ञानाभ्यासान्नानुष्ठानान्तरमपेक्षते, नित्यनैमित्तिककर्मानुष्ठानसहभावस्यापास्तत्वादिति भावः । जिज्ञास्यभेदमात्यन्तिकमाह—भव्यश्च धर्म इति । भविता भव्यः, कर्तरि कृत्यः । भविता च भावकव्यापारनिर्वर्त्यतया तत्तन्त्र इति ततः प्राग्ज्ञानकाले नास्तीत्यर्थः । भूतं सत्यम् । सदेकान्ततः न कदाचिदसदित्यर्थः । न केवलं स्वरूपतो जिज्ञास्ययोर्भेदः, ज्ञापकप्रमाणप्रवृत्तिभेदादपि भेद इत्याह—चोदनाप्रवृत्तिभेदाच्च । चोदनेति वैदिकं शब्दमाह; विशेषेण सामान्यस्य लक्षणात् । प्रवृत्तिभेदं विभजते—या हि, चोदना

पादनप्रतिज्ञानमिव तच्च हेत्वनुक्तेरयुक्तमित्याशङ्क्य भेदाविवरणार्थं सिद्धानुवादोऽयं, न प्रतिपादनमित्याह—**फलेति** । जिज्ञासयोः फलभेदमप्रतिज्ञाय ज्ञानफलोक्तिरयुक्ता, अत आह—**जिज्ञासाया इति** । तच्चानुष्ठानापेक्षमिति फलभेदविवरणानुपयुक्तं ज्ञानयोर्वैषम्याभिधानादित्याशङ्क्याह—**न केवलमिति** । अनुष्ठानापेक्षत्वाद् वैषम्यस्य नानुष्ठानापेक्षमित्येतावतैव सिद्धेरन्तरपदाधिक्यमाशङ्क्य निदिध्यासनानुष्ठानस्यापि व्यावृत्तिरिति भ्रमशान्त्यर्थमाह—**अत एवेति** । नन्वभ्याससमुच्चितं कर्माप्यपेक्षते अत आह—**नित्येति** । जिज्ञास्यभेदो न वक्तव्यः धर्मब्रह्मरूपेण स्फुटत्वात् अत आह—**जिज्ञास्येति** । "तयोरेव कृत्यक्तखलर्थाः" इति कृत्यानां भावकर्मणोः स्मरणाद् भवतेरकर्मकत्वाद् भावे च नपुंसकत्वापातात् भव्य इत्ययुक्तमाशङ्क्याह—**भवितेति** । तर्हि "तयोरेवे"ति सूत्रविरोधः अत आह—**कर्तरीति** । 'भव्य-गेये'-त्यादिसूत्रेण कृत्प्रत्ययान्तभव्यादिशब्दानां कर्तरि निपातनाददोष इत्यर्थः । पुरुषव्यापारतन्त्रत्वात् ज्ञानकाले नास्तीत्युक्तं हेतोरसिद्धेः । ज्ञातस्य धर्मस्य ज्ञानकाले सत्त्वाच्चेत्याशङ्क्याह—**भविता चेति** । ततः भावकव्यापारात् भवितृप्रतियोगिकत्वाद् भूतमतीतमिति शङ्कां शमयति—**सत्यमिति** । ननु धर्मोऽपि सन्, अत आह—**सदिति** । धर्मोऽपि तादृगेव । नहि कदाचिदसौ शून्यः अत आह—**न कदाचिदिति** । अशून्यत्वेऽपि कदाचिदसन्नसावित्यर्थः । फलजिज्ञास्यभेदप्रस्तावे चोदनाप्रवृत्तिभेदकथा वृथा अत आह—**न केवलमिति** । ब्रह्मणि चोदना नास्ति अत आह—**चोदनेति** । चोदनाशब्दो विधौ प्रसिद्धः अत आह—**विशेषणेति** । प्रवृत्तिभेदं प्रतिज्ञाय चोदनाभेदोक्तिरयुक्ता, न, चोदनस्यैव प्रवृत्तिनिमित्तत्वेन

---

* निर्णयसागरमुद्रितायां भामत्यां 'अत एवे'ति न दृश्यते ।

या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति । ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं, अवबोधस्य चोदनाऽजन्यत्वान्न

धर्मस्येति । आज्ञादीनां पुरुषाभिप्रायभेदानामसंभवात् अपौरुषेये वेदे चोदनोपदेशः । अत एवोक्तम्—'तस्य ज्ञानमुपदेशः' इति । *स च स्वसाध्ये पुरुषव्यापारे भावनायां, तद्विषये च यागादौ । स हि भावनाविषयः, तदधीननिरूपणत्वात् प्रयत्नस्य भावनायाः । 'षिञ् बन्धने' इत्यस्य धातोर्विषयपदव्युत्पत्तेः । भावनायास्तद्द्वारेण च यागादेरपेक्षितोपायतामवगमयन्ती तत्रेच्छोपहारमुखेन पुरुषं नियुञ्जानैव यागादिधर्ममवबोधयति नान्यथा, ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं, नतु प्रवर्तयन्त्यवबोधयति; कुतः ? अवबोधस्य प्रवृत्तिरहितस्य चोदनाजन्यत्वात् ।

विवक्षितत्वादित्याह—**प्रवृत्तीति** । नन्वाज्ञाभ्यर्थनानुज्ञाश्चोदनाः प्रसिद्धाः लोके, कथं वेदे चोदना सत्यम् । अस्मादेव दोषात् चोदनाशब्दोऽन्यार्थ इत्याह—**आज्ञादीनामिति** । आज्ञाद्यतिरेकेणोपदेशोऽप्रवृत्त-नियोज्यफलोपायबोधकः प्रसिद्धोऽनेन पथा याहीति गोपालवाक्यादौ, तत्र नियोक्तुर्निकृष्टत्वान्नाज्ञा । फलाभावान्नाभ्यर्थना, उपदेशस्य प्रवृत्तत्वान्नानुज्ञेति, स चाविरुद्धो वेद इत्यर्थः । उपदेशत्वं न स्वकपोलकल्पितमित्याह—**अत एवेति** । उक्तं जैमिनिना **तस्य** धर्मस्य, **ज्ञानं** ज्ञायतेऽनेनेति व्युत्पत्त्या प्रमाण**मुपदेशो** विधिरिति । स्वविषय इति कर्मधारयशङ्कां नुदन्नाह—**स चेति** । सः, उपदेशः, **स्वसाध्ये** स्वप्रतिपाद्ये । भावनायां भावनारूपे पुरुषव्यापारे चेति योजना । किं भावनायामेव नियुङ्क्त, कथं तर्हि कर्मानुष्ठानमित्याशङ्क्य स्वविषयविषयस्यापि स्वविषयपदेन सङ्ग्रहात् तत्सिद्धिरित्याह—**तद्विषये चेति** । विषयविषयितापि कथमत आह—**स हीति** । शब्दभावनाव्यवच्छेदाय **प्रयत्नस्येति** । तदधीननिरूपणत्वं च यागे प्रयत्न इति, निरूपकस्तर्हि विषयी न विषय इति अत आह—**षिञिति** । नियुञ्जानैवेत्ययुक्तं, प्रमाणस्य वायुवदप्रेरकत्वादत आह—**भावनाया इति** । **इच्छोपहारेति** वायुवैषम्योक्तिः । इच्छोदयहेतुरपेक्षितेति पुरुषस्यैवावबोधकर्मत्वशङ्कां नुदति—**यागादीति** । भाष्यस्थैवकारार्थमाह—**नान्यथेति** । **ब्रह्मचोदनात्विति** भाष्योपादानम् अवबोधयत्येवेत्यलम्, केवलमित्यधिकम्, न, अयोगव्यवच्छेद-शङ्कामपास्यान्ययोगव्यवच्छेदार्थत्वादित्याह—**नत्विति** । सर्वत्र हेतोर्विशिष्टैकधर्मत्वाद् अवबोधस्येति व्यस्तषष्ठ्यर्थस्य हेत्वप्रवेशशङ्कां वारयन्नवतारयति—**कुत इति** । एषैवेदृशे स्थले रीतिः । [1]चोदनयाऽवबोधस्य जन्यत्वं न प्रवृत्त्यभावे हेतुः । धर्मचोदनायां भङ्गात् अत आह—**प्रवृत्तिरहितस्येति** । प्रवृत्त्य[2]हेतुसिद्धवस्त्ववबोधस्य ब्रह्मचोदनाजन्यत्वादिति भाष्यार्थ इत्यर्थः । न पुरुषोऽवबोधे नियुज्यत इति धर्मचोदनाया वैषम्योक्तौ असङ्गतम् । तस्या अप्यवबोधे अनियोजकत्वादित्याशङ्क्य शङ्कोत्तरत्वमाह—

1 ''चोदनाया अव'' ख पाठः   2 "त्ति" ख पाठः

* सा चेति कल्पत - भामती - विवरणाद्या इतः पाठः

पुरुषोऽवबोधे नियुज्यते । यथाक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत् । तस्मात्कि-

---

ननु 'आत्मा ज्ञातव्यः' इत्येतद्विधिपरैर्वेदान्तैः **तदेकवाक्यतयावबोधे प्रवर्तयद्भिरेव पुरुषो** ब्रह्मावबोध्यत इति समानत्वं धर्मचोदनाभिर्ब्रह्मचोदनानामित्यत आह—**न पुरुषोऽवबोधे नियुज्यते** । **अयमभिसंधिः**—**न तावद्**ब्रह्मसाक्षात्कारे पुरुषो नियोक्तव्यः; तस्य ब्रह्मस्वाभाव्येन नित्यत्वात्, अकार्यत्वात् । नाप्युपासनायां; तस्या अपि ज्ञानप्रकर्षे हेतुभावस्यान्वयव्यतिरेकसिद्धतया प्राप्तत्वेनाविधेयत्वात् । नापि शाब्दबोधे तस्याप्यधीतवेदस्य पुरुषस्य विदितपदतदर्थस्य समधिगतशाब्दन्यायतत्त्वस्याप्रत्यूहमुत्पत्तेः । **अत्रैव** दृष्टान्तमाह—**यथाक्षार्थे**ति । **दार्ष्टान्तिके योजयति**—**तद्वदि**ति । **अपि** चात्मज्ञानविधिपरेषु वेदान्तेषु नात्मतत्त्वविनिश्चयः शाब्दः स्यात् । **न हि** तदात्मतत्त्वपरास्ते, **किंतु** तज्ज्ञानविधिपराः, **यत्पराश्च ते स एव तेषामर्थाः** । **नच** बोधस्य **बोध्यनिष्ठत्वाद**पेक्षितत्वात्, अन्यपरेभ्योऽपि बोध्यतत्त्वविनिश्चयः; समारोपेणापि **तदुपपत्तेः** । तस्मान्न बोधविधिपरा वेदान्ता इति सिद्धम् । प्रकृतमुपसंहरति—

नन्विति । ननु सिद्धोपदेशा वेदान्ताः कथं प्रवर्तकाः अत आह—**तदेकवाक्यतये**ति । विध्येकवाक्यतयेत्यर्थः । ननु विधिरेव नास्ति केनैकवाक्यता अत आह—**आत्मे**ति । प्रतिज्ञाय हेत्वनुक्तिरयुक्ता, न, अवबोधपदेन हेतोरभिप्रेतत्वात् इत्याह—**अयमि**ति । साक्षात्कारभावनाशब्दज्ञानविकल्पनेन विधिं दूषयति **न तावदित्यादिना** । यथेत्यत्नोत्पाद्यदृष्टान्तः अनुत्पाद्ये साक्षात्कारे यत्नोत्पाद्यभावनायां च न युज्यते अत आह—**अत्रैवे**ति । शाब्दज्ञान एवेत्यर्थः । यद्वा, अत्र दृष्टान्तमेवाहेत्यन्वयः । विध्यनपेक्षसद्भावे विधिर्नेत्यभिप्रेतत्वान्नायं क्वाप्यदृष्टान्त इत्यर्थः । यथेत्येव साम्यसिद्धौ तद्वदिति पुनरुक्तम् अत आह—**दार्ष्टान्तिके**ति । **योजयति** । वैषम्यलवोऽपि नास्तीति ज्ञापयितुमित्यर्थः । ननु वृत्तिसाक्षात्कारो विधेयोऽस्तु तस्योत्पाद्यत्वात्, श्रवणमननयोर्वा विधौ न कश्चिद्दोषः । न, साक्षात्कारस्य, अविद्याध्वंसे, श्रवणादेः स्वज्ञानप्रकर्षे हेतुत्वस्यान्वयव्यतिरेकसिद्धेरिति परिहारसम्भवेऽपि परिहारान्तरमाह—**अपि चे**ति । कथं न शाब्दः शब्दादेवावगतेरत आह—**न ही**ति । अतत्परत्वं कुतः, तात्पर्यभेदे वाक्यभेदादित्याह—**किन्त्विति** । माभूत् तात्पर्यमत आह—**यत्परा इ**ति । अर्थाः प्रमेयाः तत्रैव ते प्रमाणमित्यर्थः । विशिष्टविधावतात्पर्यविषयस्य विशेषणस्येव सविषयप्रतिपत्तिविधौ सामर्थ्याद् ब्रह्मणःसिद्धिमाशङ्क्याह—**न चे**ति । **बोध्यनिष्ठत्वात्** बोध्यविषयत्वात् । इदं च तदपेक्षितत्वे हेतुः । **तदुपपत्तेः** सविषयज्ञानोपपत्तेः । विशिष्टक्रियाविधिर्विशेषण-

मपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति । उच्यते-नित्यानित्य-

---

तस्मात्किमपि वक्तव्यमिति । यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सति तु भवन्ती भवत्येवेत्यर्थः । तदाह-उच्यते—नित्यानित्यवस्तुविवेक इत्यादि । नित्यः प्रत्यगात्मा, अनित्या देहेन्द्रियविषयादयः । तद्विषयश्चेद्विवेको निश्चयः, कृतमस्य ब्रह्मजिज्ञासया; ज्ञातत्वाद्ब्रह्मणः । अथ विवेको ज्ञानमात्रं, न निश्चयः; तथा सत्येष विपर्यासादन्यः संशयः स्यात्, तथाच न वैराग्यं भावयेत्; अभावयन्कथं ब्रह्मजिज्ञासाहेतुः, तस्मादेवं व्याख्येयम् । नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु तद्धर्मः, नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेकः । एतदुक्तं भवति—मा भूदिदं तद्दतं नित्यं, इदं तदनृतमनित्यमिति धर्मिविशेषयोर्विवेकः, धर्मिमात्रयोर्नित्यानित्ययोस्तद्धर्मयोश्च विवेकं निश्चिनोत्येव । नित्यत्वं सत्यत्वं तद्यस्यास्ति

समारोपे दुर्घटः । प्रतिपत्तिविधिस्तु 'वाचं धेनुमुपासीते'ति विधिवदारोपेऽपि घटत इत्यर्थः । अपेक्षितविषयस्य प्रतीतस्याबाधादेवताधिकरणन्यायेन सिद्धिमाशङ्क्य अतत्परत्वे वेदान्तानामहंधीबाधो दुर्वार इति मत्वोपसंहरति—तस्मादिति । कर्मावबोधानन्तर्यं दूषयित्वा तस्मान्नकर्मावबोधानन्तर्यमिति वक्तव्ये किमन्यदुच्यत इत्याशङ्क्य आनन्तर्यान्तरदूषणेन प्रतिपादितस्य "एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्त" मिति भाष्ये प्रतिज्ञातस्योपसंहारान्नासङ्गतिरित्याह—प्रकृतमिति । तत्रोक्तस्य नियमेनेत्यस्य अभावादप्रत्यभिज्ञानमाशङ्क्याह—यस्मिन्निति । उच्यत इत्यारम्भात्पूर्वस्य पूर्वपक्षत्वशङ्कां नुदति—तदाहेति । प्रतिपाद्यत्वोपसंहृतस्य निष्कृष्य निर्देशोपक्रमे स्यादुक्तं न भवतीति सूचनायोच्यत इत्युक्तिरित्यर्थः । नित्यानित्यवस्तुविवेकस्य जिज्ञासाहेतुषु पाठायोगं वक्तुमाक्षेप्ता नित्यशब्दार्थमाह—नित्य इति । तद्विवेको विभिन्नासाधारणाकारस्य प्रमा । ज्ञानमात्रं वा आद्यं दूषयति—तद्विषयश्चेदिति । प्रथमपक्षदूषणाप्राप्तिं दर्शयति—न निश्चय इति । ननु अप्रमात्वे कथं संशयत्वम् विपर्ययस्य कोटयन्तरत्वादत आह—विपर्ययादिति आत्मानात्मनोरत्यन्तविविक्तयोः विविक्ताकारबोधस्य भ्रमत्वप्राप्त्यभावादित्यर्थः । भावयेत् जनयेत् । दूषणमङ्गीकृत्य परिहरति—तस्मादिति । एवं वक्ष्यमाणरीत्या । तद्धर्माः तद्धर्मजातम् । नित्यत्वानित्यत्वास्थागोचरत्वतदभावरूपम् नित्यत्वादिविवेकेऽपि धर्म्यविवेके क्व स्याद्वैराग्यमत आह— नित्यानित्ययोर्धर्मिणोरिति । नित्यानित्ये च वस्तु च तेषां विवेक इति विग्रहः । पूर्वग्रन्थेऽपि वसतीति व्युत्पत्त्या वस्तुशब्दमेव धर्मवाचकं व्युदपीपदत् । वासश्चानाश्रयोऽनुपपन्न इत्याश्रयमात्रकथनं नित्यानित्ययोरिति । नित्यानित्ययोर्वास एव वस्तुशब्दप्रवृत्तिनिमित्तमिति भ्रमशान्त्यै पुनः नित्यानित्येति । वस्तुपदेन

तन्नित्यं सत्यं, तथा चास्थागोचरः। अनित्यत्वमसत्यत्वं तद्यस्यास्ति तदनित्यमनृतं, तथा चानास्थागोचरः। तदेतेष्वनुभूयमानेषु युष्मदस्मत्प्रत्ययगोचरेषु विषयविषयिषु यदृतं नित्यं सुखं व्यवस्थास्यते तदास्थागोचरो भविष्यति, यत्त्वनित्यमनृतं भविष्यति तापत्रयपरीतं तत्त्यक्ष्यत इति। सोऽयं नित्यानित्यवस्तुविवेकः प्राग्भवीयादैहिकाद्वा कर्मणो विशुद्धसत्त्वस्य भवत्यनुभवोपपत्तिभ्याम्। न खलु सत्यं नाम न किंचिदस्तीति वाच्यम्; तदभावे तदधिष्ठानस्यानृतस्याप्यनुपपत्तेः, शून्यवादिनामपि शून्यताया एव सत्यत्वात्। अथास्य पुरुषधौरे-

---

समासः नित्यानित्ययोर्वसन् तयोर्वस्तु भवति। एवमन्यत्रापि वसतस्तत्र वस्तुतेति विवक्षितमित्यर्थः। ननु धर्मिणोरविवेके जिज्ञासानुपपत्तिरुक्ता अत आह—**एतदिति**। ऋतमनृतमिति नित्यानित्यपदव्याख्या। **धर्मिमात्रयोः** आत्मानात्मेत्यनिष्कृष्टाकारयोः तद्धर्मयोः वर्गभेदाद्द्विवचनम्। आत्मानात्मसमुदाये नित्यानित्यत्वे स्तः तयोश्च पृथग् धर्मिभ्यां भवितव्यमित्येतावन्मात्रं निश्चिनोतीत्यर्थः न तु नित्यत्वयोगि नित्यत्वं अनित्यत्वयोगि, अनित्यत्वम् एवं स्थिते ऋतमनृतमिति कथमुक्तमिति, नित्यत्वानित्यत्वयोः सत्यत्वानृतत्वरूपत्वादित्याह—**नित्यत्वमिति**। पुनः सत्यमिति स्फुटीकरणार्थम्। एवं व्याख्यायाः किं फलमत आह—**तथा चेति**। नित्यतामात्रेण तु नार्थः इष्टप्रध्वंसे तदभावादित्यर्थः। सत्यत्वासत्यत्वे कथमास्थानास्थे। अपि चेदन्तयानवगतं कथमास्थानास्थागोचरः अत आह—**तदेतेष्विति**। **तत्** तथासति नित्यत्वानित्यत्वयोः सत्यत्वासत्यत्वरूपत्वे सतीत्यर्थः। **एतेषु** पदार्थेषु। तान्निर्दिशति—**विषयविषयिषु**। विषयविषयित्वविवेकोऽपि कथं अत उक्तम्—**युष्मदिति**। प्रतीतिकलहवारणाय—**अनुभूयमानेषु**। सुखं व्यवस्थास्यते अनृतस्यानर्थत्वेन सुखत्वायोगादित्यर्थः। आध्यात्मिकादितापत्रयपरीतं भविष्यतीत्यन्वयः। भुजङ्गादिभ्रमाणां तथात्वस्य स्फुटत्वात्। रूप्यादिभ्रमाणामपि निष्फलप्रवृत्त्यादिद्वारा समनन्तरनाशेन च क्लेशत्वात्। तर्ह्यनृतत्वं विशेषतोऽवधारितं, सत्यं, सर्वस्यानात्मवर्गस्य नैवमवधारणमिति धर्मिमात्रयोः, विवेक इति नात्युक्तम्। एतदुक्तं भवति—**सत्यासत्ययोः** सुखत्वानर्थत्वाभ्यामास्थानास्थे। ते च सत्यत्वे ग्रहीष्यामि, अनृतत्वे त्यक्ष्यामीत्येवंरूपे संमुग्धयोरपि धर्मिणोरविरुद्धे इति। ईदृगपि नियमः कथं विचारं विना अत आह—**सोऽयमिति**। प्रत्यक्षेण रूप्यादेः मृषात्वम् उपपत्त्याधिष्ठानस्य कस्यचित् सत्यत्वम्। तदन्यतया रूप्यादिवदितरस्यापि युक्त्या मृषात्वनिश्चय इत्यर्थः। सत्यमधिष्ठानमेव मास्तु को दोष इत्युपपत्तिभङ्गमाशङ्क्याह—**न खल्विति**। निरधिष्ठानभ्रमायोगात् सत्यमनिच्छतोऽनृतमपि न स्यादित्यर्थः। सत्यमनिच्छन्त एव शून्यवादिनो भ्रममिच्छन्ति अत आह—**शून्येति**। तदलीकत्वे भावानामशून्यत्वप्रसङ्गादित्यर्थः। भवत्वेवं किमतः, वैराग्यमिति चेत्, न, सकृत् तज्ज्ञानमात्रेण

वस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसाधनसंपत्, मुमुक्षुत्वं च ।

यस्यानुभवोपपत्तिभ्यामेवं सुनिपुणं निरूपयतः, आ च सत्यलोकात् आ चावीचेः 'जायस्व म्रियस्व' इति विपरिवर्तमानं, क्षणमुहूर्तयामाहोरात्रार्धमासमासर्त्वयनवत्सरयुगचतुर्युगमन्वन्तर-प्रलयमहाप्रलयमहासर्गावान्तरसर्गसंसारसागरोर्मिभिरनिशमुह्यमानं, तापत्रयपरीतमात्मानं च जीवलोकं चावलोक्य अस्मिन्संसारमण्डले अनित्याशुचिदुःखात्मकं प्रसंख्यानमुपावर्तते; ततोऽस्यैतादृशान्नित्यानित्यवस्तुविवेकलक्षणात्प्रसंख्यानात्—इहामुत्रार्थभोगविरागो भवति । अर्थ्यते प्रार्थ्यत इत्यर्थः । फलमिति यावत् । तस्मिन्विरागोऽनाभोगात्मिकोपेक्षाबुद्धिः । ततः शमदमादिसाधनसंपत् । रागादिकषायमदिरामत्तं हि मनस्तेषु तेषु विषयेषूच्चावचमिन्द्रियाणि प्रवर्तयत्, विविधाश्च प्रवृत्तीः पुण्यापुण्यफला भावयत्, पुरुषमतिघोरे विविधदुःखज्वालाजटिले संसारहुतभुजि जुहोति । प्रसंख्यानाभ्यासलब्धवैराग्यपरिपाकभग्नरागादिकषायमदिरामदं तु मनः पुरुषेणावजीयते वशीक्रियते, सोऽयमस्य वैराग्यहेतुको मनोविजयः शम इति वशीकारसंज्ञ इति चाख्यायते । विजितं च मनस्तत्तद्विषयविनियोगयोग्यतां नीयते, सेयमस्य योग्यता

तद्योगात् । सत्यम्, शुद्धसत्त्वस्योक्तविवेकाभ्यासो भवति । स च वैराग्यमावहतीत्याह—**अथेति** । अवीचिर्नरकविशेषः । **जायस्व म्रियस्वेति** क्रियासमभिहारे लोट् । पुनः पुनः जायते म्रियते चेत्ययनेन प्रकारेण विपरिवर्तमानमित्यन्वयः । क्षणादय एव सागरोर्मयः तैरूह्यमानं दुःखात्मकमिति । **प्रसंख्यानं** प्रत्ययाभ्यासः । न चैवं निष्कृष्यानृतं दुःखत्वेनावगतमिति वाच्यम् । अन्तःकरणादिभेदाग्रहस्य तदवस्थत्वात्, वैराग्यस्य विवेकानन्तरोक्तिः, तत्कार्यत्वपरेत्याह—**तत इति** । अर्थशब्दस्य द्रव्याद्यर्थतां परिहरति—**अर्थ्यत इति** । विराग इति विशिष्टरागशङ्कां वारयति—**उपेक्षेति** । सकृज्जाता सा न शमादिहेतुरत उक्तम्—**अनाभोगात्मिकेति** । [1]मनस्कारतिरस्काररूपेत्यर्थः । भाष्ये शमादेर्वैराग्या-नन्तरोक्तिस्तत्कार्यत्वपरेत्याह—**तत इति** । शमस्य व्यतिरेकान्वयाभ्यां वैराग्यहेतुत्वमाह—**रागादीति** । रागादय एव कषायः दोषः स एव मदिरा । युद्धसाध्याद् जयाद् व्यावर्तयति—**वशीक्रियत इति** । शमे प्रस्तुते मनोविजयस्य वैराग्यहेतुतोक्तिरयुक्ता, न, तस्यैव शमादित्वादित्याह—**सोऽयमिति** । वैराग्यहेतुक इति स्फुटीकरणं निगमनतुल्यम् । ननु मनोविजयं वशीकारमाचक्षते । सत्यं तस्य पर्याय इत्याह—**वशीकार इति** । वशीकारपर्यायान्तरप्राप्तिसूचनाय संज्ञ इति ग्रहणम् । भाष्ये शमदमादेस्तुल्यवद् वैराग्यजत्वविवक्षाभ्रमं नुदन् दमशब्दस्य दण्डे प्रसिद्धत्वाद् व्याचष्टे—**विजितं चेति** । विनियोगः प्रवर्तनं सोऽयं दम इत्यन्वयः । कोऽसौ अत उक्तं **योग्यतेति** । विनियोगयोग्यतायां दमशब्दोऽप्रसिद्धः

---

[1] मनस्कारः आदर इत्यर्थः

तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च, न विपर्यये। तस्मादथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते। अतःशब्दो हेत्वर्थः। यस्माद्वेद एवाग्निहोत्रादीनां श्रेयः

दमः। यथा दान्तोऽयं वृषभयुवा हलशकटादिवहनयोग्यः कृत इति गम्यते। आदिग्रहणेन च विषयतितिक्षातदुपरमतत्त्वश्रद्धाः संगृह्यन्ते। अत एव श्रुतिः—'तस्माच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमात्मनि पश्यति' इति। तदेतस्य शमदमादिरूपस्य साधनस्य संपत्प्रकर्षः शमदमादिसाधनसंपत्। ततोऽस्य संसारबन्धनान्मुमुक्षा भवतीत्याह—मुमुक्षुत्वं च। तस्य च नित्यशुद्धमुक्तसत्यस्वभावब्रह्मज्ञानं मोक्षस्य कारणमित्युपश्रुत्य तज्जिज्ञासा भवति धर्मजिज्ञासायाः प्रागूर्ध्वं च, तस्मात्तेषामेवानन्तर्यं न धर्मजिज्ञासाया इत्याह—तेषु हीति। न केवलं जिज्ञासामात्रमपि तु ज्ञानमपीत्याह—ज्ञातुं च। उपसंहरति—तस्मादिति। क्रमप्राप्तमतःशब्दं व्याचष्टे—अतः शब्दो हेत्वर्थः। तमेवातःशब्दस्य हेतुरूपमर्थ-

---

अत आह—यथेति। वृषभयुवा इति प्रयोगे इति शेषः। विषयतितिक्षा प्रतिकूलविषयसहिष्णुता। तदुपरमः इष्टविषयप्रवृत्तिविरतिः। आदिशब्दस्यैते अर्था इति कथम्। श्रुतौ सहपाठादित्याह—अतएवेति श्रद्धावित्तः श्रद्धाधनः पश्येद् यः स सर्वमात्मनीति योजना। शमदमादेः साधनमिति शङ्कां नुदति—तदेतस्येति। सम्पत्पदेन कर्मधारयं निरस्यति—साधनस्येति। सम्पत्पदस्य निष्पत्त्यर्थत्वे ततः शमादीत्यनेन गतत्वमाशङ्क्याह—प्रकर्षः वैराग्याज्जायन्ते[1] शमादयः तदनुवृत्त्या प्रकृष्यन्त इत्यर्थः। अनेनाप्रकृष्टस्य शमादेः, असाधकत्वमुक्तम्। विगृहीतसमासानुवादः शमेति। मोक्तुमिच्छा मुमुक्षा तस्यां[2] किं शमादिभिः सा वा कथं जिज्ञासामादध्यात्, न, मोचनविशिष्टेच्छावत्त्वस्य मुमुक्षुपदेनाभिप्रेतत्वात्, इत्याह—तत इति। संसार एव बन्धः बन्धग्रहणम् मुमुक्षुत्वमिति निर्देशघटनाय, इत्याहेति सर्वत्रान्वयं मत्वान्ते कथितम्। तेषु हीत्याद्यनुपपन्नं सत्स्वपि तेष्वनधीतवेदान्तस्यात्मजिज्ञासायोगात्। तेषामन्वयव्यतिरेकाभ्यां हेतुत्वे वक्तव्ये धर्मजिज्ञासाया इत्यधिकं धर्मजिज्ञासाया इत्यस्य प्रागित्यनेनान्वये द्वितीयस्य साकाङ्क्षत्वं, द्वितीयान्वये प्रथमस्येति शङ्कां परिहरन्नाह—तस्येति। उक्तसाधनचतुष्कवत इत्यर्थः। यद्यपि कर्मजिज्ञासानन्तर्यं प्राङ्निरस्तम्। तथापि निरपेक्षं जिज्ञासाहेतुं कथयन्नलब्धावसरो निरस्तमपि निरस्यतीत्यदोषः। ज्ञातुञ्चेत्यधिकम अत आह—न केवलमिति। उक्तैः साधनैर्भवन्त्यपि जिज्ञासा न फलपर्यन्तेति शङ्काशान्त्यर्थमाहेत्यर्थः। पूर्वभाष्ये यस्मादर्थे हिशब्दादेव तस्मादितिसिद्धेः पौनरुक्त्यमाशङ्क्य हेत्वन्तरादन्यथात्वमिति शङ्काशान्त्यर्थमुपसंहरतीत्यदोष इत्याह—उपसंहरतीति। जिज्ञासाधर्मानन्तर्यार्थे, अथशब्दे व्याख्याते बुद्धिस्थधर्मिवाचकजिज्ञासापदं व्याख्येयं, अत आह—क्रमेति।

---

1 'ज्ज्ञायं' ख-पाठः 2 'स्याः' ख पाठः

साधनानामनित्यफलतां दर्शयति 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छान्दो. ८-१-६) इत्यादिः।

माह—यस्माद्वेद एवेति। अत्रैवं परिचोद्यते—सत्यं यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा भवति, सैव त्वनुपपन्ना; इहामुत्रफलोपभोगविरागस्यानुपपत्तेः। अनुकूलवेदनीयं हि फलम्, इष्टलक्षणत्वात्फलस्य। न चानुरागहेतावस्य वैराग्यं भवितुमर्हति; दुःखानुषङ्गदर्शनात्सुखेऽपि वैराग्यमिति चेत्, हन्त भोः सुखानुषङ्गाद्दुःखेऽप्यनुरागो न कस्माद्भवति। तस्मात्सुख-उपादीयमाने दुःखपरिहारे प्रयतितव्यम्। अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते। तद्यथा मत्स्यार्थी सशल्कान्सकण्टकान्मत्स्यानुपादत्ते, स यावदादेयं तावदादाय विनिवर्तते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति; स यावदादेयं तावदुपादाय निवर्तते, तस्माद्दुःखभयान्नानुकूलवेदनीयमैहिकं वामुष्मिकं वा सुखं परित्यक्तुमुचितम्। न हि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। अपि च

बुद्धिसन्निधेः पाठसन्निधिर्बलवानित्यर्थः। हेत्वर्थ इति प्रतिज्ञायां यस्मादित्यादिहेतुरिति भ्रमं नुदति **तमेवेति**। हेतुरूपं तमेवातशब्दस्यार्थमित्यन्वयः। अन्वयव्यतिरेकवत्साधनचतुष्टयानन्तर्यमुक्तं जिज्ञासायाः नैतद्धेतुमाशास्ते। अतोऽतःपदं तद्व्याख्यानं चायुक्तमित्याशङ्क्याह—**अत्रैवमिति**। जिज्ञासायाः पुष्कलकारणानन्तर्यं न हेतुरेषः किन्तु कारणाक्षेपे साधकः, अतो न व्याख्यानव्याख्येययोरयुक्ततेत्यर्थः। **सैव** सम्पत्तिः। ननु नित्यानित्यविवेकाद्युक्तमत आह— **इहेति**। न हि नित्यानित्यवस्तुविवेकस्तद्धेतुरुक्तः अत आह—**अनुकूलेति**। अनुकूलमिति वेदनीयं फलं सुखम् **इष्टलक्षणत्वात्** निरुपाधीच्छाविषयत्वात्। **अनुरागहेतौ** विषयतयेति शेषः **अस्य** पुरुषस्य। कथं तर्हि विनिर्गमः अत आह—**तस्मादिति**। ननु दुःखं दुष्परिहरमत आह—**अवर्जनीयतयेति**। **परिहृत्य** अनादृत्य। अनिष्टमनादृत्येष्टमात्रं ग्राह्यम्। अनिष्टयोगात् त्याज्यं वेत्यविनिगमस्तदवस्थः अत आह—**तद्यथेति**। **सशल्कान्** सवल्कान् **निवर्तते** न शल्काद्यादीयते। आगन्तुकयोगमनिष्टमुदाहृत्य सहजयोगमनिष्टमुदाहरति—**यथेति**। **पलालो** मुक्तफलस्तृणकाण्डः। सुखेन सहितं दुःखम्, अनादरणीयमस्तु तत्संभिन्ने सुखे तु प्रवृत्तिरेव मास्तु अत आह—**न हीति**। यद्यप्यत्रापि पूर्वोदाहरणे नोत्तरं सुशकं, तथापि वैभवादुदाहरणान्तरम्। मृगभिया तद्वति स्थले शाल्यनावापोऽपि सम्भवति। नत्वपाको भिक्षुकभयादित्याद्युदाहरणान्तरम्। पुंसां विचित्राशयत्वाद् भीरवो दुःखयोगात् सुखमपि त्यक्ष्यन्ति, अत आह—**अपिचेति**। अपिः

दृष्टं सुखं चन्दनवनितादिसङ्गजन्म क्षयितालक्षणेन दुःखेनाघ्रातत्वात् अतिभीरुणा त्यज्येतापि, न त्वामुष्मिकं स्वर्गादि; तस्याविनाशित्वात्। श्रूयते हि—'अपाम सोमममृता अभूम' इति। तथा च 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति। न च कृतकत्वहेतुकं विनाशित्वानुमानमत्र सम्भवति; नरशिरःकपालशौचानुमानवत् आगमबाधितविषयत्वात्। तस्माद्यथोक्तसाधनसंपत्त्यभावान्न ब्रह्मजिज्ञासेति प्राप्तम्। एवं प्राप्ते आह भगवान्सूत्रकारः—अत इति। तस्यार्थं व्याचष्टे भाष्यकारः—यस्माद्वेद एवेति। अयमभिसंधिः-सत्यं मृगभिक्षुकादयः शक्याः परिहर्तुं पाचककृषीवलादिभिः, दुःखं त्वनेकविधानेककारणसंपातजमशक्यपरिहारं; अन्ततः साधनपारतन्त्र्यक्षयितालक्षणयोर्दुःखयोः समस्तकृतकसुखाविनाभावनियमात्। न हि मधुविषसंपृक्तमन्नं विषं परित्यज्य समधु शक्यं शिल्पिवरेणापि भोक्तुम्। क्षयितानुमानोपोद्बलितं च 'तद्यथेह कर्मचितः' इत्यादि वचनं क्षयिताप्रतिपादकम् 'अपाम सोमम्' इत्यादिकं वचनं मुख्यार्संभवे जघन्यवृत्तितामापादयति। यथाहुः पौराणिकाः—'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इति। अत्र च ब्रह्मपदेन तत्प्रमाणं वेद उपस्थापितः।

सम्भावनायाम् 'अमृता अभूमे'ति उत्तमपुरुषात् फलाविनाशाप्रतीतेः श्रुत्यन्तरमाह तथेति। वैराग्याभावेऽपि शिष्टैःसाधनैः जिज्ञासामाशङ्क्य, अविरक्तस्य शमाद्यभावं मत्वा उपसंहरति—तस्मादिति। प्राप्तं युक्तम्। इत्येवं परिचोद्यते इति पूर्वान्वयः। तस्मात् साधनस्वरूपाक्षेपे तत्समर्थनहेतुपरत्वान्नायुक्तमतः-पदं न च तद्व्याख्यानमित्याह—एवं प्राप्त इति। अतः इति शब्दो द्रष्टव्यः। यद्वा आशङ्कोत्तरत्वे सा भाष्ये वक्तव्या। न, अतःपदव्याख्ययैव तस्याः सुग्रहत्वादित्याशयेनाह—तस्यार्थमिति। अर्थमेव व्याचष्टे न शङ्कामवादीत्यर्थः। भगवान् सूत्रकारो भाष्यकार इति च तयोरयुक्तोर्न सम्भवतीति ज्ञापनाय। क्षयितादिदुःखमनादृत्य सुखोपादेयत्वस्योक्तत्वादपरिहारमाशङ्क्याह—अयमिति। अशक्यपरिहारत्वे हेतुः नैकविधेति। अनेकविधेति। दुःखं हि कारणपरिहारेण परिहार्यम् कारणानि च बहूनि बहुप्रकाराणि चेत्यपरिहार्याणि अतो दुःखागतिखार्येत्यर्थः। तर्हि दुःखासम्भिन्नमेव सुखमुपादीयताम्। अत आह—अन्तत इति। यदुक्तमागतमपि तदनादृत्य सुखमेव भोज्यमिति तत्राह—नहीति सम्पृक्तमन्नं इति स्थिते, इति शेषः। विषाक्तमध्वन्नभुक्तौ विषभुक्तिवत् सुखभोगे दुःखभोगो दुर्वार इत्यर्थः। यदुक्तमामुष्मिके न वैराग्यं श्रुतेस्तत्र नित्यत्वावगमादिति तत्राह—क्षयितेति। अनुमानं कृतकत्वेन जघन्यवृत्तिताम् उपचारवृत्तिताम्। उपचारमेवाह—तथेति। स्थानम् अवस्थानम्। अत इति 'तद्यथेति वाक्यपरामर्शः कथं, असन्निधानादित्याशङ्क्य बुद्धिसन्निधिमाह—अत्रचेति। अवस्थापितः बुद्धौ, तर्हि वाक्यविशेष-

तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति—'ब्रह्मविदाप्नोति परम्' इत्यादिः (तैत्ति.२-१) तस्माद्यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणं 'जन्माद्यस्य यतः'

स च योग्यत्वात् 'तद्यथेह कर्मचितः' इत्यादिरतः इति सर्वनाम्ना परामृश्य, हेतुपञ्चम्या निर्दिश्यते। स्यादेतत्—यथा स्वर्गादेः कृतकस्य सुखस्य दुःखानुषङ्गस्तथा ब्रह्मणोऽपीत्यत आह—तथा ब्रह्मविज्ञानादपीति। तेनायमर्थ—अतः स्वर्गादीनां क्षयिताप्रतिपादकात्, ब्रह्मज्ञानस्य च परमपुरुषार्थताप्रतिपादकात् आगमात्, यथोक्तसाधनसंपत् ततश्च जिज्ञासेति सिद्धम्। ब्रह्मजिज्ञासापदव्याख्यानमाह—ब्रह्मण इति। षष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणे जिज्ञासा ब्रह्मजिज्ञासेति चतुर्थीसमासः परास्तो वेदितव्यः। 'तादर्थ्यसमासे प्रकृतिवि-

---

परामर्शःकथमत आह—स चेति वेद इत्यर्थः। तस्यैव योग्यता कथं सर्वस्यैव बुद्धिस्थत्वादित्याशङ्क्य परामर्शार्हत्वेऽपि प्रकृते हेतुत्वानर्हत्वात्, अन्यत्याग इत्याह—हेतुपञ्चम्येति पञ्चम्यर्थे तसिलित्यर्थः। वैराग्याय कर्मफलानित्यत्वश्रुतिर्युक्ता वक्तुं न तु ज्ञानस्य पुरुषार्थहेतुत्वश्रुत्युक्तेः फलमस्ति अत आह—स्यादेतदिति। कृतकस्येति। परोक्षक्षयितादुःखानुषङ्गहेत्वनुवादः। तथा ब्रह्मणोऽपि सुखत्वाविशेषादित्यर्थः। अयं भावः। ज्ञानफलस्य ब्रह्मणोऽपि (कर्मफलकत्वात्) तदवलम्बनेन कर्मफलवैराग्यमयोग्यमिति। सत्यमयं परिहारः, तथापि सूत्रमनुत्तरम्। अतश्शब्देन श्रुतिपरामर्शस्योक्तत्वात्। अपि चातश्शब्दस्य जिज्ञासाहेतुहेत्वर्थत्वे अतो ब्रह्मजिज्ञासेत्यनुपपन्नमित्याशङ्क्य अतश्शब्देन श्रुतिद्वयपरामर्शात् तस्य चाथशब्दात्प्रागन्वयान्नदोष—इत्याह—तेनेति। येन श्रुतिद्वयमपेक्षितं येन चातःशब्दो वैराग्यादिसाधकार्थः तेनेति। अतः सूत्रपदोपादनमेतत्। ब्रह्मज्ञानस्य सम्बन्धी यः परमपुरुषार्थः तत्प्रतिपादकात्। सम्पद् घटत इति शेषः। एवमतश्शब्दप्राथम्यमुक्त्वा, अथशब्दस्य पश्चात्सम्बन्धं मत्वाह, सम्पत् ततश्चेति। भाष्ये 'जिज्ञासा कर्तव्येत्यवश्यम्भावपरं, न विधिपरमिति मत्वा कर्तव्येतिपदं मुक्त्वा जिज्ञासासिद्धिमुपसंहरति—इति सिद्धमिति। यद्येवमतश्शब्देन पुरुषार्थसूचनं जिज्ञासया सन्देहप्रयोजने सूचयतीति प्राक्कथमुक्तम्। उच्यते-जिज्ञासापदेन सन्देहप्रयोजनयोरुपपन्नता सूचिता। अतश्शब्देन तु पुरुषार्थस्वरूपमात्रसमर्पणी श्रुतिःपरामृष्टेत्यदोषः। क्रमप्राप्तब्रह्मपदाव्याख्यानमयुक्तं इति। न। तस्य समासैकदेशत्वात् क्रमप्राप्तं समासपदमेव व्याख्येयमित्याह—ब्रह्मजिज्ञासापदेति। आह करोति। यद्वा विविच्याख्यानं व्याख्यानं विग्रहः। विग्रहस्य स्फुटत्वादुक्तिवैफल्यमाशङ्क्याह—षष्ठीति। समासान्तरोक्त्यैव कथं परासः अत आह—तादर्थ्येति। पाणिनिना "चतुर्थी तदर्थार्थबलिहित-सुख-रक्षितैः" इति

कृतिग्रहणं कर्तव्यम्' इति कात्यायनीयवचनेन यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात्, अप्रकृतिविकारभूत इत्येवमादौ तन्निषेधात्, 'अश्वघासादयः षष्ठीसमासा भविष्यन्ति' इत्यश्वघासादिषु षष्ठीसमासप्रतिविधानात्; षष्ठीसमासेऽपि च ब्रह्मणो वास्तवप्राधान्योपपत्तेरिति । स्यादेतत्—ब्रह्मणो जिज्ञासेत्युक्ते तत्रानेकार्थत्वाद्ब्रह्मशब्दस्य संशयः, कस्य ब्रह्मणो जिज्ञासेति। अस्ति ब्रह्मशब्दो विप्रत्वजातौ, यथा ब्रह्महत्येति । अस्ति च वेदे, यथा ब्रह्मोज्झमिति। अस्ति च परमात्मनि, 'यथा ब्रह्म वेद ब्रह्मैव भवति' इति, तमिमं संशयमपाकरोति—ब्रह्म च वक्ष्यमाणलक्षणमिति। यतो ब्रह्मजिज्ञासां प्रतिज्ञाय तज्ज्ञापनाय परमात्मलक्षणं प्रणयति ततोऽवगच्छामः परमात्मजिज्ञासैवेयं न विप्रत्वजात्यादिजिज्ञासेत्यर्थः । षष्ठीसमासपरिग्रहेऽपि नेयं कर्मषष्ठी, किन्तु शेषलक्षणा, सम्बन्धमात्रं च शेष इति ब्रह्मणो जिज्ञासेत्युक्ते ब्रह्मसंबन्धिनी जिज्ञासेत्युक्तं भवति। तथा च

तादर्थ्यसमासः स्मृतः । तत्र **चतुर्थी** चतुर्थ्यन्तं पदम् । तदर्थेन चतुर्थ्यन्तशब्दार्थकुण्डलादिप्रयोजनवाचिना हिरण्यादिशब्देन समस्यते कुण्डलहिरण्यमित्यादौ । तथार्थशब्दादिभिरपि चतुर्थीसमास इति सूत्रार्थः । तत्र तदर्थेति प्रथमोक्त[1]तादर्थ्यसमासे प्रकृतिग्रहणं चतुर्थ्यन्तेन समस्यमानशब्दार्थस्य प्रकृतिभूतस्यैव ग्रहणमिति कात्यायनवचनेनेत्यर्थः । नियमफलमाह—**प्रकृतीति । इत्येवमादौ** ब्रह्मजिज्ञासेत्येवमादौ । **तन्निषेधात्** । नियमसामर्थ्याभावादित्यर्थः ॥ निषेधे कारणमाह – **अप्रकृतीति** । नन्वश्वार्थो घासः अश्वघासः इत्यादौ अप्रकृतिविकारेऽपि तादर्थ्यसमासो दृष्टः । न, तत्र कात्यायनेनैव समासान्तरोपसंख्यानादित्याह—**अश्वघासादय इति** । षष्ठीसमासे ब्रह्मणो जिज्ञासाव्यावर्तकस्य तद्गुणत्वात् प्राधान्यभङ्गः, अत आह—**षष्ठीति** । शाब्दमप्राधान्यमिष्टमेव आर्थप्राधान्यं तु न शाब्दाद् गुणत्वादपैति [2]राजवदित्यर्थः । ब्रह्मलक्षणस्य वक्ष्यमाणताकथा प्रथमसूत्रव्याख्यानुपयोगिनी । न, अर्थान्तरव्यावृत्त्या ब्रह्मपदार्थकथनत्वादस्येत्याह— **स्यादेतदिति** । 'ब्रह्मोज्झं गर्भशातक'मित्यादिपातकानुस्मरणस्मृतौ ब्रह्मोज्झत्वं वेदत्यागः । वक्ष्यमाणलक्षणं ब्रह्मशब्दार्थ इति कुतो निश्चयः इत्याशङ्क्य अभिप्रायमाह—**यत इति**। अन्यत् प्रतिज्ञायानाकाङ्क्षितान्यज्ञापनस्यायोग्यत्वादित्यर्थः । षष्ठीसमासोक्त्यैव चतुर्थीसमासवादिनामुत्तरमभूत् किं कर्मणि षष्ठीत्यारम्भेण । न च शेषषष्ठीनिराकरणार्थं घटज्ञानमित्यादिषु सकर्मकेषु कर्मणि षष्ठ्या एव पुरःस्फुरणेन शङ्कानुदयादत आह—**षष्ठीति** । **शेषलक्षणा** शेषविषया शेषषष्ठ्यां सम्बन्धिनीति कथं लभ्यते अत आह—**सम्बन्धमात्रमिति** । शङ्कानुत्थानं स्वपरपक्षयोर्गुणदोषाभ्यां परिहरति—**तथा**

---

1 'क्तं' ख पाठः

2 राजपुरुषमानयेत्यत्रेति शेषः ।

इति । अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम् । ब्रह्मण

ब्रह्मस्वरूपप्रमाणयुक्तिसाधनप्रयोजनजिज्ञासाः सर्वा ब्रह्मजिज्ञासार्था ब्रह्मजिज्ञासयावरुद्धा भवन्ति; साक्षात्पारम्पर्येण च ब्रह्मसंबन्धात्, कर्मषष्ठ्यां तु ब्रह्मशब्दार्थः कर्म, स च स्वरूपमेवेति तत्प्रमाणादयो नावरुध्येरन्, तथा चाप्रतिज्ञातार्थचिन्ता प्रमाणादिषु भवेदिति ये मन्यन्ते तान्प्रत्याह—ब्रह्मण इति कर्मणीति । अत्र हेतुमाह—जिज्ञास्येति । इच्छायाः प्रतिपत्त्यनुबन्धो ज्ञानं, ज्ञानस्य च ज्ञेयं ब्रह्म । न खलु ज्ञानं ज्ञेयं विना निरूप्यते, न च जिज्ञासा ज्ञानं विनेति प्रतिपत्त्यनुबन्धत्वात्प्रथमं जिज्ञासा कर्मैवापेक्षते, न तु संबन्धिमात्रम्; तदन्तरेणापि सति कर्मणि तन्निरूपणात् । न हि चन्द्रमसमादित्यं चोपलभ्य कस्यायमिति संबन्ध्यन्वेषणा भवति । भवति तु ज्ञानमित्युक्ते विषयान्वेषणा किंविषयमिति । तस्मात्प्रथम-

---

चेत्यादिना । स्वरूपमिति जन्मादिसूत्रार्थः । शिष्टोऽध्यायचतुष्कार्थः । ब्रह्मजिज्ञासया । तत्पदेन, अब्रह्मणः प्रमाणादेःजिज्ञासा ब्रह्मासम्बन्धिनी कथमवरुध्यते, अत आह—साक्षादिति । स्वरूपजिज्ञासायाः साक्षात्, प्रमाणादिजिज्ञासायाःपारम्पर्येण, प्रमाणादयः । तज्जिज्ञासाः इष्टापत्तिं वारयति—तथा चेति । कर्मणि षष्ठीति प्रतिज्ञायाः जिज्ञासाया जिज्ञास्यापेक्षत्वादिति पटस्य कृतकत्वादिति व्यधिकरणहेतुरत आह—अत्रेति । अपेक्षितकर्मग्रहणार्हत्वात् षष्ठ्या इति विवक्षितत्वाद् वैयधिकरण्यमित्यर्थः । ननु जिज्ञासा ज्ञानेच्छा सा ज्ञानमपेक्षते न जिज्ञास्यं कथञ्चिदपेक्षा तु सम्बन्धिन्यपि तुल्या अत आह—इच्छाया इति । जिज्ञासाया इत्यर्थः । प्रतिपत्तौ विशेषणत्वेन अनुबध्यत प्रतिपत्त्यनुबन्धः ज्ञानस्य च ब्रह्मप्रतिपत्त्यनुबन्ध इत्यनुषङ्गः । तत्र हेतुः ज्ञेयमिति । तस्य हेतुत्वं व्यतिरेकमुखेनाह—नो खल्विति । इच्छायाः प्रतीत्यनुबन्धो ज्ञानमित्युक्तस्य ज्ञानत्वस्य हेतुत्वं व्यतिरेकमुखेनाह—न चेति । ज्ञेयानिरूपितस्य ज्ञानस्येच्छानिरूपकत्वाभावात् ज्ञेयमिच्छाप्रतीत्यनुबन्धः प्रथमापेक्षितत्वाच्च सम्बन्धिमात्राद् वैषम्यमित्याह—इति प्रतिपत्तीति । ज्ञानापेक्षायां ज्ञेयापेक्षावत् कर्मापेक्षायां सम्बन्धिमात्रापेक्षामाशङ्क्याह—तदन्तरेणेति । निरूपणात् । निरूपणस्य दृष्टत्वादित्यर्थः । कर्मणः सकर्मकत्वप्रतीत्यनुबन्धत्ववत् सम्बन्धिनः सम्बन्ध्यन्तरप्रतीत्यनुबन्धत्वात् प्रथमापेक्षा सुवचा, अतः कर्मान्तरेणापि सम्बन्धिना तन्निरूपणादिति शक्यं वक्तुमित्याशङ्क्य, सम्बन्धिनः सम्बन्ध्यन्तरप्रतीत्यनुसम्बन्धिनः सम्बन्ध्यन्तरप्रतीत्यनुबन्धत्व-व्यभिचाराद् नैवमित्याह—नहीति । उपलभ्य तच्छब्दात् । एवं च ज्ञानमित्युक्त इति वक्ष्यमाणसाम्य[1] सिद्धिः । चन्द्रादित्ययोः सम्बन्धिसद्भावेऽपि तदाकाङ्क्षा न ज्ञायत इत्यर्थः । ननु घटज्ञानमित्युक्ते ज्ञानेऽपि कर्मावगमात् तथानवगते तु कर्मणि भवतीत्याह—भवतित्विति । कर्मषष्ठीवादी ब्रह्मैवाऽद्व

---

1 ‘ ध्य ’ ख पाठः

इति कर्मणि षष्ठी, न शेषे; जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च। ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते; संबन्धसामान्यस्य विशेषनिष्ठत्वात्। एवमपि प्रत्यक्षं ब्रह्मणः

मपेक्षितत्वात् कर्मतयैव ब्रह्म संबध्यते, न तु संबन्धितामात्रेण, तस्य जघन्यत्वात्। तथा च कर्मणि षष्ठीत्यर्थः। ननु सत्यं न जिज्ञास्यमन्तरेण जिज्ञासा निरूप्यते, जिज्ञास्यान्तरं त्वस्या भविष्यति, ब्रह्म तु शेषतया संभन्त्स्यत इत्यत आह—जिज्ञास्यान्तरेति। निगूढाभिप्रायश्चोदयति—ननु शेषषष्ठीपरिग्रहेऽपीति। सामान्यसंबन्धस्य विशेषसंबन्धाविरोधेन कर्मताया अविघातेन जिज्ञासानिरूपणोपपत्तेरित्यर्थः। निगूढाभिप्राय एव दूषयति—एवमपि प्रत्यक्षं ब्रह्मण इति। वाच्यस्य कर्मत्वस्य जिज्ञासया प्रथममपेक्षितस्य प्रथमसंबन्धार्हस्य

शेषषष्ठीवाद्यपि तदेव, तथा च कथमेकस्य परिग्रहपरित्यागावित्याशङ्क्य धर्म्यैक्येऽपि धर्मालिङ्गितरूपभेदादविरोधमाह—**तस्मादिति**। जिज्ञास्यापेक्षत्वादिति हेतोः न शेषे इति प्रतिषेधमात्रान्वयशङ्कां नुदति—**तथा चेति**। निषेधविधौ हेतुरित्यर्थः। जघन्यमपि जिज्ञासान्तरावरोधाय ग्राह्यमिति शङ्कमानं प्रति प्राथम्यजघन्योक्तिरनुत्तरमिति चेत् न, विधान्तरेण जिज्ञासावरोधं विवक्षोरस्यैवोत्तरस्योचितत्वात्, उत्तरं भाष्यं चकाराद्धेत्वन्तरमिव, तदयुक्तं। जिज्ञास्यान्तरानिर्देशेऽपि "चैत्रस्य मित्र" मित्यादौ कर्मषष्ठ्यदर्शनात्, अतश्शङ्कोत्तरत्वमाह—**नन्विति**। जिज्ञास्यान्तरसद्भावे लाभमाह—**ब्रह्म त्विति**। **शेषितया** सम्बन्धितय। **संभन्त्स्यते**। सम्बद्धं भविष्यति। प्राथमिककर्मत्यागायोगे स्थिते कथमियं शङ्का अत आह—निगूढेति। प्रमाणादिजिज्ञासावरोधसिद्धिरिति निगूढोऽभिप्रायः। कर्मतां मुक्त्वा शेषतां ब्रुवतः कर्मत्वाविरोधोक्त्या किम्। विशेषनिष्ठत्वादिति चायुक्तं, कर्मत्वलक्षणविशेषनिष्ठत्वे, जिज्ञास्यान्तरासङ्ग्रहतादवस्थ्यात् अत आह—**सामान्येति**। विशेषनिष्ठत्वादिति विशेषाविरोधित्वमेवोक्तं न तु विवक्षितविशेषमात्रपर्यवसानं, जिज्ञासानिरूपणसिद्धये च कर्माविरोधोक्तिरिति भावः। **सामान्यसम्बन्धस्य** जिज्ञासायाः सम्बन्धिमात्रान्वयस्य जिज्ञासान्तरावरोधार्थत्वात् कथं प्रयासो व्यर्थः। अत आह—**निगूढेति**। जिज्ञासान्तराणामर्थादाक्षेप इति निगूढोऽभिप्रायः। **निगूढाभिप्राय एव** न तु पराभिसन्धिमजानन्नित्यर्थः। प्रत्यक्षं कर्मत्वमुत्सृज्य परोक्षं कर्मत्वं कल्पयत इत्यनुपपन्नम्, परेण द्वयोः कर्मत्वयोरस्वीकारात्। कर्मत्वस्य प्रत्यक्षतामुत्सृज्य परोक्षत्वकल्पनमयुक्तमिति चेत्, न, प्रत्यक्षस्य सम्बन्धमात्रस्याभिधानेनावरुद्धस्य कर्मत्वस्य[1] परोक्षत्वकल्पने दोषाभावादित्याशङ्क्य सम्बन्धिमात्रस्य न प्रत्यक्षत्वं कर्मत्वभेदपरिहारस्तु स एवेत्याह—**वाच्यस्येति**। प्रथमान्वयापरित्यागे हेतुः **प्रथमसम्बन्धार्हस्येति**। तत्र हेतुः **जिज्ञासया**

1 'त्वप' ख. पाठः

कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात् । न व्यर्थः, ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेन्न;

चान्वयपरित्यागेन पश्चात्कथंचिदपेक्षितस्य संबन्धिमात्रस्य संबन्धो जघन्यः प्रथमः प्रथमश्च जघन्य इति सुव्यवदातं न्यायतत्त्वम् । प्रत्यक्षपरोक्षाभिधानं च प्राथम्याप्राथम्यस्फुटत्वा-स्फुटत्वाभिप्रायम् । चोदकः स्वाभिप्रायमुद्घाटयति—न व्यर्थः, ब्रह्माश्रिताशेषेति ।

प्रथममपेक्षितस्येति । एवमपि न सम्बध्येत यदि वाच्यं न स्यात् न चैवमित्याह—**वाच्यस्येति** । 'कर्तृकर्मणोः कृती'ति कृद्योगे कर्मणि षष्ठीश्रवणात् । जिज्ञासाशब्दस्य चाकारप्रत्ययान्तत्वेन कृद्योगाद् वाच्यं कर्मत्वमित्यर्थः । जघन्यत्वे हेतुः—**पश्चादपेक्षितस्येति** । पश्चादपेक्षापि न स्वारसिकीत्याह—**कथञ्चिदिति** । **सम्बन्धिमात्रस्य** सम्बन्धित्वमात्रस्य । जघन्यः सन्नपि त्वन्मते प्रथमः, *सुव्यवदातं सुविशदम् **न्यायतत्त्वं** भवदीयस्य न्यायस्य स्वरूपमित्युपहासः । मतद्वयेऽपि शाब्दत्वात्कर्मत्वस्य परोक्षत्वाविशेषात् प्रत्यक्षं परोक्षमिति विभागायोगमाशङ्क्याह—**प्रत्यक्षेति** । ननु न व्यर्थो ब्रह्माश्रितेति चोद्यार्थादन्यं न तावत् पूर्वचोद्येऽभिप्रेतं, तदनिरूपणात् । अत्रैव तत्राभिप्रेतत्वे पुनरुक्तमेतच्चोद्यम् । न, निगूहनतद्विवरणयोः पुनरुक्तिदोषाभावादिति मत्वाह—**चोदक इति** । एवमन्यत्रापि निगूढाभिसन्धिविवरणग्रन्थावतारः । सन्निहितसिद्धान्त्यभिप्रायशङ्काव्यावृत्त्यै चोदक इत्युक्तम् । चोदकस्य पराभिप्रायविवरणश्रमशान्त्यै [1]**सेति** । ब्रह्माश्रितानाम् **अशेषाणां विचाराणां**

* श्रीयुतैः शिवरामकृष्णशास्त्रिभिः संशोध्य श्रीरङ्ग वाणिविलास मुद्रणालये (1952 A.D) मुद्रिते, पनमन्न श्रीसुब्रह्मण्यशास्त्रिभिर्विरचितेन विवरणाभिधानव्याख्यानेन सहिते, भामतीपुस्तके "सुव्याहतं न्यायतत्त्व" मिति पाठो दृश्यते । जघन्यः सन् प्रथमः इति कल्पनं व्याहतमित्यर्थः इति विवरणे व्याख्यातम् ।

*महामहोपाध्यायैः श्रीयुतैरनन्तकृष्णशास्त्रिभिः संशोध्य निर्णयसागरमुद्रणालये मुद्रिते, भामती-कल्पतरु-परिमलैः समेते ब्रह्मसूत्रशाङ्करभाष्यपुस्तके—"सुव्याहतं न्यायतत्त्वम्" इति भामतीपाठो दृश्यते । न व्याख्यातमेतत्कल्पतरौ ॥

*मं मं, पूर्वोक्तशास्त्रिभिरेव संशोध्य कालिघट्टनगर्या (Metropolitan Printing House) (1933 A.D) मुद्रणालये मुद्रिते नवव्याख्योपेते ब्र. सू-शा. भाष्यपुस्तके "सुव्याहतमाहो न्यायतत्त्वम्" इति भामतीपाठो दृश्यते । तत्राखण्डानन्दकृतायां ऋजुप्रकाशिकाव्याख्यायाम्—"जिज्ञासायाः सम्बन्धमात्रान्वयश्चरमोप्यजघन्यः, प्रथमोऽपि कर्मत्वान्वयः जघन्य इति वदतः सुव्याहतं न्यायतत्त्वम् । आहो इत्युपहासः । तथा च तथोक्तौ न्यायविरोध इति भावः" इति व्याख्यातम् ।

[1] 'चेति' - ख पाठः

प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात् । ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात्प्रधानम् । तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि । यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत् । श्रुत्यनुगमाच्च । 'यतो वा इमानि भूतानि जायन्ते' (तैत्ति.३-१) इत्याद्याः श्रुतयः 'तद्विजिज्ञासस्व तद्ब्रह्म' इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं

व्याख्यातमेतदधस्तात् । समाधाता स्वाभिसंधिमुद्घाटयति—न प्रधानपरिग्रह इति । वास्तवं प्राधान्यं ब्रह्मणः । शेषं सनिदर्शनमतिरोहितार्थं, श्रुत्यनुगमश्चातिरोहितः । तदेवमभिमतं

प्रतिज्ञार्थत्वादिति यद्यर्थः सोऽयुक्तः । ब्रह्मस्वरूपविचारनानात्वाभावात्, भावे वा कर्मणि षष्ठ्येव तदवरोधात्, ब्रह्माश्रितानाम् अशेषाणां प्रमाणादीनां ये ये विचाराः, तत्प्रतिज्ञानार्थत्वादित्यपि न युक्तम् । प्रमाणादीनां अब्रह्मत्वेन तज्जिज्ञासानां ब्रह्मसम्बन्धाभावात् सम्बन्धमात्रषष्ठ्यामपि तदनवरोधादित्यत आह—**व्याख्यातमिति** । व्याख्यातप्रायम् । द्वितीयमेव पक्षमूरीकृत्य प्रमाणादिजिज्ञासानां परम्परया ब्रह्मसम्बन्धित्वात् तदवरोधः । अन्यथा प्रमाणादिष्वप्रतिज्ञातविचारः स्यादिति चोद्याभिप्रायस्योक्तत्वादित्यर्थः । ब्रह्म हि ज्ञानेनेत्ययुक्तम्, इच्छाप्राधान्यस्य पूर्वमुक्तत्वात् । न, आर्थप्राधान्यपरत्वाद् भाष्यस्येत्याह—**वास्तवमिति** । तदपेक्षितानामित्ययुक्तं जिज्ञासान्तराभावेऽपि ब्रह्मस्वरूपस्य अनुपपत्त्यभावेन ब्रह्मणस्तदनपेक्षत्वादित्याशङ्क्य, तज्जिज्ञासायास्तदपेक्षत्वमेव । तस्य तदपेक्षत्वमिति समाधानपरम् तस्मिन्प्रधान इति भाष्यमर्थाक्षिप्तत्वं प्रतिज्ञातमुपपाद्य पृथक्सूत्रयितव्यानीति यद्यप्यधिकं तथापि, आर्थिकत्वात्, वरं कण्ठोक्तिरिति शङ्काशान्त्यै 'यश्चार्थादर्थः' इति [1]न्यायसूचनाय । तन्निदर्शने च सपरिवारस्य राज्ञो गमनमुक्तं भवतीति यद्यप्ययुक्तं, आर्थिकत्वात् परिवारगमनस्य, तथाप्युक्तवद्भवतीति विवक्षितमिति च सुग्रहमित्याह—**शेषेति** । श्रुत्यनुगमादित्यादिना शेषषष्ठीवादिनं प्रत्याशङ्क्य कर्मणि षष्ठीपक्षे श्रुत्यनुगमसम्भवादिति मत्वा श्रुत्यनुगमादित्युक्तम् । न तु सिद्धवत्कारेणेत्यभिप्रायेण तद्विवरणं "यतः वा" इत्यादि भाष्येणेति सुबोधमित्याह—**श्रुत्यनुगम इति** । यद्यपि सनिदर्शनं सश्रुत्यनुगममिति वक्तुं शक्यते, तथापि निरपेक्षयुक्तिद्योतनाय पृथगुक्तः । ननु ब्रह्मजिज्ञासापदे ब्रह्म वक्ष्यमाणमिति ब्रह्मपदार्थोक्त्यनन्तरं जिज्ञासापदार्थः कथनीयः, न विग्रहस्थ ब्रह्मप्रकृत्यर्थमुक्त्वा तदीयषष्ठीविभक्त्यर्थं षष्ठीसमासविशेषज्ञप्त्युपायं निरूप्यानन्तरमेव तदुत्तरपदस्य व्याख्यातुं योग्यत्वादिति मत्वाऽह—**तदेवमिति** ।

---

[1] न्यायोऽयं पूर्वमीमांसाभाष्यकारेण शबरस्वामिनोक्तः ।

दर्शयन्ति । तच्च कर्मणिषष्ठीपरिग्रहे सूत्रेणानुगतं भवति । तस्माद्ब्रह्मण इति कर्मणि षष्ठी । ज्ञातुमिच्छा जिज्ञासा । अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म; फलविषयत्वादिच्छायाः । ज्ञानेन हि प्रमाणेना-

---

समासं व्यवस्थाप्य जिज्ञासापदार्थमाह—ज्ञातुमिति । स्यादेतद्—न ज्ञानमिच्छाविषयः । सुखदुःखावाप्तिपरिहारौ वा तदुपायौ वा तद्द्वारेणेच्छागोचरः । न चैवं ब्रह्मविज्ञानम्; न खल्वेतदनुकूलमिति वा प्रतिकूलनिवृत्तिरिति वानुभूयते । नापि तयोरुपायः; तस्मिन्सत्यपि सुखभेदस्यादर्शनात्, अनुवर्तमानस्य च दुःखस्यानिवृत्तेः, तस्मान्न सूत्रकारवचनमात्रादिषि-कर्मता ज्ञानस्येत्यत आह—अवगतिपर्यन्तमिति । न केवलं ज्ञानमिष्यते किंत्ववगतिं साक्षात्कारं कुर्वदवगतिपर्यन्तं सन्वाच्याया इच्छायाः कर्म । कस्मात् ? फलविषयत्वादिच्छायाः, तदुपायं फलपर्यन्तं गोचरयतीच्छेति शेषः । ननु भवत्ववगतिपर्यन्तं ज्ञानं, किमेतावतापीष्टं भवति; न ह्यनपेक्षणीयविषयमवगतिपर्यन्तमपि ज्ञानमिष्यत इत्यत आह—ज्ञानेन हि

अभिमतं समासं कर्मषष्ठीसमासम । अवगतिपर्यन्तमित्यसङ्गतं, जिज्ञासापदनिरुक्त्यनुपयोगात् अत आह—**स्यादेतदिति** । तस्मिन्सत्यपि श्रवणादिनेति शेषः । ब्रह्मज्ञानिनो भुक्त्यादिसुखसम्भवेऽपि ज्ञानायत्तसुखविशेषो न दृश्यत इति मत्वोक्तं **सुखभेदेति** । स्वतःकदाचिन्निवृत्तावपि न निश्शेषनिवृत्तिरिति मत्वोक्तम् **अनुवर्तमानस्येति** । परमाप्तसूत्रकृद्वचनात् सुखाद्यनन्तर्गतमपि ज्ञानमिच्छाकर्मास्तु, न न्यायसूत्रस्य मनुस्मृतिवदुपदेशत्वाभावाद् इत्याह—**न सूत्रेति** । पशुपर्यन्तं प्राणिबृन्दं, इतिवदवगतिपर्यन्तं ज्ञानमित्युक्ते सर्वज्ञानावरोधः, ततश्चोक्तदोषतादवस्थ्यम् । ज्ञानावगत्योः पर्यायत्वात् तत्पर्यन्तत्वोक्तिरपि अयुक्ता अत आह—**न केवलमिति** अवगतिमकुर्वत् परोक्षज्ञानम् । **साक्षात्कारं** स्वरूपसाक्षात्कारं । **कुर्वत्** आविष्कुर्वद्, अपरोक्षवृत्तिरूपम् । इच्छावाचकपदाभावात् कथमिच्छाकर्मत्वमित्याशङ्क्य प्रत्ययस्य तद्वाचकत्वमुक्तं भाष्ये सन्वाच्याया इति । पञ्चम्यैव हेतुपूर्तिभ्रमं नुदन् व्यस्तायाः षष्ठ्याः हेत्वन्तःपातं सूचयन्, आकांक्षापूर्वकं पदद्वयमवतारयति—**कस्मादिति** । साक्षात्कारफलकं ज्ञानमिच्छाविषय इति प्रतिज्ञायेच्छायाः फलविषयत्वादिति व्यधिकरणहेतूक्तिरिति, आशङ्क्याऽह—**तदुपायमिति** । इच्छेत्यत्र इति शब्दानन्तरं शेषशब्दात्पूर्वं यत-इति द्रष्टव्यम । अन्यथा कस्मादित्याकांक्षितसमानाधिकरणहेत्वप्रतीतेः । फलेच्छामात्रेण तदप्राप्तेरिच्छासाधने पततीति दर्शनेनैतदुक्तम । ज्ञानेन हीति हिशब्दात् पूर्वत्र हेतुरिव सोऽनर्थकः, पूरितेन भाष्येण हेतुसिद्धेरित्याशङ्क्य शङ्कोत्तरतामाह—**नन्विति** । किमाक्षेपे एतावतापि, इष्टं भवति किम इत्यन्वयः । साक्षात्कारत्वादेवेष्टता पुत्रसाक्षात्कारवत् अत आह—**नहीति** । **अवगतिपर्यन्तमपि** चिद्व्यञ्जकापरोक्षवृत्तिरूपमपि । अपरोक्षवृत्तेरिष्टत्वं व्याघ्रादिसाक्षात्कृतौ

वगन्तुमिष्टं ब्रह्म। ब्रह्मावगतिर्हि पुरुषार्थः; निःशेषसंसारबीजाविद्याद्यनर्थ-

प्रमाणेनावगन्तुमिष्टं ब्रह्म। भवतु ब्रह्मविषयावगतिः, एवमपि कथमिष्टेत्यत आह— ब्रह्मावगतिर्हि पुरुषार्थः। किमभ्युदयः, न, किन्तु निःश्रेयसं विगलितनिखिलदुःखानुषङ्ग-परमानन्दघनब्रह्मावगतिर्ब्रह्मणः स्वभाव इति सैव निःश्रेयसं पुरुषार्थ इति। स्यादेतत् - न ब्रह्मावगतिः पुरुषार्थः पुरुषव्यापारव्याप्यो हि पुरुषार्थः। न चास्या ब्रह्मस्वभावभूताया उत्पत्तिविकारसंस्कारप्राप्तयः संभवन्ति; तथा सत्यनित्यत्वेन तत्स्वाभाव्यानुपपत्तेः। न चोत्पत्त्याद्यभावे व्यापारव्याप्यता; तस्मान्न ब्रह्मावगतिः पुरुषार्थ इत्यत आह—निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्। ब्रह्मावगतौ ब्रह्मस्वभावे नोत्पत्त्यादयः संभवन्ति, तथाप्यनिर्वचनीयानाद्यविद्यावशाद्ब्रह्मस्वभावोऽपराधीनप्रकाशोऽपि [1]प्रतिभानपि न प्रतिभातीव पराधीनप्रकाश इव देहेन्द्रियादिभ्यो भिन्नोऽप्यभिन्न इव भासत इति संसारबीजाविद्याद्यनर्थ-निबर्हणात् प्रागप्राप्त इव तस्मिन्सति प्राप्त इव भवतीति पुरुषेणार्थ्यमानत्वात्पुरुषार्थ

व्यभिचारीत्यर्थः इयं शङ्का, अवगतेः फलत्वमनिच्छत इति नानुत्थानं स्वप्रकाशतया नित्यावगतस्वरूपस्य कथमवगन्तुमिष्टतेत्याशङ्क्य प्रमितिवृत्तिव्यक्तस्यैवावगमस्याविद्याविरोधित्वादित्यभिप्रेत्योक्तं **प्रमाणेनेति**। वृत्तिसाक्षात्कारसाध्यावगतिर्ब्रह्मावगतित्वादिष्टा, न, व्याघ्राद्यवगतितुल्या, अतोऽपेक्षणीयविषयत्वं वृत्तेरित्यर्थः। भाष्ये ब्रह्मावगन्तुमिष्टमित्यन्वयः। ब्रह्मावगतिर्हि पुरुषार्थ इति पुनरुक्तम्। अवगन्तुमिष्टं ब्रह्मेति, अत एव तत्सिद्धेरित्याशङ्क्य शङ्कापरिहारत्वमाह—**भवत्विति**। **ब्रह्मविषयेति**। स्वरूपावगते-र्व्यवहारहेतुत्वेन स्वविषयत्वोपचारः। **एवमपि कथमिष्टा**। येन तत्पर्यन्तं ज्ञानमिहेष्यतेति शेषः। नायं पुरुषार्थः अस्वर्गत्वादपश्वादित्वाच्चेत्याशयेन पृच्छति—**किमिति**। निगूढाभिसन्धिर्यथाश्रुतं निषेधति—**नेति**। तर्ह्यपुरुषार्थता स्थिरेति शङ्कते—**किन्त्विति**। अभिप्रायं विवृण्वन्परिहरति—**निःश्रेयसमिति**। असुखत्वाद्, अदुःखनिवृत्तित्वाद् कथं पुरुषार्थः अत आह—**विगलितेति**। ननु ब्रह्मण एवंविधत्वे तस्य पुरुषार्थत्वमस्तु तदवगतेः कथं पुरुषार्थत्वमत आह—**ब्रह्मणःस्वभाव इति**। पूर्वग्रन्थ एवादुःखानुषक्तपरमानन्दरूपत्वेन पुरुषार्थत्वोक्तेः किमनेन हेतुना आनन्दत्वत्यागशङ्कावहेनेत्यत आह—**स्यादेतदिति**। **व्याप्यः** साध्यः। नित्यं स्वरूपमसाध्यमित्यत्र तु नेदमुत्तरमित्याशङ्क्य, वस्तुतोऽसाध्यत्वमङ्गीकृत्य कथञ्चित्साध्यत्वमाह—**सत्यमिति**। तथापि प्राप्त इव भवति। प्राप्तवद् भावे हेतुः **प्रागप्राप्त इवेति**। प्रागित्यस्य प्रतियोगिनिर्देशः **संस्कारबीजेति**। अप्राप्तवद्भावे हेतुः **देहेन्द्रियादिभ्य इत्यादि**। स्वरूपस्य प्रतिभासा[2]दन्या न प्राप्तिः। स च स्वाभाविकः स्वप्रकाशत्वात्

[1] प्रतिभान्—प्रतिभासमान इत्यर्थः

[2] "सास्याद" ख - पाठः

निबर्हणात् । तस्माद्ब्रह्म विजिज्ञासितव्यम् । तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा

इति युक्तम् । अविद्यादीत्यादिग्रहणेन तत्संस्कारोऽवरुध्यते । अविद्यादिनिवृत्तिस्तूपासनाकार्या-दन्तःकरणवृत्तिभेदात् साक्षात्कारादिति द्रष्टव्यम् । उपसंहरति तस्माद्ब्रह्म जिज्ञासितव्यम् । उक्तलक्षणेन मुमुक्षुणा । न खलु तज्ज्ञानं विना सवासनविविधदुःखनिदानमविद्योच्छिद्यते । न च तदुच्छेदमन्तरेण विगलितनिखिलदुःखानुषङ्गानन्दघनब्रह्मात्मतासाक्षात्काराविर्भावो जीवस्य । तस्मादानन्दघनब्रह्मात्मतामिच्छता तदुपायो ज्ञानमेषितव्यम् । तच्च न केवलेभ्यो वेदान्तेभ्योऽपि तु ब्रह्ममीमांसोपकरणेभ्य इति इच्छानिभेन ब्रह्ममीमांसायां प्रवर्त्यते, न तु वेदान्तेषु तदर्थविवक्षायां वा । तत्र फलवदर्थावबोधपरतां स्वाध्यायाध्ययनविधेः

अत आह—**पराधीनप्रकाशोऽपीत्यादि** । स्वप्रकाशत्वविरुद्धास्वप्रकाशत्वारोपात् प्रतिभासमान[1]त्वविरुद्धा-प्रतिभासमानत्वारोप इत्यर्थः । अविद्याया एव संस्कारबीजत्वादादिशब्दायोगमाशङ्क्याह—**अविद्यादीति** । अविद्यादिनिवृत्त्या स्वरूपं प्राप्तमिवेत्युक्तम् । तन्निवृत्तिः कुतः, साक्षात्कारादिति चेत्, तस्य नित्यत्वात् नित्यनिवृत्तिप्रसङ्गः अत आह—**अविद्यादीति** । यद्यन्तःकरणं साक्षात्कारकारणं प्रागपि तत्प्रसङ्गः, न, उपासनावासितस्यैव तस्य तत्र शक्तेरित्याह—**उपासनेति** । जिज्ञासापदव्याख्यानासङ्गतिमुत्तरभाष्यस्या-शङ्क्य पदार्थकथनानन्तरं वाक्यार्थोपसंहार इत्याह—**उपसंहरतीति** । यदि जिज्ञासया भवितव्यं कथं न जिज्ञासन्ते सर्वे अत आह—**उक्तेति** । मुमुक्षाभावे जिज्ञासाभावादुक्तम्—**उक्तलक्षणेति** । मुमुक्षोर्मोक्षो-पायान्वेषणमुक्तं न तु ब्रह्मजिज्ञासायां ब्रह्मज्ञानस्यैव मोक्षोपायत्वादित्याह—**न खल्वित्यादिना** । ब्रह्मणो-जिज्ञासार्हत्ववर्णनस्याफलत्वमाशङ्क्य मीमांसारम्भं फलमाह—**तच्चेत्यादिना** । **इच्छानिभेन** जिज्ञासामिषेण । **ब्रह्ममीमांसायां** ब्रह्मप्रमाणभूतवेदान्तवाक्यविचारे । **प्रवर्त्यते** मुमुक्षुः । स्वतः प्रवृत्तोऽपि मीमांसौन्मु-ख्यातिशयशाली क्रियत इत्यर्थः । श्रवणादिविधेर्निराकरिष्यमाणत्वात्, एवं व्याख्या किं मीमांसया वेदान्तैरेव ज्ञाते ब्रह्मण्युपास्यमाने साक्षात्कारसिद्धेरत आह—**न केवलेभ्य इति** । **केवलेभ्यः** साङ्गाधीत-मात्रेभ्यः । **इष्यमाणं** साक्षात्कारज्ञानं, अधीतमात्रैर्वेदान्तैः, उपासनद्वारा साध्यं न भविष्यति पाठमात्रजप्रतिपत्तेः सन्देहाद्याक्रान्तत्वेन तदभ्यासेऽपि, तत्त्वसाक्षात्कारायोगादित्यर्थः । तर्हि संशयच्छेदोपाय एव मृग्यो न मीमांसा न, तस्या एव तदुपायत्वादित्याह—**अपि त्विति** । यदि मीमांसा वेदान्तानामुपकरणं तर्हि प्रधानेषु तेष्वपि प्रवर्तनीयम् नोपकरणमात्रे, न, प्रधानानामपि तेषामध्ययनविधिनैवाध्यापितत्वादित्याह—**न वेदान्तेष्विति** । तर्हि ब्रह्मविचारवत् तद्धेतौ वेदान्तानां विवक्षितार्थत्वचिन्तायामपि प्रवर्त्यतामत आह—**तदर्थेति** । **विवक्षायाम्** नेषां विवक्षितार्थचिन्तायाम् । अत्रैव हेतुमाह—**तत्रेति** । **सूत्रयता** सूचयता

1 "न त्वारो" ख - पाठः

स्यात् । यदि प्रसिद्धं, न जिज्ञासितव्यम् । अथाप्रसिद्धं, नैव शक्यं

सूत्रयता 'अथातो धर्मजिज्ञासा' इत्यनेनैव प्रवर्तितत्वात्, धर्मग्रहणस्य च वेदार्थोपलक्षणत्वेनाधर्मवद्ब्रह्मणोऽप्युपलक्षणाच्च यद्यपि धर्ममीमांसावत् वेदार्थमीमांसया ब्रह्ममीमांसाप्याक्षेप्तुं शक्यते; तथापि प्राच्या मीमांसया न तद्व्युत्पाद्यते, नापि ब्रह्ममीमांसाया अध्ययनमात्रानन्तर्यमिति ब्रह्ममीमांसारम्भाय नित्यानित्यविवेकाद्यानन्तर्यप्रदर्शनाय चेदं सूत्रमारम्भणीयमित्यपौनरुक्त्यम् । स्यादेतत् —एतेन सूत्रेण ब्रह्मज्ञानं प्रत्युपायायता मीमांसायाः प्रतिपाद्यत इत्युक्तं – तदयुक्तं विकल्पासहत्वादिति चोदयति—तत्पुनर्ब्रह्मेति । वेदान्तेभ्योऽपौरुषेयतया स्वतः सिद्धप्रामाण्येभ्यः प्रसिद्धमप्रसिद्धं वा स्यात् । यदि प्रसिद्धं वेदान्तवाक्यसमुत्थेन निश्चयज्ञानेन विषयीकृतं, ततो न जिज्ञासितव्यं; निष्पादितक्रिये कर्मणि अविशेषाधायिनः

अनेन सूत्रेण । ननु तत्र धर्मग्रहणाद् विधीनामर्थविवक्षोक्ता न वेदान्तानामत आह—**धर्मग्रहणस्येति** । मुख्ये बाधाभावात् किमुपलक्षणेन अत आह—**अधर्मवदिति** । धर्मपदस्य स्वार्थत्वे तत्राधर्मविचारो न स्यादिति बाध इत्यर्थः । धर्मपदस्योपलक्षणत्वे ब्रह्ममीमांसाप्रतिज्ञापि [1]गतेत्यत आह—**यद्यपीति** । **धर्ममीमांसया** तत्प्रतिज्ञया । **ब्रह्ममीमांसा** तत्प्रतिज्ञा । **अपि**रर्थविवक्षासमुच्चये । **आक्षेप्तुमन्त**र्भावयितुम् । यद्वा पृथङ्नकार्येत्याक्षेप्तुम् अव्युत्पादनादप्रतिज्ञातत्वं गम्यत इत्यर्थः । ननु सैव प्रतिज्ञास्तु । अत्र व्युत्पादनमेव क्रियताम् अत आह —**नापीति** । धर्ममीमांसासूत्रेऽथशाब्दस्याध्ययनमात्रानन्तर्यार्थत्वात् तत्राप्रतिज्ञानमित्यर्थः । नानेन न्यायेन वेदान्तानां तत्रार्थविवक्षा न सिद्धेति शङ्कनीयम्, वेदस्य विवक्षितार्थताया एव तत्रातश्शब्दार्थत्वादिति द्रष्टव्यम् । तत्पुनरिति चोद्यमयुक्तम् अप्रसिद्धेऽपि अवगतिपर्यन्तज्ञानेच्छायास्सम्भवादित्याशङ्क्य जिज्ञासायोग्यत्वप्रतिपादनफलविचारस्यायमाक्षेप इत्याह—**स्यादेतदिति** । **प्रतिपाद्यते** जिज्ञासारूपसूत्रार्थसामर्थ्याद्बोध्यते । **उक्तम्** तस्माद्ब्रह्म जिज्ञासितव्यमिति भाष्य इत्यभिप्रेतम् । अहंप्रत्ययस्याब्रह्मविषयत्वादप्रसिद्धिरुक्ता । कथं प्रसिद्धिपक्षप्राप्तिरत आह–**वेदान्तेभ्य इति** । प्रसिद्धौ सत्यामपि परमार्थविचार इति शङ्कानुत्थानायाह—**स्वत इति** । प्रसिद्धमिति शब्दात् प्रकृष्टा सिद्धिस्साक्षात्कार इति भाति, तदयुक्तम् । शब्दस्य तत्राशक्तेरुक्तत्वात् अत आह—**वेदान्तवाक्येति** । नियतत्वं प्रकर्षः । नापरोक्षमित्यर्थः । प्रसिद्धं यदि न जिज्ञासितव्यमित्येकान्वयभ्रमं नुदति–**तत इति** । **न जिज्ञासितव्यं** जिज्ञासुना न विचार्यम् । ननु विचारोऽपि प्रसिद्धिमेव करोतीति कथमकर्तव्यः अत आह—**निष्पादितेति** । **निष्पादितक्रिये** साधितफले कर्मणि विषये । **अविशेषाधायिनः**, अतिशयं अकुर्वतः ।

---

1 " तेत्याह " क - पाठः

जिज्ञासितुमिति । उच्यते—अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं,

---

साधनस्य साधनन्यायातिपातात् । अथाप्रसिद्धं वेदान्तेभ्यः, तर्हि न तद्वेदान्ताः प्रतिपादयन्तीति सर्वथाप्रसिद्धं नैव शक्यं जिज्ञासितुं; अनुभूते हि प्रिये भवतीच्छा, न तु सर्वथाननुभूतपूर्वे । न चेष्यमाणमपि शक्यं ज्ञातुं; प्रमाणाभावात् । शब्दो हि तस्य प्रमाणं वक्तव्यम् । यथा वक्ष्यति—'शास्त्रयोनित्वात्' इति । स चेत्तन्नावबोधयति, कुतस्तस्य तत्र प्रामाण्यम् । न च प्रमाणान्तरं ब्रह्मणि प्रक्रमते । तस्मादप्रसिद्धस्य ज्ञातुं शक्यस्याप्यजिज्ञासनात्, अप्रसिद्धस्येच्छाया अविषयत्वात्, अशक्यज्ञानत्वाच्च न ब्रह्म जिज्ञास्यमित्याक्षेपः । परिहरति—उच्यते—अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम् । अयमर्थः—प्रागपि ब्रह्ममीमांसाया अधीतवेदस्य निगमनिरुक्तव्याकरणादिपरिशीलनविदितपदतदर्थसंबन्धस्य 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रमात्, 'तत्त्वमसि' इत्यन्तात्संदर्भात् नित्यत्वाद्युपेतब्रह्मस्वरूपावगमस्तावदापाततो विचाराद्विनाप्यस्ति । अत्र च ब्रह्मेत्यादिनावगम्येन तद्विषयमवगमं लक्षयति, तदस्तित्वस्य सति विमर्शे विचारात्प्रागनिर्णयात् । नित्येति क्षयितालक्षणं दुःखमपक्षिपति ।

साधनस्य साधनत्वाभिमतस्य **साधनन्यायातिपातात्** । या साधनानामौचिती तदतिक्रमात् । **अथेति** । वेदान्तेभ्य इत्येतदुक्तस्यैव स्फुटीकरणाय । तत्राप्येकवाक्यताभ्रमशान्त्यै **तर्हीति** । वेदान्तेभ्योऽप्रसिद्धमपि जिज्ञास्यं लोके दृष्टमत आह—[1]**न सर्वथेति** । तदसिद्धिमाशङ्क्य वेदान्तातिरिक्तप्रमाणस्य तत्राभावादिति मत्वाऽऽह—**न तद्वेदान्ता इति** । नन्वप्रसिद्धत्वं प्रसिद्धार्थाविचारानुगुणमेव नेत्याह—**अनुभूते हीति** । अनुभूतेऽपीच्छा दुःखे न दृष्टा अत उक्तं **प्रिय इति** । सुन्दर इत्यर्थः । इच्छा विचारप्रवर्तनीति शेषः । ननु द्वितीयविकल्पेऽपि न जिज्ञास्यमित्येवालं, नैव शक्यमिति [2]विशेषलक्षणोक्त्या किं न अप्रसिद्धमपि ब्रह्मजिज्ञास्यमित्यनुशयानं प्रति जिज्ञासामङ्गीकृत्य, असौ फलपर्यन्तविचारप्रवर्तनी न भवतीति ज्ञापनार्थत्वादिति मत्वाऽऽह—**न चेति** । ननु शक्यत्वगुणात् प्रथमः पक्षः किं नेष्यते, जिज्ञासासाफल्यगुणाद्द्वितीयो वेत्याशङ्क्य एकैकगुणसम्भवेऽपि दोषानुद्धारादग्राह्यौ पक्षावित्याह—**तस्मादिति** । उच्यत इत्यस्य पूर्वान्वयं वारयति—**परिहरतीति** । ब्रह्मसिद्धिसत्त्वासत्त्वाभ्यामाक्षेपे ब्रह्मसत्त्वोक्तिरनुत्तरमत आह—**अयमिति** । प्रतीतिसत्तापरत्वव्याख्याभाष्ये ब्रह्मसत्त्वप्रतीति पराहता—अत आह—**अत्र चेति** । नित्यत्वादिरादिशब्दार्थः । मुख्ये को बाधः, अत आह—**तदस्तित्वस्येति** । अवगमस्यास्तित्वस्येत्यर्थः । ननु ब्रह्मास्तीत्युक्तं किं विशेषणैरित्याशङ्क्य जिज्ञास्यत्वप्रयोजकपुरुषार्थत्वज्ञापकत्वात्, स्वरूपलक्षणप्रवेशाच्च केषांचित्तावत्सार्थ-

---

1 'न तथेति' क पाठः 2 "षणल" ख पाठः

सर्वज्ञं, सर्वशक्तिसमन्वितम्, ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते; बृहतेर्धातोरर्थानुगमात् । सर्वस्यात्मत्वात् च

शुद्धेति देहाद्युपाधिकमपि दुःखमपाकरोति। बुद्धेत्यपराधीनप्रकाशमानन्दात्मानं दर्शयति; आनन्दप्रकाशयोरभेदात् । स्यादेतत् । मुक्तौ सत्यामस्यैते शुद्धत्वादयः प्रथन्ते, ततस्तु प्राक् देहाद्यभेदेन तद्धर्मजन्मजरामरणादिदुःखयोगादित्यत उक्तम्—मुक्तेति। सदैव मुक्तः सदैव केवलोऽनाद्यविद्यावशात्तु भ्रान्त्या तथावभासत इत्यर्थः। तदेवमनौपाधिकं ब्रह्मणो रूपं दर्शयित्वाऽविद्योपाधिकं रूपमाह—सर्वज्ञं सर्वशक्तिसमन्वितम्। तदनेन जगत्कारणत्वमस्य दर्शितं, शक्तिज्ञानभावाभावानुविधानात्कारणत्वभावाभावयोः। कुतः पुनरेवंभूतब्रह्मस्वरूपावगतिरित्यत आह—ब्रह्मशब्दस्य हीति। न केवलं 'सदेव सोम्येदम्' इत्यादीनां वाक्यानां पौर्वापर्यालोचनया इत्थंभूतब्रह्मावगतिः, अपि तु ब्रह्मपदमपि निर्वचनसामर्थ्यादिममेवार्थं स्वहस्तयति, निर्वचनमाह—बृहतेर्धातोरर्थानुगमात्। वृद्धिकर्मा हि बृहतिरतिशायने वर्तते।

कत्वमाह—नित्येत्यादिना। ननु बुद्धेति बोधरूपतोक्ता नानन्दत्वमत आह—आनन्देति। वक्तव्यस्य नित्यादिपदैरुक्तत्वान्मुक्तपदवैयर्थ्यमाशङ्क्य पूर्वोक्तानां स्वाभाविकत्वाक्षेपसमाधित्वमाह—स्यादेतदिति। **अस्य,** आत्मनः। एवं च मुक्तः केवल इति वक्ष्यमाण इति पुल्लिङ्गोपपत्तिः। **प्रथन्ते** भवन्ति। न प्राक्सन्तीत्यर्थः। कुतः प्रागशुद्ध्यादियोगादित्याह—तत इति। ननु मुक्तिरपि बन्धपूर्विका कथं स्वभाव इत्यत आह—सदैवेति। सदैवं मुक्तः। अत एव सदा केवलः। दुःखासङ्गी। सदामुक्तत्वादिकमसिद्धं दुःखादिप्रतिबन्धप्रतिभासादत आह—अनादीति। अवशिष्टविशेषणयोः परोपाधिकत्वात् प्रथमानुक्तिरिति दर्शयन् सार्थकत्वमाह—तदेवमिति। सोपाधिकरूपोक्तेरपि किं फलम्, तटस्थलक्षणप्रदर्शनमित्याह—तदनेनेति। अन्यशब्दाभ्यां कथमन्यदर्शनम्, सम्बन्धिशब्देन सम्बन्ध्यन्तरलक्षणादित्याह—शक्तीति। भाष्ये हिशब्दस्य ब्रह्मशब्दस्येत्येतत्सन्निधानादेते ब्रह्मशब्दस्य न शब्दान्तरस्येति[1] भाति तथाच प्रकृतासङ्गतमनाकांक्षितोत्तरमित्याशङ्क्य पूर्वप्रतिज्ञायां हेतुत्वमाह—कुत इति। हिशब्दो वाक्यादावन्ते वा योज्यत इत्यर्थः। ननु हेतुत्वाकांक्षा नास्ति वाक्यात्प्रसिद्धेरुक्तत्वात्। सत्यं हेत्वन्तराकांक्षायाम् इदमवतीर्णमित्याह—न केवलमिति। स्वहस्तयति स्वहस्तारूढं करोति। स्वयमपि स्फुटयतीत्यर्थः। व्युत्पाद्यमानस्येत्यनेन पौनरुक्त्यमाशङ्क्य तद्विवरणत्वमाह—निर्वचनमिति। ननु बृहतिर्वृद्ध्यर्थः कथं नित्यत्वादिप्रतीतिः अत आह—वृद्धीति। अतिशायनमिह वृद्धिरित्यर्थः।

---

1 " ति तथाच " ख पाठः

ब्रह्मास्तित्वप्रसिद्धिः। सर्वो ह्यात्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको नाहमस्मीति प्रतीयात्।

तच्चेदमतिशायनमनवच्छिन्नं पदान्तरावगमितं नित्यशुद्धबुद्धत्वाद्यस्याभ्यनुजानातीत्यर्थः। तदेवं तत्पदार्थस्य शुद्धत्वादेः प्रसिद्धिमभिधाय त्वंपदार्थस्याप्याह—सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वस्य पांसुलपादकस्य हालिकस्यापि ब्रह्मास्तित्वप्रसिद्धिः, कुतः? आत्मत्वात्। एतदेव स्फुटयति–सर्वो हीति। प्रतीतिमेवाप्रतीतिनिराकरणेन द्रढयति—न नेति। न न प्रत्येत्यहमस्मीति, किन्तु प्रत्येत्येवेति योजना। नन्वहमस्मीति च ज्ञास्यति मा च ज्ञासीदात्मानमित्यत आह—यदीति। अहमस्मीति न प्रतीयात्। अहंकारास्पदं हि जीवात्मानं चेन्न

ननु बृहत्कुम्भ इत्यत्रातिशयप्रत्ययेऽपि नित्यत्वादि न प्रतीतमत आह—**तच्चेदमिति**। **अनवच्छिन्नम्** असङ्कुचितम्। बृहत्कुम्भ इत्यत्रानुभवविरोधात् सङ्कोच इत्यर्थः। अतिशयानवच्छेदे शैत्यमाधुर्यसौरभ्याद्यतिशयोऽपि स्यादत आह—**पदान्तरावगमितम्**। शैत्यादि "अशब्दमस्पर्शमित्यादिपदैर्बाधितं, नित्यत्वादि तु न बाधितं प्रत्युत साक्षान्नित्यादिपदैरवगमितम्। विरुद्धमुत्सृज्याविरुद्धं गृह्णातीत्यर्थः। वाक्यात् पदाच्च प्रसिद्धेरभिहितत्वात् पुनस्तत्प्रसिद्ध्यभिधानमधिकमित्यत आह— **तदेवमिति**। समानाधिकरणे षष्ठ्यौ। सर्वात्मत्वाच्चेति वक्तव्ये सर्वस्येति व्यर्थो व्यासः, न, सर्वस्येत्यस्य प्रसिद्धेरित्यनेन सम्बन्धादित्याह—**सर्वस्येति**। ब्रह्मास्तित्वप्रसिद्धिरिति प्रतिज्ञायां सर्वस्येति विशेषणेन किमित्याशङ्क्य विचारयितृणां प्रसिद्धत्वज्ञापनं फलमित्याह—**पांसुलपादुकस्य हालिकस्यापीति**। हलेन खनतीति **हालिकः** कर्षकः। ननु किं व्यवहितान्वयेन व्यस्तमपि सर्वस्येत्येतद्धेतुनैवान्वेतु न आत्मत्वादित्यस्यैव हेतुतोपपत्तौ सर्वस्येति विशेषणवैयर्थ्यादित्याशयेनाह—**कुतः आत्मत्वादिति**। ननु त्वंपदार्थप्रसिद्धिकथायां ब्रह्मास्तित्वप्रसिद्धिरिति किमुच्यते तत्पुनर्ब्रह्मेत्यत्र ब्रह्मप्रसिद्धेरेव प्रस्तुतत्वात् तस्यैव तत्त्वमर्थरूपेण प्रसिद्धिरुच्यत इत्यदोषः। ब्रह्मास्तित्वप्रसिद्धिमुक्त्वा तद्विवरणमात्मास्तित्वं प्रत्येतीत्ययुक्तमाशङ्क्य न प्रतिज्ञाविवरणमिदं किन्तु आत्मत्वात् ब्रह्मसिद्धिः कुतः, आत्मन एवाप्रसिद्धत्वादिति शङ्काशान्त्यै हेतुत्वोपपादनमित्याह—**एतदेवेति**। अव्यवहितं हेतुरूपमेव न व्यवहितप्रतिज्ञानमित्यर्थः। **स्फुटयति** हेतुत्वेन व्यक्तीकरोति। उत्तरभाष्यं प्रतीत्यभिनय इव, तत्र नञ्वैयर्थ्यमत आह—**प्रतीतिमेवेति**। कथमप्रतीतिनिराकरणं प्रतीतिपदाभावात् तेन वा कथं प्रतीतिदार्ढ्यमित्याशङ्क्य प्रतीतिपरं प्रत्येतिपदमनुकृष्य जयन्नाह—**अनेनेति**। अप्रतीतिनिरासेन प्रतीतेर्दृढीकृतत्वात् पौनरुक्त्यमाशङ्क्याह— **नन्विति**। अस्तित्वप्रसिद्ध्यभावेन नास्तित्वप्रसिद्ध्यापादनं अयुक्तं, व्याप्त्यभावादत आह—**अहमिति**। आत्माप्रतीतौ, अहमप्रतीतिरनापाद्या, अन्याप्रतीतावन्याप्रतीत्यनियमादत आह—**अहंकारेति**। आत्मत्वाच्च ब्रह्मास्तित्व-

आत्मा च ब्रह्म । यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति । ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम् । न तद्विशेषं प्रति विप्रतिपत्तेः ।

प्रतीयात्, अहमिति न प्रतीयादित्यर्थः । ननु प्रत्येतु सर्वो जन आत्मानमहंकारास्पदं, ब्रह्मणि तु किमायातमित्यत आह—आत्मा च ब्रह्म । तदस्त्वमा सामानाधिकरण्यात् । तस्मात्तत्पदार्थस्य शुद्धबुद्धत्वादेः शब्दतः, त्वंपदार्थस्य च जीवात्मनः प्रत्यक्षतः प्रसिद्धेः पदार्थज्ञानपूर्वकत्वाच्च वाक्यार्थज्ञानस्य, त्वंपदार्थस्य ब्रह्मभावावगमः 'तत्त्वमसि' इति वाक्यादुपपद्यत इति भावः ॥ आक्षेप्ता प्रथमकल्पाश्रयं दोषमाह—यदि तर्हि लोक इति । अध्यापकाध्येतृपरंपरा लोकः । तत्र 'तत्त्वमसि' इति वाक्याद्यदि ब्रह्मात्मत्वेन प्रसिद्धमस्ति । आत्मा ब्रह्मत्वेनेति वक्तव्ये ब्रह्मात्मत्वेनेत्यभेदविवक्षया गमयितव्यम् । परिहरति—न । कुतः? तद्विशेषं प्रति विप्रतिपत्तेः । तदनेन विप्रतिपत्तिः साधकप्रमाणाभावे सति संशयबीजमुक्तम् । ततश्च संशयाज्जिज्ञासोपपद्यत इति भावः । विवादाधिकरणं धर्मी सर्वतन्त्रसिद्धान्तसिद्धोऽभ्युपेयः ।

प्रसिद्धिरिति प्रागेवोक्तत्वादात्मा च ब्रह्मेति पुनरुक्तम् । न । ब्रह्मण आत्मत्वासिद्धिशङ्काशान्त्यर्थत्वादित्याह—**नन्विति** । **किमायातं** तस्यात्मत्वासिद्धेरिति भावः । **ननु** प्रतिज्ञैव, कथं शङ्कोत्तरमत आह—**तदिति** । ह्यर्थश्चकारो हेतुमेतं[1] दर्शयतीत्यर्थः । पदार्थयोः प्रसिद्धत्वेन तन्मात्रविचारोपपत्तावपि वाक्यार्थाप्रसिद्ध्या तद्विचारायोगमाशङ्क्याह—**तस्मादिति** । यदीति भाष्ये एवकार पुनश्शब्दवैफल्यमाशङ्क्य प्रसिद्धेश्चेदुच्येत, प्रथमपक्ष एव स्यात् । तत्र पूर्वोक्तदोषानिस्तारः स्यादिति ज्ञापनार्थत्वेन साफल्यमित्याह—**आक्षेप्तेति** । लोके ब्रह्मण आत्मत्वेन प्रसिद्धेरनुक्तत्वादसदनुवादत्वमाशङ्क्याह— । **अध्यापकेति** प्रथमान्तस्य भाष्येऽश्रवणात्सप्तम्या योजयति—**तत्रेति** । अध्यापकादीनामपि स्वारसिकमैक्यज्ञानं नास्ति अत आह—**तत्त्वमसीति** । अनुवाद्यविधेयव्यत्ययमाशङ्क्याह—**आत्मेति वक्तव्ये** प्रसिद्धस्यैवानुवाद्यत्वादप्रसिद्धस्यैव विधेयत्वादित्यर्थः । **अभेदविवक्षया** । अप्रसिद्धस्य प्रसिद्धस्थाननिवेशनेनाभेददार्ढ्यं विवक्षितमित्यर्थः । नेति निषेधमात्रस्य साकाङ्क्षत्वमाशङ्क्य अनन्तरनिषेध्येनान्वयः परिहारत्वादित्याह—**परिहरतीति** । तच्छब्दस्य पूर्वान्वयं परिहरन् विप्रतिपत्तेरिति षष्ठीशङ्कां नुदन्नाह—**कुत इत्यादिना** । **तद्विशेषं प्रतीति**—तयोस्तत्त्वमर्थयोर्विशेषे विप्रतिपत्तेरिति जिज्ञास्यत्वे नोत्तरम् तस्य जिज्ञासां प्रत्यहेतुत्वादित्याशङ्क्य हेतुहेतुत्वाददोषमाह—**तदनेनेति** । एकस्मिन्धर्मिणि साधारणाकारेण दृष्टे संशयो भवति । न च देहक्षणिकविज्ञानस्थिरभोक्त्रादिष्वस्ति साधारणाकारः, त्वमर्थस्य शुद्धबुद्धत्वाद्याकारः, तत्पदार्थस्तु तेषु पक्षेषु नास्त्येव । अतः कथं तत्त्वंपदार्थयोर्विशेषसंशय इत्याशङ्क्य वादिविप्रतिपत्त्यनुपपत्त्योभयत्र संशयार्हस्य साधारणाकारस्य प्रतीतिं साधयति—**विवादेति** । विपक्षे [2]बाधकव्याजेन हेतुमाह—

---

1 "क्तं" ख पाठः   2 "कस्य व्या" ख पाठः

देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्तेत्येके। अस्ति तद्व्यतिरिक्त ईश्वरः

अन्यथा अनाश्रया भिन्नाश्रया वा विप्रतिपत्तयो न स्युः। विरुद्धा हि प्रतिपत्तयो विप्रतिपत्तयः। न चानाश्रयाः प्रतिपत्तयो भवन्ति; अनालम्बनत्वापत्तेः। न च भिन्नाश्रया विरुद्धाः। न ह्यनित्या बुद्धिः नित्य आत्मेति प्रतिपत्तिविप्रतिपत्ती। तस्मात्तत्पदार्थस्य शुद्धत्वादेर्वेदान्तेभ्यः प्रतीतिः, त्वंपदार्थस्य च जीवात्मनो लोकतः सिद्धिः सर्वतन्त्रसिद्धान्तः। तदाभासत्वानाभासत्वतत्तद्विशेषेषु परमत्र विप्रतिपत्तयः। तस्मात्सामान्यतः प्रसिद्धे धर्मिणि विशेषतो विप्रतिपत्तौ युक्तस्तद्विशेषेषु संशयः। तत्र त्वंपदार्थे तावद्विप्रतिपत्तीर्दर्शयति—देहमात्रम् इत्यादिना,

---

अन्यथेति। आश्रयपदं विषयार्थं **अनालम्बनत्वापत्तेः**। उत्पत्त्यर्थमालम्ब्यमानस्यापेक्ष्यमाणस्याभावात् [1]स्वरूपानुत्पत्त्यापत्तेरित्यर्थः। साधारणधर्मबोधकाभावेन यथा विप्रतिपत्तिरनुपपन्ना, एवं साधारणधर्मिबोधकाभावे तद्बोधोऽप्यनुपपन्न इति शङ्कां नुदन्नुपसंहरति—**तस्मादिति**। यस्मान्निर्विषयत्वे विप्रतिपत्तिरित्यत्र प्रतिपत्तिशब्दार्थो नास्ति एकविषयत्वाभावे वीत्युपसर्गार्थो विरोधो नास्ति तस्मादित्यर्थः। *समानाधिकरणे षष्ठ्यौ। **जीवात्मनः** पराग्व्यावृत्ताहमास्पदसामान्याकारभाजः, सर्वतन्त्रसिद्धान्तश्चेत् कथं विप्रतिपत्तिः, अत आह—**तदिति**। तत्पदार्थप्रतिपत्तेराभासत्वानाभासत्वप्रतिपत्तेः। त्वमर्थस्य तु पराग्व्यावृत्तसाधारणाकारभाजः। **तेषु तेषु** देहत्वक्षणिकज्ञानत्वादिषु विशेषेषु विप्रतिपत्तिः। **परं** केवलं **अत्र-अनयोः** तत्त्वमर्थयोः। ननु किमिदमकाण्डे साधारणधर्मिप्रसिद्धिसाधनमित्याशङ्क्य जिज्ञासाप्रयोजकसंशयप्रसिद्ध्यर्थमित्युपसंहरन्नाह—**तस्मादिति**। विप्रतिपत्त्या संशयः संशयाच्च [2]जिज्ञासेत्यजिज्ञास्यत्वशङ्कायामित्यतो देहमात्रमित्यादिर्वृथा। अथ विप्रतिपत्त्युपन्यासोऽयं तर्हि प्रथमोपात्ततत्पदार्थविप्रतिपत्तिः कथं नोपन्यस्यते-त्याशङ्क्य विप्रतिपत्त्युपन्यासविधावुद्देश्यत्वात्त्वमर्थस्य प्रथमं तद्विप्रतिपत्तिरुच्यत इत्याह—**तत्रेति**। प्रथमग्रन्थ एव तत्त्वमर्थविप्रतिपत्तिरिति शङ्काशान्त्यर्थमुपात्तस्य न्यूनाधिकग्राहित्वमपाकर्तुमित्यन्तेनेति ग्रहणम्। [3]ननु द्व्यणुकप्रक्रमारम्भपरिणामादिविवादेऽपि सोऽयं घट इति प्रत्यभिज्ञावत् सत्यामपि विप्रतिपत्तौ तत्त्वमसिवाक्यात्सोऽहमिति बुद्ध्युदयादविद्याद्यनर्थनिवृत्तेः किं विप्रतिपत्तिजसंशयनिरासिना विचारेणेत्याशङ्क्य प्रकृते विप्रतिपत्तिजस्य संशयस्यानिरासे अधिकारिणस्तत्त्वमसिवाक्यार्थबोधविरोधात् संशयनिरासि-

---

[1] "पतानु" ख पाठः [2] 'सेति जि' क पाठः [3] 'नु बुध्यणु' ख. पाठः

* अत्र "तत्पदार्थस्य शुद्धत्वादेरिति" इति अध्याहारः कार्यः।

भोक्तैव केवलं न कर्ता इत्यन्तेन । अत्र देहेन्द्रियमनःक्षणिकविज्ञानचैतन्यपक्षे न *तत्पदार्थाः नित्यत्वादयः त्वंपदार्थेन संबध्यन्ते ; योग्यताविरहात् । शून्यपक्षेऽपि सर्वोपाख्यारहितमपदार्थः कथं तत्त्वमोर्गोचरः । कर्तृभोक्तृस्वभावस्यापि परिणामितया तत्पदार्थनित्यत्वाद्यसंगतिरेव । अकर्तृत्वेऽपि भोक्तृत्वपक्षे परिणामितया नित्यत्वाद्यसंगतिः । अभोक्तृत्वेऽपि नानात्वेनावच्छिन्नत्वादनित्यत्वादिप्रसक्तावद्वैतहानाच्च तत्पदार्थासंगतिस्तदवस्थैव । त्वंपदार्थविप्रतिपत्त्या च तत्पदार्थेऽपि विप्रतिपत्तिर्दर्शिता । वेदाप्रामाण्यवादिनो हि लौकायतिकादयस्तत्पदार्थप्रत्ययं मिथ्येति मन्यन्ते । वेदप्रामाण्यवादिनोऽप्यौपचारिकं तत्पदार्थमविवक्षितं वा मन्यन्त इति । तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षात्तत्पदर्थे विप्रतिपत्तिमाह—

विचारापेक्षेत्यभिसन्धायाह—**अत्रेति** । **चैतन्यपक्षे** चेतनत्वपक्षे आत्मत्वपक्ष इति यावत् । तत्पदार्था इति छेदः । **संबध्यन्ते** सम्बन्धा इत्यधिकारिणा न ज्ञायन्ते । शून्यपक्षे प्राचीनदोषसंभवेऽप्यसाधारणप्रबलदोषसत्त्वात् पृथगाह—**शून्येति** । **अपदार्थः** सद्वाचिशब्दार्थरहितः । तत्र हेतुः **सर्वोपाख्यारहितमिति** । निस्स्वभावमित्यर्थः । तत्त्वमोः समानाधिकृतयोरनेन वाक्यार्थत्वं निराकृतं । कर्तृभोक्तृपक्षे नित्यत्वादेः सङ्गतिमाशङ्क्याह—**कर्तृभोक्त्रिति** । **परिणामितया** परिणामित्वप्रसक्त्या । क्रियायाः परिणामित्वादित्यर्थः । भोक्तैव केवलमिति पक्षे भोक्तृत्वं विकारः चिद्रूपत्वं वा आद्यं निरस्य द्वितीयं प्रत्याह **अभोक्तृत्व इति** । भोक्तृत्वरूपविकारस्याभावपक्षे । चिन्मात्ररूपभोक्तृत्वपक्ष इति यावत् । **अवच्छिन्नत्वाद्** वस्तुपरिच्छेदवत्त्वात । जडत्वादिरादिशब्दार्थः । **प्रसक्तौ** तत्पदार्थस्यासङ्गतिरित्यन्वयः । **असङ्गतौ** हेत्वन्तरम् **अद्वैतेति** । अद्वितीयस्य तत्पदार्थस्य परस्परविभिन्नसद्वितीयत्वपदार्थैक्यायोगादित्यर्थः । इयं च, असङ्गतिबुद्धिरधिकारिणो विप्रतिपत्तिमाकलयतः, न तु वादिनां स्वमत एव अपदार्थत्वानित्यत्वाद्यापादनस्य तेषामनर्हत्वात् । यद्यपि च वक्ष्यमाणा तत्पदार्थविप्रतिपत्तिरेव । तत्र संशयमानेतुं क्षमा तथाप्युपन्यस्तेषु पक्षेषु संभवन्ती तत्पदार्थविप्रतिपत्तिरनुपेक्षणीयेति मत्वाह—**त्वंपदार्थेति** । एवार्थश्चकारः । **दर्शिता** सूचिता । येषां तत्पदार्थ एव नास्ति, ते कथं तत्र विप्रतिपद्येरन्नित्याशङ्क्य तदाभासत्वानाभासत्व इत्युक्तमनुस्मारयन् परिहरति—**वेदाप्रामाण्येति** । **प्रामाण्यवादिनः** मीमांसकसाङ्ख्याः । **अविवक्षितं वा मन्यन्ते** उपनिषदां जपमात्रे जपमात्रोपयोगं वा मन्यमाना इत्यर्थः । यदि प्रागेव तत्पदार्थविप्रतिपत्तिदर्शनं, किमुत्तरेणात आह—**तदेवमिति** । सन्निधानाद् भोक्तृमात्रपरामर्शभ्रमं नुदति—

---

* तत्पदार्थनित्यत्वादय इति कल्पतरुधृतः पाठः ।

सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा स भोक्तुरित्यपरे । एवं बहवो

अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । तदिति जीवात्मनः परामृशति । न केवलं शरीरादिभ्यः, जीवात्मभ्योऽपि व्यतिरिक्तः । स च सर्वस्यैव जगत ईष्टे । ऐश्वर्यसिद्ध्यर्थं *भविकमस्य रूपद्वयमुक्तम्—सर्वज्ञः सर्वशक्तिरिति । तस्यापि जीवात्मभ्योऽपि व्यतिरेकात्, न त्वंपदार्थेन सामानाधिकरण्यमिति स्वमतमाह—आत्मा स भोक्तुरित्यपरे । भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य स ईश्वरस्तत्पदार्थ आत्मा, तत ईश्वरादभिन्नो जीवात्मा । परमाकाशादिव घटाकाशादय इत्यर्थः । विप्रतिपत्तीरुपसंहरन् विप्रतिपत्तिबीजमाह—एवं बहव इति । युक्तियुक्त्याभासवाक्यवाक्याभाससमाश्रयाः सन्त इति योजना । ननु सन्तु विप्रतिपत्तयः,

---

तदिति । जीवात्मनः अनन्तरपक्षद्वयोक्तात् । कर्ता भोक्तेति जात्येकवचनमिति सूचयितुं जीवात्मन इति बहुवचनम् । जीवव्यतिरेके देहाद्यव्यतिरेकमाशङ्क्याह—न केवलमिति । ईश्वर इति किमर्थं, भेदकज्ञप्त्यर्थमिति चेद् न, जीवानामपि यथास्वमीश्वरत्वात् अत आह—स चेति । निरुपपदेश्वरशब्दः सर्वेश्वरत्वमाहेत्यर्थः । ईश्वर इत्येव भेदकोक्तौ पदद्वयवैयर्थ्यमाशङ्क्याह—ऐश्वर्येति । इन्द्रियाभावात् ज्ञानं, कराद्यभावात् शक्तिश्चायुक्तेत्यत उक्तं भविकमिति । स्वाभाविकमित्यर्थः । अस्मिन्पक्षे शक्तेर्धर्मत्वमुपचारात्, अस्मिन्पक्षेऽधिकारिणो वाक्यार्थबोधविरोधः कथमत आह—अस्यापीति । अपर इत्युक्त्या मतान्तरमिव, तत्र वाक्यार्थबोधाविरोधमाशङ्क्य परिहरन् सर्वान्तनिवेशेऽपि कारणमाह—स्वमतमिति । जीवाद्व्यतिरिक्त इति पक्षस्य भोक्तृव्यतिरेकपक्षः कथं प्रतिकूलः अत आह—भोक्तुर्जीवात्मन इति । ननु अन्यः कथमात्मा अत आह—अविद्येति । औपाधिकमेवान्यत्वमित्यर्थः । स इति तच्छब्देन तद्व्यतिरिक्त इत्याद्युक्तरूपविशिष्टपरामर्शात् आत्मेत्यभेदायोगमाशङ्क्य धर्मिमात्रपरामर्शमाह—ईश्वरः इति । नित्यज्ञानाधिकरणत्वभ्रमं नुदति—तत्पदार्थः इति । ईश्वरस्य जीवाभेदविधौ असंसारिरूपप्रलयमाशङ्क्याह—तत इति । इत्यर्थः स भोक्तुरात्मेतिवाक्यस्य । एवं बहव इत्युक्त्या पूर्वोपन्यस्तवादिन इव बहवो विप्रतिपन्ना इति भाति । तेच दुरुदाहराः युक्तिवाक्येतिचाधिकम् अत आह—विप्रतिपन्नेति । तदाभासेति तच्छब्दस्य सन्निहितवाक्यग्राहित्वात् तत्तत्पूर्वपक्षेष्वपि युक्तिमूलता स्यात् ततश्च वाक्याभासमूलतापि न स्यादित्याशङ्क्य आह—युक्तीत्यादिना । योजना तच्छब्दस्योभयपरामर्शित्वेन घटना । युक्तिश्च वाक्यं च युक्तिवाक्ये । ते च तयोराभासौ चेति विग्रहः । यत्किञ्चित्प्रतिपत्तेः प्रागप्रस्तुतत्वात् तत्रेत्युक्तमुपजीव्य दोषोद्भावनमसङ्गतमित्याशङ्क्येदानीमेव तच्छङ्कायां परिहारोऽयमित्याह—नन्विति ।

---

* स्वाभाविकमिति कल्पतरुपाठः ।

विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः। तत्राविचार्य यत्किंचित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येतानर्थं चेयात्। तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते। इति जिज्ञासाधिकरणम् ॥ १ ॥

तन्निमित्तश्च संशयः, तथापि किमर्थं ब्रह्ममीमांसारभ्यत इत्यत आह—तत्राविचार्येति। तत्त्वज्ञानाच्च निःश्रेयसाधिगमो नातत्त्वज्ञानाद्भवितुमर्हति। अपि च अतत्त्वज्ञानान्नास्तिक्ये सत्यनर्थप्राप्तिरित्यर्थः। सूत्रतात्पर्यमुपसंहरति—तस्मादिति। वेदान्तमीमांसा तावत्तर्क एव, तदविरोधिनश्च येऽन्येऽपि तर्का अध्वरमीमांसायां न्याये च वेदप्रत्यक्षादिप्रामाण्यपरिशोधनादिषूक्तास्त उपकरणं यस्याः सा तथोक्ता। तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोजना ब्रह्ममीमांसारब्धव्येति सिद्धम्॥ इति जिज्ञासाधिकरणम्॥ १ ॥

किमर्थं ब्रह्ममीमांसारभ्यते, तां विनापि यत्किञ्चित्पक्षपरिग्रहादेव मोक्षोपपत्तेरित्यर्थः। ननु तीर्थकराः सर्वे मोक्षोपायमेवोपदिशन्ति। कथं तत्प्रतिघातः अत आह—तत्त्वज्ञानादिति। एवार्थश्चकारः। न च परस्परविरुद्धानि सर्वाणि तत्त्वज्ञानानीत्यर्थः। तत्त्वज्ञानाभावे तत्साध्यो मोक्षो मा भूत्। विपरीतसिद्धिस्तु कुतः अत आह—अपि चेति। नास्तिक्ये सति। दुरितप्रनाडिकयेति शेषः। जिज्ञासाया वाक्यार्थत्वात् मीमांसा प्रस्तूयत इत्यसूत्रार्थोपसंहारमाशङ्क्याह—सूत्रेति। तात्पर्यम् तात्पर्यविषयजिज्ञासानिरूपणप्रयोजनत्वेन सूत्राभिप्रेतम्। विचारारभ्यत्वं तर्कस्य। मीमांसोपकरणत्वे मीमांसा न तर्क इति स्यात् ततश्च न वेदान्तानामुपकरणं स्यादित्यत आह—वेदान्तेति। अर्थापत्त्यनुमाने तर्कशब्दार्थः। तर्हि तर्कस्य कथमुपकरणत्वं मीमांसात्मकत्वादत आह—तदविरोधिनश्च येऽन्ये इति। वाक्यार्थ इति निर्णायकतर्कराशौ इयती मीमांसा, इयानुपकरणतर्क इति कुतो विभाग इत्याशङ्क्य दर्शनान्तरस्थतर्कस्योपकरणत्वं नत्वत्रत्यस्येत्याह—अध्वरेति। विरुद्धदर्शनान्तरस्थस्य कथमुपकरणत्वम् अविरुद्धांशसम्भवादित्याह—वेदेति। परिशोधनादिषु प्रमाणप्रमेयलक्षणादिरादिशब्दार्थः। उपकृतेरुपकरणशब्दार्थत्वे बहुव्रीहिसामर्थ्यमाशङ्क्योपकारकस्य तदर्थतया सामर्थ्यमाह—त इति। निःश्रेयसप्रयोजनेत्ययुक्तं विचारानन्तरं निःश्रेयसाभावात् प्रकर्षेण स्तुतेरप्रतिभासात् प्रस्तूयत इत्ययुक्तमित्याशङ्क्य परम्परया निःश्रेयसार्थत्वं प्रस्तावश्च, आरम्भार्हत्वबोधनमिति मन्वान आह—तस्मादिति। परमेति साधनविशेषणम्।

॥ जिज्ञासाधिकरणं समाप्तम ॥ १ ॥

—o—

ब्रह्म जिज्ञासितव्यमित्युक्तम् । किंलक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान्सूत्रकारः—

जन्माद्यस्य यतः ॥२॥

जन्माद्यस्य यतः ॥ २ ॥

तदेवमिति तदेवं प्रथमेन सूत्रेण मीमांसारम्भमुपपाद्य ब्रह्ममीमांसामारभते—जन्माद्यस्य यतः । एतस्य सूत्रस्य पातनिकामाह भाष्यकारः - ब्रह्म जिज्ञासितव्यमित्युक्तम् । किंलक्षणं पुनस्तद्ब्रह्म । अत्र यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रधानस्य प्रतिज्ञया तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि; तथापि स्वरूपस्य प्राधान्यात्तदेवाक्षिप्य प्रथमं समर्थ्यते । तत्र यद्यावदनुभूयते तत्सर्वं परिमितं अविशुद्धमबुद्धं विध्वंसि न तेनोपलब्धेन तद्विरुद्धस्य

॥ जन्माद्यधिकरणम् ॥ २ ॥

" जन्माद्यस्य यतः " ॥ २ ॥

ननु विचारस्यारभ्यत्वे सिद्धे ज्ञानार्थिनो विचारयिष्यन्ति । किमुत्तरेण सूत्रसन्दर्भेणेत्याशङ्क्य मुमुक्षूनपि कांश्चित् स्वयं विचारयितुमक्षमाननुग्रहीतुमुत्तरसूत्र सन्दर्भप्रणयनमित्यभिप्रेत्याह—**तदेवमिति** । आरम्भणीयत्वोक्तेरारम्भात्प्राथम्यं योग्यमिति प्रथमसूत्रेणेत्युक्तम् । **जन्माद्यस्य यत इति** सर्वशास्त्रप्रतीकग्रहणमेतत् । वृत्तानुवादस्य वैय्यर्थ्यमाशङ्क्य सङ्गत्यर्थत्वमाह—**एतस्येति** । यद्वा भाष्ये सूत्रोपादानस्य शास्त्रप्रतीकत्वमिति भ्राम्यतः सूत्रान्तरेषु लक्षणानुक्तेरसङ्गतिरिति शङ्कां परिहरति—**एतस्येति** । न सर्वशास्त्रनिपातनिकेयमित्यर्थः । प्रमाणादेरपि प्रतिज्ञातत्वादाकांक्षातौल्यमाशङ्क्याह—**अत्रेति** । आक्षिप्येत्यनेन किंलक्षणमित्यत्र किमाक्षेपे आक्षेपसङ्गतिश्च पूर्वाधिकरणेनेत्युक्तम् । यतो वा इमानि भूतानीति वाक्यं ब्रह्मलक्षणपरं न वेति लक्षणस्य [1]तदुचितरूपसम्पत्ययसम्पत्तिभ्यां संशये कथिता ब्रह्मजिज्ञासा । विषयाद्युपवर्णनात् लक्षणानुपपत्त्या [2]साचाक्षिप्येह समर्थ्यत इति सङ्गतिः । अत एव पूर्वाधिकरणफलमेवास्य । उक्तं हि **शबरस्वामिना** " आक्षेपे चापवादे च प्राप्त्यां लक्षणकर्मणि । प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते इति ॥ " पूर्वाधिकरणन्यायेन यत्र पूर्वपक्षस्तत्रापवादः प्राप्तिः, तदर्थचिन्तां कृत्वा प्रवर्तनं कृत्वा चिन्ता अनुपपत्त्यभावे किं लक्षणमिति कथमाक्षेप इत्याशङ्क्य तदभिप्रायमाह—**तत्रेति** । परिदृश्यमानं जगद् ब्रह्मलक्षणं नित्यशुद्धत्वादि, वा, आद्ये किं तद्धर्मतया लक्षणं तादात्म्येन वा । न द्वयम् इत्याह—**यद्यावदिति** । द्वितीयपक्षवदसिद्धिर्नास्ति इत्येतावतैवास्य कल्पस्य प्राप्तिरिति सूचयितुमनुभूयत इत्युक्तम । **उपलब्धेन** उपलब्धेनापीत्यर्थः । जगतः ब्रह्मविरुद्धत्वात

---

1 ' दुपचि ' ख पाठः 2 ' वा ' ख पाठः

जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। जन्मस्थितिभङ्गं

नित्यशुद्धबुद्धस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्षयितुम्। नहि जातु कश्चित्कृतकत्वेन नित्यं लक्षयति। न च तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते; तस्यानुपलब्धचरत्वात्। प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धम्। एवं च न शब्दोऽप्यत्र प्रक्रमते; अत्यन्ताप्रसिद्धतया ब्रह्मणोऽपदार्थस्यावाक्यार्थत्वात्। तस्माल्लक्षणाभावान्न ब्रह्म जिज्ञासितव्यमित्याक्षेपाभिप्रायः। तमिममाक्षेपं भगवान्सूत्रकारः परिहरति—'जन्माद्यस्य यतः' इति। मा भूदनुभूयमानं जगत्तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणं, तदुत्पत्त्या तु भविष्यति, देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति तात्पर्यार्थः। सूत्रावयवान्विभजते—जन्मोत्पत्तिरादिरस्येति। लाघवाय सूत्रकृता जन्मादीति नपुंसकप्रयोगः कृतः, तदुपपादनाय समाहारमाह—जन्मस्थितिभङ्गमिति।

पिकः कोकिल इति कोकिलत्वेन पिकलक्षणवद् जगद्रूपेण ब्रह्म लक्षयितुमशक्यमित्यर्थः विरोध्यात्मत्वस्या-लक्षणत्वमुदाहरति—न हीति। नित्यत्वविरुद्धधर्मेण कृतकत्वेन यथा न नित्यं लक्ष्यते तथा ब्रह्मविरुद्धस्य धर्मेण जगदात्मत्वेन ब्रह्मापीत्यर्थः। अत्र विध्वंसीत्यनेन द्वितीयपक्षनिरासः सूचितः। सति लक्ष्ये नश्यतस्तल्लक्षणत्वाभावात् तद्धर्मेण प्रसिद्धमेव लक्षणम्। किं पुनः प्रसिद्धिलेशेनापि शून्यमित्यन्त्यपदम्। अलोकसिद्धस्यापि वेदसिद्धेर्लक्षणत्वमाशङ्क्याह—एवं चेति। लक्षणाक्षेपस्य वैफल्यमाशङ्क्य जिज्ञास्यत्वभङ्गः फलमित्याह—तस्मादिति। लक्षणसम्बन्धी किंशब्दस्तस्याक्षेपं प्रबोधयेत् न जिज्ञासायाः, अत आह—अभिप्राय इति। 'अत-आहेति'—अस्मादभिप्रायादाहेति भ्रमं नुदन्, अतः अस्याक्षेपस्य सम्भवात् परिहारो ग्राह्य इति आशयेनाह—तमिममिति। भाष्ये प्रत्यभिज्ञानाय भगवानिति। उक्ताक्षेपसमाधेर्भाष्येऽनुत्तानत्वात् व्यनक्ति—मा भूदिति। तादात्म्येन वेति। जगदात्मत्वस्य लक्षणत्वमेव। जगतः, तादात्म्येन लक्षणत्वम्। अत्यन्ताभेदे लक्ष्यस्यैव लक्षणत्वानुपपत्तेः। तदुत्पत्त्या तस्मादुत्पत्त्या जगतो लक्षणत्वं नाम जगतः कारणत्वस्य लक्षणभावः। कार्यकारणत्वमुखेन कारणं लक्षयतीत्युदाहरति—देशान्तरेति। व्रज्यायाः गतेः। सवितृदेशान्तरप्राप्त्यसमवायिकारणं सवितृगतिरिति पराभिमतलक्षणव-दित्यर्थः। जन्मोत्पत्तिरित्यादेराक्षेपानिरासित्वादसङ्गतिमाशङ्क्य वाक्यार्थबोधेऽभिप्रायस्फुरणात्, वाक्यार्थ-ज्ञानस्य पदार्थज्ञानमूलकत्वात् पदार्थानाहेत्याह—सूत्रेति। जन्मस्थितिभङ्गाः समासार्थ इति किं नोक्तमत आह—लाघवायेति। जन्मादयोऽस्येति निर्देशेऽक्षरगौरवादित्यर्थः। नपुंसकप्रयोगः नपुंसकैक-वचनप्रयोगः। तदुपपादनाय अन्तिमस्य पदस्य पुंस्त्वात् तदयोगमाशङ्क्योपपादनायेत्यर्थः। संसारस्य

समासार्थः । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च । श्रुतिनिर्देशस्तावत् 'यतो वा इमानि भूतानि जायन्ते' (तैत्ति. ३-२) इत्यस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् । वस्तुवृत्तमपि जन्मना

जन्मनश्च इत्यादिः कारणनिर्देशः इत्यन्तः संदर्भो निगदव्याख्यातः । स्यादेतत्—प्रधानकालग्रहलोकपालक्रियायदृच्छास्वभावाभावेषूपप्लवमानेषु सत्सु सर्वज्ञं सर्वशक्तिस्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः संभावनेत्यत आह—अस्य जगत इति । अत्र नामरूपाभ्यां व्याकृतस्य इति चेतनभावकर्तृकत्वसंभावनया प्रधानाद्यचेतनकर्तृकत्वं निरुपाख्यकर्तृकत्वं च व्यासेधति । यत्खलु नाम्ना रूपेण च व्याक्रियते तच्चेतनकर्तृकं दृष्टं, यथा घटादि । विवादाध्यासितं च जगन्नामरूपव्याकृतं तस्माच्चेतनकर्तृकं संभाव्यते । चेतनो हि बुद्धावालिख्य नामरूपे घट इति नाम्ना रूपेण च कम्बुग्रीवादिना बाह्यं घटं निष्पादयति । अत एव घटस्य

अनादित्वात् कथं जन्मादिरित्याशङ्क्य जन्मनश्चेति भाष्यं । श्रुतावपि चोद्यतौल्यमाशङ्क्य वस्त्विति भाष्यं तदपेक्षत्वं च तद्दर्शनमूलं इत्यभिप्रायेण द्वयोर्विवरणं जन्मादियोग्यस्य[1] प्रागनुक्तेरिदंशब्दायोगमाशङ्क्य बुद्धिसान्निध्यार्थमस्येति भाष्यं । ब्रह्मण इतिवत् नेयं कर्मणि षष्ठी किन्तु सम्बन्धमात्रे जन्मादेरकर्मकत्वादिति षष्ठीति भाष्यं । अग्निरस्ति यतो धूमो दृश्यते इतिवद् बोधकहेतुभ्रमो मा भूदिति—यत इति भाष्यं । यद्वा प्रकृतिपञ्चमीभ्रमशान्त्यै कारणमात्रं ग्राह्यमिति यत इति भाष्यमित्येतत् सुगममित्याह— जन्मनश्चेति । पदानि व्याख्याय योजनावाक्यार्थं कथयता कृतं जगद्वर्णनमनुपयोगीत्याशङ्क्याह—स्यादेतदिति क्रिया अदृष्टम् यदृच्छा निर्हेतुत्वम् स्वभावएव नियामक इति स्वभावपक्षः । अभावः शून्य जगत्कारणत्वे तान्येव ब्रह्मेति मा शङ्कीत्युक्तं—सर्वज्ञं सर्वशक्तिस्वभावमिति । ईदृशं खलु ब्रह्माभिमतं तेनेत्यर्थः । लक्षणाप्रवेशिभिर्विशेषणैः सर्वकार्यकारणत्वस्य ब्रह्मलक्षणस्यातिव्याप्तिशङ्कानुदयः सूच्यत इत्यर्थः । ननु तथापि यावन्तः पक्षाः न तावन्ति विशेषणानीत्याशङ्क्याह— अत्रेति । भावः सन् प्रधानादीत्यादिशब्देन भाष्ये वक्ष्यमाणानामणूनामपि सङ्ग्रहः । अनेन विशेषणेन कथं चेतनभावकर्तृत्वसम्भावना, अत आह—यत् खल्विति । अत्र च कृतकत्वादित्येव हेतुः, कुम्भवद् विमते चेतनजन्यत्वं साध्यम् । नामरूपादिग्रहणं तु विपक्षे बाधकसूचनाय । कार्येषु क्लृप्तस्य बुद्ध्यालेख्यस्य हेतोरभावे कार्यत्वभङ्गप्रसङ्गः बाधकम् पूर्वसूचितमाविष्करोति—चेतनो हीत्यादिना । घट इति नाम्ना कम्बुग्रीवादिना रूपेण च बुद्धावालिख्येत्यन्वयः चेतनो हीति हिशब्देन बुद्ध्यालेखानुभवो दर्शितः । कर्मत्वव्यपदेशानुपपत्त्याऽपि साधयति—अत एवेति । निर्वर्त्यत्वेन रूपेणासतः सङ्कल्पविषयात्मना

---

1 'गे अस्य' ख-पाठः

लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात्। अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः। षष्ठी जन्मादिधर्मसंबन्धार्था। यत इति कारणनिर्देशः। अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृ-

---

निर्वर्त्यस्याप्यन्तः संकल्पात्मना सिद्धस्य कर्मकारकभावो घटं करोतीति। यथाहुः—'बुद्धिसिद्धं तु न तदसत्' इति। तथा चाचेतनो बुद्धावनालिखितं करोतीति न शक्यं सम्भावयितुमिति भावः। स्यादेतत्—चेतना ग्रहा लोकपाला वा नामरूपे बुद्धावालिख्य जगज्जनयिष्यन्ति, कृतमुक्तस्वभावेन ब्रह्मणेत्यत आह—अनेककर्तृभोक्तृसंयुक्तस्येति। केचित्कर्तारो भवन्ति, यथा सूदर्त्विगादयः, न भोक्तारः। केचित्तु भोक्तारः यथा श्राद्धवैश्वानरीयेष्ट्यादिषु पितापुत्रादयः, न कर्तारः। तस्मादुभयग्रहणम्। देशकालनिमित्त-क्रियाफलानि इतीतरेतरद्वन्द्वः। देशादीनि च प्रतिनियतानि चेति विग्रहः। तदाश्रयो जगत्तस्य। केचित्खलु प्रतिनियतदेशोत्पादाः, यथा कृष्णमृगादयः। केचित्प्रतिनियत-कालोत्पादाः, यथा कोकिलारवादयः। केचित्प्रतिनियतनिमित्ताः यथा नवाम्बुदध्वानादिनिमित्ता बलाकागर्भादयः। केचित् प्रतिनियतक्रियाः, यथा ब्राह्मणानां याजनादयो नेतरेषाम्।

सिद्धिर्यदि न स्यात् कर्मकारकत्वन्निर्देशो न स्यादित्यर्थः। अत्र सत्कार्यवादिसम्मतिमाह—**यथेति**। बुद्धौ सङ्कल्पे सिद्धं तत्कार्यं अत्यन्तासन्नेत्यर्थः। कार्ये सङ्कल्पो हेतुरुक्तः तदभावात् कार्यभङ्गमुक्तपक्षेष्वाह—**तथा चेति**। निरुपाख्यस्याप्यचेतनपदेनैव सङ्ग्रहः, अनेकवर्त्ति, इति विशेषणं पूर्वं कथं नाभूत् अचेतनपक्षोक्तदोषाभावेन चेतनपक्षस्य सालम्बनत्वशङ्कापरिहारार्थतयात्रैव तदवसरादित्याह—**स्यादेतदिति**। एकग्रहे अन्यस्य नान्तरीयत्वादुभयग्रहवैयर्थ्यमाशङ्क्याह—**केचिदिति**। **सूदाः** पाचकाः। श्राद्धे पिता भोक्तैव, वैश्वानरीयेष्ट्यां पुत्रः फलस्य भोक्तैव। "वैश्वानरं द्वादशकपालान्निर्वपेत् पुत्रे जाते" इति विहिता वैश्वानरेष्टिः। तत्र "पूत एव तेजस्वी"त्यादिना पूत्रस्य पूतत्वतेजस्वित्वादिफलमुक्तम्। अनेन विशेषणेन भोक्तृणां ग्रहादीनां शरीरित्वेन सृज्यकोटिनिवेशात् कर्तृत्वानुपपत्तिरुक्ता। देशकालनिमित्तस्य क्रियाफलस्याश्रय इति विग्रहे देशकालादिवैयर्थ्यमाशङ्क्य समासान्तरमाह—**देशेति**। ननु द्वन्द्वे प्रतिनियतपदं कथमुपेक्षितम् तेन समासान्तरादित्याह—**देशादीनि चेति**। आश्रयपदस्य बहुव्रीहिं निरस्यति—**तदाश्रयः**। अत्रोपपत्तिं सूचयति—**जगदिति**। जगदिति[1] फलादिकं, न फलादौ जगदित्यर्थः। कोकिलादय इति पाठे तत्कूजितं विवक्षितं लक्ष्यम्—**याजनादय इति** अतो ब्राह्मणादयः प्रतिनियतक्रिया

---

[1] 'ति हि फ' क पाठः

संयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः। अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थि-

---

एवं प्रतिनियतफलाः। यथा केचित्सुखिनः, केचिद्दुःखिनः, एवं य एव सुखिनस्त एव कदाचिद्दुःखिनः। सर्वमेतदाकस्मिकापरनाम्नि यादृच्छिकत्वे च स्वाभाविकत्वे चासर्वशक्तिकर्तृकत्वे च न घटते; परिमितज्ञानशक्तिभिर्ग्रहलोकपालादिभिर्ज्ञातुं कर्तुं चाशक्यत्वात्। तदिदमुक्तम्—मनसाप्यचिन्त्यरचनारूपस्येति। एकस्या अपि हि शरीररचनाया रूपं मनसा न शक्यं चिन्तयितुं कदाचित्, प्रागेव जगद्रचनायाः, किमङ्ग पुनः कर्तुमित्यर्थः। सूत्रवाक्यं पूरयति—तद्ब्रह्मेति वाक्यशेषः। स्यादेतत्—कस्मात् पुनर्जन्मस्थितिभङ्गमात्रमिहादिग्रहेण गृह्यते, न तु वृद्धिपरिणामापक्षया अपीत्यत आह—अन्येषामपि भावविकाराणां—वृद्ध्यादीनां त्रिष्वेवान्तर्भाव इति। वृद्धिस्तावदवयवोपचयः। तेनाल्पावयवादवयविनो द्वितन्तुकादेरन्य एव महान्पटो जायत इति जन्मैव वृद्धिः। परिणामोऽपि त्रिविधो धर्मलक्षणावस्थालक्षणः उत्पत्तिरेव। धर्मिणो हि हाटकादेर्धर्मलक्षणः परिणामः कटकमुकुटादिस्तस्योत्पत्तिः। एवं कटकादेरपि प्रत्युत्पन्नत्वादिलक्षणः परिणाम उत्पत्तिः। एवमवस्थापरिणामो नवपुराणत्वा-

---

इत्यर्थः। पुरुषभेदात् प्रतिनियममभिधाय तदभेदेपि कालभेदात् प्रतिनियममाह—एवं य एवेति। किमस्य विशेषणस्य कृत्यं यादृच्छिकस्वभावपक्षयोः साक्षान्निरासः। ग्रहादिपक्षेऽभ्युच्चयश्चाह—सर्वमिति। आकस्मिकेति। भावप्रधानो निर्देशः। नियामकत्वाभावे अनियमपक्षस्वीकृतिः सम्भवति। नियामके स्वभाववादश्च न ग्राह्य इत्यर्थः। असर्वज्ञपक्षाघटने हेतुमाह—परिमितेति। उत्तरविशेषणस्य वैयर्थ्यमाशङ्क्य पूर्वविशेषणसामर्थ्यलब्धाशक्यत्वरूपफलाभिधायितामाह—तदिदमिति। अनुभवाश्रयणेनाशक्यतामाविष्करोति—एकस्या अपीति। वाक्ययोजनयार्थकथने अनुपात्तपदद्वयनिवेशनायोगं वाक्यशेष इति चासूत्रार्थोक्तिमाशङ्क्याह—सूत्रेति। साकाङ्क्षस्य पूरणाय तद् ब्रह्मेति पदद्वयम्। पूरणीयत्वहेतुसाकाङ्क्षत्वस्य ज्ञापनाय च वाक्यशेष इत्युक्तिरित्यर्थः। आदिपदेन स्थितिभङ्गग्रहाज्जन्मादीति त्रयं गृहीतम् न त्वन्येषामन्तर्भावात्, अतोऽन्येषामपीति भाष्यायोगमाशङ्क्य-अन्येषामप्यादिपदेन ग्राह्यत्वशङ्कामाकृष्य त्रयाणामेव ग्रहहेतुरयमित्याह—स्यादेतदिति। आदिग्रहणेन जन्मपदोपेतेन वृद्ध्यादिग्रहशङ्कायामन्येषां भावविकाराणामिति व्यधिकरणोत्तरमाशङ्क्याह—वृद्ध्यादीनामिति। त्रयाणां त्रिष्विति यथासङ्ख्यभ्रमं नुदन्नन्तर्भावं विवृणोति—वृद्धिरित्यादिना। धर्मलक्षणः परिणामः साङ्ख्याभिमतः तस्य हाटकादेः कटकादिरूपेणोत्पत्तिरित्यर्थः। —प्रत्युत्पन्नत्वं वर्तमानत्वम्। आदिपदाद् भविष्यत्वातीतत्वग्रहणम्। कटकादेर्लक्षणपरिणामः

तिनाशानामिह ग्रहणम् । यास्कपरिपठितानां तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्यमानत्वान्मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत, तन्मा शङ्कीति योत्पत्ति-

---

द्युत्पत्तिः । अपक्षयस्त्ववयवह्रासो नाश एव । तस्माज्जन्मादिषु यथास्वमन्तर्भावाद्वृद्ध्यादयः पृथङ्नोक्ताः इत्यर्थः । अथैते वृद्ध्यादयो न जन्मादिष्वन्तर्भवन्ति, तथाप्युत्पत्तिस्थितिभङ्गमेवोपादातव्यम्; तथा सति हि तत्प्रतिपादके 'यतो वा इमानि भूतानि' इति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणं ब्रह्म लक्षितं भवति, अन्यथा तु जायतेऽस्ति वर्धत इत्यादीनां ग्रहणे तत्प्रतिपादकं नैरुक्तवाक्यं बुद्धौ भवेत्, तच्च न मूलकारणप्रतिपादनपरम्, महासर्गादूर्ध्वं स्थितिकालेऽपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्तेः, इति शङ्कानिराकरणार्थं वेदोक्तोत्पत्तिस्थितिभङ्गग्रहणमित्याह— यास्कपरिपठितानां त्विति । नन्वेवमप्युत्पत्तिमात्रं सूच्यतां, तन्नान्तरीयकतया तु स्थितिभङ्गं गम्यत इत्यत आह— योत्पत्तिर्ब्रह्मणः कारणादिति । त्रिभिरस्योपादानत्वं सूच्यते । उत्पत्तिमात्रं तु निमित्तकारण-

---

तदीयवर्तमानत्वादिजन्मेत्यर्थः नवपुराणत्वादिलक्षणः । अधीतादौ अतीतातीततरातीततमत्वादिलक्षणः । वृद्ध्याद्यग्रहहेतोरन्तर्भावस्योक्तत्वाद्यास्कपरिपठितानां ग्रहण इत्यप्रसक्तानुवादः मूलकारणादुत्पत्त्याद्यग्रहशङ्कोक्तिरप्ययुक्ता मूलकारणकार्येष्वपि वृद्धिपरिणामादेरसत्वात् स्थितिकाले सम्भाव्यमानत्वादिति शङ्काहेतुश्चायुक्तः, तावता प्राक्काले सम्भावितस्यानिवृत्तेरत आह—अथेति । अनन्तर्भावमभ्युपेत्यायं परिहार इति प्रथमानुपपत्तिनिवृत्तिरनेन सूचिता । नैरुक्तं यास्कप्रोक्तनिरुक्तिगतम् । बुद्धौ भवेत् अर्थप्रत्यभिज्ञानादित्यर्थः । इष्टापत्तिं परिहरति—तच्चेति । न मूलकारणप्रतिपादनपरम् न मूलकारणकार्यस्य भावविकारपरं, पुरुषाणां श्रुतिं विनातीन्द्रियार्थज्ञानाशक्तेः, इत्यर्थः । अनेन द्वितीयानुपपत्तिः शमिता न च भावविकारोक्त्यनुपपत्त्यैव मूलकारणकार्यविकारदर्शिता अन्यथाप्युपपत्तेरित्यभिप्रायेण भाष्यस्थो हेतुरिति तृतीयानुपपत्तिं नुदन्नपिशब्दमध्याहृत्याह—महासर्गादिति । तन्मा शङ्कीति जन्मस्थितिनाशानामिति पूर्वान्वये सिद्धे योत्पत्तिरित्यादिविलक्षणनिर्देशोऽधिक इत्याशङ्क्य शङ्कोत्तरत्वमाह—नन्विति । ननु त्रयाणामिहाप्रतीतौ यत इति वाक्यप्रत्यभिज्ञा न स्यादत आह—तन्नान्तरीयकेति । षष्ठीशङ्कां नुदति—कारणादिति । पदाग्राह्यत्वशङ्कायां गृह्यन्त इति नोत्तरमत आह—त्रिभिरिति । यद्यप्युत्पत्त्यैव स्थितिभङ्गप्रतीतिः तथापि न ब्रह्मणि स्थितिलयाविति प्रतीतिः । ततश्चोपादानत्वं न सूच्येत । अतस्तदर्थं तत्सम्बन्धित्वेन त्रयाणां ग्रहणमित्यर्थः । उपादानत्वसूचनाय त्रयाणां ग्रहणमिति भाष्ये न

ब्रह्मणस्तत्रैव स्थितिः प्रलयश्च त एव गृह्यन्ते । न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वान्यतः प्रधानादचेतनादणुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम् । न च स्वभावतः; विशिष्टदेशकालनिमित्तानामिहोपादानात् । एतदेवानुमानं संसारिव्यतिरिक्तेश्वरा-

---

साधारणमिति नोपादानं सूचयेत् । तदिदमुक्तम् - तत्रैवेति । पूर्वोक्तानां कार्यकारणविशेषणानां प्रयोजनमाह - न यथोक्तेति । तदनेन प्रबन्धेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वारेण संभावनोक्ता । तत्र प्रमाणं वक्तव्यम् । यथाहुर्नैयायिकाः—'संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना । न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥ यथा च वन्ध्या जननी' इत्यादिरिति । इत्थं नाम जन्मादिसंभावनाहेतुः, यदन्ये वैशेषिकादयः इत एवानुमानादीश्वर-

---

भाति अत आह—**तदिदमिति** । स्थितिः प्रलयश्चेत्यनुक्त्वा, तत्रैवेत्यधिकम् उपपन्नं तेनेदमभिप्रेतमिति गम्यत इत्यर्थः । ननु किमुपादनत्वसूचनेन, निमित्तेऽतिव्याप्तिनिवृत्तिश्चेत्, किं तत्! अदृष्टादीतिचेत्, न, तस्यापि कार्यत्वेन सर्वकार्यकारणत्वाभावात् कार्यमात्रकारणत्वस्य च लक्षणत्वात् । अविद्यायामतिव्याप्तिनिवृत्तिः फलमिति चेत्, न, तस्या अपि प्रतिजीवं भिन्नत्वेनैकपुरुषाविद्यायाः पुरुषान्तरासाधारणकार्यहेतुत्वाभावात्, मुक्ताविद्यायाश्च तदनन्तरकार्याहेतुत्वात्, जीवन्मुक्तदशायां ध्वस्ताया अविद्यायाः स्वसंस्कारजकार्याहेतुत्वात्, इहैवोपादानत्वोक्तौ प्रकृत्यधिकरणपौनरुक्त्यात्, अत्रोक्तस्य तत्राक्षिप्य समाधानमित्युक्तौ च "तच्च घटरुचकाना"मित्यादि प्रकृत्यधिकरणस्थ भाष्यविरोधात् । कारणतामात्रेण लक्षणतोपपत्तौ तद्विशेषस्योपादानत्वस्य वैयर्थ्याच्च । सत्यम् । प्रकृत्यधिकरणस्थमेवोपादानत्वं सिद्धान्तत्वादिह व्यवह्रियते । न त्वेतदपि कारणार्थत्वेन, तदिदमुक्तं सूच्यत इति । सिद्धान्त्यभिप्रेतमितरत्र वक्ष्यमाणमिह सूच्यते न तु प्रतिपाद्यत इत्यर्थः । यद्यपि 'इदं यतः' इत्येतावदलं सूत्रं, तथापि लिलक्षयिषितं "यतो वा" इत्यादिवाक्यमनुसरता सूत्रकारेण जन्मादीनि त्रीण्युपात्तानि । तदुक्तं भगवता भाष्यकारेण **योत्पत्तिर्ब्रह्मण इति** । अत्र हि यच्छब्देन यत इति श्रौती प्रसिद्धिर्द्योत्यते । नामरूपाभ्यामित्यादिविशेषणैरेव प्रधानादेर्निराकृतत्वात् पौनरुक्त्यमाशङ्क्य तद्विवरणत्वमाह—**पूर्वोक्तेति** । लक्षणरूपके फलव्यतिरेकेणैव प्रतिज्ञातब्रह्मप्रमितौ तत्प्रमाणसमर्पकशास्त्रयोनित्वसूत्रस्य, तत्प्रामाण्यस्थापकसमन्वयसूत्रस्य च वैफल्यमाशङ्क्याह **तदनेनेति** । तत्र सम्भाविते ब्रह्मणि । वक्तव्य स्थाप्यं चोत्तरसूत्राभ्यामित्यर्थः । तर्ह्युत्तरसूत्राभ्यामेवालम्, अत आह—**यथाहुरिति** । नन्वेतदेवानुमानमिति परमतोक्तिर्दूषणाय, संवादाय वा, नाद्यः दूषणादर्शनात्, न द्वितीयः स्वाभिमत सम्भावनामात्रहेतुत्वे संसार्य[1] व्यतिरेकविरोधित्वात् अत आह इत्थमिति । सिद्धान्तिनोऽपीश्वरकारणिकत्वोक्तेः तेन चानुमानान्निश्चयानङ्गीकरणाद् अत उक्तम् अन्य इति । इच्छन्तीत्यनयोक्त्या

---

[1] 'र' क पाठः

स्तित्वादिसाधनं मन्यन्त ईश्वरकारणिनः । नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे, न; वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम् । वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते । वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिर्नानुमानादिप्रमाणान्तरनिर्वृत्ता । सत्सु तु वेदान्तवाक्येषु

विनिश्चयमिच्छन्तीति संभावनाहेतुतां द्रढयितुमाह—एतदेवेति । चोदयति—नन्विहापीति । एतावतैवाधिकरणार्थे समाप्ते वक्ष्यमाणाधिकरणार्थमनुवदन्सुहृद्भावेन परिहरति—न । वेदान्तेति । वेदान्तवाक्यकुसुमग्रथनार्थतामेव दर्शयति—वेदान्तेति । विचारस्याध्यवसानं सवासनाविद्याद्वयोच्छेदः । ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भावः । तत्किं ब्रह्मणि शब्दादृते न मानान्तरमनुसरणीयम् ? तथा च कुतो मननम् ? कुतश्च तदनुभवः साक्षात्कारः ? इत्यत आह—सत्सु तु वेदान्तवाक्येष्विति । अनुमानं वेदान्ताविरोधि तदुपजीवि चेत्यपि द्रष्टव्यम् । शब्दाविरोधिन्या

यत्र निपुणानामपि निश्चयभ्रमः, क्वैव कथा तस्य सम्भावकत्वमिति भावः । एतदेवेश्वरास्तित्वसाधनमनुमानमन्ये मन्यन्ते इहापि तदेवोपन्यस्तं नन्वतस्सम्भावनाहेतुरिति पूर्वसम्बन्धं नेत्युत्तरग्रन्थारम्भविरोधिनं परिहरति—चोदयतीति । ननु ब्रह्मण्येतदेव प्रमाणमिति शास्त्रयोनित्वसूत्रे वक्ष्यते । अतो नात्र शङ्कितव्यम् परिहर्तव्यं च । किन्तु लक्षणसूत्रार्थस्य समाप्तत्वादुत्तरसूत्रमेवारम्भणीयम् अत आह—**एतावतेति । सुहृद्भावेनेति ।** लक्षणसूत्रार्थसिद्धये सर्वज्ञत्वदृढीकारस्वरूपस्योत्तरसूत्रार्थस्याभ्यर्हितत्वेन पूर्वसन्निकर्षाय प्रथमवर्णनीयत्वे द्वितीयवर्णके[1] वेदैकवेद्यत्व प्रतिपादनपर्यन्तं शिष्याणां प्रागुक्तशङ्कोदयवतामतिक्लेशो मा भूदिति कृपालुतयेत्यर्थः । ग्रथनार्थत्वमुपक्षिप्योदाहृत्य विचार्यन्ते इत्यन्यस्योक्तिरयुक्तेत्याशङ्क्य ग्रथनस्यैतद्विवरणमित्याह—**वेदान्तेति ।** वाक्यान्यनिष्पाद्यैव विचार्यन्त इति सूचयितुं कुसुमग्रहणम् । अवसितेऽपि विचारे अवगत्यभावाद् विचारावसाननिर्वृत्तेत्ययुक्तमाशङ्क्याह—**विचारस्येति ।** यद्यप्यविद्याद्वय एव वासना प्रविष्टा, तथापि सचैत्रा सभेतिवत् समुदायस्य समुदायिसाहित्योक्तिर्युक्तैव । यद्वा द्वितीयाऽविद्या दोषः, उच्छेदोदयमननादिद्वारा विचारफलत्वात्तदवसानम् । अवसानरूपेण निर्वृत्तेतिभ्रमं, नित्यस्य निर्वृत्त्ययोगशङ्कां च परिहरति—**तत इति ।** आविर्भावः केवलत्वं, वेदान्तार्थसम्भावनाहेतुत्वस्य प्रागेवोक्तत्वात् तदर्थग्रहणदाढ्र्यायेत्युत्तरभाष्यं वृथेत्याशङ्क्य नानुमानादिप्रमाणान्तरनिर्वृत्तेति पूर्ववाक्ये अनुमानादेस्स्वातन्त्र्यनिवृत्तिपरेऽप्यस्यात्यन्तनिवृत्तिरुक्तेति भ्राम्यतः शङ्कां पूर्वोक्तानुस्मरणेन परिहरतीत्याह—**तत्किमिति ।** अविरोधिन्यपि युक्तिः कथं वेदार्थे प्रमाणम् अतिगहनस्य तस्याप्रतिष्ठितेन तर्केणासिद्धेरत आह—**तदुपजीवि चेति ।** तदुपजीवित्वं च स्वार्थनिश्चये न तु सम्भावनायामित्यर्थः । कुतो मननमित्येतदुद्धरति

---

1 'क' क - पाठः

जगतः जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्यते; श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात्। तथा हि—'श्रोतव्यो मन्तव्यः' (बृह- २-४-५) इति श्रुतिः 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेद' (छान्दो. ६-१४-२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति । न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किन्तु श्रुत्यादयोऽनुभवादयश्च

तदुपजीविन्या च युक्त्या विवेचनं मननम् । युक्तिश्चार्थापत्तिरनुमानं वा । स्यादेतत् —यथा धर्मे न पुरुषबुद्धिसाहाय्यम्, एवं ब्रह्मण्यपि कस्मान्न भवतीत्यत आह—न धर्मजिज्ञासायामिवेति । श्रुत्यादय इति । श्रुतीतिहासपुराणस्मृतयः प्रमाणम् । अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारस्तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलम् । तच्च फलमिव फलमिति गमयितव्यम् । यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारः, तथापि साक्षान्नास्ति, ब्रह्मजिज्ञासायां तु साक्षादनुभवादीनां संभवोऽनुभवार्था च ब्रह्मजिज्ञासेत्याह —

शब्देति । तर्ह्यनुमानप्रामाण्योक्तिरयुक्ता मननसिद्धौ युक्तिप्रामाण्यस्य वाच्यत्वादत आह—युक्तिश्चेति । प्रमाणानुग्राहकत्वात् अनयोर्युक्तित्वोक्तिः । अकाण्डे मीमांसाद्वयविवेचनमयुक्तं श्रुत्यादीनां ज्ञेये प्रमाणत्वात् जिज्ञासायां प्रामाण्योक्तिश्चायुक्ता, अत आह—कस्मादिति । वेदार्थत्वाविशेषे वैषम्यमाकस्मिकमित्यर्थः । धर्मवद्ब्रह्मैकवेद्येऽन्यप्रमाणाभावशङ्कायाः परिहारे श्रुतिशब्देन वेदो ग्राह्यः, एवं चादिशब्देन लिङ्गादेः, विसदृशस्यान्यस्य ग्राह्यत्वादादिशब्दायोगमाशङ्क्याह—श्रुतीति । प्रमाणरूपेणैकीकृत्य बहुष्वेकवचनमिति दर्शयन्नाह—प्रमाणम् इति । आत्मरूपस्यानुभवस्य कथं तत्र प्रामाण्यमत आह—अनुभव इति । सुखादिवृत्तिं व्यवच्छिनत्ति—भेद इति । श्रुत्यादिवृत्तीनामपि तथात्वात् पृथक्कथायोगमाशङ्क्य आह—साक्षात्कार इति । ननु साक्षात्कारः प्रमाणफलं न तु प्रमाणं फलान्तराभावात् अत आह—तस्येति । वेदान्तरूपग्रहणादौ धर्मजिज्ञासायामपि प्रत्यक्षाद्यपेक्षणाच्छ्रुत्यादय एवेति अवधारणायोगमाशङ्क्याह—यद्यपीति । न धर्मजिज्ञासायामिति ग्रन्थे धर्मब्रह्मपदाभ्यां धर्मविलक्षणत्वाद् ब्रह्मणो मानान्तरयोग्यत्वमिति भाति । किमनुभवावसानत्वादिति हेतुना किंचास्य योग्यत्वात् प्रमाणमिति प्रतिज्ञातैर्धर्मिभिरसम्बन्धः, तत्र च भागासिद्धिरिति, आशङ्क्य न केवलं धर्मविलक्षणत्वात्, ब्रह्मणि मानान्तरस्य सम्भावना किन्तु तन्निश्चयः, जिज्ञासापरमफलस्य स्वरूपसाक्षात्काराविर्भावस्यापरोक्षान्तःकरणवृत्तिमन्तरेणाभावादिति भाष्यार्थं दर्शयन् इह प्रमाणमित्यत्रत्येहशब्दार्थेन हेतोरसम्बन्धमाह—अनुभवार्था चेति । अनुभवशब्दस्य स्मृतिव्यतिरिक्तज्ञानवाचित्वादुक्ताभिप्रायासिद्धिमा-

यथासंभवमिह प्रमाणं; अनुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य। कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य। कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म, यथाश्वेन गच्छति पद्भ्यामन्यथा वा, न वा

अनुभवावसानत्वात्। ब्रह्मानुभवो ब्रह्मसाक्षात्कारः परमपुरुषार्थः, निर्मृष्टनिखिलदुःखपरमानन्दरूपत्वादिति। ननु भवतु ब्रह्मानुभवार्था जिज्ञासा, तदनुभव एव त्वशक्यः, ब्रह्मणस्तद्विषयत्वायोग्यत्वादित्यत आह—भूतवस्तुविषयत्वाच्च ब्रह्मविज्ञानस्येति। व्यतिरेकसाक्षात्कारस्य विकल्परूपो विषयविषयिभावः, नत्वेवं धर्मज्ञानमनुभवावसानं; तदनुभवस्य स्वयमपुरुषार्थत्वात्, तदनुष्ठानसाध्यत्वात् पुरुषार्थस्य, अनुष्ठानस्य च विनाप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेरित्याह—कर्तव्ये हीत्यादिना। न चायं साक्षात्कारविषयतायोग्योऽप्यवर्तमानत्वात्, अवर्तमानश्चानवस्थितत्वादित्याह—पुरुषाधीनेति। पुरुषाधीनत्वमेव लौकिकवैदिककार्याणामाह—

शङ्कयाह—ब्रह्मानुभव इति। तथापि न तदर्था जिज्ञासा सुखदुःखप्राप्तिपरिहारार्थत्वात्तस्याः, अत आह—परम इति। तस्मात्तदर्थो वृत्तिसाक्षात्कारोऽवश्यंभावीत्युपसंहारदृष्ट्याह—इतीति। भूतवस्तुविषयत्वाच्चेत्यनुभवावश्यकत्वे युक्त्यन्तरं, तदयुक्तं, अतीन्द्रियभूतविषयेषु व्यभिचाराद् ब्रह्मज्ञानस्येति चाधिकमित्याशङ्कयाशक्यत्वशङ्कापरिहारोऽयं ज्ञानस्य तद्विषयत्वशङ्कोत्तरत्वाद् ब्रह्मज्ञानस्येति नाधिकमिति मत्वाऽह—नन्विति। तदनुभवः स्वरूपानुभवार्थो वृत्तिरूपः। तद्विषयत्वायोग्यत्वादिति। धर्मवद्वेदार्थत्वादित्यर्थः। वेदार्थस्याप्यार्थवादिकादेः सिद्धवस्तुनः प्रत्यक्षत्वदर्शनादिति भाष्यार्थः। भवतु भूतस्य जडस्य साक्षात्कारविषयत्वं, न ब्रह्मणः स्वप्रकाशत्वादत आह—व्यतिरेकेति। स्वरूपाद्व्यतिरेकवतो वृत्तिसाक्षात्कारस्य ब्रह्मणा सह विषयविषयिभावात्मा सम्बन्धः, वृत्त्यैव उपाधिभूतया विकल्पनोपादानेन कृतो घटत इत्यर्थः। कर्तव्ये हि विषये नानुभवापेक्षेति निर्युक्तिकमत आह—नत्विति। पुरुषाधीनात्मलाभत्वाच्चेति श्रुत्यादीनामेव प्रामाण्ये हेत्वन्तरं भाति, तदयुक्तम्, पुरुषाधीनेऽपि भोजनादौ श्रुत्याद्यप्रामाण्यादत आह—न चायमिति। अयं कर्तव्यो विषयः अवर्तमानत्वात्कर्तव्यत्वेनावगमदशायामित्यर्थः। प्रक्रान्तमुत्सृज्य स्वतन्त्रप्रतिज्ञान्तरमिति शङ्कां नुदति—पुरुषेति। जात्यभिप्रायेण लौकिकं वैदिकं चेत्येकवचनमित्याशयेनोक्तं—कार्याणामिति। अनन्तरवाक्ययोर्यथा तथा योगादन्योन्योपमानोपमेयता भाति सा व्यर्थेत्याशङ्क्याह—लौकिकमिति। कथं तर्हि तथेति, यथा चेति वक्तव्यत्वादत आह—लौकिकेनेति। लोके एकमेवोदाहरणं दर्शितम्।

गच्छतीति । तथा 'अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोत्यनुदिते जुहोति' इति । विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च । न तु वस्त्वेवं नैवमस्ति नास्तीति

कर्तुमकर्तुमिति । लौकिकं कार्यमनवस्थितमुदाहरति—यथाश्वेनेति । लौकिकेनोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति—तथातिरात्र इति । कर्तुमकर्तुमित्यस्येदमुदाहरणमुक्तम् । कर्तुमन्यथा वा कर्तुमित्यस्योदाहरणमाह—उदित इति । स्यादेतत्—पुरुषस्वातन्त्र्यात् कर्तव्ये विधिप्रतिषेधानामानर्थक्यम्, अतदधीनत्वात् पुरुषप्रवृत्तिनिवृत्त्योरित्यत आह—विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः । गृह्णातीति विधिः । न गृह्णातीति प्रतिषेधः । उदितानुदितहोमयोर्विधी । एवं नारास्थिस्पर्शननिषेधो ब्रह्मघ्नश्च तद्धारणविधिरित्येवंजातीयका विधिप्रतिषेधा अर्थवन्तः । कुत इत्यत आह—विकल्पोत्सर्गापवादाश्च । चो हेतौ । यस्माद्ग्रहणाग्रहणयोरुदितानुदितहोमयोश्च विरोधात्समुच्चयासंभवे तुल्यबलतया च बाध्यबाधकभावाभावे सत्यगत्या विकल्पः । नारास्थिस्पर्शननिषेधतद्धारणयोश्च विरुद्धयोरतुल्यबलतया न विकल्पः । किन्तु सामान्यशास्त्रस्य स्पर्शनिषेधस्य धारणविधिविषयेण विशेषशास्त्रेण बाधः । एतदुक्तं भवति—विधिप्रतिषेधैरेव स तादृशो विषयोऽनागतोत्पाद्यरूप उपनीतः, येन पुरुषस्य विधिनिषेधाधीनप्रवृत्तिनिवृत्त्योरपि स्वातन्त्र्यं

वैदिके किमित्युदाहरणान्तरमत आह—**कर्तुमिति** । एकेनैव सर्वलाभाल्लौकिकमेकमेवोदाहृतम् । तदलाभात्तु वैदिके द्वितीयमित्यर्थः । विधिप्रतिषेधानामेवोदाहृतत्वाद् विधिप्रतिषेधा इति पुनरुक्तम् **अर्थवन्त** इति च वृथा अभिधायकत्वस्य स्फुटत्वेनावक्तव्यत्वादत आह—**स्यादेतदिति** । **आनर्थक्यं** निष्प्रयोजनत्वम् कर्तव्ये विधिप्रतिषेधानामानर्थक्यमित्यन्वयः । नानर्थक्यं प्रवृत्त्यर्थत्वादत आह—**अतदधीनत्वादिति** । तदसिद्धमत आह—**पुरुषेति** । **स्वातन्त्र्यात्** त्वदुक्तरीत्येति शेषः । प्रतिवाक्यं पूर्वो विधिः उत्तरो निषेधः इति भ्रमं निरस्यति—**गृह्णातीत्यादिना** । एतावन्त एव विधिप्रतिषेधा इति भ्रमं नुदति—**एवमिति** । प्रतिज्ञाते हेतुमनुक्त्वा प्रतिज्ञान्तरमयुक्तमत आह—**कुत इति** । नात्र हेतुर्भाति अत आह—**च इति** । यदि चो हेतौ किमवशिष्टेन, यदि तत्सहितः अहेतौ तर्हि, सर्वस्य विकल्पोत्सर्गापवादत्वादसिद्धेरत आह—**यस्मादिति** । नन्वनेन हेतुना पुरुषस्वातन्त्र्यप्रतिषेधात् पुरुषाधीनात्मलाभत्वं प्रागुक्तं भज्येत । तदप्रतिषेधे विध्याद्यानर्थक्यतादवस्थ्यमित्याशङ्क्योभयाविरोधमाह—**एतदिति** । पुरुषस्वातन्त्र्यार्हत्वं दर्शयति—**उत्पाद्येति** । तत्र हेतुः **अनागतेति** । **येन** विषयेण । विध्यादिव्यतिरेके हितसाधनत्वाज्ञानात् तदपेक्षा । तैरेवाव्यवस्थितसाधनोपदेशादेकतरपक्षपाते पुरुषस्यैव स्वातन्त्र्यमित्यर्थः । न तु

वा विकल्प्यते, विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः । न वस्तुयाथात्म्यज्ञानं

भवतीति, भूते वस्तुनि तु नेयमस्ति विधेत्याह—न तु वस्त्वेवं नैवमिति । तदनेन प्रकारविकल्पो निरस्तः । प्रकारिविकल्पं निषेधति—अस्ति नास्तीति । स्यादेतत् । भूतेऽपि वस्तुनि विकल्पो दृष्टः, यथा स्थाणुर्वा पुरुषो वेति, तत्कथं न वस्तु विकल्प्यत इत्यत आह—विकल्पनास्त्विति । पुरुषबुद्धिः—अन्तःकरणं, तदपेक्षा विकल्पनाः—संशयविपर्यासाः । सवासनमनोमात्रयोनयो वा, यथा स्वप्ने । सवासनेन्द्रियमनोयोनयो वा, यथा स्थाणुर्वा पुरुषो वेति स्थाणौ संशयः, पुरुष एवेति वा विपर्यासः, अन्यशब्देन वस्तुतः स्थाणोरन्यस्य पुरुषस्याभिधानात्, न तु पुरुषतत्वं वा स्थाणुतत्त्वं वापेक्षन्ते; समानधर्मधर्मिदर्शनमात्राधीनजन्मत्वात् । तस्मादयथावस्तवो विकल्पना न वस्तु विकल्पयन्ति वान्यथयन्ति वेत्यर्थः । तत्त्वज्ञानं तु न बुद्धितन्त्रं, किंतु

वस्तित्वत्याद्ययुक्तं, वस्तुन एव धर्मस्य विकल्पितत्वादत आह—**भूत इति** । अस्ति नास्तीति पुनरुक्तमत आह—**तदनेनेति** । विकल्पनाः पुरुषबुद्ध्यपेक्षा इत्ययुक्तम् । विधिनिषेधापेक्षत्वात्, अथ भूतगोचर-विकल्पना विवक्षिताः, तर्हि तदभावस्योक्तत्वात् कारणोक्तिर्व्याहता । अत आह—**स्यादेतदिति** । बुद्ध्यपेक्षा इत्ययुक्तं विकल्पनानां बुद्धित्वादत आह—**पुरुषेति** । उदाहरणार्थं भाष्यस्थविकल्पनाशब्देन विपरीतकल्पनात्वाद् विपर्ययो विगृहीत इत्याह—**संशयविपर्यासा इति** । ननु तत्त्वज्ञानमपि पुरुष-बुद्ध्यपेक्षम् । अथ पुरुषबुद्धिमात्रापेक्षत्वं विवक्षितं **तदसिद्धम्** । संस्काराद्यपेक्षणादत आह—**सवासनेति** । इन्द्रियमनोयोनय इत्यत्रापि मात्रग्रहणं द्रष्टव्यम् । यथा स्थाणुर्वेत्यत्र यथाशब्दस्योपरि जागर इति पठनीयम् । उक्तसंशयविपर्ययस्थले सवासनेन्द्रियमनोमात्रयोनित्वे हेतुमाह—**अन्यशब्देनेति** । **अन्यशब्देन** स्थाण्वपेक्षया अन्यस्य पुरुषस्य शब्देन, पुरुषादन्यस्य वस्तुभूतस्य सतोभिधानात् पुरुषत्वेनाभिधानादित्यर्थः । यत्र पुरुषस्येति पदं नास्ति स पाठः श्रेयान् । तत्रैषा योजना अन्यशब्देन, अन्यस्य स्थाणोर्वस्तुनोऽभिधानादिति । अदृष्टादियोनित्वान्मात्रग्रहायोगमाशङ्क्याह—**नत्विति** । वस्तुतत्त्वापेक्षाव्यावृत्तिर्मात्रचोऽर्थ इत्यर्थः । सत्यपि स्थाणुतत्त्वे नापेक्षन्ते । कैव कथा पुरुषतत्त्वानपेक्षायामिति मत्वोक्त **स्थाणुतत्त्वं वेति** । तदनपेक्षायां तदाकारनियतस्य प्रत्ययस्य कथं जन्म, अत आह—**समानेति** । चकारः शङ्कोच्छेदे वस्तुनि विकल्पो दृश्यत इति शङ्कायां विकल्पान्तरेणोक्तिर्नोत्तरमत आह—**तस्मादिति** । **अयथावस्तवः** वस्त्वननुसारिण्यः । **विकल्पयन्ति** विकल्पितरूपं कुर्वन्ति । विकल्प्यमानं रूपं प्रत्ययमात्रगामि न वस्तु-स्पृगित्यर्थः । वस्तुनि विकल्पासहत्वमाशङ्क्य पर्यहारि । अस्मिन् प्रस्तावे तत्त्वज्ञानस्य पुरुषबुद्ध्यनपे-

पुरुषबुद्ध्यपेक्षम् । किं तर्हि ? वस्तुतन्त्रमेव तत् । न हि स्थाणावेकस्मिन्स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति । तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम् । स्थाणुरेवेति तत्त्वज्ञानं, वस्तुतन्त्रत्वात् । एवंभूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम् । तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव; भूतवस्तुविषयत्वात् । ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तर-

---

वस्तुतन्त्रम् , अतस्ततो वस्तुविनिश्चयो युक्तः न तु विकल्पनाभ्य इत्याह—न वस्तुयाथात्म्येति । एवमुक्तेन प्रकारेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यस्य वस्तुतन्त्रतां प्रसाध्य ब्रह्मज्ञानस्य वस्तुतन्त्रतां आह—तत्रैवं सतीति । अत्र चोदयति—ननु भूतेति । यत् किल भूतार्थं वाक्य तत्प्रमाणान्तरगोचरार्थतयानुवादकं दृष्टम् । यथा नद्यास्तीरे फलानि सन्तीति । तथा च वेदान्ताः । तस्मात् भूतार्थतया प्रमाणान्तरदृष्टमेवार्थमनुवदेयुः । उक्तं च ब्रह्मणि जगज्जन्मादिहेतुकमनुमानं प्रमाणान्तरम् । एवं च मौलिकं तदेव परीक्षणीयं, न तु वेदान्तवाक्यानि तदधीनसत्यत्वानीति कथं वेदान्तवाक्यग्रथनार्थता सूत्राणामित्यर्थः । परिहरति—

क्षतोक्तिरसङ्गतेत्याशङ्क्य विकल्प्यमानस्यापि रूपस्य ज्ञानोपनीतत्वाविशेषात् स्थाणुत्ववद् वस्तुस्पर्शोऽभ्युपगन्तव्य इति शङ्कायां वस्तुतन्त्रज्ञानोपनीतत्वेन वस्तुत्वं न ज्ञानोपनीतत्वेन । न च वैकल्पिकं रूपं वस्तुतन्त्रज्ञानोपनीतं बुद्धितन्त्रज्ञानोपनीतस्योक्तत्वादिति परिहारपरं भाष्यमिति दर्शयन्नाह—**तत्त्वज्ञानन्त्विति** । **वस्तुनिश्चयः** वस्तुनो ज्ञानोपनी[1]तस्य आकारस्य निश्चयोऽभ्युपगमः । एवम्भूतविषयाणामित्यत्रैवमिति पूर्वोपमानं प्रतीयते, तदयुक्तम् पूर्वमपि भूतवस्तुविषयतत्त्वज्ञानस्यैव न वस्तुयाथात्म्यज्ञानमित्यादिना वर्णितत्वात् , तत्रैवं सतीत्यपि न वक्तव्यम् वस्तुयाथात्म्यज्ञानमित्यत्रैव ब्रह्मज्ञानस्यापि प्रवेशादित्याशङ्क्य, एवंशब्दः प्रकारार्थः । तच्च भाष्यमुपसंहारार्थम् तत्रैवं सतीति च सामान्येनोक्तस्य विशेषयोजनमित्यभिप्रेत्याह—**एवमिति** । **वस्तुतन्त्रतामिति** प्रसाधनमेव प्रामाण्यस्य वस्तुतन्त्रताप्रसाधनम् । **प्रसाध्य** तत्त्वज्ञानादेव वस्तुनिश्चयः न तु विकल्पनाभ्य इत्येतदर्थमिति शेषः । भाष्ये भूतवस्तुविषयत्वादिति भूतवस्तुविषयप्रमाणत्वादित्यर्थः । ननु ब्रह्मज्ञानस्य वस्तुतन्त्रतोक्तिः किमर्था, साक्षात्कारिप्रमाविषयतायोग्यत्वविरोधिविकल्पाप्राप्त्यर्थमिति ब्रूमः । भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्येत्यत्र, एतच्चोद्यं कथं नाकारि तत्र कर्तव्यवैषम्यादेर्निरूप्यशेषस्य सत्त्वात्तदन्ते तस्यावसरादित्याह—**अत्रेति** । प्रमाणान्तरविषयत्वमेवेत्ययुक्तं वाक्यैरपि ब्रह्मप्रतीतेः, विचारणाऽनर्थिकेति चायुक्तं निर्णयार्थत्वादत आह—**यत्किलेति** । नेन्द्रियाविषयत्व इति सप्तम्या भूतवस्तुत्वेन दोषः न, इन्द्रियाविषयत्व इत्येकवाक्यताभ्रमं नुदति—**परिहरतीति** । प्रकृतासम्बन्धप्रतिज्ञान्तरत्वं परिहरति—

---

1 '' नियतस्य '' ख - पाठः

विषयत्वमेवेति वेदान्तवाक्यविचारणानर्थिकैव प्राप्ता, न; इन्द्रियाविषयत्वेन संबन्धाग्रहणात् । स्वभावतो विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि । सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा संबद्धं कार्यमिति गृह्येत । कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धं किमन्येन केनचिद्वा संबद्धमिति न शक्यं निश्चेतुम् । तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं किं तर्हि वेदान्तवाक्यप्रदर्शनार्थम् । किं पुनस्तद्वेदान्तवाक्यं यत्सूत्रेणेह लिलक्षयिषितम् । 'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति' इत्युपक्रम्याह—'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व । तद्ब्रह्मेति' (तैत्ति०

न इन्द्रियाविषयत्वेति । कस्मात् पुनर्नेन्द्रियविषयत्वं प्रतीच इत्यत आह—स्वभावत इति । अत एव श्रुतिः—'पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्' इति । सति हीन्द्रियेति । प्रत्यगात्मनस्त्वविषयत्वमुपपादितम् । यथा च सामान्यतोदृष्टमप्यनुमानं ब्रह्मणि न प्रवर्तते तथोपरिष्टान्निपुणतरमुपपादयिष्यामः । उपपादितं चैतदस्माभिर्विस्तरेण न्यायकणिकायाम् । न च भूतार्थतामात्रेणानुवादतेत्युपरिष्टादुपपादयिष्यामः । तस्मात्सर्वमवदातम् । श्रुतिश्च—'यतो वा' इति जन्म दर्शयति, 'येन जातानि जीवन्ति' इति जीवनं स्थितिं, 'यत्प्रयन्ति' इति तत्रैव लयम् । तस्य च निर्णयवाक्यम् । अत्र च प्रधानादिसंशये

कस्मादिति । ब्रह्मण इति वक्तव्ये वक्ष्यमाणश्रुतिविषयत्वाय प्रतीच इत्युक्तम् । प्रत्यग्ब्रह्मणोरेकत्वात्तदप्यसिद्धमत आह—अत एवेति । स्वयंभूः खानि, इन्द्रियाणि पराञ्चि पराग्विषयाणि कृत्वा व्यतृणत् हिंसितवान् । तस्माल्लोकः पराग्भूतं पश्यति । नान्तरात्मानमित्यर्थः । श्रुतिर्बाह्येन्द्रियविषयेत्याशङ्कयाह—प्रत्यगिति । उपपादितम् अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेरित्यत्र भाष्ये । प्रत्यक्षाविषयत्वे सम्बन्धस्य व्याप्तेरग्रहादित्यनुमानविषयत्वायोक्तं तदयुक्तं विशेषव्याप्त्यग्रहेऽपि सामान्यतो दृष्टानुमानोदयादत आह—यथा चेति । उपरिष्टात् तर्कपादे । वक्ष्यमाणदूषणानन्तर्गतानि सामान्यतो दृष्टदूषणानि, अस्मद्ग्रन्थान्तरे द्रष्टव्यानीत्याह—उपपादितमिति । भाष्ये चोद्यबीजानुद्धारे हेतुमाह—न चेति । उपरिष्टात् समन्वयसूत्रे । अनन्तरोक्तं वक्ष्यमाणमभिसन्धाय भाष्ये निरङ्कुशोपसंहारः इत्याशयेनाह—तस्मादिति । ननु सूत्रे जन्मस्थितिभङ्गा, श्रुतौ तु जन्मजीवनाभिसंवेशाः कथं सा लिलक्षयिषिता अत आह—श्रुतिरिति । पूर्ववाक्यस्यापि लक्षणनिर्णायकत्वादस्य निर्णयवाक्यत्वमिति कथं अत आह—अत्र चेति । आनन्दैकरसस्य ब्रह्मणः कथं जगज्जन्मादिहेतुत्वम्, अविद्यासाचिव्यादित्याह—एतदिति ।

३-१) तस्य च निर्णयवाक्यम्—'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति' (तैत्ति. ३-६) अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि ॥२॥ इति द्वितीयं जन्माद्यधिकरणम् ॥

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तं, तदेव द्रढयन्नाह—

शास्त्रयोनित्वात् ॥३॥

निर्णयवाक्यम्—'आनन्दाद्ध्येव' इति । एतदुक्तं भवति—यथा रज्ज्वज्ञानसहितरज्जूपादाना धारा रज्ज्वां सत्यामस्ति रज्ज्वामेव च लीयते, एवमविद्यासहितब्रह्मोपादानं जगत् ब्रह्मण्येवास्ति तत्रैव च लीयत इति सिद्धम् ॥ २ ॥ इति द्वितीयं जन्माद्यधिकरणम् ॥

सूत्रान्तरमवतारयितुं पूर्वसूत्रसंगतिमाह—जगत्कारणत्वप्रदर्शनेनेति ॥

शास्त्रयोनित्वात् ॥ ३ ॥

न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता, शास्त्रयोनित्वादपि बोद्धव्या ।

साहित्यं तद्विषयत्वम् । अधिकरणार्थमुपसंहरति इतीति—इति लक्षणद्वयम् । यत इति वाक्ये तटस्थलक्षणस्य वक्तव्यत्वात् कारणमनूद्य "आनन्दाद्ध्येवे"ति वाक्येनानन्दत्वविधानात् स्वरूपलक्षणस्यापि सिद्धेः ॥

॥ जन्माद्यधिकरणम् समाप्तम् ॥

॥ जन्माद्यधिकरणभामतीतिलकः समाप्तः ॥

॥ शास्त्रयोनित्वाधिकरणम् ॥

"शास्त्रयोनित्वात्"

ननु वृत्तमनुवदता जगत्कारणत्वेन ब्रह्म लक्षितमित्यनुवाद्यम् । किमिति सर्वज्ञं ब्रह्मेत्युपक्षिप्तमिति, अधिकमनूद्यते इत्याशङ्क्य 'शास्त्रयोनित्वादि'त्यस्य हेतुमात्रत्वाद् वेदकारणत्वस्य च जगत्कारणत्वव्याप्त्यभावेन पूर्वोक्तलक्षणेनापि संबन्धाभावादयुक्तत्वशङ्कायां पूर्वसिद्धार्थसम्बन्धं दर्शयितुमधिकानुवाद इत्याह—सूत्रान्तरमिति । द्रढयन्नित्यनुपपन्नं, सर्वज्ञत्वेऽतिशयाभावेन भृशत्वापरपर्यायस्य दार्ढ्यस्याभावात्, सत्यं हेत्वन्तरेण तत्साधनमिह दार्ढ्यं विवक्षितमित्याह—न केवलमिति । "अस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदः" इति वेदस्य कर्तृत्वेनेश्वरस्य सर्वज्ञत्वं प्रतिपादयत्युत नेति । सकर्तृत्वे वेदस्य सापेक्षत्वापरिहारपरिहाराभ्यां संशयः—

महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्स-

शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थयते—महत ऋग्वेदादेः शास्त्रस्येति। चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथायथं निषेकादिश्मशानान्तासु ब्राह्ममुहूर्तोपक्रमप्रदोषपरिसमापनीयासु नित्यनैमित्तिककाम्यकर्मपद्धतिषु च ब्रह्मतत्त्वे च शिष्याणां शासनात् शास्त्रमृग्वेदादि, अत एव महाविषयत्वान्महत्। न केवलं महाविषयत्वेनास्य महत्त्वम्, अपि त्वनेकाङ्गोपाङ्गोपकरणतयापीत्याह—अनेकविद्यास्थानोपबृंहितस्य। पुराणन्यायमीमांसादयो दश विद्यास्थानानि तैस्तया तया द्वारोपकृतस्य। तदनेन समस्तशिष्टजनपरिग्रहेणाप्रामाण्यशङ्काप्यपाकृता। पुराणादिप्रणेतारो हि महर्षयः शिष्टास्तैस्तया तया द्वारा वेदान्व्याचक्षाणैस्तदर्थं चादरेणानु-

जगद्धेतुत्वसामर्थ्यात्सर्वज्ञत्वमुपागतम्।
ब्रह्मणस्तदिहाचार्यो द्रढयत्यन्यहेतुना॥

इति बुद्धिसन्निधिसङ्गतिः। प्रयोजनं तु वेदस्य अकर्तृत्वे सम्प्रदायाविच्छेदाय सृष्टेरनिष्टत्वेन गगनादेरकार्यतया आरम्भणाधिकरणन्यायानवतारादद्वैतभङ्गस्यापाततः परिहारः। लक्षणं तु सर्वकार्यकारणत्वमेवेति वेदस्याकर्तृकत्वेऽपि नास्य क्षतिरिति न तत्समर्थनं प्रयोजनम्। सकर्तृकस्यापि न सापेक्षतेति न्यायभेदादधिकरणान्तरत्वम्। सिद्धान्तोपक्रममिदमधिकरणम्। ऋग्वेदादेः शास्त्रस्य योनिः कारणं ब्रह्मेत्येतावत्सूत्रार्थकथनं, तत्र महत इत्याद्यसङ्गतमत आह—शास्त्रेति। एवंभूतत्वाद्वेदस्य तस्य कर्त्रा सर्वज्ञेन भाव्यमिति मत्वा विशेषणानीत्यर्थः। ऋग्वेदादेः शास्त्रस्येति सामानाधिकरण्यमयुक्तं वेदशास्त्रयोर्भेदादत आह—चातुर्वर्ण्यस्य चेति। चतुर्णां वर्णानां समाहारश्चातुर्वर्ण्यम्। एवं चातुराश्रम्यम् निषेको गर्भाधानम्। श्मशानमन्त्येष्टिः। शब्दस्य परिमाणाभावमाशङ्क्याह—अत एवेति। उक्तक्रमेण महाविषयत्वात् कर्तुः सर्वज्ञत्वसिद्धावुत्तरविशेषणवैफल्यमाशङ्क्याह—न केवलमिति। विद्यास्थानैरुपबृंहितत्वं सूच्यते न साङ्गोपाङ्गोपकरणता, अत आह—पुराणेति। आदिशब्देन धर्मशास्त्रस्य निरुक्ताद्यङ्गषट्कस्य च सङ्ग्रहः। विद्यास्थानशब्देनाङ्गोपाङ्गान्येवोच्यन्त इत्यर्थः। ननूपबृंहणं वर्धनं तदयुक्तं अङ्गैरपि वेदशरीरावृद्धेरत आह—तैरिति। एकेनोपकृतस्य किमन्यापेक्षया अथ आह—तया तयेति। सृष्टिवाक्यापेक्षितसर्गादिनिरूपणेन पुराणाद्युपयोगः। जातिव्यक्त्यादिलक्षणद्वारेण न्यायस्य। एवमपि महत्त्वे हेत्वन्तरमिदं तस्य नात्यन्तमुपयोगः अत आह—तदनेनेति। पुराणाद्युपकृतत्वमुक्तम् न तु शिष्टैः परिगृहीतत्वमत आह—पुराणादीति। पुराणाद्युपबृंहितत्वं हि तत्प्रणेतृभिश्शिष्टैर्व्याख्यातत्वमित्यर्थः। न च तेषां केवलयशोर्थं व्याख्यानं येन वेदस्यापरिग्रहः शङ्क्यतेत्याह—तदर्थं चेति। प्रदीपवत्सर्वार्थावद्योतिन

र्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म । न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति । यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति, यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके ।

तिष्ठद्भिः परिगृहीतो वेद इति । न चायमनवबोधको नाप्यस्पष्टबोधको येनाप्रमाणं स्यादित्याह—प्रदीपवत्सर्वार्थावद्योतिनः । सर्वमर्थजातं सर्वथाववोधयन् नानवबोधको नाप्यस्पष्टबोधक इत्यर्थः । अत एव सर्वज्ञकल्पस्य सर्वज्ञसदृशस्य । सर्वज्ञस्य हि ज्ञानं सर्वविषयं, शास्त्रस्याप्यभिधानं सर्वविषयमिति सादृश्यम् । तदेवमन्वयमुक्त्वा व्यतिरेकमाह—नहीदृशस्येति । सर्वज्ञस्य गुणः सर्वविषयता तदन्वितं शास्त्रं, अस्यापि सर्वविषयत्वात् । उक्तमर्थं प्रमाणयति—यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति स पुरुषविशेषः ततोऽपि शास्त्राद् अधिकतरविज्ञानः इति योजना । अद्यत्वेऽप्यस्मदादिभिर्यत्समीचीनार्थविषयं शास्त्रं विरच्यते तत्रास्माकं

इति न सप्रयोजनं विशेषणं दृष्टान्तश्च साध्यविकलः अत आह—न चेति । स्पष्टबोधकत्वमात्रे दृष्टान्त इत्यर्थः । सर्वावद्योतित्वेऽपि न स्पष्टतासिद्धिः सर्वत्रैव स्पष्टबोधासम्भवादित्याशङ्क्य सर्वशब्देन प्रकारप्रकारिसर्वत्वं गृह्यत इत्याह—**सर्वमर्थजातमिति** । सर्वार्थावद्योतिन इत्यनेन सर्वज्ञकल्पस्येत्यस्य पौनरुक्त्यमाशङ्क्य साध्यसाधनभावादपौनरुक्त्यमाह—**अत एवेति** । न चास्य वृथात्वं उक्तसर्वावद्योतितत्वस्यासङ्कोचज्ञापनार्थत्वात् । कल्पशब्दस्यार्थान्तरमाशङ्क्य ईषदसमाप्तौ कल्पप् प्रत्ययोऽयमित्याह—**सर्वज्ञसदृशस्य** । नहीदृशस्येति भाष्यं बाधकतर्कोक्तिरिव तथा चायुक्तं हेत्वन्तरस्यानवसरादत आह—**तदेवमिति** । सर्वज्ञं ब्रह्मेत्युपक्षिप्तं तदेव द्रढयन्नित्युक्त्या ब्रह्म सर्वज्ञमिति प्रतिज्ञा सिद्धा । शास्त्रयोनित्वादिति सूत्रमेव हेतुत्वेन पठितम्, महत इत्यादिना तद्व्याख्यानेन वेदकर्तृत्वादिति हेत्वर्थ उक्तः । इत्थं जगत्कारणत्वप्रदर्शनेनेत्युपक्रम्य, कारणं ब्रह्मेत्यन्तेन साध्यसाधनयोरन्वयं पक्षसम्बन्धमुक्त्वास्य हेतोः केवलव्यतिरेकित्वं मत्वा व्यतिरेकव्याप्तिमाहेत्यर्थः । सर्वज्ञगुणान्वितस्येत्ययुक्तं सर्वज्ञानस्य तद्गुण[1]स्याभावादत आह—**सर्वज्ञस्येति** । ननु व्यतिरेकानुमानेन सर्वज्ञत्वं सिद्धम्, किमिदमुच्यते यद्यदित्यादि अत आह—**उक्तमिति** । केवलव्यतिरेकिणोक्तमेवार्थं सामान्यव्याप्तिकान्वयव्यतिरेकिरूपप्रमाणान्तरारूढं करोति यद्यदित्यादिनेत्यर्थः । "स तत" इति पाणिन्यादिदृष्टान्तमात्रसम्बन्धे दृष्टान्तस्य सपक्षविशेष[2]त्वात् सर्वसपक्षोपसंहारवती व्याप्तिर्न सिद्ध्येत् अतो योजयति—**यद्यदिति** । **शास्त्रादिति** तद्विषयात् । **अधिकतरविज्ञानः** अधिकतरविषयविज्ञान इत्यर्थः । चिरातिवृत्तस्य पाणिनेरीदृग्ज्ञानमिति को वेदेत्याशङ्क्यास्यां व्याप्तौ आधुनिकं स्वानुभवमाह—**अद्यत्वेऽपीति** । व्याप्तिकथायां

---

1 'णत्वा भा' ख - पाठः   2 'षणत्वा' ख - पाठः

किमु वक्तव्यमनेकशाखाभेदाभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोर्ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्याप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद्यस्मान्महतो भूताद्योनेः संभवः, 'अस्य महतो भूतस्य निःश्वसित-

वक्तॄणां वाक्याज्ज्ञानमधिकविषयम्। न हि ते तेऽसाधारणधर्मा अनुभूयमाना अपि शक्या वक्तुम्। न खल्वि*क्षुक्षीरगुडादीनां मधुररसभेदाः शक्याः सरस्वत्याप्याख्यातुम्। विस्तरार्थमपि वाक्यं न वक्तृज्ञानेन तुल्यविषयमिति कथयितुं विस्तरग्रहणम्। सोपनयं निगमनमाह—किमु वक्तव्यमिति। वेदस्य यस्मात् महतो भूतात् योनेः संभवः, तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति योजना। अनेकशाखेति। अत्र चानेकशाखाभेदभिन्नस्येत्यादिः संभव इत्यन्त उपनयः। तस्येत्यादि सर्वशक्तित्वं चेत्यन्तं निगमनम्। अप्रयत्नेनैवेति ईषत्प्रयत्नेन, यथाऽलवणा यवागूरिति। देवर्षयो हि महापरिश्रमेणापि यत्राशक्तास्तदयमीषत्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति। अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता—'अस्य महतो भूतस्य' इति। येऽपि

विस्तरार्थमिति विशेषणानुपयोगमाशङ्क्य महाविषयस्य वाक्यस्य वक्तुः स्वज्ञानसमानविषयत्वसम्भावनायां व्याप्तिभङ्गशङ्काशान्तिः फलमित्याह—**विस्तरार्थमपीति**। भाष्ये व्याप्तिमात्रमुक्तं कथं प्रमाणयतीत्युक्तिरत आह—**सोपनयमिति**। नन्ववयवद्वयस्य कुतो युगपदवतारणं वाक्यस्यैकत्वादिति दर्शयन्नाह—**वेदस्येति**। महतो भूतस्य सर्वज्ञत्वमस्तु ब्रह्मणि किमायातमत आह—**ब्रह्मण इति**। **निरतिशयम्** असङ्कुचितम्। सर्वशक्तित्वं तूदाहरणार्थम्। सर्वं वाक्यमुपनयनिगमनार्थमिति भ्रमं नुदन्नाह—**अत्र चेति**। इत्यन्तं किमु वक्तव्यमित्येतत्सहितमिति शेषः। उपनयनिगमनाभ्यामेव हेतुप्रतिज्ञे लभ्येते इति भावः। अयमत्र प्रयोगः ब्रह्म वेदविषयाधिकज्ञं, तत्प्रणेतृत्वात् यो यद्वाक्यप्रणेता स तद्विषयाधिकज्ञः यथा पाणिन्यादिरिति। वेदस्य सर्वावद्योति[1]त्वात् पक्षधर्मताबलेन ब्रह्मणः सर्वज्ञता सिद्ध्यति। अप्रयत्नेनेत्ययुक्तं ईक्षणादिप्रयत्नापेक्षणादत आह—**ईषदिति**। कथं तर्हि नञः प्रयोगः अत आह—**यथेति**। अप्रयत्नेनेत्यस्य किं प्रयोजनमत आह—**देवेति**। **लीलान्यायेनेति**। न्यायः तर्कः प्रमाणात्मा न भवति किन्तु प्रकारवाची न्यायशब्दः ततश्च लीलयैवेति लभ्यत इत्याह—**लीलयैवेति**। अनायासेनैवेत्यर्थः। **उक्तम्** सर्वज्ञत्वं **भवति** सम्भवतीत्यर्थः। उपनयनिगमनमध्ये श्रुतेरनवसरमाशङ्क्य उपनयार्थसाधकत्वाददोष इत्याह—**अप्रयत्नेनेति**। इदानीं वेदस्य सकर्तृकत्वे व्याकरणादिवदेव पौरुषेयतया निरपेक्षप्रामाण्यभङ्ग इति पूर्वपक्षस्य दूषणं स्पष्टत्वाद्भाष्यकारोपेक्षितमाह—**येऽपीति**। सकर्तृकत्वे वेदस्य सापेक्षत्वं

1 'वितत्वा' ख - पाठः * "इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्। तथापि न तदाख्यातुं सरस्वत्यापि शक्यते।" इत्याचार्यदण्डिकृतकाव्यादर्शगतपद्यसंवादीदं वाक्यम्।

मेतद्यदृग्वेदः' (बृह. २-४-१०) इत्यादिश्रुतेः, तस्य महतो भूतस्य

तावत् वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेयम्। आनुपूर्वीभेदवन्तो हि वर्णाः पदम्। पदानि चानुपूर्वीभेदवन्ति वाक्यम्। व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः, वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात्। व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदता नित्या। पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता। तस्मान्नृत्तानुकरणवत् पदाद्यनुकरणम्। यथाहि यादृशं गात्रचलनादि नर्तकः करोति तादृशमेव शिक्ष्यमाणानुकरोति नर्तकी; न तु तदेव व्यनक्ति। एवं यादृशीमानुपूर्वीं वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेवानुकरोति माणवकः, न तु तामेवोच्चारयति, आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात्। तस्मान्नित्यानित्यवर्णवादिनां लौकिकवैदिकपदवाक्यादिपौरुषेयत्वे विवादः, केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः। यथाहुः—'यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता'। तत्र सृष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रत्यस्मादृशगुरुशिष्यपरम्परामविच्छिन्नामनादिमाचक्षते। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योपधानलब्धसर्वशक्ति-

---

किं पुरुषप्रभवत्वमात्रात्, स्वातन्त्र्यपूर्वानुपूर्व्यादिनिरपेक्ष[1]रचनाद्वा। पूर्वरचनाननुसारिस्वतन्त्रपुरुषप्रभवत्वाद्वा, परानध्यापितपुरुषप्रभवत्वाद्वा विच्छिन्नसम्प्रदायस्यैकेन प्रवर्तनाद्वा। नाद्यः परेषामपि सम्मतेरित्याह—**तैरपीति**। वर्णनित्यत्ववादिभिर्मीमांसकैरपीत्यर्थः। प्रकरणमादिशब्दार्थः **अनित्यत्वं** पुरुषप्रभवत्वेन कादाचित्कत्वम्। ननु वर्णा एव पदम् पदान्येव वाक्यम् कथमनित्यता अत आह—**आनुपूर्वीति**। आनुपूर्व्यैव सह नित्या वर्णाः सन्तु अत आह—**व्यक्तिधर्म इति**। **व्यक्ति**र्ध्वनिः। तर्हि कथमुपाध्यायोक्तमेव वक्ति माणवक इति प्रतीतिः। तदनुकरणत्वादित्याह—**तस्मादिति**। नृत्तानुकरणमपि माणवकस्यैवेति शङ्कां नृत्तसमये नृत्तान्तराभावात्, अनुकरणत्वं कथमिति शङ्कां च नुदन् दृष्टान्तं विवृणोति—**यथेति**। **शिक्ष्यमाणा** अभ्यस्यन्ती। **न तु तदेव व्यनक्ति**। द्रव्यान्तरक्रियायाः द्रव्यान्तरासमवायादित्यर्थः। **आचार्यव्यक्तिभ्यः** तद्ध्वनिभ्यः। **पौरुषेयत्वे** पुरुषप्रभवत्वे। **पौरुषेयत्वे नास्ति विवाद इति**। तद्विवादानुभवविरुद्धम। न। अन्यविषयत्वाद्विवादस्येत्याह—**केवलमिति**। स्वातन्त्र्यपूर्वानुपूर्वीनिरपेक्षरचयितृत्वेन न द्वितीयः। अस्माभिरप्यनङ्गीकारात्। तर्ह्यस्माभिरिव सम्प्रदायाविच्छेदोप्य[1]ङ्गीकार्यः स्यात्। न। तावति वैषम्ये सत्यप्यस्वातन्त्र्यसाम्यस्याक्षतेरित्याह—**तत्रेति**। स्वातन्त्र्यं चेत् अस्मदुक्तमिष्यते इष्यतामविच्छेदोऽपि। न। सर्गप्रलयप्रतिपादकप्रमाणविरोधादित्याह—**श्रुतीति**।

---

1 'क्षा' ख पाठः 2 'व्यनङ्गी' ख - पाठः

ज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यं ; पूर्वपूर्वसर्गानुसारेण तादृशतादृशानुपूर्वीविरचनात् । तथाहि यागादिब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरे विपरीयन्ते । नहि जातु क्वचित् सर्गे ब्रह्महत्याऽर्थहेतुरनर्थहेतुश्चाश्वमेधो भवति । अग्निर्वा क्लेदयति । आपो वा दहन्ति, तद्वत् । यथात्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयाऽनर्थहेतुः, एवं सर्गान्तरेष्वपीति तदनुरोधात् सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचियन्न स्वतन्त्रः । पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि । तच्चास्माकमपि समानमन्यत्राभिनिवेशात् । न चैकस्य प्रतिभानेऽनाश्वास इति युक्तम् । नहि बहूनामप्यज्ञानां विज्ञानां वाशयदोषवतां प्रतिभाने युक्त आश्वासः । तत्त्वज्ञानवतश्चापास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्त एवाश्वासः । सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्स्वरूपावधारणं तत्प्रत्ययेन

नन्वसङ्कुचितज्ञानशक्तिश्च रचयति अतो युक्तं स्वातन्त्र्यम् अत आह—**लब्धसर्वशक्तिज्ञानस्यापि** । शक्त्यादिलाभहेत्वनुवादः—**अनाद्यविद्येति** । अनादिवेदप्रवाहरचनोपपत्त्यै—**नित्यस्येति न तेषु स्वातन्त्र्यम्** । आचक्षत इत्यनुषङ्गः । ननु लोके विवर्तानां यादृच्छिकत्वेनानियमदर्शनाद्वेदस्य त्वया विवर्तत्वेनाङ्गीकारादनियमः किं न स्यात् । न । विवर्तविशेषाणां नियमदर्शनादित्याह—**यथाहीति** । **तद्वत्** विवर्तस्यापि वेदस्य नियमः सम्भवतीत्यर्थः । तथापि पूर्वानुसारेण करोतीति निश्चयः कुतः अत आह—**वाग्वज्रतयेति** । "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तदर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति शास्त्रादित्यर्थः । न तृतीय इत्याह—**पुरुषेति** । **अस्वातन्त्र्यमात्रम्** अनाकलितपराध्यापित[1]त्वानध्यापितत्वविशेषम् । **अपौरुषेयत्वं** निरपेक्षत्वम् । **पुरुषास्वातन्त्र्यमिति** । पुरुषस्वातन्त्र्याविषयत्वम् । **रोचयन्ते जैमिनीया अपि** "यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता" इति वदन्त इति शेषः । अयमर्थः—युष्मदिष्टस्यापौरुषेयत्वस्याविकलस्यास्माभिरिष्टत्वात् तदङ्गीकार[2]द्वारभेदो न दोषायेति । चतुर्थमनूद्य निरस्यति—**न चेति** । **अनाश्वासः** ततश्च तन्निवृत्तये प्रमाणान्तरापेक्षेति शेषः । एकस्य प्रतिभासादानाश्वासवादी प्रष्टव्यः किं बहूनां प्रतिभासमात्रमाश्वासकारणम्, अथ तत्त्वविदां अदुष्टाशयानां बहूनाम् । नाद्य इत्याह **न हीति** । द्वितीये तु बहुत्वं वृथागौरवावहं चेत्याह—**तत्त्वज्ञानेति** । ईश्वरस्य तादृक्त्वं श्रुतिसिद्धमित्यर्थः । ननु, उच्चारयन्तं, ईश्वरं, न पश्यामः । कथं तत्कृतत्वाद्वेदे विश्वास इति तत्राह—**सर्गादीति** । **तत्स्वरूपावधारणं** तस्य वेदानुच्चारयत ईश्वरस्य स्वरूपावधारणम् । तदुपपत्तौ हेतुः—**धर्मज्ञानेति** । वैराग्येत्या

---

1 'तत्त्वविशेषम्' ख - पाठः 2 'रो' ख - पाठः

निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति। इति प्रथमवर्णकम् ॥

अथवा—यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे। शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः। शास्त्रमुदाहृतं पूर्वसूत्रे—'यतो वा इमानि भूतानि जायन्ते' इत्यादि। किमर्थं तर्हीदं सूत्रं? यावता पूर्वसूत्र एवैवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम्। उच्यते—तत्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादि केवलमनुमानमुपन्यस्तमित्याशङ्क्येत तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते, शास्त्रयोनित्वादिति ॥ ३ ॥

इति तृतीयं शास्त्रयोनित्वाधिकरणम् ॥

चार्वाचीनानामपि तत्र संप्रत्यय इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वं, शास्त्रस्य चापौरुषेयत्वं, प्रामाण्यं चेति ॥ इति प्रथमवर्णकम् ॥

वर्णकान्तरमारभते—अथवेति। पूर्वेणाधिकरणेन ब्रह्मस्वरूपलक्षणासंभवशङ्कां व्युदस्य लक्षणसंभव उक्तः। तस्यैव तु लक्षणस्यानेनानुमानत्वाशङ्कामपाकृत्यागमोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तम्। अक्षरार्थस्त्वतिरोहितः ॥ ३ ॥

इति तृतीयं शास्त्रयोनित्वाधिकरणम् ॥

शयदोषशून्यत्वमुक्तम्। तत्प्रत्ययेन तेषु विश्वासेन। अर्वाचीनानां तदुपदेश्यानाम्। तत्र ईश्वरप्रणीते वेदे। एवमुत्तरोत्तरप्रत्ययादस्मत्पर्यन्तानां विश्वास इति भावः। सिद्धस्यैव सर्वज्ञत्वस्य साधने कथमधिकरणान्तरत्वमित्याशङ्क्याकर्तृकत्वेऽपि निरपेक्षप्रामाण्यविरोधि पौरुषेयत्वं न यातीति न्यायभेदादित्याशयेनोपसंहरति—इत्युपपन्नमिति॥ सर्वज्ञतादार्ढ्यानुपयोगादथवेत्ययुक्तमाशङ्क्याह—वर्णकान्तरमिति। अस्यैव सूत्रस्य न्यायान्तरपरत्वेन वर्णकमारभते न तु व्याख्यान्तरेण सर्वज्ञत्वे युक्तिं दर्शयतीत्यर्थः। 'तं त्वौपनिषदं पुरुषं पृच्छामीति' श्रुतिः, ब्रह्मणो वेदैकवेद्यत्वमावेदयेद्, न वेति कार्यलिङ्गकानुमानस्य कारणविशेषपर्यवसानसम्भवासम्भवाभ्यां संशयः। यत् स्वरूपतटस्थाभ्यां लक्षणाभ्यां निरूपितं ब्रह्म तस्मिन् प्रमाणस्य विशेषश्चिन्त्यतेऽधुनेति बुद्धिसन्निधिः। तत्र कार्यत्वानुमानलब्धस्य कर्तुः पक्षधर्मताबलात् सर्वज्ञतासिद्धेरानुमानिक ईश्वर इति पूर्वपक्षः। फलं चात्रानुमानमेव विचार्यं न वेदवाक्यमिति। पक्षधर्मतया पक्षे साध्यसम्बन्धातिरिक्तासिद्धेः प्रकृताङ्कुरादितत्कारणादिज्ञानसम्भवेऽपि न सर्वज्ञस्य सिद्धिः। ततो वेदैकवेद्यत्वात् स एव विचार्य इति सिद्धान्तः फलं च। भाष्ये जन्मादि केवलमनुमानमुपन्यस्तमित्याशङ्क्येतेत्युक्त्या सूत्रकारेणानुमानमुपन्यस्तमिति भ्रमशान्त्यै सूत्रमेतदित्युक्तं भाति।

तत्तु समन्वयात् ॥ ४ ॥

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. सू. १-२-१) इति क्रियापरत्वं

तत्तु समन्वयात् ॥ ४ ॥

शास्त्रप्रमाणकत्वमुक्तं ब्रह्मणः प्रतिज्ञामात्रेण, तदनेन सूत्रेण प्रतिपादनीयमित्युत्सूत्रं **पूर्वपक्षमारचयति भाष्यकारः—कथं पुनरिति**। **किमाक्षेपे**। **शुद्धबुद्धोदासीनस्वभावतयोपेक्षणीयं**

ततश्च पूर्वपक्षाभावाद्, नेदमधिकरणान्तरं सङ्गत्यभावाच्च न तदानन्तर्यमत आह—**पूर्वेति**। **तस्यैव** सूत्रकारोक्तलक्षणस्यैव। **स्वतन्त्रानुमानत्वमिति पूर्वपक्षिणः शङ्कामपाकृत्य** न तु सूत्रमेवानुमानोपन्यास इति शङ्कामपाकृत्येत्यर्थः। तर्हि जन्मादि केवलमनुमानमुपन्यस्तमिति भाष्यं विरुध्येत नेत्याह—**अक्षरार्थ इति**। उपन्यस्तं जन्मादि केवलं निरपेक्षमनुमानमित्याशङ्क्येत पूर्वपक्षिणेत्यक्षरार्थः **स्पष्ट इत्यर्थः** ॥ ३ ॥

शास्त्रयोनित्वधिकरणम् समाप्तम्

समन्वयाधिकरणम्

"तत्तु समन्वयात्" ॥ ४ ॥

आनुमानिकत्वमपाकृत्य शास्त्रैकप्रमाणकत्वस्योक्तत्वात् कथमाक्षेप इति शङ्कां निरस्यन्नाक्षेपसङ्गतिमाह—**शास्त्रेति**। अनुमानगम्यत्वमेव निराकृतम्। शास्त्रवेद्यत्वं तु नाद्यापि सिद्धं कार्यपरत्वस्यानिराकरणादिति प्रतिज्ञामात्रम्। **अनेन** वक्ष्यमाणेन। तर्हि उपपादनमेव[1] कार्यम्। अत आह—**पूर्वपक्षमिति**। तर्हि सूत्रमवतार्य पूर्वपक्षो विधेयः। न। नियमाभावादित्याह—**उत्सूत्रमिति**। तर्हि सूत्रार्थवर्णनं भाष्यं न स्यात्। अत आह—**भाष्यकार इति**। अक्षरानुपात्तस्यापि, अभिप्रेतस्य वर्णनात् भाष्यत्वमित्यर्थः। वेदान्ताः कार्यपरा उत ब्रह्मपरा इति सिद्धोपदेशस्य निष्फलत्वसफलत्वाभ्यां मानान्तरसापे[2]क्षत्वानपेक्षत्वाभ्यां वा संशयः। ब्रह्मणः शास्त्रयोनित्वमुदीरितमसङ्गतम्। कार्ये शास्त्रस्य मानत्वादिति, आक्षेपोऽत्र वार्यते। ननु नैष पूर्वपक्षः। किन्तु प्रश्नः। अत आह—**किमिति**। अतो वेदान्तानामानर्थक्यमित्ययुक्तं जैमिन्युक्त्यैवानर्थक्यस्यानङ्गीकार्यत्वात्। आनर्थक्यमिति च वक्ष्यमाणपक्षादन्यो वैकल्पिकः पक्षो भाति। तत्राध्ययनविधिविरोधः प्रत्यक्षादिविषयत्वादित्ययुक्तं तद्विषयस्यापि लोके प्रतिपादनदर्शनात्। हेयोपादेयरहित इति च निर्हेतुकम्। कर्मापेक्षितेति चायुक्तम्। अपेक्षितकर्मानिर्धारणादिति शङ्कां परिहरन्नभिप्रायमाह—**शुद्धेत्यादिना**। शुद्धादिस्वभावत्वं हेयोपादेयराहित्ये

---

1 'व अ' ख - पाठः 2 'क्षत्वाभ्यां' ख - पाठः

शास्त्रस्य प्रदर्शितम् । अतो वेदान्तानामानर्थक्यं; अक्रियार्थत्वात् । कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं, उपासनादिक्रियान्तरविधानार्थत्वं वा । न हि परिनिष्ठितवस्तुप्रतिपादनं संभवति; प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः, तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात् । अत एव 'सोऽरोदीत्' इत्येवमादीनामानर्थक्यं मा भूदिति

ब्रह्म, भूतमभिदधतां वेदान्तानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्तेः भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत्तदर्थानुवादकत्वेनाप्रामाण्यप्रसङ्गात् । न खलु लौकिकानि वाक्यानि प्रमाणान्तरविषयमर्थमवबोधयन्ति स्वतः प्रमाणम् । एवं वेदान्ता अपीत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत । न च तैरप्रमाणैर्भवितुं युक्तम्, न चाप्रयोजनैः, स्वाध्यायाध्ययनविध्यापादितप्रयोजनवत्त्वनियमात् । तस्मात्तत्तद्विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपादनपरत्वेनैव क्रियार्थत्वम् । यदि त्वसंनिधानात्तत्परत्वं न रोचयन्ते, ततः संनिहितोपासनादिक्रियापरत्वं वेदान्तानाम् । एवं हि प्रत्यक्षाद्यनधिगतगोचरत्वेनानपेक्षतया प्रामाण्यं च प्रयोजनवत्त्वं च सिध्यतीति तात्पर्यार्थः । पारमर्षसूत्रोपन्यासस्तु पूर्वपक्षदार्ढ्याय । आनर्थक्यं चाप्रयोजनवत्त्वं, सापेक्षतया प्रमानुत्पादकत्वं चानुवादकत्वादिति । अतः इत्यादि वाऽन्तं ग्रहणकवाक्यम् । अस्य विभागभाष्यं न हि इत्यादि उपपन्ना वा इत्यन्तम् । स्यादेतत्—अक्रियार्थत्वेऽपि ब्रह्मस्वरूपविधिपरा वेदान्ता भविष्यन्ति,

---

हेतुः । अप्रयोजनत्वमापाद्यते । न प्रतिपाद्यते । आपादनं च न जैमिन्युक्त्या, किन्तु युक्त्या । प्रतिपादनासम्भवश्च मानान्तरानपेक्षयेति विवक्षितम् । कर्मापेक्षितेति च तत्र तत्र विहितानि कर्माणि गृह्यन्त इत्यर्थः युक्त्यानर्थक्यं वदतः किं परानभिमतप्रामाण्यसूत्रोपन्यासेन, अत आह—**पारमर्षेति** । सूत्रकारोक्तत्वाद् दृढः पूर्वपक्षः, अतस्तन्निरासः अवश्यं कार्य इति ज्ञापनायेत्यर्थः । उक्तं पूर्वपक्षबीजद्वयं सूत्रेऽस्मिन् न भाति अत आह—**आनर्थक्यं चेति** । द्विप्रकारस्यानर्थक्यस्य क्रियासम्बन्धस्य चोक्तत्वाद् नहीत्यादि पुनरुक्तमतमत आह—**अत इत्यादीति** । **वान्तं** द्वितीयवाशब्दान्तम् । [1]अल्पं ग्रहणं ग्रहणकः सङ्ग्रहः । तस्य वाक्यम् । न च परिनिष्ठितेति ब्रह्मस्वरूपविधिशङ्कां परिहरति । नैषा प्राप्तिमती अप्रवृत्तप्रवर्तनत्वाद्विधेः, न च प्रयोजनवती क्रियाविधिसम्बन्धाभावप्राप्ताप्रामाण्यतादवस्थ्याद् अत आह—**स्यादेतदिति** । राद्धान्तसूत्रे विधिनैकवाक्यत्वमुक्तं, न तु क्रियाविधिनेति, तेन विधिसंस्पर्शादेव प्रामाण्योपपत्तिरिति द्वितीयानुपपत्तेः परिहारः । अन्यो व्यक्तः । उत्पत्तिविधेरक्रियायामपि सम्भवस्योक्तत्वात् क्रियाविषयत्वादिति

---

1 " अल्पग्रहणकं सङ्ग्रहः " इति क - पाठः

'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' (जै. सू. १-२-७) इति स्तावकत्वेनार्थवत्त्वमुक्तम् । मन्त्राणां च 'इषे त्वा' इत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम् । न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा । न च परिनिष्ठिते वस्तुस्वरूपे

तथा च 'विधिना त्वेकवाक्यत्वात्—' इति राद्धान्तसूत्रमनुग्रहीष्यते । न खल्वप्रवृत्तप्रवर्तनमेव विधिः; उत्पत्तिविधेरज्ञातज्ञापनार्थत्वात्, वेदान्तानां चाज्ञातं ब्रह्म ज्ञापयतां तथाभावादित्यत आह—नच परिनिष्ठित इति । अनागतोत्पाद्यभावविषय एव हि सर्वो विधिरुपेयः; अधिकारविनियोगप्रयोगोत्पत्तिरूपाणां परस्पराविनाभावात् । सिद्धे च तेषामसंभवात् । तद्वाक्यानां त्वैदंपर्यं भिद्यते । यथा 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यादिभ्योऽधिकारविनियोगप्रयोगाणां प्रतिलम्भात् 'अग्निहोत्रं जुहोति' इत्युत्पत्तिमात्रपरं वाक्यम्, न त्वत्र विनियोगादयो न सन्ति; सन्तोऽप्यन्यतो लब्धत्वात्केवलमविवक्षिताः ।

नियमासिद्धिमाशङ्क्य आह—अनागतेति । भावो भावना । उत्पाद्यत्वे हेतुरनागतेति । ज्ञापनमात्रं कुर्वत उत्पत्तिविधेर्ज्ञाप्येनैवालं, किं भावनया अत आह—अधिकारेति । विधिरेकः, अवस्थास्तु भिद्यन्त इति रूपग्रहणेन दर्शयति । अधिक्रिया न शेषत्वं विना, तच्च नानुष्ठानादृते, तच्च नाज्ञाते इत्यविनाभावः । फलसम्बन्धबोधको विधिः अधिकारः । विनियोगः फलशेषत्वबोधकः प्रयोगोऽनुष्ठापकः । तेषामस्य चोत्पत्तिविधेश्च भावनाविषयैरविनाभूतत्वाद् भावनाविषयत्वमित्यर्थः । तर्हि सिद्ध एव चत्वारः सन्तु अत आह—सिद्धे चेति । तेषामधिकार-विनियोग-प्रयोगाणां लब्धात्मकस्याप्रयोज्यत्वादित्यर्थः । चतुर्णामविनाभावेऽधिकारवाक्यमुत्पत्तिवाक्यमिति वार्ता कथं मीमांसकानामत आह—तद्वाक्यानामिति । यथा विधेरेकं रूपं रूपान्तराविनाभूतम् एवं वाक्यस्यैकत्र तात्पर्यमितरतात्पर्याविनाभूतं नेति तुशब्दार्थः । ऐदम्पर्यमिदम्परत्वं तात्पर्यमिति यावत् । ऐदम्पर्यभेदाद् वाक्यानां विभाग इति भावः । उदाहरति—यथेति । अग्निहोत्रं जुहोतीति शब्दः उत्पत्तिवाक्यान्तरस्य 'आग्नेयोऽष्टाकपालः' इत्यादेरुपलक्षणार्थः । एवं च इत्यादिभ्य इति बहुवचनमुपपद्यते । ननूत्पत्तावप्रतीतानां रूपान्तराणां तदविनाभावमूरीकृत्य तात्पर्यभेदमात्रवर्णनं क्लिष्टं, तद्वरमविनाभावाभाव इत्याशङ्क्याह—नत्विति । अग्निहोत्रं जुहोतीत्यत्रापि अग्निहोत्रेणेष्टं भावयेदित्यर्थः, न त्वग्निहोत्रं भावयेदिति, अफलत्वात् । न चाग्निहोत्रहोमसत्ता बोध्या, अभूत्, भवति, भविष्यति, इति प्रसक्तौ उपदेशवैयर्थ्यात् । तस्मादप्रतीतिर्नास्तीत्यर्थः । तर्ह्यधिकारादिपरत्वमपि स्यात् । न । प्रतीतिमात्रेण तात्पर्ये सर्वेषामनुवाद्यानां तात्पर्यगोचरत्वापत्तेरित्याह—सन्तोऽपीति ।

विधिः संभवति ; क्रियाविषयत्वाद्विधेः । तस्मात्कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम् । अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम् । तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते—तत्तु समन्वयात् । तुशब्दः पूर्वपक्ष-

---

तस्मात् भावनाविषयो विधिर्न सिद्धे वस्तुनि भवितुमर्हतीति । उपसंहरति—तस्मादिति । अत्रारुचिकारणमुक्त्वा पक्षान्तरमुपसंक्रामति—अथेति । एवं च सत्युक्तरूपे ब्रह्मणि शब्दस्यातात्पर्यात् प्रमाणान्तरेण यादृशमस्य रूपं व्यवस्थाप्यते न तच्छब्देन विरुध्यते ; तस्योपासनापरत्वात् , समारोपेण चोपासनाया उपपत्तेरिति । प्रकृतमुपसंहरति—तस्मान्नेति । सूत्रेण सिद्धान्तयति—एवं प्राप्त उच्यते—तत्तु समन्वयात् ॥ तदेतत् व्याचष्टे—तुशब्द इति । तदित्युत्तरपक्षप्रतिज्ञा

भाष्ये परिनिष्ठितशब्दः सिद्धपर इति दर्शयन्नुपसंहरति—**तस्मादिति** । उत्तरभाष्ये तस्मादित्यनन्तरोक्तसिद्धविध्यभावमरामर्शो भाति । तथा चायुक्तं माभूत् सिद्धे विधिः । किं कर्मशेषतया सिद्ध एव प्रामाण्यसंभवादिति शङ्कोदयात् , अत आह—**उपसंहरतीति** । तस्मादिति नानन्तरोक्तमात्रस्य परामर्शः, किन्तु सर्वस्यापि पूर्वोक्तस्येत्यर्थः । स्ववाक्यगतोपासनादिकर्मपरत्वमिति केवलप्रतिज्ञा न युक्ता । अतस्तस्मादित्यनुषङ्गेणायमप्युपसंहारः । तर्ह्यथ प्रकरणान्तरेत्यधिकमत आह—**अत्रेति** । अरुच्यैव प्राक् पक्षान्तरमुक्तं तत्कारणमिहाविष्कृतमित्यर्थः । क्रियापरत्वे वेदान्तानां तच्छब्दाजाडयेन सर्वजनीनस्फुटतरप्रत्यक्षाद्यपलापप्रयासोऽपि शाम्यतीत्याह—**एवं चेति** । एवं शब्दपरामृष्टहेतुं व्यनक्ति—**तस्येति** । उपासनापरत्वेऽपि प्रत्यक्षादिबाधस्तुल्यः । उपासनासिद्ध्यर्थमुपास्यस्याकर्तृत्वादिरूपस्याङ्गीकार्यत्वादत आह—**समारोपेण चेति** । उपासनायाश्चेत्यन्वयः । यद्वा वार्थ एवार्थो वा चकारः । ‘कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्व’ मित्युप्रक्रमो न ब्रह्मणः शास्त्रयोनित्वमिति, अप्रस्तुतोपसंहार इत्याशङ्क्य पूर्वसूत्रद्वितीयवर्णके योनिशब्दस्य[1] प्रमाणपरत्वेनोक्तत्वात् पूर्वेण सङ्गतिस्फुटीकरणाय प्रकृतस्यैवमुपसंहार इत्याह—**प्रकृतमिति** । एवं प्राप्त आहेत्यनुक्त्वोच्यत इत्युक्ते ‘तत्तु समन्वयादिति’ भाष्यमिति भ्रमः स्यात् तं नुदति—**सूत्रेणेति** । अवधारणादेरपि त्वर्थत्वात् पक्षव्यावृत्त्यर्थ इत्ययुक्तमाशङ्क्येहत्यतुशब्दस्यार्थोऽयं उच्यते । योग्यत्वान्नतु सामान्येनेत्याह—**तदेतदिति** । तद् ब्रह्मेत्यादि न पदार्थस्य कथनं नापि वाक्यार्थस्यात आह—**तदिति** । ननु सूत्रेऽपि तदिति वृथा, अत आह—**उत्तरपक्षेति** ।

---

1 ‘स्यार्थप्र’ ख. पाठः

व्यावृत्त्यर्थः । तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते । कथम्, समन्वयात् । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि । 'सदेव सोम्येदमग्र आसीत्' । 'एकमेवाद्वितीयम्' (छा. ६-२-१) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐत. २-१-१-१) 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' 'अयमात्मा ब्रह्म सर्वानुभूः' । (बृह. २-५-१९) 'ब्रह्मैवेदममृतं पुरस्तात्' (मुण्ड. २-२-११) इत्यादीनि । न च तद्गतानां पदानां ब्रह्मस्वरूपविषये

विभजते—तद्ब्रह्मेति । पूर्वपक्षी कर्कशाशयः पृच्छति—कथम् । कुतः प्रकारादित्यर्थः । सिद्धान्ती स्वपक्षे हेतुं प्रकारभेदं आह—समन्वयात् । सम्यगन्वयः समन्वयस्तस्मात् । एतदेव विभजते-सर्वेषु हि वेदान्तेष्विति । वेदान्तानामैकान्तिकीं ब्रह्मपरतामाचिख्यासुर्बहूनि वाक्यान्युदाहरति—सदेवेति । 'यतो वा इमानि भूतानि' इति तु वाक्यं पूर्वमुदाहृतं जगदुत्पत्तिस्थितिनाशकारणमिति चेह स्मारितमिति न पठितम् । येन हि वाक्यमुपक्रम्यते येन चोपसंह्रियते तदेव वाक्यार्थ इति शाब्दाः । यथोपांशुयाजवाक्येऽनूचोः पुरोडाशयोर्जामितादोषसंकीर्तनपूर्वकोपांशुयाजविधाने तत्प्रतिसमाधानोपसंहारे चापूर्वोपांशुयाजकर्मविधिपरता एकवाक्यताबलादा-

---

कथमिति नाक्षेपे, तस्य कृतत्वात्, न प्रश्ने, आक्षेप्तुः प्रश्नविरोधात्, अत आह—**पूर्वपक्षीति** । **कर्कशाशयः** उक्तमाक्षेपमननुस्मरन् । प्रश्नत्वान्न पौनरुक्त्यम् । आशयकार्कश्यात् प्रश्नाविरोध इत्यर्थः । प्रश्नत्वे कथंशब्दप्रयोगः कथं अत आह—**कुत इति** । यद्वा कथमिति केन प्रकारेणेति भाति । ततश्च समन्वयादिति पञ्चम्योत्तरायोगमाशङ्क्याह—**कुत इति** । अस्मात् प्रकारादित्यनुक्तत्वात् कुतः प्रकारादितिप्रश्नानानुगुण्यमिति शङ्कां, कर्कशाशयस्य प्रष्टुरेवायं हेतूपन्यास इति भ्रमं च नुदन्, आह—**सिद्धान्तीति** । स्वपक्षे हेतूक्तिरेव प्रकारभेदोक्तिरित्यर्थः । ननु तत्त्वन्वयादिति वाच्यम् अल्पाक्षरत्वस्य सूत्रौचित्यात् । न । अन्वयसम्यक्त्वाय संशब्दोक्तेरित्याह—**सम्यगिति** । हिशब्दयोगात् समन्वये हेतुरिव, ततश्च साध्यवैशिष्ट्यमाशङ्क्याह—**एतदेवेति** । **विभजते** न तत्र हेतुमाहेत्यर्थः । इह स्मारितं चेत्यन्वयः । तात्पर्येण समधिगतानीत्यसिद्धमाशङ्क्योदाहरणपूर्वं तात्पर्यस्य लिङ्गमाह—**येनेति** । भेदलक्षणे "जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति । विष्णुरुपांशु यष्टव्यः । प्रजापतिरुपांशु यष्टव्यः । अग्नीषोमावुपांशु यष्टव्यावजामित्वाये"ति वाक्ये देवतालक्षणयागरूपवत्तया विष्ण्वादिवाक्यानि यागविधयः । अरूपमन्तरा वाक्यन्तु तत्समुदायानुवादकमिति प्रापय्य सिद्धान्तितम् । तत्रत्यसिद्धान्तमाह—**यथेति** । अनूचोः सन्दष्टयोः । **जामिता** आलस्यम् । तत्प्रतिसमाधानम् 'अजामित्वाये'ति ।

निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न च तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते; 'तत्केन कं पश्येत्' (बृह. २-४-१३) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः; 'तत्त्वमसि' (छान्दो. ६-८-७) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्।

श्रिता, एवमत्रापि 'सदेव सोम्येदम्' इति ब्रह्मोपक्रमात् 'तत्त्वमसि' इति च जीवस्य ब्रह्मात्मनोपसंहारात् तत्परतैव वाक्यस्य। एवं वाक्यान्तराणामपि पौर्वापर्यालोचनया ब्रह्मपरत्वमवगन्तव्यम्। न च तत्परत्वस्य दृष्टस्य सति संभवेऽन्यपरताऽदृष्टा युक्ता कल्पयितुं; अतिप्रसङ्गात्। न केवलं कर्तृपरता तेषामदृष्टा, अनुपपन्ना चेत्याह—**न च तेषामिति**। सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षबीजं दूषयति - **न च परिनिष्ठितवस्तुस्वरूपत्वेऽपीति**। अयमभिसंधिः—पुंवाक्यनिदर्शनेन हि भूतार्थतया वेदान्तानां सापेक्षत्वमाशङ्क्यते। तत्रैवं भवान् पृष्टो व्याचष्टाम्, किं पुंवाक्यानां सापेक्षता भूतार्थत्वेनाहो पौरुषेयत्वेन। यदि भूतार्थत्वेन ततः प्रत्यक्षादीनामपि

समुदायानुवादत्वं परिहरति—**अपूर्वेति**। उपांशुयाज एव कर्म। **एकवाक्यताबलात् इति**। विष्ण्वादिवाक्यानां यागविधित्वे तद्वद्विष्णुत्वात् एकवाक्यता भज्यते अतो विष्ण्वदिवाक्यानां विशिष्टदेवताकत्वेनोपांशुयाजस्तावकत्वमित्यर्थः। समन्वये गम्यमाने अर्थान्तरकल्पना न युक्तेति प्रतिज्ञाय श्रुतहान्यश्रुतकल्पनाप्रसङ्गादिति न युक्तं, समन्वयस्य तात्पर्यात्मनो लिङ्गगम्यत्वेन श्रुतत्वाभावात् दृष्टहान्यदृष्टकल्पनेति विवक्षायां च दृष्टं हित्वादृष्टं कल्पयन्तं प्रति तत्प्रसङ्गस्य इष्टापादनत्वात् अत आह—**न चेति**। अन्यत्रापि श्रुतहान्यश्रुतकल्पनाप्रसङ्गादिति भाष्यार्थः, इत्यर्थः। न च तेषामिति कर्तृपरत्वानवसाय उच्यते। अतः पौनरुक्त्यम् अश्रुतत्वस्योक्तत्वात्। तद्विवरणे च न हीति वाच्यं न तु न चेति अत आह—**न केवलमिति**। उक्तयुक्त्या समन्वयस्य साधितत्वाद्। न च परिनिष्ठितेत्यनारम्भणीयमित्याशङ्क्य नेह युक्त्यन्तरं किन्तु पूर्वोक्तदोषोद्धरणमित्याह—**सापेक्षत्वेनेति**। **अप्रामाण्यम्** अप्रामाण्यप्रसङ्गम्। पूर्वपक्षबीजमिति दूषणीयत्वे हेतुः। वेदान्ताः यदि भूतार्थाः सापेक्षाः स्युः पुंवाक्यवदिति प्रसङ्गस्य ब्रह्मात्मभावः शास्त्रमन्तरेण नावगम्यत इति नोत्तरम्। सत्यम्। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपीत्यपि नैवोत्तरमभिप्रेतमित्याह—**अयमिति**। किं भूतार्थत्वेनाहो पौरुषेयत्वेन भवितुमर्हतीति विमृश्य कथ्यतामिति पृष्टो भवान् कृतविमर्शो योग्यं पक्षं व्याचष्टामित्यर्थः। द्वयोरपि पक्षयोर्योग्यत्वात्किं विमर्शेनेति अत आह—**यदीति**। अनेन प्रसङ्गहेतोर्व्यभिचारोऽपि सूचितः। तस्माद् द्वितीयः पक्षो योग्यः। तत्र तदेव

परस्परापेक्षत्वेनाप्रामाण्यप्रसङ्गः। तान्यपि हि भूतार्थान्येव। अथ पुरुषबुद्धिप्रभवतया पुंवाक्यं सापेक्षं, एवं तर्हि तदपूर्वकाणां वेदान्तानां भूतार्थानामपि नाप्रामाण्यं; प्रत्यक्षादीनामिव नियतेन्द्रियलिङ्गादिजन्मनाम्। यद्युच्येत सिद्धे किलापौरुषेयत्वे वेदान्तानामनपेक्षतया प्रामाण्यं सिद्ध्येत्, तदेव तु भूतार्थत्वेन न सिध्यति; भूतार्थस्य शब्दानपेक्षेण पुरुषेण मानान्तरतः शक्यज्ञानत्वाद्बुद्धिपूर्वं विरचनोपपत्तेः वाक्यत्वादिलिङ्गकस्य वेदपौरुषेयत्वानुमानस्याप्रत्यूहमुपपत्तेः[1]। तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारं, न तु भूतार्थत्वेन। कार्यार्थत्वे तु कार्यस्यापूर्वस्य मानान्तरागोचरतयात्यन्ताननुभूतपूर्वस्य तत्त्वेन समारोपेण वा पुरुषबुद्धावनारोहात् तदर्थानां वेदान्तानामशक्यरचनतया पौरुषेयत्वाभावादनपेक्षं प्रमाणत्वं सिद्ध्यतीति प्रामाण्याय वेदान्तानां कार्यपरत्वमातिष्ठामहे। अत्र ब्रूमः—किं पुनरिदं कार्यमभिमतमायुष्मतः, यदशक्यं पुरुषेण

पौरुषेयत्वमुपाधिः। न च साधनव्याप्तिरित्याह—अथेत्यादिना। अप्रामाण्यं सापेक्षत्वम्। प्रत्यक्षादीन्यपि सापेक्षाणीति मा शङ्कीत्युक्तं—नियतेन्द्रियेति। इन्द्रियादिभ्य एव तानि जायन्ते, न समानविषयपूर्वानुभवादित्यर्थः। भूतार्थवाक्यत्वे पौरुषेयत्वप्रसङ्ग इति साधनव्याप्तिं शङ्कते—यदीति। भूतार्थत्वे वाक्यत्वविशेषिते इति हृदयम्। एतच्च बुद्धिपूर्वकविरचनोपपत्तेरित्यनेन सूचितम्। भूतार्थत्ववादिनां नैयायिकाद्युक्तपौरुषेयत्वानुमानभङ्गोऽशक्य इत्याह—वाक्यत्वादीति। आदिपदेन पदानुपूर्व्यत्वादेः संग्रहः [2]उपपत्तेः। त्वां प्रतीति शेषः। उपाधेःसाधनव्यापकत्वे फलमाह—तस्मादिति। ननु भूतार्थत्वेन पौरुषेयत्वमापाद्य सापेक्षत्वापादनमित्ययुक्तं। प्रत्यक्षादौ भूतार्थत्वस्य पौरुषेयत्वव्यभिचारादिति बुद्धिपूर्वविरचनोपपत्तेरित्यत्र सूचितं वाक्यत्वे सतीति विशेषणमपश्यतः शङ्कां परिहरति—नत्विति। न तु भूतार्थत्वेन केवलेन, किन्तु वाक्यत्वविशेषितेनेत्यर्थः। ननु तवापि वाक्यलिङ्गकानुमानं दुर्वारम्। न। प्रतिकूलतर्कनिवारणीयत्वादित्याह—कार्येति। स्नानपानादिकार्यस्य मानान्तरगोचरत्वादुक्तम्—अपूर्वस्येति। समारोपेणेति [3]विभवादुक्तं, प्रमाणवाक्ये तदयोगात्। न चानपेक्षप्रामाण्यं त्याज्यम्। अपराद्धान्तापत्तेरित्याशयेनोपसंहरति—इतीति। आतिष्ठामहे स्वीकुर्महे। शङ्कां पूजयन्नुत्तरमारभते—अत्रेति। कार्यपरत्वेऽपि पौरुषेयत्वं दुर्वारमिति दर्शयन् गूढाभिसन्धिः पृच्छति किमिति। ननु प्रसिद्धमेव लोके कार्यं किमत्र प्रश्नेन अत आह—यदिति। प्रसिद्धस्य शक्यज्ञानत्वात् त्वया च कार्यमशक्यज्ञानमित्युक्तत्वात् प्रसिद्धं त्वया नाभ्युपेयमिति प्रश्न इत्यर्थः तथापि न प्रष्टव्यं

---

1 कल्पतरुभामतीविवरणाधारतः पाठः 2 उत्पत्तेरिति 3 "वैभ" ख - पाठः

ज्ञातुम् । अपूर्वमिति चेत्, हन्त कुतस्त्यमस्य लिङाद्यर्थत्वं ; तेनालौकिकेन संगतिसंवेदन-विरहात्, लोकानुसारतः क्रियाया एव लौकिक्याः कार्याया लिङादेरवगमात् । 'स्वर्गकामो यजेत' इति साध्यस्वर्गविशिष्टो नियोज्योऽवगम्यते, स च तदेव कार्यमवगच्छति यत्स्वर्गानु-कूलम् । न च क्रिया क्षणभङ्गुरामुष्मिकाय स्वर्गाय कल्पत इति पारिशेष्याद्वेदत एवापूर्वे कार्ये लिङादीनां संबन्धग्रह इति चेत्, हन्त चैत्यवन्दनादिवाक्येष्वपि स्वर्गकामादिपदसबन्धाद-पूर्वकार्यत्वप्रसङ्गः । तथा च तेषामप्यशक्यरचनत्वेनापौरुषेयत्वापातः । स्पष्टदृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्रतिषेधे वाक्यत्वादिना लिङ्गेन वेदानामपि पौरुषेयत्वमनुमितमित्यपूर्वार्थता न स्यात् । अन्यतस्तु वाक्यत्वादीनामनुमानाभासत्वोपपादने कृतमपूर्वार्थत्वेनात्र तदुप-पादकेन । उपपादितं चापौरुषेयत्वमस्माभिर्न्यायकणिकायां, इह तु विस्तरभयान्नोक्तम् । तेन पौरुषेयत्वेऽसिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातः । न चानधिग-

---

कार्यस्यापूर्वतयोक्तत्वादिति शङ्कते—**अपूर्वमिति** । अभिसन्धिमाविष्कुर्वन् दूषयति—**हन्तेति** । तत्र लिङादीनां व्युत्पत्तेस्तदर्थत्वमत आह—**तेनेति** । अलौकिकेऽपि यूपादिवत् सङ्गतिग्रहणमाशङ्क्य यूपादिपदानां लोकेऽन्यत्राव्युत्पन्नानां युक्ता अलौकिकी व्युत्पत्तिः । लिङादीनां तु लोके भावार्थकार्य-व्युत्पन्नानां नान्यत्र व्युत्पत्तिर्युक्ता य एव लौकिका इति न्यायादित्याह—**लोकानुसारत इति** । कार्यायाः कार्याकारशालिन्याः य एव लौकिका इत्यौत्सर्गिकमनुपपत्त्येह त्याज्यमिति शङ्कते—**स्वर्गेति** । **लिङादीनां** वैदिकानाम् । बुद्धगिरां कर्तृनिश्चयान्नापूर्वार्थतेति वैषम्यमाशक्याह—**स्पष्टेति** । अनुकूलतर्काभावादिना पौरुषेयत्वानुमानं दूषयामः, अत आह—**अन्यतस्त्विति** । **तदुपपादकेन** प्रतिकूलतर्कद्वारा अनुमाना-भासत्वोपपादकेन । सिद्धार्थत्वेऽपि पौरुषेयत्वानुमाने त्वदुक्तदोषाविशेषादित्यर्थः । परपक्षप्रतिक्षेपार्थत्वा-भावेऽपि स्वाभिमतापौरुषेयत्वस्थापनायापूर्वार्थत्वमित्याशङ्क्याह—**उपपादितमिति** । अनपेक्ष्यापि लिङादेर-पूर्वार्थतां भट्टमत्या न्यायकणिकायां प्रत्यक्षस्य वर्तमानमात्रग्राहिणः साध्येऽग्निहोत्रादौ धर्मेऽनवकाशात्, योगजसामर्थ्यस्यपि योग्येष्वेवाति[1]शयहेतुत्वात् लिङ्गाद्यभावेन धर्मेऽनुमित्याद्यनुदयाद्, अज्ञाते च वाक्या-प्रयोगादपौरुषेयत्वमित्यर्थः । ननु पौरुषेयत्वस्यानुमातुमशङ्क्यत्वेऽपि तत्प्रसञ्जनस्य प्राक्कृतस्य न परिहार इत्याशङ्क्य उपसंहारव्याजेनाह—**तेनेति** । पौरुषेयत्वानुमानस्यानुकूलतर्कवैधुर्याद्दोषित्वेनेत्यर्थः । **प्रामाण्यविघातः** प्रामाण्यविघातप्रसञ्जनम् । तत्र, उपाधित्वेनोक्तस्य पौरुषेयत्वस्य प्रसञ्जनेऽप्यनुकूलतर्का-भावाद् व्याप्तिशैथिल्यस्य समत्वादिति भावः । यदि चेत्येव भाष्यं पूर्वपक्षबीजमुद्धरेत्, तर्हि तत्त्वमसीति

---

1 'ये' ख-पाठः

यत्तु—हेयोपादेयरहितत्वादुपदेशानर्थक्यं इति, नैष दोषः; हेयोपादेयशून्य-

तब्रह्मात्मता नास्ति, येन प्रामाण्यं न स्यात्; जीवस्य *ब्रह्मात्मभावस्य अन्यतोऽनधिगमात्।

तदिदमुक्तम्—'न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि' इति। द्वितीयं पूर्वपक्षबीजं स्मारयित्वा दूषयति—यत्तु हेयोपादेयरहितत्वादिति। विध्यर्थावगमात् खलु पारंपर्येण पुरुषार्थप्रतिलम्भः। इह तु 'तत्त्वमसि' इत्यवगतिपर्यन्ताद्वाक्यार्थज्ञानात् बाह्यानुष्ठानायासानपेक्षात्साक्षादेव पुरुषार्थ-प्रतिलम्भो नायं सर्पो रज्जुरियमिति ज्ञानादिवेति। सोऽयमस्य विध्यर्थज्ञानात्प्रकर्षः। एतदुक्तं भवति—द्विविधं हीप्सितं पुरुषस्य। किञ्चिदप्राप्तं ग्रामादि, किंचित्पुनः प्राप्तमपि भ्रमवशादप्राप्तमित्यवगतं, यथा स्वग्रीवावनद्धं ग्रैवेयकम्। एवं जिहासितमपि द्विविधं, किंचिदहीनं जिहासति, यथा वलयितचरणं फणिनं, किंचित्पुनर्हीनमेव जिहासति, यथा चरणाभरणे नूपुरे फणिनमारोपितम्। तत्राप्राप्तप्राप्तौ चात्यक्तत्यागे च बाह्योपायानुष्ठानसाध्य-त्वात् तदुपायतत्त्वज्ञानादस्ति पराचीनानुष्ठानापेक्षा। न जातु ज्ञानमात्रं वस्त्वपनयति। न हि सहस्रमपि रज्जुप्रत्यया वस्तुसन्तं फणिनमन्यथयितुमीशते, समारोपिते तु प्रेप्सितजिहासिते

किमुत्तरेण हेतुभाष्येणेत्याशङ्क्यापौरुषेयत्वेन रचनामूलप्रमाणानपेक्षायामपि भूतार्थत्वादग्निर्हिमस्ये'ति वाक्यवत् प्रमात्रन्तरप्रत्ययानुवादकत्वादप्रामाण्यमिति शङ्कापरिहार इत्याह—**न चेति**। **ब्रह्मात्म-भावस्येति,** ब्रह्मण्यात्मभावो जीवत्वं, ततश्चोद्देश्यविधेयव्यत्यय इत्याशङ्क्य ब्रह्मात्मभावो, ब्रह्मरूपता जीवस्येति तु पूरणीयमित्याह—**जीवस्येति**। शास्त्रेण सहावगम्यत्वभ्रमं व्युदस्यति—**अन्यत इति**। **शास्त्रमन्तरेणे**ति शास्त्रादन्तरेण शास्त्रादन्यत इति विवक्षितमित्यर्थः। न चास्मिन्नर्थद्वये क्लिष्टं भाष्यम्। विना शास्त्रमन्तरेणेति च स्पष्टं प्रतीतेरित्याह—**तदिदमिति**। एतच्चानवगम्यमानत्वादित्यन्तस्य प्रतीक-ग्रहणम्। पूर्वमेवं पाठाभावादसदनुवादमाशङ्क्याह—**द्वितीयमिति**। **स्मारयित्वा** तुल्यार्थैः पदैः, न तु तथैवानूद्येत्यर्थः। अपुरुषार्थत्व[1]शङ्कायां ब्रह्मात्मावगमात्पुरुषार्थसिद्धेरित्यलम् अवगमादेवेत्यधिकमाशङ्क्य वैधज्ञानाद्विशेषज्ञापनं पूर्वपक्षबीजस्यातितुच्छत्वसूचनफलमित्याह—**विध्यर्थेति**। परोक्षज्ञानात्पुरुषार्था-सिद्धेरवगतिपर्यन्तादित्युक्तम्। सोऽयमिति प्रकर्षः एवकारोक्तः। इष्टानिष्टप्राप्तिपरिहारयोः पुमर्थयोर्व्यापार-पूर्वकत्वनियमादुक्तप्रकर्षायोगमाशङ्क्याह—**एतदिति**। **अहीनम्** अत्यक्तम्। बाह्यानुष्ठानसाध्यत्वासिद्धिमा-शङ्क्याह—**न जात्विति**। **ज्ञानमात्रं** व्यापारानपेक्षं अपनयोपायज्ञानम्। एतदपि प्रतिज्ञामात्रमित्याशङ्क्य विरोधिनोऽपि प्रत्यया वस्तु नापनयन्ति, किमुताविरोधिनस्तदपनयोपायप्रत्यया इत्यभिसन्धायोदाहरति—**न हीति**। अप्राप्तप्राप्तौ चात्यक्तत्यागे चेति किं विशेष्याभिधानेन, असमारोपितयोरनीदृक्त्वादित्याह—**समारोपितेत्विति**। **समारोपिते** आरोपिताप्राप्त्यत्यागे। **समारोपमात्रजीविते** अप्राप्त्यत्यागे। तत्रापि

---

1 "त्वा" ख - पाठः * "ब्रह्मतया" इति कल्पतरु-भामती-विवरणाधारतः पाठः

ब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः। देवतादिप्रतिपादनस्य तु

तत्त्वसाक्षात्कारमात्रेण बाह्यानुष्ठानानपेक्षेण शक्येते प्राप्तुमिव हातुमिव। समारोपमात्रजीविते हि ते, समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहन्तीति। तथेहाप्यविद्यासमारोपितजीवभावे ब्रह्मण्यानन्दे वस्तुतः शोकदुःखादिरहिते समारोपितनिबन्धनस्तद्भावः 'तत्त्वमसि' इति वाक्यार्थतत्त्वज्ञानादवगतिपर्यन्तान्निवर्तते। तन्निवृत्तौ प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति, त्यक्तमपि शोकदुःखाद्यत्यक्तमिव त्यक्तं भवति, तदिदमुक्तम्— ब्रह्मात्मावगमादेव जीवस्य सर्वक्लेशस्य सवासनस्य विपर्यासस्य। स हि क्लिश्नाति जन्तूनतः क्लेशः, तस्य, प्रकर्षेण हानात् पुरुषार्थस्य दुःखनिवृत्ति-सुखाप्तिलक्षणस्य सिद्धेरिति। यत्तु—'आत्मेत्येवोपासीत', 'आत्मानमेव लोकमुपासीत' इत्युपासनावाक्यगतदेवतादिप्रतिपादनेनोपासनापरत्वं वेदान्तानामुक्तम्, तद्दूषयति— देवतादिप्रतिपादनस्य तु आत्मेत्येतावन्मात्रस्य स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः। यदि न विरोधः, सन्तु तर्हि वेदान्ता देवताप्रतिपादनद्वारेणो-

पुनरुत्पत्तिहेतु[1]संस्कारेच्छादिव्यापारापेक्षामाशङ्क्याह—**समारोपितं चेति**। 'तत्त्वपक्षपातो हि स्वभावो धिया"मित्युक्तन्यायेनेत्यर्थः। नन्वेवं चतुर्विधे पुमर्थे कथं ब्रह्मज्ञाने क्रियानपेक्षानिश्चयः, तत्फलयोर्द्वितीयविधान्तर्भावादित्याह—**तथेहापीति**। **समारोपितं** समारोपः। तद्भावः जीवत्वम्। ननु जीवत्वं निवर्ततां, सुखदुःखप्राप्तिपरिहारयोः किमायातमत आह—**तन्निवृत्ताविति**। प्राप्तमिव भवतीत्यन्वयः। एवं त्यक्तमिव भवतीति। ननु जीवत्वारोपनिवृत्तौ पुरुषार्थसिद्धिरिति घटतां क्लेशप्रहाणात् पुरुषार्थसिद्धेरिति भाष्यं तु न घटते क्लेशप्रहाणस्यैव पुरुषार्थत्वसिद्धेरित्याशङ्क्य स्वोक्तमर्थं भाष्येण वाचयति—**तदिदमिति**। वासनोच्छेदाय क्रियापेक्षेत्याशङ्क्य सर्वपदं भाष्य इत्याह—**सवासनस्येति**। ननु क्लेशो दुःखं, न विपर्यासः, अत आह—**स हीति**। हानशब्दस्यैव त्यागार्थत्वात् प्रशब्दवैयर्थ्यमाशङ्क्याह—**प्रकर्षेणेति**। मूलाविद्यासाहित्यं प्रकर्षः। देवताप्रतिपादनमुपासनार्थमिति प्रागनुक्तत्वात् परिहारायोगमाशङ्क्य स्ववाक्यगतोपासनार्थत्वमिति भाष्योक्तमेव परिह्रियते। अत्रत्येन च देवताशब्देनोपासनावाक्यगतं सगुणमेव ब्रह्मोच्यते। अतो नायुक्तमित्याह—**यत्त्विति**। **लोकं** चैतन्यम्। देवताप्रतिपादनमुखेन सर्ववेदान्तानामुपासनार्थत्वाङ्गीकारो भाष्य इति भ्रमं नुदति—**आत्मेति**। **एतावन्मात्रस्य** 'आत्मेत्येवोपासीते'ति वाक्ये विध्यंशमुत्सृज्य शिष्टांशस्येत्यर्थः। एतच्च वाक्यान्तरेष्वपि विध्यपेक्षितसमर्पकोपलक्षणम्। देवतादीत्यादिशब्देन प्राणाद्युपास्यान्तरसङ्ग्रहः सर्वेषां वेदान्तानां देवताप्रतिपादनेनोपासनापरत्वे पूर्ववादिनोक्ते तदेकदेशस्य तत्परत्वेऽपि न विरोध इति नोत्तरम्, अंशान्तरस्य तत्परत्वप्रयुक्तविरोधानिराकृतेः। सत्यम्। इमामेव शङ्काम् उत्तरभाष्यं परिहरतीत्याह—**यदि न विरोध इति**। वेदान्तानामेव सतां केषाञ्चिदुपासनार्थ-

1 "तुतत्संस्कारं" ख - पाठः

स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः, न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति; एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः। न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति। येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत। यद्यप्यन्यत्र

पासनाविधिपरा एवेत्यत आह—न तु तथा ब्रह्मण इति। उपास्योपासकोपासनादिभेदसिद्ध्यधीनोपासना न निरस्तसमस्तभेदप्रपञ्चे वेदान्तवेद्ये ब्रह्मणि संभवतीति [1]नोपासनाविधिविषयत्वं वेदान्तानां तद्विरोधित्वादित्यर्थः। स्यादेतद्—यदि विधिविरहेऽपि वेदान्तानां प्रामाण्यं, हन्त तर्हि 'सोऽरोदीत्' इत्यादीनामप्यस्तु स्वतन्त्राणामेवोपेक्षणीयार्थानां प्रामाण्यम्। न हि हानोपादानबुद्धी एव प्रमाणस्य फले, उपेक्षाबुद्धेरपि तत्फलत्वेन प्रामाणिकैरभ्युपेतत्वादिति कृतं 'बर्हिषि रजतं न देयम्' इत्यादिनिषेधविधिपरत्वेनैतेषामित्यत आह—यद्यपीति। स्वाध्यायविध्यधीनग्रहणतया हि सर्वो वेदराशिः पुरुषार्थतन्त्र इत्यवगतम्।

त्वाविरोधो यदीत्यर्थः। वेदान्तानां विधिशेषत्वे शङ्किते ब्रह्मण उपासनाविधिशेषत्वनिषेधो व्यधिकरणः। तथा शङ्कितमुत्सृज्याशङ्कितस्योपमर्दकथनं व्यधिकरणम्। न। ब्रह्मपदेन तद्वाक्यानां विवक्षितत्वाद्, अपेक्ष्योपमर्दोक्तेरेव तदपेक्ष्युपमर्दोक्तित्वादित्याह—उपास्येति। ब्रह्मणि वेदान्तवेद्ये सतीत्यन्वयः। उपासनाविधिर्विषयो येषां ते, तथा तत्त्वम्। तद्विरोधित्वादिति। स्वप्रतिपाद्ये ब्रह्मण्युपासनानुपपत्त्या सह तत्प्रतिपादकानां वेदान्तानमुपासनाविधिविषयत्वस्य व्याहतत्वादित्यर्थः। न क्वचिदपि वेदवाक्यानामिति पूर्वपक्षवचसो न चानुमानगम्यमिति परिहारो भविष्यति। अतो यद्यपीत्याद्यधिकमिति। मैवम्। 'न क्वचिदपीत्यनया गिरा विधिमन्तरेण वेदान्तानां प्रामाण्यवदर्थवादानामपि किं न स्यादिति प्रतिबन्दी मता, अथ निदर्शनाभावात् सिद्धपरत्वं वेदान्तानां दुर्ज्ञानमिति मतमिति विकल्प्य प्रथमपक्षप्रतिक्षेपपरत्वादित्याह—स्यादेतदिति। 'सोऽरोदीदित्यादीनामपि निषेधविधिप्रामाण्यादिष्टापत्तिमाशङ्क्याह—स्वतन्त्राणामिति। विध्येकवाक्यत्वशून्यानामित्यर्थः। फलशून्यानां कथं तथा प्रामाण्यम् अत आह—उपेक्षणीयेति। हानोपादानबुद्ध्योः प्रमाणफलत्वनियमादुपेक्षणीयार्थमफलमत आह—न हीति। त्वदभ्युपगमो न मयादर्तव्यः, अत आह—प्रामाणिकैरिति। इष्टापत्तिं परिहरति—इति कृतमिति। तर्हि विध्येकवाक्यत्वमुक्तं भज्येत, अर्थवादाधिकरणपूर्वपक्षस्यैव दार्ढ्यादित्यर्थः। उक्तरीत्यार्थवादानां फलवत्प्रामाण्यसिद्धेर्यद्यपीत्यङ्गीकारायोगमाशङ्क्यार्थवादाधिकरणसिद्धान्तं दर्शयन्नाह—स्वाध्यायेति। पुरुषार्थतन्त्र इत्यवगतं, न तु प्रमाणफलमात्रतन्त्र इति।

---

1 "उपासनाविधिशेषत्व"मिति तु कल्पतरु-भामती-विवरणादिसमाहतः पाठः

वेदवाक्यानां विधिसंस्पर्शमन्तरेण न प्रमाणत्वं दृष्टं; तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम् । न चानुमानगम्यं शास्त्रप्रमाण्यं, येनान्यत्र दृष्टं निदर्शनमपेक्षेत । तस्मात्सिद्धं

तत्रैकेनापि वर्णेन नापुरुषार्थेन भवितुं युक्तं, किं पुनरियता 'सोऽरोदीत्' इत्यादिना पदप्रबन्धेन । न च वेदान्तेभ्य इव तदर्थावगममात्रादेव कश्चित्पुरुषार्थ उपलभ्यते । तेनैष पदसंदर्भः साकाङ्क्ष एवास्ते पुरुषार्थमुदीक्षमाणः । 'बर्हिषि रजतं न देयं' इत्ययमपि निषेधविधिः स्वनिषेध्यस्य निन्दामपेक्षते । न ह्यन्यथा ततश्चेतनः शक्यो निवर्तयितुम् । तद्यदि दूरतोऽपि न निन्दामवाप्स्यत्ततो निषेधविधिरेव रजतनिषेधे च निन्दायां च दर्विहोमवत् सामर्थ्यद्वयमकल्पयिष्यत् । तदेवमुक्तयोः 'सोऽरोदीत्' इति च 'बर्हिषि रजतं न देयं' इति च पदसंदर्भयोर्लक्ष्यमाणनिन्दाद्वारेण नष्टाश्वदग्धरथवत् परस्परं समन्वयः, नत्वेवं वेदान्तेषु पुरुषार्थापेक्षा, तदर्थावगमादेवानपेक्षात्परमपुरुषार्थलाभादित्युक्तम् । ननु विध्यसंस्पर्शिनो वेदस्यान्यस्य न प्रामाण्यं दृष्टमिति कथं वेदान्तानां तदस्पृशां तद्भविष्यतीत्यत आह—

न चोपेक्षा पुरुषार्थ इत्यर्थः । ननु प्रयोजनाय किं विधिस्पर्शेन, वेदान्तवदुपपत्तेरत आह —**न चेति** । **पूरुषार्थमुदीक्षमाणः साकाङ्क्षः** । पुरुषार्थपर्यन्तत्वघटके साकाङ्क्षः । अर्थवादस्य साकाङ्क्षत्वेऽपि विधेरनपेक्षत्वादसम्बन्धमाशङ्क्याह—**बर्हिषीति** । किं निषेधस्य निन्दापेक्ष्या स्वत एव फलवत्त्वादत आह —**नहीति** । न फलायाकाङ्क्षा किन्तु निवर्तने सहकारितयैवेत्यर्थः । तर्हि केवलनिषेधस्थले निवृत्तिर्न स्यात् तत्र निषेध एव निन्दां कल्पयिष्यतीति चेद् अस्तु तथात्वं प्रकृतेऽपि । न । सति सम्भवे व्यापारद्वयगौरवायोगात्, इत्याह—**तद्यदीति** । दवीयस्यपि निन्दा ग्राह्या, किमु नेदीयसीत्युक्तं—**दूरतोऽपीति** । उक्तयोः साकाङ्क्षयोः । नन्वर्थवादे रजतं दुष्टमिति तन्निन्दा न भाति । किन्त्वरोदी[1]द्रुदतीत्यादिना भूतवर्तमानरोदनाद्यनुवादः । अत आह—**लक्ष्यमाणेति** । भाष्ये 'फलपर्यन्तत्वादि'ति विधिनिरपेक्षप्रामाण्यहेतुरयुक्तः, फलपर्यन्तत्वस्य विध्यन्वयाविरोधितया 'सोऽरोदीदि'त्यादौ दर्शनादित्याशङ्क्य निरपेक्षफलपर्यन्तत्वं हेतूकृतमित्याह—**नत्वेवमिति** । न तद्विषयस्येति तच्छब्दस्यात्मज्ञानग्राहित्वभ्रमं नुदंस्तद्विशेषणभूतात्मग्राहित्वं मत्वाह—**वेदान्तेष्विति** । असिद्धिमुद्धरति—**इत्युक्तमिति** । द्वितीयकल्पोत्तरत्वमुत्तरभाष्यस्याह —**नन्विति** । शास्त्रप्रामाण्यमनुमानगम्यं नेति प्रतिज्ञामात्रमित्याशङ्क्यान्यत्रादृष्टया वेदान्तानां विध्यसंस्पृशां प्रामाण्यं प्रतिक्षिपता बोधजनकत्वं प्रतिक्षिप्यते, तन्निश्चयो वा, न प्रथम इति वक्तुं प्रामाण्यस्वरूपं तावदाह—**अबाधितेति** । अबाधितेति विपर्ययमात्रव्यावृत्तिः । असन्दिग्धेति पृथगुपादानात् ।

---

[1] 'द्रु' क पाठः

ब्रह्मणः शास्त्रप्रमाणकत्वम्। अत्रापरे प्रत्यवतिष्ठन्ते—यद्यपि शास्त्रप्रमाणकं

न चानुमानगम्यमिति। अबाधितानधिगतासंदिग्धबोधजनकत्वं हि प्रमाणत्वं प्रमाणानां, तच्च स्वत इत्युपपादितम्। यद्यपि चैषामीदृग्बोधजनकत्वं कार्यार्थापत्तिसमधिगम्यं; तथापि तद्बोधोपजनने मानान्तरं नापेक्षन्ते। नापीमामेवार्थापत्तिं, परस्पराश्रयप्रसङ्गादिति स्वत इत्युक्तम्। ईदृग्बोधजनकत्वं च कार्ये इव विधीनां वेदान्तानां ब्रह्मण्यस्तीति दृष्टान्तानपेक्षं तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवति; अन्यथा नेन्द्रियान्तराणां रूपप्रकाशनं दृष्टमिति चक्षुरपि न रूपं प्रकाशयेदिति। प्रकृतमुपसंहरति—तस्मादिति। आचार्यदेशीयानां मतमुत्थापयति—अत्रापरे प्रत्यवतिष्ठन्त इति।

उपपादितम् न्यायकणिकायामिति शेषः॥ ननु प्रमास्वरूपकार्यानुपपत्त्या तज्जनकत्वज्ञप्तिः प्रमाणानां तद्वदुत्पादकत्वमपि परतः किं न स्यादत आह—**यद्यपीति**। **नापेक्षन्ते** अस्यानुपलम्भादित्यर्थः। ज्ञप्तौ मानान्तरानपेक्षायामप्यर्थापत्त्यपेक्षावदुत्पत्तावपि तदपेक्षामाशङ्क्याह—**नापीति**। अर्थापत्त्या बोधजन्म, जातबोधानुपपत्तेश्चार्थापत्तिरिति परस्पराश्रयत्वम्। द्वितीयेऽपि नान्यत्रादर्शनं दोषाय, प्रामाण्यस्य कार्यार्थापत्तिमात्रज्ञेयत्वेन दृष्टान्तसापेक्षानुमानज्ञेयत्वाभावादीदृग्बोधरूपकार्यस्य[1] च वेदान्तेषु स्फुटत्वादित्याह—**ईदृगिति**। तद्बोधजन्मनि विगाने विधिवाक्येष्वपि तत्सुशकमिति दर्शितम्। **विधीनामेवेति** तदनेन शास्त्रप्रामाण्यमनुमानगम्यं अनुमानप्राप्यं न भवति। शास्त्रजा प्रमा अनुमानसापेक्षाच्छास्त्रान्न जायत इति प्रथमविकल्पे भाष्यव्याख्या। द्वितीये तु शास्त्रप्रामाण्यमनुमानगम्यमनुमानज्ञेयं न भवति। किन्तु परिदृष्टबोधलक्षणकार्यस्यान्यथानुपपत्त्यैवेति दर्शितं भवति। वेदान्ता न सिद्धपराः वेदत्वाद् विधिवदित्यशाङ्क्य चक्षुर्न रूपप्रमाणम् इन्द्रियत्वात् घ्राणवदित्यस्येव तादृग्बोधकार्यार्थापत्तिबाधितत्वं मत्वाह—**अन्यथेति**। दृष्टान्तानपेक्षं। तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवतीति पूर्वभाष्य एवोपसंहारकल्पनमयुक्तम्। अनन्तरमेवोपसंहारदर्शनाद्—अत आह—**प्रकृतमिति**। प्रकृतस्य ब्रह्मधर्मस्य शास्त्रप्रमाणकत्वस्यासावुपसंहारः, न तु शास्त्राद्यनपेक्षप्रामाण्यस्यावान्तरप्रमेयस्येति भावः॥ **अत्रापर** इति दूषितेभ्योऽपरे मीमांसका इति भाति। तच्चायुक्तम्। ब्रह्मणः शास्त्रप्रमाणकत्वमिच्छतां मीमांसकानामेवाभावादत आह—**आचार्येति**। तृतीयं सूत्रोक्तं ब्रह्मणि शास्त्रप्रामाण्यं किं कार्यशेषे तस्मिन्, उत स्वतन्त्र इति सिद्धव्युत्पत्त्यसम्भवसम्भवाभ्यां संशयः। वेदान्तानां प्रमाणत्वं ब्रह्मणि प्रतिपादितम्। परतन्त्रे स्वतन्त्रे वा तदित्यत्र विचार्यते, **इति बुद्धिसन्निधिः** भाष्ये 'शास्त्रस्य प्रवृत्ति' प्रयोजनत्वादिति कर्तव्यविध्यननुप्रवेशे स्यादनर्थकमिति च पूर्वपक्षप्रापकं भवति। ततश्च 'न चानुमानगम्यं शास्त्रप्रामाण्य'मित्यनेन 'हेयोपादेयशून्यब्रह्मात्मतावगमादेव क्लेशप्रहाणा'दित्यनेन च

---

[1] 'स्य वे' क-पाठः

तथाहि—'अज्ञातसंगतित्वेन शास्त्रत्वेनार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद्ब्रह्मनिश्चयः ॥' न खलु वेदान्ताः सिद्धब्रह्मरूपपरा भवितुमर्हन्ति; तत्राविदितसंगतित्वात्। यत्र हि शब्दा लोके न प्रयुज्यन्ते, तत्र न तेषां संगतिग्रहः। न चाहेयमनुपादेयं रूपमात्रं कश्चिद्विवक्षति प्रेक्षावान्; तस्याबुभुत्सितत्वात्, अबुभुत्सितावबोधने च प्रेक्षावत्ताविघातात्। तस्मात् प्रतिपित्सितं प्रतिपिपादयिषन्नयं लोकः प्रवृत्तिनिवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत्। कार्यं चावगतं तद्धेतुरिति तदेव बोधयेत्। एवं च वृद्धव्यवहारप्रयोगात् पदानां कार्यपरतामवगच्छति। तत्र किंचित्-साक्षात्कार्याभिधायकं, किंचित्तु कार्यार्थस्वार्थाभिधायकं, न तु भूतार्थपरता पदानाम्। अपि च नरान्तरस्य व्युत्पन्नस्यार्थप्रत्ययमनुमाय तस्य च शब्दभावाभावानुविधानमवगम्य शब्दस्य तद्विषयबोधकत्वं निश्चेतव्यम्। न च भूतार्थरूपमात्रप्रत्यये परनरवर्तिनि किंचिल्लिङ्गमस्ति, कार्यप्रत्यये तु नरान्तरवर्तिनि प्रवृत्तिनिवृत्ती स्तो हेतू इत्यज्ञातसंगतित्वान्न ब्रह्मरूपपरा

निरासात्तस्य दौर्बल्यमाशङ्क्य 'प्रवृत्तिनिवृत्तिपरत्वा'दिति भाष्यसूचितं प्रबलं पूर्वपक्षबीजं तदुपोद्बलकमन्यच्च प्रतीतिसौकर्याय श्लोकेन सङ्गृह्णाति—**अज्ञातेति**। सिद्धे व्युत्पत्तिं पुंवाक्यानां सिद्धपरत्वं चाङ्गीकृत्य निरपेक्षप्रमाणस्य वेदस्य न सिद्धे प्रामाण्यमिति पूर्वः पक्षः ॥ तेनास्य तस्माद् भेदः। **कार्यार्थात्** कार्यपरात्। कार्यार्थाद्ब्रह्मनिश्चय इतिप्रतिज्ञाविरुद्धो हेतुः—**अज्ञातसङ्गतित्वेनेति**। कार्यान्विते सङ्गतेर्ग्रहे तत्पराद्ब्रह्मनिश्चयव्याघातादित्याशङ्क्यार्थिकप्रतिज्ञायां सम्बन्धमाह—**न खल्विति**। असिद्धोऽयं हेतुरत आह—**यत्रेति**। लोके इति छेदः प्रयोगमूलत्वात्तस्येत्यर्थः। इच्छामस्तर्हि प्रयोगमपि। न। सिद्धे तदभावादित्याह—**न चेति**। **अहेयेत्यादि** केवलसिद्धमित्यर्थः। **विवक्षति** वक्तुमिच्छति। वक्तुरिच्छैव नास्ति दूरे तदुक्तिरित्यर्थः। विवक्षाहेतुः—**प्रेक्षावानिति**। तथापि कार्यार्थान्निश्चय इति श्रौतप्रतिज्ञासिद्धिः कुतः, अत आह—**कार्यं चेति**। **तथैव बोधयेत्** तत्रैव वाक्यं तथैव प्रयुञ्जीतेत्यर्थः। सति प्रयोगे न सिद्धवत्सङ्गत्याग्रह इत्याह—**एवञ्चेति**। **अवगच्छति** व्युत्पित्सुः। सर्वपदानां कार्यार्थत्वे पर्यायत्वमाशङ्क्याह—**तत्रेति**। ननु यथाऽयं विभागः, एवं कार्याकार्यपरत्वविभागोऽप्यस्तु। न। प्रयोगाभावस्योक्तत्वादित्याह—**नत्विति**। सिद्धे वृद्धप्रयोगस्य व्युत्पत्तिमूलस्याभावोऽसिद्धः लोके सिद्धान्वाख्यानानां बहुलमुपलम्भादित्याशङ्क्य तत्रापि कार्याध्याहारो लक्षणा वाभ्युपेया। सङ्गतिग्रहोपायभूतस्य वृद्धप्रयोगजमध्यमवृद्धवर्तिज्ञानानुमानस्य लिङ्गाभावेन सिद्धेऽनुपपत्तेरित्याह—**अपि चेति**। तस्यानुमितस्य परवर्तिज्ञानस्य यो विषयस्तद्वाचकत्वम्। एवमेवास्तु कोऽन्यथाऽऽहेत्यत आह **न चेति**। रूपग्रहणं स्फुटीकरणार्थम्। कार्यग्रहणेऽपि लिङ्गाभावाविशेषमाशङ्क्याह—**कार्येति**। **हेतू** लिङ्गे। प्रसिद्धपदसमभि-

वेदान्ताः। अपि च वेदान्तानां वेदत्वाच्छास्त्रत्वप्रसिद्धिरस्ति। प्रवृत्तिनिवृत्तिपराणां च संदर्भाणां शास्त्रत्वम्। यथाहुः—'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥' इति॥ तस्माच्छास्त्रत्वप्रसिद्ध्या व्याहतमेषां स्वरूपपरत्वम्। अपि च न ब्रह्मरूपप्रतिपादनपराणामेषामर्थवत्त्वं पश्यामः। न च रज्जुरियं न भुजङ्ग इति यथाकथञ्चिल्लक्षणया वाक्यार्थतत्त्वनिश्चये यथा भयकम्पादिनिवृत्तिः, एवं 'तत्त्वमसि' इति वाक्यार्थावगमान्निवृत्तिर्भवति सांसारिकाणां धर्माणाम्;, श्रुतवाक्यार्थस्यापि पुंसस्तेषां तादवस्थ-

---

व्यहाराधीनव्युत्पत्तिरपि प्राथमिककार्यान्वितव्युत्पत्त्यनुसारेण नेयेत्यभिसन्धाय, एवं सिद्धे व्युत्पत्त्यनुपपत्तेरनुकूलतर्कस्य सिद्धौ विगीतानि कार्यपराणि पदत्वात् कार्यपरवदित्यनुमानेन पराभिप्रेतब्रह्मपरत्वं विघटितमित्युपसंहरति—**इतीति**। शास्त्रत्वेनेति द्वितीयहेत्वसिद्धिमाशङ्क्याह—**अपि चेति**। **वेदवद्** विधिवत्। वेदवदित्युक्त्या शास्त्रत्वहेतुकानुमाने दृष्टान्तस्य साधनवैकल्यं परिहृतम्। हेतोःपक्षधर्मतामुक्त्वा व्याप्तिमाह—**प्रवृत्तीति**। व्याप्तिप्रदर्शनार्थमेव बहुवचनम्। प्रवृत्तिनिवृत्तिपराणां सन्दर्भाणां शास्त्रत्वमित्यसङ्गतम्। कस्यापि प्रवृत्तिनिवृत्तिपरत्वादर्शनादित्याशङ्क्य प्रवृत्तिनिवृत्त्यन्यतरपरत्वं विवक्षितमिति दर्शयन् सम्मतिमाह—**यथाहुरिति**। नित्येन अपौरुषेयेण। कृतकेन पौरुषेयेण। कार्यपरा वेदान्ताः शास्त्रत्वाद्विधिवत्। विपक्षे च शास्त्रत्वभङ्गप्रसङ्गः, शास्त्रलक्षणशून्यं च शास्त्रं चेति व्याहतेरित्याह—**तस्मादिति**। वेदान्ताः कार्यपराः प्रयोजनवद्वाक्यत्वात्, विधिवाक्यवदित्यर्थवत्तयेति श्लोकपादेन उक्तं। तस्याप्रयोजकत्वमाशङ्क्य विपक्षे बाधकमाह—**अपि चेति**। ब्रह्मरूपप्रतिपादनपराणां अभ्युपगम्यमानानामिति शेषः। भुजङ्गभ्रमनिवर्तकाप्तवचने व्यभिचारमाशङ्क्योपदेशमात्रसाध्यप्रयोजनशून्यत्वे सतीति हेतुविशेषणान्न व्यभिचार इत्यभिप्रेत्याह—**न चेति**। कार्यान्वितसङ्गतिग्रहनियमवादिनो रज्जुरियमित्यादिसिद्धोपदेशाङ्गीकारेण प्रकृते तद्वैषम्योक्तिरयुक्ता, अत आह—**लक्षणयेति**। कार्यान्वित एव सङ्गतिग्रहात् तस्यैव पदानां मुख्यार्थत्वेऽपि लक्षणया सिद्धार्थबोधकत्वाभ्युपगमो न विरुध्यत इत्यर्थः। लक्षणाबीजं सम्बन्धमाह—**यथाकथञ्चित्** इति कार्यान्वितस्वार्थे स्वार्थस्यापि सम्भवात् सम्बन्ध इत्यर्थः। यद्वा तत्रापि कार्याध्याहारेण सिद्धपरत्वं शक्यते निराकर्तुं, तथापि प्रतीतिकलहानर्हतयाभ्युपेत्यापि सिद्धोपदेशतां वैषम्यद्वारेण हेतुर्विशेष्यत इति सूचितं यथाकथञ्चिदिति। न चेत्यस्य निवृत्तिरित्यनेनान्वयः। सिद्धोपदेशस्य चेत्प्रयोजनम् उपदेशानन्तरमेव भवेत्। नत्विहैवमित्युक्त्या अहेयानुपादेयब्रह्मावगमादेवेति पूर्ववर्णितोक्तप्रयोजनवत्त्वं व्यावर्तितम्। मननादिप्रतीत्या चेति चकाराच्छास्त्रत्वादित्यादिवत् कार्यपरत्वे हेत्वन्तरं भाति। तन्न तावदन्वयि, हेतुमतो दृष्टान्तस्याभावात्। न व्यतिरेकि, सपक्षस्य

यात्। अपि च यदि श्रुतब्रह्मणो भवति सांसारिकधर्मनिवृत्तिः, कस्मात् पुनः श्रवणस्योपरि मननादयः श्रूयन्ते। तस्मात्तेषां वैयर्थ्यप्रसङ्गादपि न ब्रह्मस्वरूपपरा वेदान्ताः, किन्त्वात्मप्रतिपत्तिविषयकार्यपराः। तच्च कार्यं स्वात्मनि नियोज्यं नियुञ्जानं नियोग इति च मानान्तरापूर्वतयाऽपूर्वमिति चाख्यायते। न च विषयानुष्ठानं विना तत्सिद्धिरिति स्वसिद्ध्यर्थं तदेव कार्यं स्वविषयस्य करणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति। यथा च कार्यं स्वविषयाधीननिरूपणमिति ज्ञानेन विषयेन निरूप्यते, एवं ज्ञानमपि स्वविषयमात्मानमन्तरेणाशक्यनिरूपणमिति तन्निरूपणाय तादृशमात्मानमाक्षिपति, तदेव कार्यम्। यथाहुः—'यत्तु तत्सिद्ध्यर्थमुपादीयते आक्षिप्यते तदपि विधेयमिति तन्त्रे व्यवहारः' इति। विधेयता च नियोगविषयस्य ज्ञानस्य भावार्थतयानुष्ठेयता, तद्विषयस्य त्वात्मनः स्वरूपसत्ताविनिश्चितिः। आरोपिततद्भावस्य त्वन्यस्य

विधिवाक्यस्य सत्त्वादित्याशङ्क्य न केवलं श्रवणमात्रेण संसारानुवृत्तिरनुभवबलात् किन्तु युक्तितोऽपीति तत्रैव हेत्वन्तरपरत्वेन विवृणोति—**अपि चेति**। यदि ब्रह्मज्ञानमात्रान्न संसारनिवृत्तिः कस्मात्पुनः "ब्रह्म वेद ब्रह्मैव भवती"ति "तरति शोकमात्मविदि"ति च श्रूयत इति प्रतियुक्तिमाशङ्क्य विहितोपासनासाध्यसाक्षात्कारद्वारफलाभिधायित्वेन तस्यार्थवत्ता, नैवं श्रवणादिवाक्यस्य प्रकारान्तरेणार्थवत्त्वमित्याह—**तस्मादिति**। श्रुतब्रह्मणोऽपि संसारानुवृत्तिदर्शनादिव मननादिवैयर्थ्यप्रसङ्गादपि न श्रवणमात्रसाध्यप्रयोजनवदर्था वेदान्ता इति कृत्वार्थवत्त्वहेतुनानन्तरोक्तेन न ब्रह्मरूपपरा वेदान्ता इत्यर्थः। तर्हि तेषामप्रामाण्यमित्याशङ्क्य चतुर्थपादं व्याचक्षाणः परिहरति—**किन्त्विति**। प्रकरणान्तरस्थकार्यपरत्वभ्रमं नुदति—**आत्मप्रतिपत्तीति**। प्रतिपत्तिर्विषयः प्रतीत्यनुबन्धो यस्य तत्तथा। ननु प्राभाकरैर्वेदस्य नियोगपरत्वमपूर्वपरत्वमिति चोच्यते। कथं कार्यपरत्वोक्तिरत आह—**तच्चेति**। वेदान्तानामन्यपरत्वे तेभ्यः कथं वस्तुप्रमेत्याशङ्क्य विध्याक्षेपणलक्षणप्रमाणादित्याह—**न चेत्यादिना**। **तत्सिद्धिः** कार्यनिष्पत्तिः। स्वप्रतीत्युपाधित्वेन विषयस्य स्वनिर्वर्तकत्वेन करणस्य। अस्त्वेवं ज्ञानस्य विध्याक्षेपः। ब्रह्मणः कथमत आह—**यथा चेति**। **विषयाधीननिरूपणमिति** विषयमन्तरेणाशक्यनिरूपणमिति। तर्हि विषयस्य ज्ञानेनाक्षेपो न विधिना[1]। न। स्वविषयसिद्ध्यै कार्येणैव तस्याक्षेपादित्याह—**इति तन्निरूपणायेति**। उक्तक्रमेण विध्याक्षेपलभ्यत्वे ब्रह्मणः श्रौतत्वं न स्यादित्याशङ्क्य विध्याक्षिप्तस्य श्रौतत्वे गुरुसम्मतिमाह—**यथाहुरिति**। **तत्सिद्ध्यर्थं** विधेयसिद्ध्यर्थम्। उपादीयत इति गुरुवचनस्थपदव्याख्या। आक्षिप्यत इति ज्ञानस्याक्रियात्वात् व्योमवन्न विधेयत्वम्। अत एवात्मनः नित्यत्वाच्चेत्याशङ्क्याह—**विधेयता चेति**। स्पन्दरूपक्रियैव विधेयेति न नियमः। अनागतोत्पाद्यतया भावार्थमात्रस्य तथात्वोपपत्तेरित्यर्थः।—**अनुष्ठेयतेति**। ब्रह्मणि वक्ष्यमाणविधेयवैपरीत्योक्तिः। स्वरूपसत्ताविनिश्चितिः विधिद्वारिका। अयमर्थः—

---

[1] 'ना - स्व' ख - पाठः

ब्रह्म; तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते, तद्वत्।

निरूपकत्वे तेन तन्निरूपितं न स्यात्। तस्मात्तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्यस्तादृगात्मविनिश्चयः। तदेतत्सर्वमाह—यद्यपीति। विधिपरेभ्योऽपि वस्तुतत्त्वविनिश्चय इत्यत्र निदर्शनमुक्तम्—यथा यूपेति। 'यूपे पशुं बध्नाति' इति बन्धनाय विनियुक्ते यूपे तस्यालौकिकत्वात्कोऽसौ यूप इत्यपेक्षिते 'खादिरो यूपो भवति यूयं तक्षति यूपमष्टाश्रीकरोति' इत्यादिभिर्वाक्यैस्तक्षणादिविधिपरैरपि संस्काराविष्टं विशिष्टसंस्थानं दारू यूप इति गम्यते। एवमाहवनीयादयोऽप्यवगन्तव्याः। प्रवृत्तिनिवृत्तिपरस्य शास्त्रत्वं न स्वरूपपरस्य, कार्य एव च

विधिद्वारा निश्चयस्वरूपत्वमात्मनो विधेयत्वमिति नित्यत्वेऽप्यविरोध इति। "नाम ब्रह्मेत्यादाविवारोपितेनापि विषयेण ज्ञाननिरूपणान्न तद्विधिर्विषयसत्तामाक्षिपति। अत आह—आरोपितेति। वेदान्तेषु यादृग्रूपमात्मनो भाति तद्भाव आरोपितो यस्य स तथा। अन्यस्य वस्तुतत्त्वभूतस्य। तेन प्रतिभासमानरूपशालिना। तज्ज्ञाननिरूपितं न स्यादित्यर्थः। न च सत्यां गता[1]वारोपो युक्त इत्यभिप्रेत्योपसंहरति—तस्मादिति। भाष्यस्यासमर्थत्वात् स्वतन्त्रपूर्वपक्षनिर्वहणमित्याशङ्कां वारयति—तदेतदिति। सर्वस्य पूर्वपक्षस्य प्रतीकग्रहणमेतत्। विध्यपेक्षितब्रह्मस्वरूपसमर्पकसत्यज्ञानादिवाक्यवत् स्वरूपसमर्पकस्य विधीतरवाक्यस्य यूपादावभावात्तदुदाहरणं विषममत आह—विधिपरेभ्योऽपीति विधिपराद्वाक्यात् स्वरूपनिश्चय इत्येतावति दृष्टान्तः न तु विध्याकाङ्क्षितसमर्पकाद्विधिवाक्यादित्यत्रेत्यर्थः। यूपाहवनीयादीनीत्युक्त्या मिलितानां तेषां शास्त्रेण समर्पणमिति न भ्रमितव्यम्। किन्तु व्यस्तानामित्यभिसन्धायोदाहरणं विवृणोति—यूप इति। खादिर इति वार्क्ष्यत्वम्। तक्षणाष्टाश्रीकरणविधिभ्यां संस्कारभेदस्संस्कारयोगश्च गम्यत इत्यर्थः। एवमिति। "यदाहवनीये जुहोति" इति विहिते कोऽसावाहवनीय इत्यपेक्षायां "वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यादिविधिभिः संस्काराविष्टोऽग्निराहवनीय इति गम्यत इत्यर्थः। तदेतत्सर्वमाहेत्ययुक्तम् अज्ञातसङ्गतित्वेनेति हेतोर्भाष्येऽनवभासादित्याशङ्क्य शास्त्रत्वेनेति हेतुप्रपञ्चनभाष्यमध्ये 'तद्भूतानां क्रियार्थेनेति सुत्रोदाहरणात् कार्यान्विते सङ्गतिग्रहः न, स्वरूपे, इत्याद्यो हेतुरपि भातीत्याह—प्रवृत्तीति। हेतुद्वयमुपपादितम्। न तु यथाश्रुति शास्त्रत्वेनेत्येक एव हेतुरित्यर्थः। तत्तेषु पदार्थेषु भूतानां भूतार्थानां पदानां कार्यार्थेन समाम्नायः सहोच्चारणमिति सूत्रार्थः। सति च विधिपरत्व इति नियोज्यभेदोक्तिर्वृथा विधिपरत्व-

1 "तावयु" ख-पाठः

कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य। तथाहि शास्त्रतात्पर्यविद आहुः—'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति। चोदनेति क्रियायाः प्रवर्तकं वचनम्'। 'तस्य ज्ञानमुपदेशः—' (जै. सू. १-१-५) 'तद्भूतानां क्रियार्थेन समाम्नायः' (जै. सू. १-१-२५) 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्—' (जै. सू. १-२-१) इति च। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत्कुतश्चिद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम्। तच्छेषतया चान्यदुपयुक्तम्। तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्। सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादिसाधनं विधीयते,

---

संबन्धो न स्वरूपे, इति हेतुद्वयं भाष्यवाक्येनोपपादितम्—प्रवृत्तिनिवृत्तिप्रयोजनत्वात् इत्यादिना तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात् इत्यन्तेन। न च स्वतन्त्रं कार्यं नियोज्यमधिकारिणमनुष्ठातारमन्तरेणेति नियोज्यभेदमाह—सति च विधिपरत्व इति। 'ब्रह्म वेद ब्रह्मैव भवति' इति सिद्धवदर्थवादादवगतस्यापि ब्रह्मभवनस्य नियोज्यविशेषाकाङ्क्षायां ब्रह्मबुभूषोर्नियोज्यविशेषस्य रात्रिसत्रन्यायेन प्रतिलम्भः। पिण्डपितृयज्ञन्यायेन तु स्वर्गकामस्य

मात्रेणैव कार्यार्थाद् ब्रह्मनिश्चय इति पूर्वपक्षस्य पूर्तेरित्याशङ्क्य उक्तस्य नियोगपरत्वस्य नियोज्याभावादाक्षेपपरिहारोऽयमित्याह—न चेति। प्रथमं ममायं नियोग इति बुध्यमानं नियोज्यम्। अथ मदर्थमेतत् कर्मेति कर्मणि स्वामित्वं प्रतिपाद्यमानमधिकारिणम्। पश्चात्कर्मणि तस्मिन्कर्तारमनुष्ठातारमिति। ज्ञानफले कामसम्बन्धाश्रवणान्नियोज्यभेदासिद्धिमाशङ्क्याह—ब्रह्म वेदेति। पञ्चमलकारेण वेदनविधौ ब्रह्म बुभूषोर्नियोज्यविशेषस्य प्रतिलम्भः। ननु ब्रह्मभवनं वर्तमानतयार्थवादावगतं कथं ब्रह्म बुभूषोः प्रतिलम्भोऽत आह—सिद्धवदिति। अनादरे षष्ठयौ। अर्थवादाद्ब्रह्मभवनस्य सिद्धवदवगमेऽपि तमनादृत्य ब्रह्मबुभूषुरिति विपरिणामेनेत्यर्थः। एवं प्रतिलम्भे मूलं नियोगस्य नियोज्यविशेषाकाङ्क्षा। ननु यज्ञवर्मकर्मकरणवदार्थवादिकस्य फलस्य न नियोज्यविशेषणत्वमत आह—रात्रीति। प्रयाजानुयाजानामङ्गत्वात्तत्फलस्य वर्मकरण[1]स्य केवलार्थवादत्वम्। अनन्यशेषत्वात्तु वेदनविधेरार्थवादिकस्य फलस्य रात्रिसत्र[2]इव नियोज्यविशेषणत्वेन विपरिणाम इत्यर्थः। "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती"ति वाक्यविहिते रात्रिसत्रे प्रतिष्ठायाः कामसम्बन्धाश्रुतेः सर्वाभिलषितस्वर्ग एव नियोज्यविशेषणमिति प्रतितिष्ठन्तीति स्तुतिमात्रमितिप्राप्य स्वर्गकल्पनायाम, अर्थवादस्यात्यन्तपरोक्षवृत्तिप्रसङ्गादर्थवादावगतफलाभ्युपगमेन प्रतिष्ठाकामा रात्रीरुपेयुरिति विपरिणाममात्रमेव कार्यमिति चतुर्थे स्थापितम्। तमिमं न्यायं संक्षिप्याह—पिण्डपितृयज्ञन्यायेनेति। 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति कर्मवाच्यमावास्याशब्देन

---

1 'ण के'' ख - पाठः 2 ''त्रनि'' ख - पाठः

एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् । नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्, कर्मकाण्डे भव्यो धर्मो जिज्ञास्य इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति; तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति । नार्हत्येवं भवितुम्; कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । 'आत्मा वा अरे द्रष्टव्यः' (बृह. २-४-५) इति । 'य आत्माऽपहतपाप्मा—सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा. ८-७-१)

नियोज्यस्य कल्पनायामर्थवादस्यासमवेतार्थतयात्यन्तपरोक्षा वृत्तिः स्यादिति। ब्रह्मभावश्चामृतत्वमिति अमृतत्वकामस्य इत्युक्तम्। अमृतत्वं चामृतत्वादेव, न कृतकत्वेन शक्यमनित्यमनुमातुम् आगमविरोधादिति भावः। उक्तेन धर्मब्रह्मज्ञानयोर्वैलक्षण्येन विध्यविषयत्वं चोदयति—नन्विति। परिहरति—नार्हत्येवमिति। अत्र चात्मदर्शनं न विधेयम्। तद्धि दृशेरुपलब्धिवचनत्वात् श्रावणं वा स्यात् प्रत्यक्षं वा। प्रत्यक्षमपि लौकिकमहंप्रत्ययो वा, भावनाप्रकर्षपर्यन्तजं वा। तत्र श्रावणं न विधेयं; स्वाध्यायविधिनैवास्या प्रापितत्वात्, कर्मश्रावणवत्। नापि

पृथक्फलाभावमाशङ्क्यापराह्णशब्देन समभिव्याहाराद्रूढिबलाच्चामावास्याशब्दस्य कालार्थत्वात् कर्माङ्गत्वे प्रमाणाभावेन पिण्डपितृयज्ञो विश्वजिन्न्यायेन स्वर्गफलक इति स्थितं चतुर्थे । तर्हि—ब्रह्मभवनकामस्येति भाष्ये वक्तव्यम्, अत आह **ब्रह्मभावश्चेति** । ननु ब्रह्मभावो ब्रह्मत्वं नामृतत्वम् अत आह—**अमृतत्वं चेति** । ब्रह्मभावः अमृतत्वं च भवति । कुतः । ब्रह्मणोऽमृतत्वात् । ब्रह्म चेदमृतं तद्भावःकथममृतत्वं न भवेदित्यर्थः । एवमपि विध्युद्देशगतं ब्रह्मभवनपदं मुक्त्वा पदान्तरेण भाष्ये फलनिर्देशस्य किं प्रयोजनमिति, अनित्यत्वशङ्काशान्तिरित्याह—**न कृतकत्वेनेनि** । क्रियाफलत्वेनेत्यर्थ इति भावः । अमृतत्वशब्देन ब्रह्मभावं निर्दिशत इति शेषः । जिज्ञास्ययोः फलयोश्च सालक्षण्यस्य पूर्ववादिना अनुक्तत्वात् तद्वैलक्षण्योक्तिस्मारणायोगमाश-ङ्क्याह—**उक्तेनेति** । ज्ञानयोर्वैलक्षण्येन । जिज्ञास्यफलवैलक्षण्यद्वारेण । विध्यविषयत्वं ब्रह्मज्ञानस्य नेत्येव परिहारप्रतिज्ञायामर्हत्येवं भवितुमित्युत्तरेण व्याहतिमाशङ्क्य सर्वोऽयं परिहारप्रतिज्ञेत्याह—**परिहरति नार्हत्येवमिति** । कार्यविधिप्रयुक्तिविवरणभाष्ये द्रष्टव्य इति दर्शनस्य, अन्वेष्टव्य इत्यन्वेषणस्य जिज्ञासितव्य इति जिज्ञासायाः, उपासीत वेदेति चोपासनस्य विधानान्युदाहृतानि । तेषामतुल्यार्थत्वात्, मिथो विरोधमाशङ्क्योपासनमेव विधेयमिति दर्शयितुमाह—**अत्र चेति** । **श्रावणं** शब्दश्रवणजम् । चाक्षुषज्ञानस्य दर्शनत्वाद् विकल्पयोरप्राप्तिमाशङ्क्याह—**दृशेरिति** । **उपलब्धिवचनत्वाद्** उपलब्धिमात्रेऽपि प्रयुक्तत्वादित्यर्थः । **स्वाध्यायविधिबलात्** साङ्गाधीतेन प्रापितत्वादित्यर्थः । प्रत्यक्षे द्वितीयकल्पस्याहंप्रत्ययसमानार्थत्वे तस्य तत्र

'आत्मेत्येवोपासीत' (बृ. १-४-७) 'आत्मानमेव लोकमुपासीत' (बृ. १-४-१५) 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड. ३-२-९)। इत्यादिविधानेषु सत्सु कोऽसावात्मा किं तद्ब्रह्म इत्याकाङ्क्षायां तत्स्वरूपसर्पणेन सर्वे वेदान्ता उपयुक्ताः—नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म इत्येवमादयः। तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति। कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासंभवात् सप्तद्वीपा वसुमती राजासौ गच्छतीत्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात्। ननु वस्तुमात्रकथनेऽपि रज्जुरियं नायं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं, तथेहाप्यसंसार्यात्म-

---

लौकिकं प्रत्यक्षं तस्य नैसर्गिकत्वात्। न चौपनिषदात्मविषयं भावनाधेयवैशद्यं विधेयं; तस्योपासनाविधानादेव वाजिनवदनुनिष्पादितत्वात्। तस्मादौपनिषदात्मोपासनामृतत्वकामं नियोज्यं प्रति विधीयते। 'द्रष्टव्यः' इत्यादयस्तु विधिसरूपा न विधय इति। तदिदमुक्तम्—तदुपासनाच्चेति। अर्थवत्तया मननादिप्रतीत्या चेत्यस्य शेषः प्रपञ्चो निगदव्याख्यातः।

भावनाप्रकर्षजत्वाप्राप्तिं नुदन्विषयान्तराभिधानपूर्वकं परिहरति—न चेति। भावनया आधेयं वैशद्यं यस्य प्रत्यक्षस्य तत्तथा। अनुनिष्पादितत्वात् नान्तरीयकतया जायमानत्वात्। वाजिनवदिति "तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन"मित्यत्रामिक्षावाजिनयोर्दध्यानयनजत्वाविशेषादानयनं प्रति द्वयोः प्रयोजकत्वमाशङ्क्य सा वैश्वदेवीति। दधिसंस्पृष्टस्य प्रकृतस्य पयस एव तच्छब्देन तद्धितान्तर्गतेनेदमा च परामर्शात् तस्यैव चामिक्षाशब्देनोक्तत्वाद्, आनयतेर्द्विकर्मकत्वात् यत्प्रति दधि आनीयते तस्य पयस आनयनसंस्कार्यत्वात् संस्कारकर्मणश्च संस्कार्यप्रयोज्यत्वात्, आमिक्षैव प्रयोजिकेति चतुर्थे स्थितम्॥ तत्र यथा प्रयोजकनान्तरीयकमप्रयोजकम् एवं विधेयनान्तरीयकमविधेयमित्यर्थः। विजिज्ञासितव्य इत्यत्र तु विधित्वशङ्कैव न। इच्छायाः प्रयत्नासाध्यत्वात्। अन्वेषणस्यापि विचारपर्यायस्य निश्चिचीषोः स्वत एव भावादविधेयत्वं मत्वा आह—तस्मादिति। साक्षाच्चिकीर्षोरुपासनापि स्वतःसिद्धेत्यत आह—अमृतत्वकाममिति। उपासनाया मोक्षहेतुत्वमप्रसिद्धमिति विधिरित्यर्थः। दर्शनादेरविधेयत्वे विधिविभक्तिविरोधमाशङ्क्याह—द्रष्टव्य इति। स्वोक्तस्य भाष्यविरोधं परिहरति—तदिदमिति। ततश्च विधीनां सार्थवादत्वेन स्फुटतरज्ञापनाय विधिस्वरूपपाठ इति भावः। अविशिष्टहेतुविवरणेनैव पूर्वपक्षशेषो व्याख्यायत इति नेदानीं व्याख्यायत इत्याह—अर्थवत्तयेति। अस्य प्रपञ्चश्शेषः एवं विधिशेषतया

'स्म' क पाठः

वस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्। स्यादेतदेवं, यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत, न तु निवर्तते; श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारिधर्मदर्शनात्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृह. २-४-५) इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात्। तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति। अत्राभिधीयते—न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसं च कर्म

---

*तदेतद् दूषयति—अत्राभिधीयते—न एकदेशिमतम्। कुतः? कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। पुण्यापुण्यकर्मफले सुखदुःखे। तत्र मनुष्यलोकमारभ्याब्रह्मलोकात्सुखस्य तारतम्यमधिकाधिकोत्कर्षः। एवं मनुष्यलोकमारभ्य दुःखतारतम्यमाचावीचिलोकात्। तच्च सर्वं कार्यं

ब्रह्मणि वेदान्तानां प्रामाण्याच्छेषिणि सुतरां तत्प्रामाण्यमिति ब्रह्मणोऽन्यस्य तत्त्वावेदकप्रमाणवेद्यस्य प्राप्तावद्वैतभङ्ग इति पूर्वपक्षफलम्। नेति पृथगारम्भादत्राभिधीयते इत्यस्य पूर्वान्वयः प्राप्तः। सोपि न, अभ्युपगन्तव्यमितीति शब्दस्याधः प्रत्यवतिष्ठन्त इति पूर्वेण सम्बन्धादित्याशङ्क्य, अत्राभिधीयते नेति प्रतिज्ञापूर्वको निषेध इत्याह—**तदेतदिति**। अत्रेति पूर्वोक्तसर्वपरामर्श इति दर्शयितुं तदेतदित्युक्तम्। अत्रेत्यस्य सप्तम्यर्थतया नानन्वयान्निषेध्यानुक्तेश्च, निषेधस्य साकाङ्क्षत्वमाशङ्क्याह—**एकदेशिमतमिति**। सर्वत्र हेतोस्समस्तैकधर्मत्वात् षष्ठ्या हेत्वप्रवेशमाशङ्क्याह—**कुत इति**। स्फुटीकरणाय व्यस्तोपन्यासः। समस्त एव हेतुर्विवक्षित इत्यर्थः। शारीरमिति भाष्ये कर्मशब्दस्य धर्मप्रयोगादधर्मोपीत्यत्राधर्मे तदयोगादधर्मस्याकर्मत्वे कर्मज्ञानफलवैलक्षण्यविवरणे तदुक्तिरप्रस्तुतेति न भ्रमितव्यम्। कर्मणो धर्माख्यमिति विशेषणेनाधर्मस्यापि कर्मत्वस्योक्तप्रायत्वादित्याह—**पुण्यापुण्येति**। प्रत्यक्षे सुखदुःखे इति परोक्षसुखाव्यावृत्त्यै येन व्यावृत्त्यशून्यत्वं[1] स्यात् किन्तु सुखदुःखयोः कर्मफलत्वेनोच्यमानयोः अनुभवसिद्धिमात्रायेति मत्वा प्रत्यक्षपदं मुक्त्वा आह - **सुखदुःखे इति**। सुखोत्कर्षतारतम्योक्तिसिद्धमेव सुखापकर्षतारतम्यं तथा मनुष्यादिष्विति भाष्ये स्फुटीकरणार्थमुक्तमिति मत्वोत्कर्षतारतम्यमेवाह - **तत्रेति**। मनुष्यत्वादित्यत्र न जातिमात्रं किंतु मनुष्यसमुदायः। ब्रह्मान्तेष्विति च न निर्गुणं ब्रह्म, न च हिरण्यगर्भमात्रमित्याह—**मनुष्यलोकमारभ्याब्रह्मलोकादिति**। तारतम्यं तरतमभावः। तेन तरतमप्रत्ययरूपशब्दाधर्मस्तदर्थ उपचर्यत इत्याह—**अधिकाधिकोत्कर्षः** पूर्वपूर्वापेक्ष उत्तरोत्तरोत्कर्ष इत्यर्थः। यथोर्ध्वगतेष्वित्यत्र मनुष्यापेक्षयैवोर्ध्वाधोभावः, तथात्रापि ऊर्ध्वगतेष्विति दुःखापकर्षविवक्षयोक्तम्। अधोगतेष्वित्युत्कर्षविवक्षयेत्याह—**एवमिति**।

---

* "तदेकदेशिमत" मिति कल्पतर्वाद्या हतः पाठः   1 "त्वं कि" क - पाठः

च विनाशि च। आत्यन्तिकं त्वशरीरत्वमनतिशयं स्वभावसिद्धतया नित्यमकार्यमात्मज्ञानस्य फलम्। तद्धि फलमिव फलं; अविद्यापनयमात्रेणाविर्भावात्। एतदुक्तं भवति—त्वयाप्युपासनाविधिपरत्वं वेदान्तानामभ्युपगच्छता नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्यास्थीयते। सा चोपासनाविषयस्य विधेर्न फलं; नित्यत्वादकार्यत्वात्। नाप्यनाद्यविद्यापिधानापनयः; तस्य स्वविरोधिविद्योदयादेव भावात्। नापि विद्योदयः तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्। उपासनासंस्कारवदुपासनाऽपूर्वमपि चेतः सहकारीति चेत्, दृष्टं च खलु नैयोगिकं फलमैहिकमपि, यथा चित्राकारीर्यादिनियोगानामनियतनियतफलानाम्। न; गान्धर्वशास्त्रोपासनावासनाया इवापूर्वानपेक्षायाः षड्जादिसाक्षात्कारे वेदान्तार्थोपासनावासनाया जीवब्रह्मभावसाक्षात्कारेऽनपेक्षाया एव सामर्थ्यात् तथा चामृती-

दुःखतारतम्यं तत्राप्यधिकाधिकोत्कर्ष इत्येव। अत्र च सातिशयत्वानतिशयत्वकार्यत्वाकार्यत्वनित्यत्वानित्यत्वान्येव फलयोः स्वभाववैषम्यम्। श्रुतिस्मृतीति तत्प्रमाणोपन्यासः तत्र च श्रुत्यादेः प्रामाण्यं कथमित्याशङ्क्य पूर्वतन्त्रे तद्विचारितमित्यभिप्रायेण **यद्विषयेति**। शरीरवाङ्मनोभिरिति भोगप्रकारोपाधिकं वैषम्यं धर्माधर्मयोरधिकारिणां च तारतम्यं तदुपाधिकफलतारम्यनिर्वाहार्थमुक्तमित्यभिप्रेत्य साक्षाद्वैषम्यमाह—**तच्चेति**। तारतम्योपेतं सुखं दुःखं चेत्यर्थः। अनित्यत्वे कार्यत्वं हेतुः स्वभावसिद्धतयेत्यकार्यत्वे, अकार्यत्वे फलत्वभङ्गमाशङ्क्याह—**तद्धीति**। फलसाम्ये हेतुमाह—**अविद्येति**। ननूपासनाविधिवादिना मया तत्फलस्याकार्यत्वं नेष्यते कथं कार्यत्वाकार्यत्ववैषम्यमित्याशङ्क्याह—**एतदिति**। तवेष्टमुपासनाविधिफलं ब्रह्मभावो वा अविद्यानिवृत्तिर्वा, विद्योदयो वा नाद्य इत्याह—**त्वयापीत्यादिना**। **सा च** ब्रह्मात्मता विधेर्नफलं न कार्यम्। कुतः नित्यत्वादकार्यत्वात् सदातनत्वेन कार्यत्वव्याघातादित्यर्थः। सदातनत्वे हेतुः—**स्वाभाविकीति**। आत्मस्वभावानुबन्धिनीत्यर्थः। तत्र प्रमाणं **वेदान्तेति**। वेदान्तानामन्यपरत्वात्, नात्र प्रामाण्यमत आह—**विधिपरत्वमभ्युपगच्छताप्यास्थीयत** इति। यद्यपि वेदान्तप्रमाणकमिति प्रतिपत्तिविधिशेषतयैवेति चान्यपरेभ्यो वस्तुसिद्धेरुक्तत्वादित्यर्थः। यद्यपि प्राक् [1]ब्रह्मात्मभाव एव फलमिति पूर्वपक्षिणोक्तं तथापि कार्यत्वनिर्वाहाय पक्षान्तरोक्तिः सम्भवतीत्युत्तरौ विकल्पौ संस्कारसचिवादेवेत्येवकारममृष्यमाणः शङ्कते—**उपासनासंस्कारवदिति**। ऐहिकस्य विद्योदयस्य घटाद्युदयवद्विधिफलत्वायोगमाशङ्क्याह—**दृष्टमिति**। चित्राफलं पशवो भुव्येव भोग्या अपीह वा जन्मान्तरे वा भवतीत्यनियताः[2]। कारीरीफलं वृष्टिरिहैव जन्मनीति नियता। भावनायास्साक्षात्कारजनने स्वजन्यापूर्वैनैरपेक्ष्यदर्शनान्नैवमित्याह—**नेति**। एवञ्च नियोज्यविशेषाकाङ्क्षायां ब्रह्मबुभूषोः प्रतिलम्भ इति भग्नमित्याह—**तथाचेति**।

[1] 'ह्म भा' ख - पाठः [2] 'ता' क - पाठः

श्रुतिस्मृतिसिद्धं धर्माख्यं, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' (जै. सू. १-१-१) इति सूत्रिता; अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय। तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे । मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते । ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते । धर्मतारतम्यादधिकारितारतम्यम् । प्रसिद्धं चार्थित्वसामर्थ्यादिकृतमधिकारि-

---

भावं प्रत्यहेतुत्वादुपासनापूर्वस्य, नामृतत्वकामस्तत्कार्यमवबोद्धुमर्हति। अन्यदिच्छत्यन्यत्करोतीति हि विप्रतिषिद्धम् । न च तत्कामः क्रियामेव कार्यमवगमिष्यति नापूर्वमिति—सांप्रतम्; तस्या मानान्तरादेव तत्साधनत्वप्रतीतेर्विधेर्वैयर्थ्यात् । न चावघातादिविधितुल्यता; तत्रापि नियमापूर्वस्यान्यतोऽनवगतेः । न च ब्रह्मभूयादन्यदमृतत्वमार्थवादिकं किञ्चिदस्ति, येन तत्काम उपासनायामधिक्रियेत, विश्वजिन्न्यायेन तु स्वर्गाकल्पनायां तस्य सातिशयत्वं क्षयित्वं चेति न

उपासनापूर्वस्य संभाव्यमानस्य तदुपासनापूर्वं कार्यमित्यवबोद्धुं नार्हतीत्यर्थः । अमृतत्वाहेतावपि यागे नियोगवत् कार्यतावबोधोऽस्तु नेत्याह—**अन्यदिति** । अतत्साध्यमित्यर्थः । **अन्यत्** अतत्साधनम् । यद्यपूर्वं न साक्षात्कारहेतुः, तर्हि तन्मुक्त्वोपासनक्रियैव तदर्थं विधीयतां, तावतापि ब्रह्मणो विधिशेषत्वावगमसिद्धेरित्यत आह—**न चेति** । **तत्कामः** साक्षात्कारकामः **मानान्तरात्** अन्वयव्यतिरेकाभ्याम् । अवघातस्य यथा मानान्तरात् तण्डुलार्थत्वसिद्धावपि विधिः तथा, इहाप्यस्तु अत आह—**न चेति** । अवघातविधिरपि न तण्डुलार्थः किन्तु नियमापूर्वार्थः । नियमापूर्वं च परमापूर्वार्थम् । न च नियमापूर्वार्थत्वमन्वयव्यतिरेकसिद्धमेवापूर्वस्य, नत्विहापूर्वस्य कृत्यमस्ति इत्युक्तमित्यर्थः ॥ ननु ब्रह्मभावस्यामृतत्वस्य नियोगासाध्यत्वं चेदन्यदेवामृतत्वमिच्छामः यस्य नियोगसाध्यता अत आह—**न च ब्रह्मभूयादिति** । न ह्यत्र कामसम्बद्धं किञ्चित्फलं किन्त्वार्थवादिकं न चासौ, अर्थवादोऽस्ति योब्रह्मभूयादन्यत्फलं ब्रूयादित्यर्थः । आर्थवादिकादन्यस्यामृतत्वस्याभावेऽपि विश्वजितीव स्वर्गः कल्प्यतां तदेवामृतत्वमित्याशङ्क्य अर्थवादस्यात्यन्तपरोक्षवृत्तित्वप्रसङ्ग इति पूर्वोक्तदोषसंभवेऽपि दोषान्तरमाह—**विश्वजिदिति** । स्वर्गश्चेत् क्षयित्वानित्यत्वयोर्दुर्वारत्वान्न तदमृतत्वमित्युपासना, अमृतत्वफला न स्यादित्यर्थः । 'विश्वजिता यजेतेत्यनारभ्याम्नाते नियोज्यविशेषाकाङ्क्षायां नियामकाभावात् यस्य कस्यापि नियोज्यविशेषस्याध्याहारप्राप्तौ स्वर्गस्यानवच्छिन्नसुखत्वात् तस्य सर्वाभिलषितत्वात् स्वर्गकाम एव नियोज्योऽध्याहार्य

तारतम्यम् । तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनं, केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनं, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्रात् 'यावत्संपातमुषित्वा' (छा. ५-१०-५) इत्यस्माद्गम्यते । तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः । तथोर्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते । एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम् । तथा च श्रुतिः—'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति यथावर्णितं संसाररूपमनुवदति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः (छा. ८-१२-१) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते । धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते । अशरीरत्वमेव धर्मकार्यमिति चेन्न, तस्य स्वाभाविकत्वात् । 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (काठ. १-२-२१) । 'अप्राणो ह्यमनाः शुभ्रः' (मुण्ड. २-१-२)

नित्यफलत्वमुपासनायाः। तस्माद्ब्रह्मभूयस्याविद्यापिधानापनयमात्रेणाविर्भावात्, अविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव संभवात्, उपासनायाः संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारोपजनने मनःसाचिव्यस्य च मानान्तरासिद्धत्वात्, 'आत्मेत्येवोपासीत' इति न विधिः, अपि तु विधिसरूपोऽयम् । यथोपांशुयाजवाक्ये 'विष्णुरुपांशु यष्टव्यः' इत्यादयो विधिसरूपा न विधय इति तात्पर्यार्थः । श्रुतिस्मृतिन्यायसिद्धमित्युक्तं, तत्र श्रुतिं दर्शयति—तथा च श्रुतिरिति ।

इति स्थितम् । संस्कारार्थमुपासनाविधिरस्त्विति प्रागनिरस्तशङ्कां नुदन्नुक्तमर्थं बुद्धिसौकर्याय सङ्कलय्योपसंहरति—**तस्मादिति** । कथं तर्हि लिङ् अत आह—**अपि त्विति** । अविदधद् विधिप्रत्यय एव नास्तीति नियमभ्रमं निरस्यति—**यथेति** । सुखदुःखतारतम्यस्य अनित्यस्य संसाररूपस्य श्रुत्यादिप्रसिद्धिमुक्त्वा प्रियाप्रियादिस्पर्शमात्रे श्रुतिपाठायोगमाशङ्क्याह—**श्रुतीति** । **तत्र** तस्मिन्नेवार्थे । अप्रियस्पर्शोक्त्याऽप्रियस्य

'असङ्गो ह्ययं पुरुषः' (बृह. ४-३-१५) इत्यादिश्रुतिभ्यः। अत एवानुष्ठेय-

न्यायमाह—अत एवेति। यत्किल स्वाभाविकं तन्नित्यं, यथा चैतन्यम्। स्वाभाविकं चेदं, तस्मान्नित्यम्। *अपरे हि द्वयीं नित्यतामाहुः—कूटस्थनित्यतां परिणामिनित्यतां च। तत्र नित्यमित्युक्ते मा भूदस्य परिणामिनित्यतेत्यत आह—तत्र किञ्चिदिति। परिणामिनित्यता हि न पारमार्थिकी, तथाहि—तत्सर्वात्मना वा परिणमेदेकदेशेन वा। सर्वात्मना परिणामे कथं न तत्त्वव्याहतिः। एकदेशपरिणामे वा स एकदेशस्ततो भिन्नो वाऽभिन्नो वा। भिन्नश्चेत् कथं तस्य परिणामः, न ह्यन्यस्मिन्परिणममानेऽन्यः परिणमतेऽतिप्रसङ्गात्। अभेदे वा कथं न सर्वात्मना परिणामः। भिन्नाभिन्नं तदिति चेत्,

प्रियस्पर्शोक्त्या वा प्रियस्य सातिशयत्वान्तवत्त्वयोरपि सिद्धेरुक्त एवार्थे श्रुतिर्दर्शिता भवतीत्यर्थः। स्मृतिन्याययोः प्रसिद्धत्वादनुक्तिः। ननु वैलक्षण्योपसंहारे अत इत्यलम्। एवकारस्त्वधिकः। न। अनन्तरोक्तस्वाभाविकत्वहेतुकेन न्यायेन नित्यत्वप्रसाधनपूर्वकं वैलक्षण्योपसंहारादित्याह—**न्यायमिति**। न्यायं व्यनक्ति—**यत्किलेति**। किलेति प्रसिद्धौ। **स्वाभाविकम्** आत्मन इति शेषः। अयं न्यायः श्रुतिस्मृतिन्यायेत्यत्रत्यो न भवति, तस्य संसाररूपगोचरत्वात्। किञ्चित्परिणामि नित्यं, स्यादिदं तु कूटस्थनित्यमित्युक्त्वा, अस्मादन्यस्य परिणामिनित्यताङ्गीकारादपसिद्धान्तः अस्य कूटस्थनित्यतोक्तेः फलमपि न पश्यामः इत्याशङ्क्य पराङ्गीकृतात् परिणामिनित्याद् वैषम्यमुच्यत इति नापसिद्धान्तः। न चाफलत्वं, परिणामिनित्यत्वादस्य परिणाम[1]सिद्ध्यै क्रियानुप्रवेश इति भ्रमशान्त्यर्थत्वादित्यभिप्रेत्याह—**अपरे हीति**। **तत्र किञ्चिदिति** इदं तु पारमार्थिकमित्ये[2]तत्सहितस्य प्रतीकग्रहणम्। भाष्ये किञ्चित्परिणामिनित्यमिति किञ्चिद्ग्रहणमन्यदपरिणामि नित्यमपीति भातीति द्वयीमित्युक्तम्। इदं तु पारमार्थिकमिति भाष्ये कौटस्थ्ये पारमार्थिकत्वं हेतुः। तस्य परिणामिनित्य[1]त्वव्यभिचारं वारयति—**परिणामीति**। बाधकाभावे कथमपारमार्थिकतेत्याशङ्क्य युक्तिबाधमाह—**तथा हीत्यादिना**। **तत्** परिणममानम्। पूर्वरूपपरित्यागेन रूपान्तरापत्तिर्हि परिणामः। तत्र तत् स्वात्मानमवस्थां च त्यक्त्वा, अन्यथा भवति, अत अपेक्षिते धर्मिणि तदवस्थैवान्यथा भवतीति विकल्पयोरर्थः। तत्त्वस्य पूर्वं यत्स्वरूपं तद्भावस्य व्याहतिः। एतदुक्तं भवति—स्वरूपत्यागो हि प्रध्वंसः तत्प्रतियोगित्वे नित्यत्वं न स्यादिति। **कथं तस्येति**। भिन्नस्यांशस्य परिणामे तस्याविनाशिनः परिणामः कथमित्यर्थः। परिणामिनोंऽशस्य भिन्नस्यापि तदीयत्वात् परिणामोंऽशिन इत्याशङ्क्याह—**न हीति**। **अतिप्रसङ्गादिति**। तर्हि क्षीरं चैत्रीयमिति तत्परिणामश्चैत्रपरिणामः स्यादित्यर्थः। **अभेदे वेति**। त्यज्यमानावस्थैक्ये स्वरूपत्याग इत्यर्थः। विकल्पयोर्न्यूनत्वं मत्वा शङ्कते—**भिन्नाभिन्नमिति**। तत्

*परे हीति कल्पतर्वादिदृतः पाठः 1 'मि' ख - पाठः 2 "त्येतत्स" क - पाठः

कर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम् । तत्र किञ्चित्परिणामिनित्यं यस्मिन्विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते; यथा पृथिव्यादि जगान्नित्यत्ववादिनाम्, यथा च सांख्यानां गुणाः, इदं

तथाहि; तदेव कारणात्मनाऽभिन्नं भिन्नं च कार्यात्मना । कटकादय इवाभिन्ना हाटकात्मना । भिन्नाश्च कटकाद्यात्मना । न च—भेदाभेदयोर्विरोधान्नैकत्र समवाय इति युक्तं; विरुद्धमिति नः क्व संप्रत्ययो यत्प्रमाणविपर्ययेण वर्तते, यत्तु यथा प्रमाणेनावगम्यते तस्य तथाभाव एव । कुण्डलमिदं सुवर्णमिति सामानाधिकरण्यप्रत्यये व्यक्तं भेदाभेदौ चकास्तः । तथा ह्यात्यन्तिकेऽभेदेऽन्यतरस्य द्विरवभासप्रसङ्गः । भेदे वात्यन्तिके न सामानाधिकरण्यं, गवाश्ववत् । आधाराधेयभावे एकाश्रयत्वे वा न सामानाधिकरण्यं, न हि भवति कुण्डं बदरमिति ।

परिणममानमेकदेशरूपम् । परिणममानस्यांशस्य भेदान्नांशिस्वरूपत्यागः । अभेदाच्च तत्परिणामोंऽशिनो भवतीत्यर्थः । भेदाभेदयोरेकत्र विरोधमाशङ्क्य व्यवस्थामाह—**तथा हीति** । **तदेव** परिणममानमेकदेशरूपम् । **कार्यात्मना** अवस्थात्मनैकदेशरूपेण । अनुपलब्धैषा व्यवस्था कथमिहाभ्युपेयते अत आह—**कटकादय इवेति** । दृष्टान्तोऽप्यनिष्टः विरोधादित्याशङ्क्याह—**न चेति** । **समवायः** सङ्गमः प्रामाणिकत्वादविरोधं विवक्षुरप्रामाणिकस्य विरुद्धतां प्रामाणिकस्याविरुद्धतां चाह—**विरुद्धमिति** । त्वमेव ब्रूहीत्यत आह—**यदीति** । **यत् प्रमाणविपर्ययेण** प्रमाणराहित्येन वर्तते । तत्र विरुद्धमिति नस्सम्प्रत्यय इत्यनुषङ्गः । यद्येवं कटकहाटके भिन्नाभिन्ने इति प्रमित्यभावाद् भेदाभेदौ विरुद्धौ अत आह—**कुण्डलमिति** । **सामानाधिकरण्यप्रत्यये** एकत्र भिन्नप्रवृत्तिनिमित्तानेकशब्दप्रयोगयोग्यप्रत्यये । भिन्नाभिन्नपदाप्रयोगेऽपि भेदाभेदप्रथा दुर्वारेत्यर्थः । प्रत्येकपक्षनिराकरणेन भेदाभेदबुद्धेर्व्यक्ततामाह-**तथाहीति** । **अभेदे** स्वर्णमात्रत्वे । स्वर्णस्य कुण्डलमात्रत्वं, कुण्डलस्य द्विरवभासः । अवभासनिमित्तद्विरभिधानं, कुण्डलपदम् । सुवर्णेत्यन्ताभिन्नार्थं यदि स्यात् सुवर्णपदं पर्यायः स्यात् हेमपदवदित्यर्थः । **गवाश्ववदिति** सामान्यव्याप्तिकप्रसङ्गदृष्टथा । विशेषप्रसङ्गस्तु कुण्डलपदं हेमात्यन्तभिन्नार्थं यदि स्याद्धेमपदसमानाधिकृतं न स्यात् रूप्यपदवदिति द्रष्टव्यः । अथवा विशेषप्रसङ्ग एव गवाश्वयोर्द्वयोरुदाहरणार्थमेतत् अत्यन्तभेदेऽपि स्वर्णकुण्डलयोराधाराधेयभावाद्वा स्वर्णत्वकुण्डलत्वयोरेकाश्रयत्वाद्वा सामानाधिकरण्यं तच्छब्दयोः रूप्यादिपदेषु सुवर्णादिश्रितार्थशून्यत्वं सुवर्णत्वैकाश्रयार्थशून्यत्वं चोपाधिरित्याशङ्क्याह—**आधारेति** । उपाधी तु साध्याव्यापकौ सुवर्णस्योपरि रजतनिक्षेपसम्भवादिति भावः । सामानाधिकरण्यधियो

---

1 " त्यव्य " क - पाठः

नाप्येकासनस्थयोश्चैत्रमैत्रयोश्चैत्रो मैत्र इति। सोऽयमबाधितोऽसंदिग्धः सार्वजनीनः सामानाधिकरण्यप्रत्यय एव कार्यकारणयोर्भेदाभेदौ व्यवस्थापयति। तथा च कार्याणां कारणात्मत्वात्, कारणस्य च सद्रूपस्य सर्वत्रानुगमात्, सद्रूपेणाभेदः कार्यस्य जगतः, भेदः कार्यरूपेण गोघटादिनेति। यथाहुः—'कार्यरूपेण नानात्वमभेदः कारणात्मना। हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा॥' इति। अत्रोच्यते—कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत्। परस्पराभाव इति चेत्, किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा। न चेद्, एकत्वमेवाऽस्ति, न च भेदः। अस्ति चेद्भेद एव नाभेदः। न च भावाभावयोरविरोधः; *सहासंभवात्। संभवे वा कटकवर्धमानकयोरपि तत्त्वेनाभेदप्रसङ्गः; भेदस्याभेदा-

न भेदाभेदप्रापकत्वं भ्रमसन्देहयोस्तदभावादत आह—सोयमिति। सार्वजनीन इत्यसङ्कुचितसंवादत्वम्। स च बाधाभावे हेतुः। कार्यकारणयोः स्वर्णकुण्डलयोः। आत्मस्वरूपभूताशरीरत्वस्य परिणामिनित्यतानिषेधः प्रक्रान्तः। तत्र पूर्वपक्षिणा परिणामनिर्वाहाय भेदाभेदावुपक्षिप्तौ। तौ च कटकहाटकोदाहरणेऽनुभवबलाद् साधितौ, तद्वदात्माहं जगदिति सामानाधिकरण्यप्रत्ययाभावाद् दार्ष्टान्तिके तयोरप्राप्तिमाशङ्क्य सदिदमिति सर्वत्र सामानाधिकरण्यप्रत्ययात्, सतश्चात्मस्वरूपत्वात्प्रकृतेप्यक्षतो भेदाभेदानुभव इत्याह—तथा चेति। न चायमसदनुवादःपूर्वपक्षस्येत्याह—यथाहुरिति। प्रसिद्धत्वाद्भेदस्य प्रश्नायोगमाशङ्क्य भेदसामानाधिरण्यस्याधिकस्य त्वयोच्यमानत्वात्प्रश्न इत्याह—थ इति। किं रूपादिवद्भावरूपो धर्मः, उतैक्याभाव इति विकल्पाभिप्रायेण प्रश्नः, नाद्यः, एकदेशस्ततोऽभिन्नो भिन्नो वेत्यैक्यतदभावविकल्पयोरस्मदभिप्रेतत्वात्, दूषणपरिहाराय पक्षान्तरं ब्रुवताऽन्यस्य भेदशब्दार्थस्याभेदसामानाधिकरण्योक्तावपि पूर्वोक्तदोषानिस्तारात्। द्वितीयं शङ्कते—परस्परेति। साधारणोक्तस्य भेदशब्दार्थस्य दृष्टान्ते सत्त्वासत्त्वे विकल्पयति। किमयमिति विकल्पस्य प्राप्तिं दर्शयितुं—कार्यकारणयोरिति। यद्यपि कारणभेदात् सत्त्वस्यानभ्युपगमात् न विकल्पः कल्पते तथाप्यैक्यमेव वा परस्पराभावो वा नोभयमेकत्रेति दर्शयितुं विकल्प इत्यदोषः। अत्यन्तं भेदासमानाधिकृतम् तत्र हेतुः—न भेद इति। ब्रूषे यत इति शेषः। अंशवत् कुण्डलांशस्य स्वस्मादत्यन्ताभेदत्वादित्यर्थः। एवकारव्यवच्छेद्यमाह—नाभेद इति। नाभेदः कथं, भेदवदैक्यस्यापि सत्त्वात् अत आह—न चेति। अविरोधः एकस्थत्वम्। सहासम्भवात् साहित्यायोग्यत्वादित्यर्थः। असिद्धिमाशङ्क्याह—सम्भवे वेति। तत्त्वेन कटकवर्धमानकरूपेण। कारणात्मनाऽभेदस्य इष्टत्वात् तत्त्वेनेत्युक्तम्। तेन रूपेण भिन्नयोः कथं तेनैवाऽभेदः, अत आह—भेदस्येति। अविरोधात्त्वत्पक्ष इति शेषः। अत्रेयं प्रसङ्गरीतिः। कटकाभिन्नत्वं नियामकवत् तद्रहितं वा। प्रथमेऽपि कटकभेदरहितत्वं

* सहावस्थानासंभवादिति कल्पतरुधृतः पाठः

विरोधात् । अपि च कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते एवं कटकात्मनापि न भिद्येरन्; कटकस्य हाटकादभेदात् । तथा च हाटकमेव वस्तुसन्न कटकादयः; भेदस्या*प्रतिभासात् । अथ हाटकत्वेनैवाभेदो न कटकत्वेन, तेन तु भेद एव कुण्डलादेः । यदि हाटकादभिन्नः कटकः, कथमयं कुण्डलादिषु नानुवर्तते । नानुवर्तते चेत्कथं हाटकादभिन्नः कटकः ? ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव, यथा सूत्रात्कुसुमभेदाः । नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः, तस्मात्तेऽपि हाटकाद्भिन्ना एवेति । सत्तानुवृत्त्या च

नियामकम् । अन्यद्वा । नाद्यः हेम्नि व्यभिचारात् । न द्वितीयः, तदनिरूपणात् । नियामकशून्यं चेत् वर्धमानकेऽपि स्यात् प्रमेयत्ववदिति । एवमतिप्रसङ्गान्तरेषूह्यम् । [अथवा वादीन्द्रमत्या प्रसङ्गातिरिक्तप्रतिबन्ध्यतिप्रसङ्गादिषु व्याप्तिरनपेक्ष्या ?] संयोगतदभाववदैक्यतदभावयोरिहाविरोधः न चातिप्रसक्तिः तद्वक्तृत्वादौ विरोधनियमसम्भवादत आह—**अपि चेति** । किमापादकमित्याशङ्क्य हाटकादभेद इत्यनूदितमेवेत्याह—**कटकस्येति** । मकुटादयः कटकाभिन्नाभिन्ना यदि स्युः कटकाभिन्नाः स्युः कटकवदिति प्रसङ्गः । इष्टापत्तिमाशङ्क्य कटका[1]न्मकुटादीनामेवोक्तरीत्या मकुटादिभ्योऽपि कटकस्य भेदभङ्गे मिथः कलहात् कटकमकुटादिसर्वभेदास्तमये स्वर्णाद्वैतं स्यादित्याह—**तथा चेति** । हाटकत्वमेव, अनाकलितविशेषं हाटकमात्रम् । **अप्रतिभासात्** अप्रमितेः । ननु स्वर्णाकारेणैव कुण्डलाद्याकारेणाभेदो नानुभूयते । किन्तु भेदः । एवं सत्यनुभवपराहतमभेदापादनमित्यापादनमुद्रानभिज्ञः शङ्कते—**अथेति** । आपादनस्य अनुभवविरोधोऽलङ्कारः न दूषणमित्यभिसन्दधानः पूर्वोक्तं स्मारयति—**यदीति** । कटकस्य कुण्डलाद्यनुवृत्त्यापादनमेव कुण्डलादीनां कटकरूपेणाभेदापादनमिति पूर्वोक्तता । कथं नानुवर्तत इत्यनुवृत्तिरापाद्यते न तु साध्यते । तत्र कथमनुभवविरोधो दोष इति भावः । उक्तं प्रसङ्गं विपर्यये पर्यवसाययति—**नानुवर्तते चेदिति** । कथं हाटकादभिन्न इति प्रतिज्ञा । हाटकादभिन्नो न भवतीत्यर्थः । नानुवर्तते चेदित्यापाद्यविपर्ययो हेतुः । कुण्डलादिष्वननुवर्तमानत्वादित्यर्थः । व्याप्तिमाह—**ये हीति** । एवकारो भेदस्यातात्त्विकार्थः । अनेन ये कटकादिषु नानुवर्तन्ते ते हाटकाद्भिन्ना एव यथा कुसुमभेदा इति विशेषव्याप्तिः सूचिता । उपनयति—**नानुवर्तन्ते चेति** । हाटकत्वे निर्विशेषेण हाटकमात्रे । नानुवर्तते चानुवर्तमानेपि हाटके कटक इति वक्तव्ये कुण्डलादिग्रहणं प्रसङ्गतद्विपर्ययौ कुण्डलादिसर्वसाधारणौ प्रदर्शनार्थं तूक्तः कटक इति दर्शयितुम् विनिगमयति—**तस्मादिति** । इहापि बहुत्वं पूर्ववत् । [2]हाटकवत् कटकस्य कुण्डलादावनुवृत्त्यङ्गीकारादिष्टापादनं, प्रसङ्गे विपर्यये च हेत्वसिद्धिरित्याशङ्क्य तर्हि तन्न्यायेन सदाकारवत् गोघटादेरपि सर्वकार्यानुगमो वाच्यः । अन्यथा व्यावर्तमानानामनुवर्तमानसंभेदायोगात् ततश्च व्यवस्थितव्यवहारभङ्गः इत्याह —**सत्तानुवृत्त्येति** । हाटकानुवृत्त्या कटकाद्यनुवृत्तिवत् सदनुवृत्त्या सह गोघटादिसर्ववस्तूनां परस्परानुगम

---

* अप्रतिभासनादिति कल्पतरुधृतः पाठः   1 'कमकु' ख - पाठः   2 'क' क-पाठः

सर्ववस्त्वनुगमे इदमिह नेदम्, इदमस्मान्नेदम्, इदमिदानीं नेदम्, इदमेवं नेदमिति विभागो न स्यात्। कस्यचित् क्वचित् कदाचित् कथञ्चिद्विवेकहेतोरभावात्। अपि च दूरात्कनकमित्यवगते न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन्; कनकादभेदात्तेषां, तस्य च ज्ञातत्वात्। अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽप्यज्ञातास्ते। नन्वभेदोऽप्यस्तीति किं न ज्ञाताः, प्रत्युत ज्ञानमेव तेषां युक्तं, कारणाभावे हि कार्याभाव औत्सर्गिकः, स च कारणसत्तयाऽपोद्यते। अस्ति चाभेदे कारणसत्तेति कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः। तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत्ततो भिद्यते, यथा करभे गृह्यमाणेऽगृह्यमाणो रासभः करभात्। गृह्यमाणे च दूरतो हेम्नि

इत्यर्थः। इह देशे। इदं गवादि। नेदं कृष्णमृगादि। इदं बलाकागर्भादि। अस्मात् अम्बुदध्वानात्। नेदं गोगर्भादि। इदं पिकरुतं। इदानीं वसन्ते। नेदं हंसरुतं। इदं कुम्भादि। एवं कम्बुग्रीवादिप्रकारं। इदं पटादि। एवं न भवति। कस्यचिदपि विवेकहेतोरभावादित्यन्वयः। कुतश्चिदित्यपि द्रष्टव्यम्। कस्यापि देशकालप्रकारविवेकहेत्वभावादित्यर्थः। कुसुमादेः सुवर्णा[1]दिभिन्नत्वं सुवर्णेऽनुवर्तमाने व्यावर्तमानत्वान्न, किन्तु सुवर्णाविकारत्वादित्युपाधिरिति चेत् न, व्यतिरेकासिद्धेः। तर्हि विपक्षे बाधकाभावादप्रयोजकता। न, हेतुभङ्गप्रसङ्गस्य बाधकत्वादित्युत्तरसंभवेऽपि विभवाद् बाधकान्तरमाह—अपि चेति। कनकमित्यवगमानन्तरं ये जिज्ञास्यन्ते कुण्डलादयः, ते यदि कनकादभिन्नाः तदा ते न जिज्ञासार्हाः स्युः कनकरूपवदिति प्रसङ्गः। कनके कनकभेदरहितत्वमुपाधिरिति शङ्कते—अथेति। सह कनकेन ज्ञातेषु तदानीमजिज्ञास्येषूपाधेः साध्याव्याप्तिः स्फुटेति तामुपेक्ष्य यत्र कनकभेदवत्त्वं तत्र तदा न जिज्ञासार्हत्वं यथा रूप्यादीति व्यतिरेके कनकादिभेदरहितत्वमुपाधिः। ततश्चोभयोः परस्परविरोधादविनिगम इत्याह—नन्विति। कथं तर्हीति निश्चित्य प्रसङ्गः, अत आह—प्रत्युतेति। अत्रोपपत्तिमाह—कारणाभावे हीति। सत्यं कारणं प्रकृते नास्तीत्यत आह—अस्ति चेति। अभेदे ज्ञानसामग्रीमतः कनकादभेदे। कारणसत्ता ज्ञानकारणसत्ता। न च भेदात् कारणसत्तापीति वाच्यम्। भावाभावयोर्भावस्यैव प्रबलत्वात्। तत्प्रयुक्तया कार्यस्यैवाभ्यर्हितत्वात्। अत एव संयोगतदभावयोरेकवृत्तित्वेऽपि तदभावमवधीर्य नोदनादिसंयोगसत्ता स्वोचितकार्यं नुद्यमानादौ करोतीति भावः। उक्तयुक्तिबाधादुपाधेर्व्याप्तिभङ्गेऽभ्युपेये निश्चित्य प्रसङ्गोपपत्तिरित्याह—कनक इति। जिज्ञासाश्च ज्ञानानि चेति विग्रहः। तद्बहुत्वं च कुण्डलादिबहुत्वात्। अनर्थकानि स्युः ततश्च न स्युरित्यर्थः। अस्यापि प्रसङ्गस्य विपर्ययमाह—तेनेति। यस्मिन्नित्याद्युदाहरणम्। गृह्यमाणे चेत्युपनयः। तस्मादिति निगमनम्। उपनयनिगमनाभ्यां हेतुप्रतिज्ञासिद्धिः। भिद्यन्ते। तदैक्यवन्तोऽपि न भवन्ति। भेदमात्रसाधने भेदा

---

[1] र्णाभि ? ख-पाठः

न गृह्यन्ते तस्य भेदाः कुण्डलादयः, तस्मात्ते हेम्नो भिद्यन्ते। कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यम्? इति चेत्, न ह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम्। अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम्? न खल्वभेद ऐकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते इत्युक्तम्। तस्माद्भेदाभेदयोरन्यतरस्मिन्नवहेयेऽभेदोपादानैव भेदकल्पना, न भेदोपादानाऽभेदकल्पनेति युक्तम्। भिद्यमानतन्त्रत्वाद्भेदस्य, भिद्यमानानां च प्रत्येकमेकत्वात्, एकाभावे चानाश्रयस्य भेदस्यायोगात्, एकस्य च भेदानधीनत्वात्, नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वात्, एकत्वग्रहस्य चान्यानपेक्षत्वात्, अभेदोपादानैवानिर्वचनीयभेदकल्पनेति सांप्रतम्। तथा च

भेदवादिनं प्रति सिद्धसाधनत्वात्। कुण्डलादयः कनकैक्यवन्तोऽपि न भवन्ति। तस्मिन् गृह्यमाणे अगृह्यमाणत्वात् रासभवत् इति विशेषव्याप्तिकानुमानम्। ऐक्यनिषेधानुमानयोः सामानाधिकरण्यप्रतीतिभङ्गप्रसङ्गबाधकं शङ्कते—**कथं तर्हीति**। मिथो विरोधेन तर्कमिमं दूषयति—**अथेति**। नन्वनैकान्तिकाभेदं न ब्रूमः, भेदस्याप्यनुप्रवेशादत आह—**अनैकान्तिके चेति**। अनैकान्तिकेप्यभेदे उक्ता व्यवस्था नोपपद्यत इत्युक्तम्। प्रत्युत ज्ञानमेव तेषां युक्तमित्यत्र अथमर्थः—तर्कद्वयविरोधात् सामानाधिकरण्यधीरेवैकाकिनी कथञ्चिन्नेयेति। तदिदमुक्तं—**उभयमिति**। तर्त्कि भेदाभेदौ त्याज्यौ, तथाप्यनुपपत्तिः, विरुद्धयोरभावसमुच्चयायोगात्। अथैकस्यैव त्यागाददोषः, तन्न। विनिगमाभावादित्याशङ्क्य परिहरन्। स्वाभिप्रेतं सामानाधिकरण्यबुद्धेः कथञ्चिन्नयनमाविष्करोति—**तस्मादिति**। **अवहेये** अपारमार्थिकत्वेन त्याज्ये। **अभेदोपादाना** एकाधिष्ठाना। **भेदकल्पना** भेदभ्रान्तिः। निगमनार्थमेवकारः। तद्व्यवच्छेद्यमाह—**नेति**। आद्यप्रतिज्ञायां हेतुमाह—**भिद्यमानेति**। तावता कथमेकोपादानता, अत आह—**भिद्यमानानामिति**। भिद्यमानानामेकत्वादित्युक्ते मिथ इति भ्रमप्राप्तं व्याघातं नुदति—**प्रत्येकमिति**। भिद्यमानतन्त्रत्वासिद्धिमुद्धरति—**एकाभाव इति**। द्वितीयप्रतिज्ञायां हेतुमाह—**एकस्य चेति**। चस्त्वर्थः। भेदाभावस्यैक्यस्य सत्त्वादित्यर्थः। एवं स्थितौ भेदस्यैक्यापेक्षा, ऐक्यस्य भेदानपेक्षां चोक्त्वा प्रतीतावप्याह—**नायमिति**। **प्रतियोगिग्रहणापेक्षत्वात्** प्रतियोगिनश्चैकत्वादिति शेषः [1]**अन्यानपेक्षत्वाद्** भेदग्रहणानपेक्षत्वात्। अभेदोपादनैवेति प्रतिज्ञायोपपादितमुपसंहरति—**अभेदेति**। तत्रापि भेदाभेदयोरेकत्रविरोधस्तदवस्थः, न, चन्द्रमसीव अलीकभेदस्य वास्तवाभेदाविरोधादित्याह—**अनिर्वचनीयेति**। उक्ततर्कानुग्राह्यप्रमाणमाह—**तथा चेति**। एवं व्यभिचारनिवारणादिदं तु पारमार्थिकं

तु पारमार्थिकं, कूटस्थनित्यं, व्योमवत्सर्वव्यापि, सर्वविक्रियारहितं, नित्यतृप्तं, निरवयवं, स्वयं ज्योतिःस्वभावम् । यत्र धर्माधर्मौ सह कार्येण

श्रुतिः—'मृत्तिकेत्येव सत्यम्' इति । तस्मात् कूटस्थनित्यतैव पारमार्थिकी न परिणामिनित्यतेति सिद्धम् । व्योमवत् इति च दृष्टान्तः परसिद्धः ; अस्मन्मते तस्यापि कार्यत्वेनानित्यत्वात् । अत्र च कूटस्थनित्यम् इति निर्वर्त्यकर्मतामपाकरोति । सर्वव्यापि इति प्राप्यकर्मताम् । सर्वविक्रियारहितम् इति विकार्यकर्मताम् । निरवयवम् इति संस्कार्यकर्मताम् । व्रीहीणां खलु प्रोक्षणेन संस्काराख्योंऽशो यथा जन्यते, नैवं ब्रह्मणि कश्चिदंशः क्रियाधेयोऽस्ति ; अनवयवत्वात्, अनंशत्वादित्यर्थः । पुरुषार्थतामाह—नित्यतृप्तमिति । तृप्त्या दुःखरहित सुखमुपलक्षयति । क्षुद्दुःखनिवृत्तिसहितं हि सुखं तृप्तिः । सुखं चाप्रतीयमानं न पुरुषार्थ इत्यत आह—स्वयंज्योतिरिति । तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य

कूटस्थनित्यमित्यत्रोक्तं । पारमार्थिकत्वं कौटस्थ्ये हेतुर्भवतीति, उपसंहरति—**तस्मादिति** । व्योम्नो नित्यत्वे व्यापित्वे वा दृष्टान्तत्वे सिद्धान्तभङ्गमाशङ्क्याह—**व्योमवदिति** । अथ स्वसिद्ध एव कस्मान्नेत्यन्यस्य शङ्कां परिहरति—**अस्मदिति** । कार्यत्वेन वियदधिकरणसिद्धेनानित्यत्वात् एतदव्यापित्वोपलक्षणम् । कौटस्थ्यव्यापित्वाभ्यां विकारावयवराहित्यसिद्धौ पौनरुक्त्यमाशङ्क्य विशेषणानां कृत्यमाह—**अत्र चेति** । ननु निरवयवस्यावयवो न घटते । न तु संस्कार इत्याशङ्क्यावयवशब्देनांशापरपर्यायो, धर्मविशेषो विवक्षित इत्याह—**व्रीहीणामिति** । खलुशब्दःप्रसिद्ध्यर्थो दृष्टान्तासम्मतिव्युदासाय । एवं चेदंशवत्तामपाकरोतीति वक्तव्यम्, न तु संस्कारकर्मतामिति अंशशब्दस्य धर्ममात्रवाचित्वादित्याशङ्क्य संस्कारराहित्यप्रतिज्ञा हृदिस्था तत्र हेतुपरं निरवयवमिति भाष्यपदमित्यभिप्रेत्याह—**अनवयवत्वात्** न चानवयवशब्दस्य मुख्यार्थत्वमिति भ्रमितव्यमित्यनन्तरोक्तमनुस्मृत्याह—**अनंशत्वादिति** । एवं चांशमात्रायोग्यत्वात् अंशविशेषायोग्य ब्रह्मेत्युक्तं भवति । एवं पूर्वविशेषणानि हेतुपराणि प्रतिज्ञास्तु हृदिस्थाः क्रियाप्रवेशावारकत्वादुत्तरविशेषणवैयर्थ्यमाशङ्क्य कार्यान्तरमाह—**पुरुषार्थत्वमिति** । सुखदुःखप्राप्तिपरिहारयोरेव पुरुषार्थत्वात् तृप्तमिति कथं पुरुषार्थतोक्तिरत आह—**तृप्त्येति** । लक्षणाद्वारं सम्बन्धमाह—**क्षुद्दुःखेति** । दुःखविशेषनिवृत्तिसहितसुखविशेषवाचिना पदेन तत्संबन्धस्य सामान्यस्य लक्षणमित्यर्थः । तर्हि स्वयं ज्योतिरित्यधिकमत आह—**सुखं चेति** । ननु मोक्षस्य नित्यत्वादपूर्वासाध्यत्वमुक्तम्, अतस्तद् यदि कर्तव्यशेषत्वेनेत्यादि वृथा । अथ परपक्षप्रतिक्षेपोपकारकः तथाप्ययुक्तम् आगमबाधेनानित्यतायाः प्राक् पूर्ववादिना निरासात् । अपि च ब्रह्म वेदेत्याद्युपन्यस्य मध्ये कार्यान्तरं वारयन्तीत्ययुक्तम् । वेदन[1]नियोगरूपं कार्यं ब्रुवता ततोऽन्यस्य कार्यस्यानुक्तेरप्रसक्तप्रतिषेधापातात् । अत आह—**तदेवमिति** । श्रुत्यादिभिः श्रुतिभिर्न्यायैः [प्रसज्यत

---

1 'नं' ख पाठः

कालत्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' (क. २-१४) इत्यादिश्रुतिभ्यः। अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता, तद्यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते, अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः। अपि च 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड. ३-२-९) 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' (मुण्ड. २-२-८)। 'आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चन' (तैत्ति. २-९) 'अभयं वै जनक प्राप्तोऽसि' (बृह. ४-२-४)। 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (वाजसनेयिब्राह्मणोप. १-४-१०) 'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' (ईशा. ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति। तथा 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं

क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसञ्जयति—तद्यदीति। (न चागमबाधः; आगमस्योक्तेन प्रकारेणोपपत्तेः। अपि च) ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याह—अपि च ब्रह्म वेदेति। अविद्याद्वयप्रतिबन्धापनयमात्रेण च विद्याया मोक्षसाधनत्वं न स्वतोऽपूर्वोत्पादेन चेत्यत्रापि श्रुतीरुदाहरति—त्वं हि

इत्यपि?] तद्यदि कर्तव्यशेषत्वेनेत्यादिनोपपाद्येत्यनुषङ्गः। उक्तेन प्रकारेण अपूर्वासाध्यत्वेनोपपत्तेरित्यभिसन्धानेनेति शेषः। मोक्षो ज्ञानजन्यापूर्वजनितः स नैयोगिक इत्यस्यार्थस्येत्यन्वयः। दृष्टेनैव रूपेण ज्ञानस्य मोक्षसाधनत्वात्, ज्ञानमोक्षयोर्मध्ये कार्यान्तरमलौकिकं नियोगापरपर्यायं मोक्षसाधनभूतं वारयतीति भाष्यार्थः। न तु नियोगान्तरमिति विवक्षितं भाष्ये। अतो न तृतीयानुपपत्तिरित्यर्थः। पूर्वानुपपत्तिद्वयनिरासस्तु व्यक्तः। मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलमित्ययुक्तम्। 'त्वं हीत्यादाववियानिवृत्तेरेव प्रतीतेः। किञ्च तन्मात्रफलत्वे ज्ञानस्य मोक्षफलत्वं प्रागुक्तं विरुध्येत। मात्रमेवेत्यनयोरन्यतरवैयर्थ्यं च। असङ्गतं चेदमपूर्वभङ्गप्रस्तावे इत्याशङ्क्य अविद्याया एव प्रतिबन्धत्वात् तद्ध्वंसद्वारेण, मोक्षस्य फलवद्फलत्वात्, मात्रचः प्रतिबन्धध्वंसमनन्तर्धाय स्वरूपेणैव मोक्षसाधनतानिवृत्त्यर्थत्वात्, एवकारस्यापूर्वद्वारवारणार्थत्वाद्, अत एव प्रकृतासङ्गतत्वाभावान्न दोष इत्याह—अविद्येति। तथा च सति सूत्रं न्यायोपबृंहितं भवतीति

मनुरभवं सूर्यश्च' (बृह. १-४-१०) इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम् । यथा तिष्ठन्गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते । 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' (प्र. ६-८) 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु' (छान्दो. ७-१-३) 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनात्कुमारः' (छान्दो. ७-२६-२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति । तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्—'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या. सू. १-१-२) इति ।

नः पितेति । न केवलमस्मिन्नर्थे श्रुत्यादयः, अपित्वक्षपादाचार्यसूत्रमपि न्यायमूलमस्तीत्याह—तथा चाचार्यप्रणीतमिति । आचार्यश्चोक्तलक्षणः पुराणे—'आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि । स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥' इति । तेन हि प्रणीतं सूत्रम्— 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति । पाठापेक्षया कारणमुत्तरं, कार्यं च पूर्वं, कारणापाये कार्यापायः, कफापाय इव कफोद्भवस्य ज्वरस्यापायः । जन्मापाये दुःखापायः, प्रवृत्त्यपाये जन्मापायः, दोषापाये प्रवृत्त्यपायः ।

फलितोक्तिर्भाति, तथा च अप्रकृतोक्तिः । आचार्यप्रणीतमिति चायुक्तं, व्यासाप्रणीतत्वात् । न्यायोपबृंहितमिति च न्यायेन सूत्रस्य स्वरूपवृद्ध्यभावादयुक्तम् अत आह—न केवलमिति । अक्षपादस्य कथमाचार्यता तल्लक्षणयोगादिति मत्वाह—आचार्यश्चेति । प्रणीतपदस्य न्यायपदेन कर्मधारयभ्रमम्, आचार्यसूत्रमिति स्वोक्तेरयुक्तत्वशङ्कावहं निरस्यति—तेन हीति । सूत्रं हि तेन प्रणीतं न न्यायः न्यायानामनादित्वादित्यर्थः । भाष्ये सूत्रस्य अर्थतोऽनुक्रमणशङ्कां[1] नुदन् स्वयमपि तथैव पठति—दुःखेति । ननूत्तरापाये कथं पूर्वापायः, न ह्युत्तरस्य घटस्यापाये पूर्वा मृदपैति । अत आह—पाठेति । पाठापेक्षया पूर्वोत्तरत्वमुच्यते । स्वरूपापेक्षयैवोच्यतामित्यन्यस्य शङ्कां वारयति—कारणेति । कारणापाय एव कार्यापायदर्शनादेवमुक्तिरित्यर्थः । सर्वाण्युत्तरोत्तराणि प्रति कस्यचिदेकस्यानन्तरत्वाभावात्, तदन्तनन्तराभावादित्ययुक्तमाशङ्क्य तदनन्तरानन्तरेति विवक्षितमिति दर्शयन्नाह—जन्मेति । यदि मिथ्याज्ञानापाये दोषापाय इत्युपक्रम्योच्येत, तर्हि मिथ्याज्ञानादीनामधराधरत्वादुत्तरोत्तरत्वं न व्यज्येत । अतो जन्मापाय इत्युप-

---

1 'मे' ख-पाठः

मिथ्याज्ञानापाये दोषापायः। मिथ्याज्ञानं चाविद्या, रागाद्युपजननक्रमेण दृष्टैनैव संसारस्य परमं निदानम्। सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वविज्ञानेनावगतिपर्यन्तेन विरोधिना निवर्त्यते। ततोऽविद्यानिवृत्त्या ब्रह्मरूपाविर्भावो मोक्षः, न तु विद्याकार्यस्तज्जनितापूर्वकार्यो वेति सूत्रार्थः। तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्येतावन्मात्रेण सूत्रोपन्यासः, नत्वक्षपादसंमतं

क्रमोक्तम्। ननु सूत्रे मिथ्याज्ञानापाय इत्युक्तः नाविद्याद्वयप्रतिबन्धनिवृत्तिः। कथमुक्तेऽर्थे संवादः अत आह—**मिथ्याज्ञानं चाविद्येति**। ननु मिथ्याज्ञानस्य[1] दोषादिकरणता कथम् अविद्याप्रतिबन्ध-भङ्गद्वारेण मोक्षः साध्यत इत्यत्र सम्मतिश्च कथम्। सूत्रे मिथ्याज्ञाननिवृत्त्यदोषापायस्यैवोक्तत्वादि-त्याशङ्क्य, कार्यकारणभावो दर्शनसिद्धः, अविद्यायाः सर्वान्तपाठेन संसारमूलकारणत्वमुक्तम्। अतस्तदपाये तन्मूलसर्वसंसारनिवृत्त्युपपत्तेः सम्मतित्वं चेति मत्वाह—**रागादीति**। मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानादित्ययुक्तं, मिथ्याज्ञानापायस्यास्य तत्त्वज्ञानैकसाध्यत्वात् शाब्दब्रह्मात्मैकत्वज्ञानेऽपि तदनपायाचेत्यत आह—**सा चेति अवगतिपर्यन्तेन**। अत एव विरोधिना निवर्तयितुं क्षमेणेत्यर्थः। सूत्रे तदनन्तरापायादपवर्ग इत्यपवर्गस्याभावसाध्यता प्रतीयते, ततः स्वयमभावं प्रति हेतोस्तत्त्वज्ञानस्यापि मोक्षस्तद्द्वारा निष्पाद्य एव। एवं च प्रतिबन्धनिवृत्तिमात्रेण मोक्षो ज्ञानस्य फलमिव फलं न तु ज्ञानस्वरूपेण तज्जन्यापूर्वेण वा साध्य इति पूर्वोक्तेऽर्थे संवादत्वभङ्ग इत्याशङ्क्य सूत्रेऽप्यविद्यानिवृत्तिद्वाराभिव्यक्तिमेवापेक्ष्य पञ्चमीप्रयोगः, न तु स्वरूप-निष्पत्तिमपेक्ष्य, अक्षपादेनापि मोक्षस्य नित्यसुखस्याभिव्यक्तिमात्रत्वाभ्युपगमात्, इत्याह—**तत इति**। तत्त्वज्ञानादित्यर्थः। ब्रह्मरूपस्य नित्यानन्दस्याविर्भावः "आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते" इति श्रुतेर्नैयायिकैरुदाह्रियमाणत्वात्। तर्हि सूत्रे मिथ्याज्ञानापायमात्रं प्रतीयते न तु तद्धेतुज्ञानमिति सम्मतेर्न्यूनत्वमाशङ्क्य, मिथ्याज्ञानापायोक्तिसामर्थ्यलब्धज्ञानं कथयता भाष्यकारेण मिथ्याज्ञानापायश्च तत्त्वज्ञानाद्भवतीति वाच्यं। न तु ब्रह्मात्मैकत्वविज्ञानादिति। अस्य ज्ञानस्य अक्षपादस्यानिष्टत्वादित्याशङ्क्य, तत्सूत्रोदाहरणात् तदुक्तमेव तत्त्वज्ञानमिष्टं। ततश्च सिद्धान्तत्याग इति न भ्रमितव्यम्। तमंशं मुक्त्वा अंशान्तरे सम्मतेरभिप्रेतत्वादिति ज्ञापनार्थत्वादस्य भाष्यस्यादोष इत्याह—**तत्त्वज्ञानादिति**। मिथ्याज्ञानापाय इत्येतत् तद्द्वारा मुक्तेरभिव्यक्तिरेव न तु विद्यया तदपूर्वेण वा साध्यत्वमित्यस्याप्युपलक्षणमिह सम्मतमिति दर्शयितुं मिथ्याज्ञानापायश्चेति भाष्यमिति शेषः। नन्वस्मिन्नर्थे सूत्रमप्यस्तीति, उपन्यासः किमर्थः। प्रमित्यर्थमिति चेत्, न, श्रुतिभिरेवास्य अर्थस्य प्रमितत्वात्। अक्षपादवचसोऽस्मान् प्रत्यनागमत्वाच्च अत

[1] "ज्ञानदोषाधिकरणता" क-पाठः

तत्त्वज्ञानमिह संमतम् । तदनेनाचार्यान्तरसंवादेनायमर्थो दृढीकृतः । स्यादेतत्—नैकत्वविज्ञानं स्थितवस्तुविषयं, येन मिथ्याज्ञानं भेदावभासं निवर्तयन्न विधिविषयो भवेत्, अपि तु संपदादिरूपम् । तथा च विधेः प्रागप्राप्तं पुरुषेच्छया कर्तव्यं सत् विधिगोचरो भविष्यति । यथा वृत्त्यनन्तत्वेन मनसो विश्वेदेवसाम्याद्विश्वान्देवान्मनसि संपाद्य मन आलम्बनमविद्यमानसमं कृत्वा प्राधान्येन संपाद्यानां विश्वेषामेव देवानामनुचिन्तनं तेन चानन्तलोकप्राप्तिः । एवं चिद्रूपसाम्याज्जीवस्य ब्रह्मरूपतां संपाद्य जीवमालम्बनमविद्यमानसमं कृत्वा प्राधान्येन ब्रह्मानुचिन्तनं तेन चामृतत्वफलप्राप्तिः अध्यासे त्वालम्बनस्यैव प्राधान्येनारोपिततद्भावस्यानु' चिन्तनं, यथा 'मनो ब्रह्मेत्युपासीत' 'आदित्यो ब्रह्मेत्यादेशः' । एवं जीवमब्रह्म 'ब्रह्मेत्युपासीत' इति । क्रियाविशेषयोगाद्वा, यथा 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' । बाह्या खलु वायुदेवता वह्न्यादीन् संवृङ्क्ते । महाप्रलयसमये हि वायुर्वह्न्यादीन्संवृज्य संहृत्यात्मनि स्थापयति । यथाह द्रविडाचार्यः—'संहरणाद्वा संवरणाद्वा स्वात्मीभावाद्वायुः संवर्गः' इति ।

आह—**तदनेनेति** । श्रुतिसिद्धस्यैवार्थस्य न्यायाभिज्ञप्रसिद्धिमदाचार्यवचस्संवादेनान्यायताशङ्का नोदेतीति । तदर्थः, तदुपन्यास इत्यर्थः । न चेदं ब्रह्मात्मैकत्वविज्ञानमित्यादिना न तावत् प्रतिपत्तिविधिशेषतया ब्रह्मसिद्धिमिच्छतः पूर्वपक्षिणो मतव्युदासः, तेनेत्थमनङ्गीकारात्, अङ्गीकारे वा विधिद्वारावस्तुसिद्धिभङ्गात्, नापि पूर्वपक्षान्तरस्य, अनुपन्यस्तत्वात् वृथा च संपदादिनिराकरणं तत्रापि हानेरदर्शनादित्याशङ्क्य-इहैवान्यस्य मतमाशङ्क्य निरस्यते । अनिरासे च विधिप्रवेशप्राप्तेः तद्भङ्गाय तन्निराकरणं सफलमित्याह—**स्यादेतदिति** । एकत्वज्ञानं ब्रह्मात्मैकत्वज्ञानम् । **स्थिरवस्तुविषयम्** अबाधितवस्तुगोचरम् । यथा 'अनन्तं वै मनः" इति सम्पदुदाहरणे । मनसोऽनन्तत्वमुक्तम् । तत्रोपा (सकै ? स्यै) कत्वादानन्त्यानुपपत्तिः मनसो विश्वेषां देवानां च यथायथमानन्त्यस्योच्यमानत्वात् । ज्ञानं न प्रतीयते । कथञ्चित्ज्ञानाध्याहारेऽपि नास्या अध्यासात् स्याद्भेदः परत्र परबुद्धित्वादत आह—**यथेति** । तर्हि वाक्यद्वयेनैव सम्पदुक्तेस्तृतीयवाक्यं वृथा अत आह—**तेन चेति** । यदि संख्यातोऽनन्ते अनन्तानां [1]चिन्तासम्पत्तिस्तर्हि जीवे ब्रह्मदृष्टेः सम्पत्प्राप्तिरिति तन्निषेधायोगमाशङ्क्य तुल्यबुद्धिमात्रं सम्पदिति मत्वा दार्ष्टान्तिकमाह—**एवमिति** । अत्राप्यनन्तलोकप्राप्तिः फलमिति शङ्कां नुदति—**तेन चेति** । सम्पत्प्रक्रियोक्तिमात्रेण नाध्यासाद्भेदसिद्धिः, अतोऽध्यासप्रक्रियामाह—**अध्यासेत्विति** । तर्हि कथं जीवे ब्रह्मदृष्टिरध्यासः चैतन्यसाम्यात् सम्पद एव अर्हत्वात् । न, अस्मिन्पक्षे तस्य साम्यस्य उपेक्षणीयत्वादित्याह—**एवमिति** । क्रियाविशेषयोगाद्वा वस्तुनि दृष्टिर्विधीयत इति शेषः । संवर्ग इति दृष्टेः क्रियायोगमूलतामाह—**बाह्येति** । आदिशब्दात्सूर्य-

---

1 "न्तनास" ख - पाठः

अध्यात्मं च प्राणः संवर्ग इति। स हि सर्वाणि वागादीनि प्रायेण संवृङ्क्ते। प्रायणकाले हि स एव सर्वाणीन्द्रियाणि संगृह्योत्क्रामतीति। सेयं संवर्गदृष्टिर्वायौ प्राणे च दशाशागतं जगद्दर्शयति यथा, एवं जीवात्मनि बृंहणक्रियया ब्रह्मदृष्टिरमृतत्वाय फलाय कल्पत इति। तदेतेषु त्रिष्वपि पक्षेष्वात्मदर्शनोपासनादयः प्रधानकर्माण्यपूर्वविषयत्वात्। स्तुतशस्त्रवत्, आत्मा तु द्रव्यं कर्मणि गुण इति संस्कारो वात्मनो दर्शनं विधीयते। यथा दर्शपूर्णमासप्रकरणे 'पत्न्यवेक्षितमाज्यं भवति' इति समाम्नातं, प्रकरणिना च गृहीतमुपांशुयागाङ्गभूताज्यद्रव्यसंस्कारतयावेक्षणं

चन्द्राप:। सत्यपि वायौ वह्न्यादेरक्षतत्वात् कथं संवर्गः वायुनैव वह्न्यादेः संवरणादत आह—**अध्यात्ममिति**। **इति** चिन्तनीय इति शेषः। संहार्याभावे कथं संवर्गता अत आह—**स हीति**। आदिशब्दाच्चक्षुस्त्वक्घ्राणरसनश्रोत्रमनांसि। सति प्राणे वागादिदर्शनात् विरुद्धमिदमत आह—***प्रायेणेति**। यद्यपि सुषुप्तौ प्राणः संवर्ग इत्याह श्रुतिः तथापि न्यायसाम्याल्लयस्य च वक्तव्यत्वात् प्रायणमुक्तम्। इति शब्दस्संवर्गत्वनिरूपणसमाप्त्यर्थः। वह्न्यादेरुपलक्षणत्वात् सर्वाश्रयत्वं वायौ प्राणे चिन्त्यमित्याह—**सेयमिति**। **दशाशागतं** दशदिग्गतं जगदन्तर्भूतत्वेन—**दर्शयति**। दार्ष्टान्तिके क्रियाविशेषं दर्शयन् दृष्टान्तवदिहापि द्वयोर्दृष्टिरिति भ्रमं नुदति—**एवमिति**। बृंहणं शरीरादेर्वर्धनम् संस्कारपक्षो नाज्यावेक्षणादिवदिति भाष्यकारेण वक्ष्यमाणः पूर्वेष्वपि पक्षेष्वात्मानमुपासीतेति द्रव्यशेषताप्रतीतेस्तस्य पूर्वेभ्यो भेदायोगमाशङ्क्य विनियोगभङ्गेन प्रधानकर्मत्वमेव सम्पदादिष्वार्थवादिकफलानुसारादिष्टमित्याह—**तदेतेष्विति**। आदिशब्देन वेदनं गृह्यते। 'आत्मन्येवात्मानं पश्येत्' 'आत्मानमुपासीत' "ब्रह्म वेदे"ति विधिवाक्यस्थपदभेदमात्रेणैकस्मिन्नप्युपासने बहुवचनम्। अपूर्वजन्यतया विषयो येषां कर्मणां तानि तथा तत्त्वात्। **स्तुतशस्त्रवदिति** द्वितीयेस्थितम्—"आज्यैःस्तुवते" "प्र उ गं शंसति" इति श्रूयते। तत्राज्यप्रउगशब्दौ स्तोत्रशस्त्रविशेषनामनी। प्रगीतमन्त्रसाध्यं गुणाभिधानं स्तोत्रम्॥ अप्रगीतमन्त्रसाध्यं तु शस्त्रम्। तत्र गुणाभिधानाद् गुणवत्या देवताया अभिधानेन क्रतूपयोगिदेवतास्मरणस्य दृष्टत्वादनयोः स्तोत्रशस्त्रयोर्गुणकर्मत्वे प्राप्ते, स्तवनशंसनयोर्गुणाभिधानमात्ररूपत्वेन स्वरूपप्रकाशनत्वाभावात्, "विशालवक्षाः क्षत्रियः" इति स्तुतौ स्वरूपप्रकाशनस्याविवक्षितत्वाद् यो विशालवक्षास्तमानयेति स्वरूपप्रकाशने स्तुतेरविवक्षितत्वात् स्तौतिशंसत्योर्मुख्यार्थत्वायापूर्वकर्मतेति कथं तर्ह्यात्मानमिति द्वितीयेत्याशङ्क्य आत्मनोपासीतेति विनियोगभङ्गमत्वाह—**आत्मा त्विति**। **द्रव्यमिति** गुणत्वयोग्यतोक्तिः। अवेक्षितमिति कर्मणि निष्ठया [1]आज्यावेक्षणं गुणो विधीयते। आनारभ्यपाठप्रयुक्तं विनियोगभङ्गं वारयति—**दर्शपूर्णमासेति**। पूषानुमन्त्रणमन्त्रवदुत्कर्षं निरस्यति—**प्रकरणिनेति**। ग्रहणे हेतुमाह—**उपांश्विति**। अन्यत्राप्याज्यभागादौ आज्यप्रवेशोऽप्याज्यस्योपांशुयाज एव

---

*प्रायेणेति पाठः कल्पतर्वाद्यादृतो न भवति   1 'ज्ये' ख. पाठः

मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति । न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्, यथा 'अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' (बृह. ३-१-९) इति । न चाध्यासरूपम्, यथा 'मनो ब्रह्मेत्युपासीत' (छान्दो. ३-१८-१) 'आदित्यो ब्रह्मेत्यादेशः' (छान्दो. ३-१९-१) इति च मन आदित्यादिषु ब्रह्मदृष्ट्यध्यासः । नापि विशिष्टक्रिया-योगानिमित्तं, 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' (छान्दो. ४-३-१,३) इतिवत् । नाप्याज्यावेक्षणादिकर्मवत्कर्माङ्गसंस्काररूपम् । संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने 'तत्त्वमसि' (छान्दो. ६-८-७) 'अहं ब्रह्मास्मि' (बृह. १-४-१०) 'अयमात्मा ब्रह्म' (बृह. २-५-१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' (मुण्ड. २-२-८) इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन् । 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड. ३-२-९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन् । तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम् । अतो

गुणकर्म विधीयते, एवं कर्तृत्वेन क्रत्वङ्गभूते आत्मनि 'आत्मा वा अरे द्रष्टव्यः' इति दर्शनं गुणकर्म विधीयते । 'यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत' (जै. अ. २पा. १ सू. ८) इति न्यायादत आह—न चेदं ब्रह्मात्मैकत्वविज्ञानमिति । कुतः ? संपदादिरूपे हि ब्रह्मात्मैकत्व-विज्ञान इति । दर्शपूर्णमासप्रकरणे हि समाम्नातमाज्यावेक्षणं तदङ्गभूताज्यसंस्कार इति युज्यते । न च 'आत्मा वा अरे द्रष्टव्यः' इत्यादि कस्यचित्प्रकरणे समाम्नातम् ।

प्रधानहविष्ट्वादुपांशुयाजाङ्गेत्युक्तम् । नन्वात्मनः स्वामित्वेन प्रधानस्यानङ्गत्वात् कथमाज्यवत्संस्कार इत्याशङ्क्य तस्याङ्गत्वयोग्यावस्थां दर्शयन्नाह—एवमिति । द्रव्यसंस्कारो गुणकर्मेत्यत्र जैमिनिसूत्रमाह—यैस्त्विति । यैरवघातादिभिर्द्रव्यं व्रीह्यादि चिकीर्ष्यते संस्कर्तुमिष्यते, तत्र तत्कर्म द्रव्ये गुणभूतं प्रतीयेतेत्यर्थः । सम्पदादिरूपे पदसमन्वयः पीड्येतेत्येतावतैवानिष्टापादनसिद्धौ हिशब्दाधिकृयमाशङ्क्य, आपादनस्य पूर्वप्रति-ज्ञायां हेतुत्वाय हिशब्द इत्याशयेनाह—कुत इति । वाक्यप्रकरणाभ्यां आत्मदर्शनस्य कर्माङ्गत्वासिद्धेर्न संस्कार इति संस्कारपक्षदोषे सति साधारणदोषोक्त्ययोगमाशङ्क्याह—दर्शपूर्णमासेति । आत्मोपासनस्य कर्माङ्गत्वं प्रकरणाद् वाक्याद्वा आद्यं दृष्टान्तवैषम्यपूर्वं निरस्य द्वितीयं दृष्टान्तमुक्त्वा तद्वैषम्यपूर्वं निरस्यति—न चेति ।

न पुरुषव्यापारतन्त्रा ब्रह्मविद्या। किं तर्हि? प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रा। एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम्। न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः; 'अन्यदेव तद्विदितादथो अविदितादधि' (केन. १-३) इति विदिक्रियाकर्मत्वप्रतिषेधात्, 'येनेदं सर्वं विजानाति तं केन विजानीयात्' (बृह. २-४-१३) इति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति—'यद्वाचानभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मणः उपन्यस्य

न चानारभ्याधीतमपि 'यस्य पर्णमयी जुहूर्भवति' इत्यव्यभिचरितक्रतुसंबन्धजुहूद्वारेण जुहूपदं क्रतुं स्मारयद्वाक्येन यथा पर्णतायाः क्रतुशेषभावमापादयति, एवमात्माऽव्यभिचारतक्रतुसंबन्धः, येन तद्दर्शनं क्रत्वङ्गं सदात्मानं क्रत्वर्थं संस्कुर्यात्। तेन यद्ययं विधिस्तथापि 'सुवर्णं भार्यम्' इतिवत् विनियोगभङ्गेन प्रधानकर्मैवापूर्वविषयत्वान्न गुणकर्मेति स्थवीयस्तयैतद्दूषणमनभिधाय सर्वपक्षसाधारणं दूषणमुक्तम्, तदतिरोहितार्थतया न व्याख्यातम्। किञ्च ज्ञानक्रियाविषयत्वविधानमस्य बहुश्रुतिविरुद्धमित्याह—न च विदिक्रियेति। शङ्कते—

जुहूपदं पर्णतायाः क्रतुशेषभावमापादयतीति सम्बन्धः। शेषत्वे प्रमाणं **वाक्येनेति**। क्रतुपदाभावात् तच्छेषत्वबोधिवाक्याभावमाशङ्क्याह—**क्रतुं स्मारयदिति**। स्मारणे हेतुः **अव्यभिचरितेति**। ततश्च प्रकरणापाठेन दोषो नेत्याह—**अनारभ्याधीतमपीति** अनारभ्याधीतवाक्यस्थमित्यर्थः। अव्यभिचरितक्रतुसम्बन्धो न चेति पूर्वेण सम्बन्धः। एवं जुहूशब्दवत् **आत्मा** आत्मशब्दः। **अव्यभिचरितक्रतुसम्बन्धः** तादृगर्थः। **येन** आत्मशब्दस्यैव तादृशार्थत्वेन। ननु तव्येन संस्कारविधित्वं प्रतीयते। न। विधित्वस्यैवाभावात्। भावेप्यात्मना पश्येदिति कल्पनीयत्वादित्याह—**तेनेति**। द्वितीये स्थितं "सुवर्णं हिरण्यं भार्यं सुवर्ण एव भवति दुर्वर्णोऽस्य भ्रातृव्यः" इत्यत्र फलकल्पनाभयात्, शत्रुदुर्वर्णत्वस्य [1]च कामसम्बन्धाभावात्, क्रत्वर्थत्वे प्राप्ते हिरण्यस्य [2]क्रत्वव्यभिचाराभावादनारभ्याधीतं धारणं पुरुषार्थं इति सुवर्णेन बिभृयात्, इति कल्पनीयमिति। न च विदिक्रियेति भाष्यं चकारात्, ज्ञानक्रियाकर्मत्वाभावेऽपि विदिक्रियाकर्मत्वमाशङ्क्य परिहरतीव, तथा चायुक्तं वेदनस्य ज्ञानानतिरेकादित्याशङ्क्य चकारः किञ्चार्थः इत्याह—**किञ्चेति**। अविषयत्वे इति भाष्ये शास्त्रयोनित्वान्यथानुपपत्त्या विषयत्वप्रसाधनमिव, तदयुक्तं सम्पदादिवादिना ब्रह्मणि शास्त्राप्रामाण्यानङ्गीकारादित्याशङ्क्य नैतद् विषयत्वसाधनं, किन्तु परस्य पूर्वापरविरोधशङ्केत्याह—**शङ्कत इति**।

---

1 'च किमिति' ख पाठः 2 'क्रतुत्वव्य' ख - पाठः

'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (केन. १-४) इति। अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्, न; अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति। किं तर्हि? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृ-

---

अविषयत्व इति। ततश्च शान्तिकर्मणि वेतालोदय इति भावः। निराकरोति न इति। कुतः? अविद्याकल्पितभेदनिवृत्तिपरत्वादिति। सर्वमेव हि वाक्यं नेदंतया वस्तुभेदं बोधयितुमर्हति। न हीक्षुक्षीरगुडादीनां मधुररसभेदः शक्य आख्यातुम्। एवमन्यत्रापि सर्वत्र द्रष्टव्यम्। तेन प्रमाणान्तरसिद्धे लौकिक एवार्थे यदा गतिरीदृशी शब्दस्य, तदा कैव कथा प्रत्यगात्मन्यलौकिके। अदूरविप्रकर्षेण तु कथंचित्प्रतिपादनमिहापि समानम्। त्वंपदार्थो हि प्रमाता प्रमाणाधीनया प्रमित्या प्रमेयं घटादि व्याप्नोतीत्यविद्याविलसितम्। तदस्याविषयीभूतोदासीनतत्पदार्थप्रत्यगात्मसामानाधिकरण्येन प्रमातृत्वाभावात् तन्निवृत्तौ प्रमाणादयस्तिस्रो विधा निवर्तन्ते। न हि पक्तुरवस्तुत्वे पाक्यपाकपचनानि वस्तुसन्ति भवितुमर्हन्तीति।

पदमात्रस्य [1]नञो विधौ? प्रयोज्यत्वमाशङ्क्य निराकरणत्वान्निराकार्यानुषङ्गेण वाक्यत्वं मत्वा आह—**निराकरोतीति**। शास्त्रस्य ब्रह्मपरत्वात् यथाश्रुतहेत्वसिद्धिमाशङ्क्याकाङ्क्षापूर्वकमन्यथा पठति—**कुत इति**। अविद्यानिवृत्तिः साध्यतया विषयोऽस्येति विग्रहः। इदमेव च तत्परत्वं भाष्येऽभिप्रेतम्। अत एव भेदमपनयतीत्युत्तरभाष्यं, शास्त्रजवृत्तिव्यक्तफलव्याप्यत्वं शास्त्रयोनित्वं तदनुपपत्तिरिति वा शास्त्रजवृत्तिव्यवहार्यतामात्रं तत् तदनुपपत्तिरिति वा, शास्त्राभिधेयत्वं तद्योनित्वं तदनुपपत्तिरिति वा, नाद्यः। स्वप्रकाशस्य फलव्याप्यतानङ्गीकारात्, न द्वितीयः। अविषयत्वविरोधादिति पक्षद्वयनिरासमभिप्रेत्य न तृतीयः। अभिधेयत्वानङ्गीकारादिति वक्तुं भाष्यं न हि शास्त्रमित्यादि, तदयुक्तं वाक्यान्तरवच्छास्त्रान्तरस्याप्यभिधायकताया एव ग्राह्यत्वादित्याशङ्क्य सर्वत्र वाक्यार्थस्य लक्ष्यत्वाद् मैवमित्याह—**सर्वमिति**। **इदन्तया** अभिधेयतया। गवानयनादिवाक्येषु तर्ह्यभिधानमस्तु अत आह—**एवमिति**। तत्रापि गवानयनस्य साधारणत्वाद्विवक्षितगोविशेषानयनस्य लक्ष्यत्वमित्यर्थः। एवञ्च शास्त्रस्यानभिधायकत्वं न दोषायेति। कैमुत्येनाह—**तेनेति**। अनभिधायित्वे कथं शास्त्राद् ब्रह्मावगमः, अथ गवानयनादेरपि कथं वाक्याल्लक्षणयेति चेत् तुल्यं प्रकृतेपीत्याह—**अदूरविप्रकर्षेणेति**। लक्षणयेत्यर्थः। मुख्यार्थत्यागाद्विप्रकर्षः। तत्सम्बन्धाददूरता। प्रत्यगात्मत्वेनेति भाष्योक्तभेदकाल्पनिकत्वासिद्धिमुद्धरन् वाक्यार्थोक्तिपूर्वकं वेदान्तेष्वदूरविप्रकर्षमाह—**त्वमिति**। **तत्** तथा सति। तत्पदार्थप्रत्यगात्मनोः सामानाधिकरण्येन। **अस्य** प्रमातुः।

---

1 "न द्विधौ?" क-पाठः

वेदनादिभेदमपनयाति । तथा च शास्त्रम्—'यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्' (केन. २-३) 'न दृष्टेर्द्रष्टारं पश्येः' 'न विज्ञातेर्विज्ञातारं विजानीयाः' (बृह. ३-४-२) इति चैवमादि । अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः । यस्य तूत्पाद्यो मोक्षस्तस्य मानसं, वाचिकं, कायिकं वा कार्यमपेक्षत इति युक्तम् । तथा विकार्यत्वे च

तथाहि—'विगलितपराग्वृत्त्यर्थत्वं पदस्य तदस्तदा त्वमिति हि पदेनैकार्थत्वे त्वमित्यपि यत्पदम् । तदपि च तदा गत्वैकार्थ्यं विशुद्धचिदात्मतां त्यजति सकलान्कर्तृत्वादीन्पदार्थमलान्निजान् ॥ [2]इत्यन्ततःश्लोकः । अत्रैवार्थे श्रुतीरुदाहरति - तथा च शास्त्रम्—यस्यामतमिति । प्रकृतमुपसंहरति - अतोऽविद्याकल्पितेति । परपक्षे मोक्षस्यानित्यतामापादयति - यस्य त्विति । कार्यमपूर्वं यागादिव्यापारजन्यं तमपेक्षते मोक्षः स्वोत्पत्ताविति । तयोः पक्षयोरिति । निर्वर्त्यविकार्ययोः । क्षणिकं ज्ञानं आत्मेति बौद्धाः । तथा च विशुद्धविज्ञानोत्पादो मोक्ष इति निर्वर्त्यो मोक्षः, अन्येषां तु संसाररूपावस्थामपहाय या कैवल्यावस्थावाप्तिरात्मनः स मोक्ष

प्रमातृत्वाभावात् तन्निवृत्तौ प्रमातृत्वनिवृत्तौ । [1]अविस्मरणाय तत्त्वंवाक्यलक्षणां श्लोकेन संगृह्णाति—**तथाहि विगलितेति** । विगलिता पराक्त्वेन वृत्तिर्वर्तनं यस्य स तथा । सोऽर्थो यस्य तत्तथा तत्त्वम् । **तदः पदस्य** तत्पदस्य । **तदा** तस्मिन्काले तमाह—**त्वमितीति** । एकार्थत्वे सामानाधिकरण्ये । **तदा** तत्पदेन । एकार्थ्यं विशिनष्टि—**विशुद्धेति** । विशुद्धश्चिदात्मा अर्थभूतोऽस्येति विशुद्धचिदात्मा । तत्ताम् । भ्रमाद्द्यत्वेन मा पाठीत्याह—**श्लोक इति** । नान्यदीयः अस्मदीय इत्याह—**अन्ततः श्लोकः इति** । शास्त्रमित्येकवचनात्, अनन्तरोक्ता श्रुतिरेकैव । आदिशब्दोऽपि तद्वाक्यशेषग्राहीति भ्रमं नुदति—**अत्रैवेति** । सम्पदादिपक्षान्प्रतिक्षिप्य शास्त्रयोनित्वभङ्गं समाधाय न मोक्षस्यानित्यत्वदोष इत्युपसंहृत्य योगमाशङ्क्याह—**प्रकृतमिति** । नित्यत्वान्मोक्षो नापूर्वसाध्य इति प्रकृतं भङ्ग्यन्तरेणोपसंहरतीत्यर्थः । यस्यत्वित्ययुक्तम् उत्पाद्यवादिनः कार्यापेक्षा युक्तेति, इष्टाभिधानत्वादत आह—**परपक्ष इति** । अनित्यतापादनार्थमेव तन्मतानुवाद इत्यर्थः । कार्यमपूर्वं चेत् कथं मानसिकत्वादि, क्रिया चेद् भङ्गुरा कथं मोक्षं साधयेदत आह—**कार्यमिति** । मानसादिकर्मजत्वान्मानसत्वाद्युक्तिरित्यर्थः । अपेक्षाद्वारमाह—**स्वोत्पत्ताविति** । कार्यापेक्षत्वस्यैक्यात्तयोरित्ययोगमाशङ्क्याह—**निर्वर्त्येति** । परीक्षकेषु पक्षयोरप्राप्तिमाशङ्क्याह—**क्षणिकमिति** । नहि दध्यादीति हिशब्दाद् दध्यादेरनित्यत्वादिति हेतुर्भाति ततो व्यधिकरणत्वमाशङ्क्य

---

[1] "ज्ञ" क-पाठः [2] आन्तरश्लोक इति कल्पतरु - भामतीविवरणाद्यादृतः पाठः

तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम् । न हि दध्यादि विकार्यं, उत्पाद्यं वा घटादि नित्यं दृष्टं लोके । न चाप्यत्वेनापि कार्यापेक्षा; स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् । स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं; सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मणः, आकाशस्येव । नापि संस्कार्यो मोक्षः,

---

इति विकार्यो मोक्षः । यथा पयसः पूर्वावस्थापहानेनावस्थान्तरप्राप्तिर्विकारो दधीति । तदेतयोः पक्षयोरनित्यता मोक्षस्य; कार्यत्वात्, दधिघटादिवत् । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इति श्रुतेर्ब्रह्मणो विकृताविकृतदेशभेदावगमादविकृतदेशब्रह्मप्राप्तिरुपासनादिविधिकार्या भविष्यति, तथा च प्राप्यकर्मता ब्रह्मण इत्यत आह—न चाप्यत्वेनापीति । अन्यदन्येन विकृतदेशपरिहाण्याऽविकृदेशं प्राप्यते । तद्यथोपवेलं जलधिरतिबहलचपलकल्लोलमालापरस्परास्फालनसमुल्लसत्फेनपुञ्जस्तबकतया विकृतः, मध्ये तु प्रशान्तसकलकल्लोलोपसर्गः स्वस्थः स्थिरतयाऽविकृतस्तस्य मध्यमविकृतं पौतिकः पोतेन प्राप्नोति । जीवस्तु ब्रह्मैवेति किं केन प्राप्यतां, भेदाश्रयत्वात्प्राप्तेरित्यर्थः । अथ जीवो ब्रह्मणो भिन्नस्तथापि न तेन ब्रह्माप्यते, ब्रह्मणो विभुत्वेन नित्यप्राप्तत्वादित्याह—स्वरूपव्यतिरिक्तत्वेऽपीति । संस्कार्यकर्मतामपाकरोति—नापि संस्कार्य इति । द्वयी हि संस्कार्यता, गुणाधानेन वा, यथा बीजपूरकुसुमस्य लाक्षारसावसेकः, तेन हि तत्कुसुमं संस्कृतं लाक्षासवर्णं फलं प्रसूते । दोषापनयेन वा, यथा मलिनमादर्शतलं निघृष्टमिष्टकाचूर्णेनोद्भासितभास्वरत्वं संस्कृतं भवति । तत्र न तावद्ब्रह्मणि गुणाधानं संभवति । गुणो हि ब्रह्मणः स्वभावो वा भिन्नो वा । स्वभावश्चेत् कथमाधेयः? तस्य नित्यत्वात् ।

दृष्टान्तपरं भाष्यमित्याह—**तदेतयोरिति** । विकार्यत्वेऽपि कार्यता दुर्वारेत्याशयेन उक्तं **कार्यत्वादिति** । नित्यप्राप्ते (व्यः?) प्राप्यत्वानुदयमाशङ्क्याह—**अथेति** । ब्रह्मणः स्वात्मरूपत्वेऽपि जीवस्य तदीयाविकृतदेशप्राप्तेः का हानिः । अथ स्वशब्दो जीवग्राही तथाप्यविकृतदेशप्राप्तेः का क्षतिरिति भ्राम्यन्तं प्रत्याह—**अन्यदिति** । पोतो यानपात्रं तेन जीवतीति **पौतिकः** । प्राप्त्यभ्युपगतावैक्यव्याघात इत्याह— **भेदेति** । ब्रह्मणो निःस्वरूपत्वाभावात् स्वरूपव्यतिरिक्त इत्यनुवादायोगः । सर्वगतत्वेनेति गतेरेव प्राप्तित्वा[1]न्नित्यप्राप्तत्वादिति साध्यावैशिष्ट्यं चेत्याशङ्क्य स्वरूपपदं जीवग्राहि सर्वगतत्वं च विभुत्वमित्याह—**अथेति** । **विभुत्वेन** निरवधिमहत्त्वेन । संस्कारस्यापि विकारत्वात् दत्तोत्तरत्वमाशङ्क्य कर्मफलस्य चातुर्विध्यप्रसिद्धिमनुरुध्य पृथग् दूषयतीति मत्वाह—**संस्कारेति** । संस्कारो हीति हिशब्दोक्तां द्वित्वप्रसिद्धिमाह— **द्वयीति** । कार्येण गुणाधानानुमानमाह—**तेनेति** । अतिशयवादिनं प्रत्यनाधेयातिशयेत्यसिद्धिरत आह—**तत्रेत्यादिना** ।

येन व्यापारमपेक्षेत । संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा । न तावद्गुणाधानेन संभवति; अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य। नापि दोषापनयनेन; नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य। स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, यथादर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेन्न, क्रियाश्रयत्वानुपपत्तेरात्मनः । यदाश्रया क्रिया, तमविकुर्वती नैवात्मानं लभते।

भिन्नत्वे तु कार्यत्वेन मोक्षस्यानित्यत्वप्रसङ्गः । न च भेदे धर्मधर्मिभावः, गवाश्ववत् । भेदाभेदश्च व्युदस्तः, विरोधात् । तदनेनाभिसंधिनोक्तम्—अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य । द्वितीयं पक्षमपक्षिपति—नापि दोषापनयनेनेति । अशुद्धिः सती दर्पणे निवर्तते, न तु ब्रह्मणि असती निवर्तनीया; नित्यनिवृत्तत्वादित्यर्थः । शङ्कते—स्वात्मधर्म एवेति । ब्रह्मस्वभाव एव मोक्षोऽनाद्यविद्यामलावृत उपासनादिक्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, न तु क्रियते । एतदुक्तं भवति—नित्यशुद्धत्वमात्मनोऽसिद्धं, संसारावस्थायामविद्यामलिनत्वादिति; शङ्कां निराकरोति—न । कुतः? क्रियाश्रयत्वानुपपत्तेः । नाविद्या ब्रह्माश्रया, किन्तु जीवे, सा त्वनिर्वचनीयेत्युक्तं, तेन नित्यशुद्धमेव ब्रह्म । अभ्युपेत्य त्वशुद्धिं क्रियासंस्कार्यत्वं दूष्यते । क्रिया हि ब्रह्मसमवेता वा ब्रह्म संस्कुर्यात्, यथा निघर्षणमिष्टकाचूर्ण-

---

भिन्नत्व इति । संस्कारभङ्गे पुनः संसारापत्तिरित्यर्थः । दूषणान्तरं न चेति । रूपघटयोरप्ययं न्यायतौल्यात्, मृषा धर्मधर्मिभाव इति न व्यभिचारः, अपिशब्दः पूर्वहेत्वाकर्षीति न भ्रमितव्यं द्वितीयपक्षत्वज्ञापनार्थत्वादित्याह—द्वितीयमिति । नित्यशुद्धत्वाद्दोषाप (ने? न) यनशून्यमिति व्याप्तिसिद्धिमाशङ्क्य यद् यतोऽपनीयते तत् तत्रास्ति यद्यत्र नास्ति न तत् ततोऽपनेयमिति व्याप्तेः सुवचत्वाददोष इति मत्वाह—अशुद्धिरिति । चेदित्यस्य व्यवहितत्वान्मध्ये कथञ्चिद्विच्छेदभ्रमं नुदति—शङ्कत इति । स्वाभाविकत्वादावरणाभावाद् यज्ञाद्यसंस्कार्यत्वाच्च धर्म इति तिरोभूत इति क्रिययेति चैषां, अयोगं निरस्यति—ब्रह्मेति । अस्मिन्पक्षे नानित्यत्वमित्याह—न त्विति । विशुद्धेरुक्तत्वात् कथं शङ्का, अत आह—एतदुक्तमिति । दार्ष्टान्तिकमेव निषिध्यते न तु दृष्टान्त इत्याह—शङ्कामिति । अनुपपत्तेरिति षष्ठीभ्रमव्युदासः—कुत इति । एवमीदृशस्थले द्रष्टव्यम् । क्रियानाश्रयत्वे परिहारान्तराभावाद् ब्रह्मण्यविद्यामालिन्यमिष्टमिति भ्रमं नुदति—नाविद्येति । किन्तु जीवाश्रया तत्राप्यनिर्वाच्येत्युक्तमध्यासभाष्ये । संस्काराश्रयत्वे शङ्किते क्रियाश्रयत्वानुपपतिरिति नोत्तरमतो विकल्पेन घटयति—क्रियेति । अस्य पक्षस्य प्राप्तिमाह—यथेति । ननु घर्षणं चैत्रस्थं नेत्याह—इष्टकेति । वैमल्यहेतुत्वाय—

यद्यात्मा क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत । 'अविकार्योऽयमुच्यते' इति चैवमादीनि वाक्यानि बाध्येरन् । तच्चानिष्टम् । तस्मान्न स्वाश्रया क्रियात्मनः संभवति । अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयात्मा संस्क्रियते । ननु देहाश्रयया स्नानाचमनयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः । न; देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात् । प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम् । तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम् ।

संयोगविभागप्रचयो निरन्तर आदर्शतलसमवेतः । अन्यसमवेतो वा । न तावद्ब्रह्मधर्मः क्रिया; तस्याः स्वाश्रयविकारहेतुत्वेन ब्रह्मणो नित्यत्वव्याघातात् । अन्याश्रया तु कथमन्यस्योपकरोति; अतिप्रसङ्गात् । न हि दर्पणे निघृष्यमाणे मणिर्विशुद्धो दृष्टः । तच्चानिष्टमिति । तदा बाधनं परामृशति । अत्र व्यभिचारं चोदयति—ननु देहाश्रययेति । परिहरति—न । देहसंहतस्येति । अनाद्यनिर्वाच्याविद्योपधानमेव ब्रह्मणो जीव इति च

निरन्तर इति । एतच्च संयोगविभागावेव भावार्थ इति मतमाश्रित्य । यद्यात्मेति भाष्ये विकारित्वेनानित्यत्वमापादयिष्यति व्याप्तिं तु क्रियाविकारयोर्ब्रवीतीत्ययुक्तमित्याशङ्क्य वक्ष्यमाणापादननिर्वाहार्थतां मत्वाह—**न तावदिति** । अन्याश्रयायास्तु क्रियाया अविषयत्वादित्ययुक्तम् । स्वाश्रयक्रियाविषयत्व इवान्याश्रयक्रियाविषयत्वे वृत्तिविरोधाभावेन विषयत्वाप्राप्तेरित्याशङ्क्य विषयशब्देनाश्रयो गृहीत इति मत्वाह—**अन्येति** । चैत्राश्रितस्पन्दो, दर्पणस्योपकरोति, सत्यं तथापि संयोगादिद्वारेण, न च तत्तुल्यः क्रियाजः संस्कारहेतुर्ब्रह्मणीत्यभिसन्धायोक्तम्—**अन्यस्येति** । स्वात्मानं स्वजन्यं संस्कारहेतुं वा प्रत्यनाश्रयस्येत्यर्थः । अतिप्रसङ्गस्येष्टतां निरस्यति—**न हीति** । पूर्ववाक्ये तत्पद[1]परामृश्यसमर्पकपदाभावात् पूर्वतरवाक्यस्थानित्यत्वस्य च व्यवधानात् परामर्शायोगं निरस्यति—**तच्चेति** । वाक्यार्थपरामर्श इत्यर्थः । समुदायतात्पर्यमुक्त्वा तन्मध्यस्थाक्षरार्थः कथ्यत इति न क्रमभङ्गः । ब्रह्मणि न संस्कार इत्युक्ते देहिसंस्कारशङ्का व्यधिकरणा, अत आह—**अत्रेति** । नेति न संस्कारस्य निराक्रिया किन्तु व्यभिचारपरिहार इत्याह—**परिहरतीति** । देहादिसंहतस्याविद्यागृहीतस्येत्ययुक्तं देहादेरविद्याग्रहहेतुत्वात् संहतस्य संस्कारेऽप्यन्यत्वाविशेषाद् व्यभिचारतादवस्थ्यम् आत्मनः संस्क्रियमाणत्वाङ्गीकारोऽप्ययुक्तः स्नानादिसंस्कृतेर्देहादिधर्मत्वादित्याशङ्क्य व्यभिचारोऽयं व्यवहारदृष्ट्या चोद्यते तत्त्वदृष्ट्या वेति विकल्प्य प्रथमपक्षभङ्गं भाष्यार्थं दर्शयन्ननुपपत्तिमपास्यति—**अनादीति** । उपधान उपहितं रूपम् । अनेनाविद्यागृहीतस्येत्यस्य प्राग्योजनमुक्तम् । **देहः** स्थूल एवेति

---

1 'दं' ख पाठः

यथा देहाश्रयाचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलं, अहमरोग इति यत्र बुद्धिरुत्पद्यते, एवं स्नानाचमनयज्ञोपवीतादिना अहं शुद्धः संस्कृत इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते। स च देहेन संहत एव। तेनैव ह्यहंकर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रियाः निर्वर्त्यन्ते। तत्फलं च स एवाश्नाति; 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' मुण्ड. (३-१-१) इति मन्त्रवर्णात्। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (काठ. १-३-४) इति च।

क्षेत्रज्ञ इति चाचक्षते। स च स्थूलसूक्ष्मशरीरेन्द्रियादिसंहतस्तत्संघातमध्यपतितस्तदभेदेनाहमितिप्रत्ययविषयीभूतः, अतः शरीरादिसंस्कारः शरीरादिधर्मोऽप्यात्मनो भवति; तदभेदाध्यवसायात्। यथाङ्गरागधर्मः सुगन्धिता कामिनीनां व्यपदिश्यते। तेनात्रापि यदाश्रिता क्रिया सांव्यवहारिकप्रमाणविषयीकृता तस्यैव संस्कारो नान्यस्येति न व्यभिचारः। तत्त्वतस्तु न क्रिया न संस्कार इति। सनिदर्शनं तु शेषमध्यासभाष्य एव कृतव्याख्यानमिति नेह व्याख्यातम्। तयोरन्यः पिप्पलमिति। अन्यो जीवात्मा। पिप्पलं कर्मफलम्। अनश्नन्नन्य इति। परमात्मा। *संहतस्य च भोक्तृत्वमाह मन्त्रवर्णः—आत्मेन्द्रियेति

भ्रमं नुदन् आदिशब्दार्थमाह—सचेति। सुषुप्तावविद्योपधानेऽपि संस्काराद्दृष्टेरेतत् विशेषणम्। संहतिर्नात्मनस्ताटस्थ्येन संयोगः, येनान्यत्वमिति, द्वितीयानुपपत्तिभङ्गायाह—तदिति। मध्यपातेऽपि, अन्यत्वानपायमाशङ्क्याह—तदभेदेनेति। फलितं वदन् तृतीयानुपपत्तिमुद्धरति—अत इति। संस्कारस्यात्मपर्यन्तत्वोक्तावपि क्रियायास्तदनुक्तौ व्यभिचारतादवस्थ्यभ्रमं नुदन् फलितमाह—तेनेति। देहाभेदाध्यासात् तद्धर्मस्यात्मधर्मत्वेनेत्यर्थः। अत्रापि व्यभिचारोदाहरणेऽपि। द्वितीयं दूषयति—तत्त्वत इति। किं देहसंहतत्वोक्त्या व्यासेन आत्मन्येव क्रियोच्यतामित्याशङ्क्य अनुभवविरोधाद् न तथेत्येतदर्थं प्रत्यक्षं हीति भाष्यम्। दृष्टान्ते विशिष्टे फलभाक्त्वप्रमाणोक्तिरहमरोग इति। अहं शुद्ध इति दार्ष्टान्तिके संस्कारवत् क्रियापि विशिष्टगामिनीत्युक्तिः। तेनैव हीति एतत्सर्वं सुग्रहम्। विशिष्टस्यैव कर्तृत्वमित्यादि तु प्रागेवोपपादितमित्याह—सनिदर्शनं त्विति। उभयोरनियमादन्योऽश्नाति अन्यस्त्वभिचाकशीतीति प्रतीयते। ततश्च स एवाश्नातीत्युक्तानुरूपत्वमाशङ्क्याह—जीवात्मेति। पिप्पलस्याप्रसिद्धत्वाद् व्याख्या। अस्याप्यन्यशब्दत्वात् स एवार्थ इति भ्रमप्राप्तं व्याघातं नुदति—अनश्नन्नन्य इति। मन्त्रवर्णादित्यनुक्तेरात्मेन्द्रियेति श्रुतित्वमव्यक्तं श्रुतित्वेऽपि तयोरन्य इत्येवाभिप्रेतसिद्धेर्वैयर्थ्यमाशङ्क्य श्रुतिरेषा, संहतभोक्तृत्वस्य अत्र स्फुटत्वाच्च तदुक्तिसाफल्यमित्याह—संहतस्य चेति। च एवार्थः।

---

* संहतस्यैवेति कल्पतर्वाधाहतः पाठः

तथा च 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' (श्वेता. ६-११) इति, 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्' (ईशा. ८) इति चैतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः । ब्रह्मभावश्च मोक्षः । तस्मान्न संस्कार्योऽपि मोक्षः । अतोऽन्यन्मोक्षं प्रति

अनुपहितशुद्धस्वभावब्रह्मप्रदर्शनपरौ मन्त्रौ पठति—एको देव इति । शुक्रं दीप्तिमत् । अव्रणं दुःखरहितम् । अस्नाविरं अविगलितम्, अविनाशीति यावत् । उपसंहरति—तस्मादिति । ननु मा भून्निर्वर्त्यादिकर्मताचतुष्टयी, पञ्चमी तु काचित् विधा भविष्यति यथा मोक्षस्य कर्मता घटिष्यत इत्यत आह—अतोऽन्यदिति । एभ्यः प्रकारेभ्यो न प्रकारान्तरमन्यदस्ति, यतो मोक्षस्य क्रियानुप्रवेशो भविष्यति । एतदुक्तं भवति—चतसृणां विधानां मध्येऽन्यतमतया क्रियाफलत्वं व्याप्तं, सा च मोक्षाद्व्यावर्तमाना व्यापकानुपलब्ध्या मोक्षस्य क्रियाफलत्वं व्यावर्तयतीति । तत्किं मोक्षे क्रियैव नास्ति, तथा च तदर्थानि

गूढ इति परिच्छिन्नत्वम् अन्तरात्मेति जीवत्वं चोच्यते कथमुक्तविधं ब्रह्म दर्शयत इत्याशङ्क्य गूढ इति दुर्ग्रहत्वम् अन्तरात्मेति च जीवस्य तदव्यतिरेक उच्यते तात्पर्यं तूक्तविधब्रह्मण्येवेत्याह—**अनुपहितेति** । यद्वा दर्शयत इत्ययुक्तं प्रतीतिमात्रेण स्वीकारस्यातिप्रसङ्गत्वादित्याशङ्क्य तात्पर्येण दर्शयत इति विवक्षितमित्याह—**अनुपहितेति** । शुद्धत्वं अतिशयदोषराहित्यम् । शुक्रशब्दस्य प्रसिद्धार्थासङ्गेर्व्याचष्टे—**दीप्तीति** । अकायमिति, अनेनार्थात्पौनरुक्त्यं नुदति—**दुःखेति** । कारणेन कार्यलक्षणात्, "ष्णु प्रस्रवण" इति धातुमनुसृत्याह—**अविगलितमिति** । अद्रवद्रव्यस्य गलनाप्राप्तिमाशङ्क्याह—**अविनाशीति** । ब्रह्मभावश्च मोक्षः तस्मादित्युक्ते मोक्षस्य ब्रह्मभावत्वादिति भाति । ततश्च पूर्वप्रयासवैयर्थ्यमाशङ्क्योपसंहारत्वात्सर्वपूर्वपरामर्श इत्याह—**उपसंहरतीति** । अत इत्युपसंहारेऽन्यदवैयर्थ्यमाशङ्क्याह—**नन्विति** । **कर्मता** क्रियासाध्यता । यदीयमाशङ्का, एभ्योऽन्यदिति वक्तव्यं न, अत इत्यस्यैव तत्कार्यकारित्वादित्याह—**एभ्य इति** । अतोऽन्यन्मोक्षं प्रतीत्युक्त्या पञ्चमं क्रियाप्रवेशद्वारमूरीकृत्य मोक्षे तत्प्रतिषेध इति न भ्रमितव्यम् । पञ्चमप्रकाराभावेन मोक्षे न क्रियाप्रवेश इति भाष्यार्थत्वादित्याह—**न प्रकारान्तरमिति** । तर्हि भविष्यतीति शङ्कायां नास्तीति नोत्तरमत आह—**एतदिति** । उपसंहारे ज्ञानमेकमित्यधिकमाशङ्क्याह—**तत्किमिति** । **तदर्थानि**

क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुम् । तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते । ननु ज्ञानं नाम मानसी क्रिया । न; वैलक्षण्यात् । क्रिया हि नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च । यथा यस्यै देवतायै

शास्त्राणि तदर्थाश्च प्रवृत्तयोऽनर्थकानीत्यत उपसंहारव्याजेनाह - तस्माज्ज्ञानमेकमिति । अथ ज्ञानं क्रिया मानसी कस्मान्न विधिगोचरः ? कस्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतमं न मोक्षः ? इति चोदयति—ननु ज्ञानमिति । परिहरति—नेति । कुतः ? वैलक्षण्यात् । अयमर्थः—सत्यं, ज्ञानं मानसी क्रिया, नत्वियं ब्रह्मणि फलं जनयितुमर्हति; तस्य स्वयंप्रकाशतया विदिक्रियाकर्मभावानुपपत्तेरित्युक्तम् । तदेतस्मिन्वैलक्षण्ये स्थित एव वैलक्षण्यान्तरमाह—क्रिया हि नाम सेति । यत्र विषये वस्तुस्वरूपनिरपेक्षैव चोद्यते । यथा देवतासंप्रदानकहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षा देवताध्यानक्रिया । यथा वा योषिति अग्निवस्त्वनपेक्षाग्निबुद्धिर्या सा क्रिया हि नामेति योजना । नहि 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्'

मोक्षसाधनोपदेशीनि । तदर्थाः । मोक्षसाधनार्थाः, इत्येतान्यनर्थकानि शङ्कोत्तरत्वे, तस्मादित्ययुक्तमत आह—उपसंहारेति । ज्ञानमक्रियेति, अनुक्तत्वात् शङ्का नोदेति, निष्फला च अदोषावधित्वादत आह—अथेति । नेति न मानसक्रियात्वनिराकृतिः किन्तु चोद्यपरिहार इत्याह—परिहरतीति । व्याख्यातुं हेतुं अवतारयति—कुत इति । ज्ञानस्य क्रियावत् विधेयत्वोत्पाद्याद्यन्यतमफलकत्वयोः शङ्कायां वैलक्षण्यादित्युपक्रम्य क्रिया हि नामेत्यादिना विधेयक्रियावैषम्यमुक्तम्, तदयुक्तं, विधेयफलस्यापि चतुरन्यतमस्य घटनिर्माण - दोहना - तक्षना - दर्शघर्षणेषु लौकिकेषु दर्शनेन शङ्काद्वितीयांशापरिहारादित्याशङ्क्य वैलक्षण्यादित्येतावतैव तत्परिहारमाह—अयमर्थ इति । ब्रह्मणि मोक्षात्मनि फलमुत्पत्त्याप्त्यादि, एवमस्य शङ्काद्वितीयांशोत्तरत्वे स्थिते प्रथमांशं परिहरतीत्यदोष इत्याह—तदेतस्मिन्निति । सेति क्रियाभिधानाद् यत्रेति क्रियाग्रहणं युक्तं, ततश्च निरपेक्षा चोद्यत इत्ययुक्तम् । क्रियायाः क्रियान्तराचोदनादत आह—विषय इति ॥ देवताध्यानस्यापि ध्यातृध्यानसाधनवस्त्वपेक्षत्वादुदाहरणासिद्धिमाशङ्क्याह—यथेति । द्वितीयोदाहरणे ध्येययोषिदपेक्षित्वाद् वस्तुशब्देन ध्येयग्रहणेऽप्ययुक्तत्वम्, अत आह—यथा चेति । यद्यथा ध्यायते तस्य तथात्वं वस्तुशब्दोक्तमित्यर्थः । येत्यनुक्तेः सेत्ययुक्तमाशङ्क्याध्याहृत्य योजयति—या सेति । यत्र या वस्तुस्वरूपनिरपेक्षैव चोद्यते तत्र सा क्रिया नामेति योजनेत्यर्थः । ध्यानस्य वस्त्वनपेक्षामुक्त्वा चोद्यत इत्युक्तं चोदनतन्त्रत्वमाह—न हीति । ज्ञानं त्वित्युपक्रम्योक्तं सर्वं प्रतिज्ञामात्रमाशङ्क्य विधिमन्तरेण प्राप्तिं दर्शयन्नुप-

हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्' इति, 'संध्यां मनसा ध्यायेत्' (ऐ. ब्रा. ३-८-१) इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसं; तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं, पुरुषतन्त्रत्वात्, ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम् । केवलं वस्तुतन्त्रमेव तत् । न चोदनातन्त्रम् । नापि पुरुषतन्त्रम् । तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम् । यथा च 'पुरुषो वाव गौतमाग्निः' 'योषा वाव गौतमाग्निः' (छान्दो. ५-७,८-१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति ।

इत्यस्माद्विधेः प्राग्देवताध्यानं प्राप्तं, प्राप्तं त्वधीतवेदान्तस्य विदितपदतदर्थसंबन्धस्याधिगतशब्दन्यायतत्त्वस्य 'सदेव सौम्येदम्' इत्यादेः 'तत्त्वमसि' इत्यन्तात्संदर्भात् ब्रह्मात्मभावज्ञानं शब्दप्रमाणसामर्थ्याद् । इन्द्रियार्थसन्निकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्तिकुम्भानुभवः । न ह्यसौ स्वसामग्रीबललब्धजन्मा सन् मनुजेच्छयान्यथाकर्तुमकर्तुं वा शक्यः, देवताध्यानवत्, येनार्थवानत्र विधिः स्यात् । न चोपासना वानुभवपर्यन्तता वास्य विधेर्गोचरः; तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वानाद्यविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छयान्यथाकर्तुमकर्तुं वा अशक्यत्वात् । तस्माद्ब्रह्मज्ञानं मानसी क्रियापि न विधिगोचरः, पुरुषचित्तव्यापाराधीनायास्तु क्रियाया वस्तुस्वरूपनिरपेक्षिता क्वचिद्-

---

पादयति—**प्राप्तं त्विति** । प्रणिहितमेकाग्रं मनो यस्य स तथा, दृष्टान्तस्य साध्यवैकल्यं परिहरति —**न हीति** । असौ कुम्भानुभवः । तद्वच्छब्दप्रमाणजमपि ज्ञानमविधेयमिति भावः । तर्हि शब्दप्रमाणमात्राप्राप्तयोः, ध्यानसाक्षात्कारयोर्विधिरस्तीति शङ्कां [1]प्रागुक्तस्मारणेन निरस्यति—**न चेति** । अस्य ज्ञानस्योपासना अभ्यासः, यथासंख्यं साक्षात्कारे, अविद्यापनये चावधृतसामर्थ्ययोस्तयोरित्यन्वयः । **अन्यथा कर्तुमकर्तुं वेति** । यथा स्वर्गरागे सत्यपि विध्यनवगमकाले यागाद्यकर्तुं शक्यं, सत्यपि विध्यवगमे वैकल्पिकमुदितहोमाद्यन्यथाकर्तुं शक्यम् । नैवमुपासनासाक्षात्कारयोः फलरागे सत्यकरणान्यथाकरणे, विधिं विनैव नियतप्रकारेण फलसाधनत्वावगमादित्यर्थः । भाष्ये तस्मान्मानसत्वेपीत्यत्र मानसत्वमात्राभ्यनुज्ञा न क्रियेत्युक्त्वा तत्रैवं सतीति दार्ष्टान्तिकोक्त्या क्रियात्ववारणं च भवति, तदयुक्तं धात्वर्थत्वेन क्रियात्वाद् ध्यानवदित्याशङ्क्य मानसत्वेपीति मानसक्रियात्वेपीति विवक्षितं न क्रियेति विधेयक्रियावैषम्योक्तिरिति मत्वोपसंहरति—**तस्मादिति** । निदर्शनपौनरुक्त्यमाशङ्क्य आह—**पुरुषेति** । क्रियैवेत्ययुक्तं प्रत्ययत्वस्यापि

---

1 'स्म' क - पाठः

केवलचोदनाजन्यत्वात्क्रियैव सा पुरुषतन्त्रा च । या तु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातन्त्रा । नापि पुरुषतन्त्रा । किं तर्हि? प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतन्न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम् । तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम् । तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात्कुण्ठीभवन्त्युपलादिषु

विरोधिनी यथा देवताध्यानक्रियायाः, न ह्यत्र वस्तुस्वरूपेण कश्चिद्विरोधः । क्वचिद्वस्तुस्वरूपविरोधिनी, यथा योषित्पुरुषयोरग्निबुद्धिरित्येतावता भेदेन निदर्शनमिथुनद्वयोपन्यासः । क्रियैवेत्येवकारेण वस्तुतन्त्रत्वमपाकरोति । ननु 'आत्मेत्येवोपासीत' इत्यादयो विधयः श्रूयन्ते । न च प्रमत्तगीताः, तुल्यं हि सांप्रदायिकं, तस्माद्विधेयेनात्र भवितव्यमित्यत आह—तद्विषया लिङादय इति। सत्यं श्रूयन्ते लिङादयः, नत्वमी विधिविषयाः । तद्विषयत्वेऽप्रामाण्यप्रसङ्गात् । हेयोपादेयविषयो हि विधिः । स एव च हेय उपादेयो वा, यं पुरुषः कर्तुमकर्तुमन्यथा वा कर्तुं शक्नोति । तत्रैव च समर्थः कर्ताधिकृतो नियोज्यो भवति । न चैवंभूतान्यात्मश्रवणमननोपासनदर्शनानीति विषयतदनुष्ठात्रोर्विधिव्यापकयोर-

---

भावादत आह—**क्रियैवेति** । तत्रैवंसतीत्युपसंहारे ज्ञानं न चोदनातन्त्रमित्यलम् श्रूयमाणा लिङादयोऽपि कुण्ठीभवन्तीत्यधिकमित्याशङ्क्य शङ्कोत्तरत्वमाह—**नन्विति** । **प्रमत्तगीताः** उन्मत्तेन प्रणीताः । साम्प्रदायिकं गुरुमुखाध्ययनादि । श्रवणबलाद् विधेयसत्त्वशङ्कायामनियोज्यविषयत्वादित्यसिद्धम्, अत आह—**सत्यमिति** । विधिर्विषयः प्रतिपाद्यो येषाम् । तत्र व्युत्पन्नाः कथमतद्विषया इत्यत आह—**तद्विषयत्व इति** । यजेतेत्यादाविव प्रामाण्यमपि स्यात् । न वैषम्यादित्याह—**हेयेति** । ब्रह्मज्ञानस्य विध्यविषयत्वं विवक्षुर्विधिविषयरूपमुक्त्वा प्रकृते नियोज्याभावसिद्ध्यै नियोज्यरूपमाह—**तत्रैवेति** । हेयोपादेययोरन्यतरस्मिन्नेवेत्यर्थः—**कर्ता** प्रयोक्ता । यः कर्ता सोऽधिकृतः स्वामी । कर्मफलभाग् योऽधिकृतः स नियोगं स्वकीयतया बुध्यमानो नियोज्यो भवति । प्रागुक्तविषयाभावाद् नियोज्याभावः सिध्यतीत्यभिप्रेत्य विषयाभावमाह—**न चैवमिति** । अत्र श्रवणस्य शाब्दज्ञानस्य शब्दादवश्यम्भावान्नाकर्तुमन्यथा वा कर्तुं शक्यत्वं, मननादीनां त्वन्वयव्यतिरेकावधृतफलहेतुभावानां सति फलरागे विधिं विना नाकर्तुमन्यथा वा कर्तुं शक्यता । अनेन, अनियोज्यविषयत्वादिति हेतुः साधितः । नियोज्यविषयाभावे विध्यविषयत्वं कथमन्या विषयत्वस्यातिप्रसङ्गित्वादत आह—**इति विषयेति** । विध्यभावे विध्यविषयत्वं

प्रयुक्तक्षुरतैक्ष्ण्यादिवत्; अहेयानुपादेयवस्तुविषयत्वात् । किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः । यो हि बहिर्मुखः

भावाद्विधेरभाव इति प्रयुक्ता अपि लिङादयः प्रवर्तनायामसमर्था उपल इव क्षुरतैक्ष्ण्यं कुण्ठमप्रमाणीभवन्तीति । अनियोज्यविषयत्वादिति । समर्थो हि कर्ताधिकारी नियोज्यः । असामर्थ्ये तु न कर्तृता ततो नाधिकृतो न नियोज्य इत्यर्थः । यदि विधेरभावान्न विधिवचनानि, किमर्थानि तर्हि वचनान्येतानि विधिच्छायानीति पृच्छति - किमर्थानीति । न चानर्थकानि युक्तानि; स्वाध्यायविध्यधीनग्रहणत्वानुपपत्तेरिति भावः । उत्तरम् - स्वाभाविकेति । अन्यतः प्राप्ता एव हि श्रवणादयो विधिस्वरूपैर्वाक्यैरनूद्यन्ते । न चानुवादोऽप्यप्रयोजनः; प्रवृत्तिविशेषकरत्वात् । तथाहि - तत्तदिष्टानिष्टविषयेप्साजिहासापहृतहृदयतया बहिर्मुखो न प्रत्यगात्मनि समाधातुमर्हति । आत्मश्रवणादिविधिसरूपैस्तु वचनैर्मनसो विषयस्रोतः खिलीकृत्य प्रत्यगात्मस्रोत उद्घाटयत इति प्रवृत्तिविशेषकरतानुवादानामस्तीति सप्रयोजनतया स्वाध्यायविध्य-

---

युक्तमित्याह—**इति प्रयुक्ता इति** । उपलादेः प्रत्येकं दृष्टान्तत्वमिति दर्शयन्नाह—**उपल इवेति** । उपले कुण्ठं क्षुरतैक्ष्ण्यमिवेत्यन्वयः । कुण्ठमित्यस्योपरि कुण्ठीभवन्तीति पठितव्यम् । मुख्यकुण्ठत्वाभावात् व्याचष्टे —**अप्रमाणीभवन्तीति** । विधाविति शेषः । विषयाभावाद् नियोज्याभावं सिद्धवत्कृत्य विधिव्यापकयोः विषयतदनुष्ठात्रोरभावादित्युक्तम् । तत्रत्यनियोज्याभावं भाष्यमुपादायाविष्करोति—**अनियोज्येति** । **असामर्थ्ये** विषयाभावापत्तौ । समर्थो हीत्युक्तस्यैवोक्तिरसामर्थ्य इत्यादेर्निषेधस्य निषेध्यसन्निधिनावैशद्याय कैमर्थ्यप्रश्नभाष्ये विधिच्छायानीति विशेषणवैयर्थ्यमाशङ्क्य प्रश्नस्य विधिच्छायत्वस्पर्शं दर्शयन् साफल्यमाह—**यदीति** तर्हि, एतानि वचनानि किमर्थानि सन्ति विधिच्छायानीत्यन्वयः । एतद्वचनगतायाः विधिविभक्तेः किं वाच्यमित्यर्थः । आनर्थक्यस्यापि (संभवदार्थ?)प्रश्नायोगमाशङ्क्याह—**न चेति** । विधिच्छायानीतिवत्स्वाभाविकेत्यादेरपि वाक्यविशेषणार्थवत्त्वेन ब्रूम इत्यन्तः प्रश्न इति भ्रमं नुदति—**उत्तरमिति** अभिधेयप्रश्ने प्रयोजनेनोत्तरमयुक्तमित्याशङ्क्य अन्यतः प्राप्तश्रवणादिकर्तव्यतानूद्यमानाभिधेयेत्यभिसन्धाय, अनुवादवैफल्यं प्रयोजनोक्त्या वारयतीति नायुक्तमित्याह—**अन्यत इति** । दर्शनार्थसमन्वयव्यतिरेकावगतकर्तव्यत्वात्, तदन्यतः प्राप्तिः । भाष्ये बहिः प्रवर्तमानं प्रत्यगात्मनि प्रवर्तयन्ति वाक्यानीत्युक्तम् तर्ह्यप्रवृत्तप्रवर्तकत्वात्, विधित्वमेव कुतोऽनुवादत्वमित्याशङ्क्य प्रत्यगात्मनि प्रवृत्तस्यैवाविद्याप्राबल्यान्मध्ये विषयैराकृष्यमाणस्य प्रत्यगात्मप्रवृत्तिस्थिरीकरणं प्रवर्तनमभिप्रेतमित्याशयेन संग्रहं विवृणोति—**तथा हीति** । तदिदमुक्तं **न समाधातुमिति** । प्रत्यगात्मनि स्रोतो निरन्तरो बुद्धिप्रवाहः । **प्रवृत्तिविशेषकरता** ।

प्रवर्तते पुरुषः इष्टं मे भूयादनिष्टं मा भूदिति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि । तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपादिश्यते । 'इदं सर्वं यदयमात्मा' (बृह. २-४-६) 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् केन कं विजानीयात्' विज्ञातारमरे केन विजानीयात्, (बृह. ४-५-१५) 'अयमात्मा ब्रह्म' (बृह. २-५-१९) इत्यादिभिः । यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते । अलंकारो ह्ययमस्माकं यद्ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति । तथा च श्रुतिः—'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥' (बृह. ४-४-१२) इति । 'एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च

धीनग्रहणत्वमुपपद्यत इति । यच्च चोदितमात्मज्ञानमनुष्ठानानङ्गत्वादपुरुषार्थमिति, तदयुक्तम्; स्वतोऽस्य पुरुषार्थत्वे सिद्धे यदनुष्ठानानङ्गत्वं तद्भूषणं न दूषणमित्याह - यदपीति। अनुसंज्वरेत् शरीरं परितप्यमानमनुतप्येत । सुगममन्यत् । प्रकृतमुपसंहरति तस्मान्न प्रतिपत्तीति । प्रकृत-

---

प्राप्तप्रवृत्तावतिशयकरता । ततश्चाध्ययनविधिविरोधाशङ्का शान्तेत्याह —इतीति । उपपद्यत इतीतिरुपात्त भाष्यव्याख्यानसमाप्तौ । पूर्ववादिना हानाद्यरत्वमात्रस्य दूषणत्वेनानुक्तत्वाद्यद्यपीत्ययुक्तोऽनुवादः सर्वकर्तव्यताहानिः कृतकृत्यता चेत्यलङ्कार इत्यप्ययुक्तं कृतकृत्यत्वस्य परेण दोषत्वेनानुद्भावितत्वात् इत्याशङ्क्य चोद्यैकदेशानुवादप्रतीकाभिप्रायेण सर्वकर्तव्यताहानिरलङ्कार इत्येव परिहारार्थः । तत्र हेतुः कृतकृत्यता चेति, अत्रेतिर्हेतावित्याशयेन आह—यच्चेति । यद्यप्यस्य तृतीयपूर्वपक्षहेतुत्वादाद्यद्वयदूषणानन्तरं युक्तो निरासः, तथापि तस्यान्वेषणायेति पूर्वभाष्ये, अहेयमनुपादेयमित्युपश्रुत्या, हानाद्यभावे कथं पुरुषार्थं इति तस्य बुद्धिस्थत्वादिह निरासः । श्रुतौ, एकस्यैव पदस्य कुतो व्याख्येत्यत आह—सुगममिति । उपदेशवैयर्थ्यशङ्काशमनस्य नायमुपसंहारोऽनुरूपः, अत आह—प्रकृतमिति । केचिदित्युक्त्या नाचार्यदेशीया इति भाति तथा चाचार्यदेशीयोक्तसर्वदोषानुद्धारे मतान्तरानवसरः, तुल्यत्वाच्च न पृथगनुभाष्यमित्याशङ्क्य केचिदित्याचार्यदेशीया एवेत्याह—प्रकृतेति । किं दूषणेन स्वमतस्योक्तत्वादित्याशङ्क्य प्रकृतसिद्ध्यर्थमित्युक्तम् । तद्दूषणे स्वपरमतयोस्तौल्यात् संशयो मा भूदिति तद्दूषणमित्यर्थः । तत्रेति

भारत' (भ. गी. १५-२०) इति स्मृतिः। तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणम्। यदपि केचिदाहुः—प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण

सिद्धयर्थमेकदेशिमतं दूषयितुमनुभाषते - यदपि केचिदाहुरिति। दूषयति तन्नेति। इदमत्राकूतम्—'कार्यबोधे यथा चेष्टालिङ्गहर्षादयस्तथा। सिद्धबोधेऽर्थवत्तैवं शास्त्रत्वं हितशासनात्, यदि हि पदानां कार्याभिधाने तदर्थस्वार्थाभिधाने वा नियमेन वृद्धव्यवहारे सामर्थ्यमवधृतं भवेत्, न भवेदहेयोपादेयभूतब्रह्मात्मतापरत्वमुपनिषदाम्; तत्राविदितसामर्थ्यत्वात्पदानां, लोके तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेः। अथ तु भूतेऽप्यर्थे पदानां लोके शक्यः संगतिग्रहस्ततः उपनिषदां तत्परत्वं पौर्वापर्यपर्यालोचनयावगम्यमानमपह्नुत्य न कार्यपरत्वं शक्यं कल्पयितुं; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। तत्र तावदेवमकार्येऽर्थे न सङ्गतिग्रहः यदि तत्परः प्रयोगो न लोके दृश्येत। तत्प्रत्ययो वा व्युत्पन्नस्योन्नेतुं न शक्येत। न तावत्तत्परः प्रयोगो न दृश्यते लोके; कुतूहलभयादिनिवृत्त्यर्थानामकार्यपराणां पदसंदर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः। तद्यथा' खण्डलादिलोकपालचक्रवालादिवसतिः सिद्धविद्याधरगन्धर्वाप्सरः परिवारो ब्रह्मलोकावतीर्णमन्दाकिनीपयः प्रवाहपातधौतकलधौतमयशिलातलो नन्दनादिप्रमदवनविहारिमणिमयशकुन्तकमनीयनिनदमनोहरः पर्वतराजः सुमेरुरिति' 'नैष भुजङ्गो रज्जु' रियमित्यादि। नापि भूतार्थबुद्धिर्व्युत्पन्नपुरुषवर्तिनी न शक्या समुन्नेतुं; हर्षादेरुन्नयनहेतोः संभवात्। तथा ह्यविदितार्थजनभाषार्थो द्रविडो नगरगमनोद्यतो राजमार्गाभ्यर्णं देवदत्तमन्दिरमध्यासीनः प्रतिपन्नजनकानन्दनिबन्धनपुत्रजन्मा वार्ताहारेण सह नगरस्थदेवदत्ताभ्याशमागतः पटवासो-

---

नोक्तिनिषेधः, किन्तूक्तस्य दूषणमित्याह—दूषयतीति। अज्ञातसङ्गतत्वादिभिः कार्यशेषत्ववादिनं प्रत्यनन्यशेषत्वादित्यप्यसिद्धम्, अत आह—इदमिति। कार्यान्वयस्य व्युत्पत्तिद्वारत्वाभ्युपगमे सिद्धे सङ्गतिभङ्गः अनभ्युपगमे च "कार्यबोधे यथा चेष्टे"ति दृष्टान्तभङ्ग इत्याशङ्क्य क्वचित्कार्यान्वयस्यापि व्युत्पत्त्युपायत्वाङ्गीकारान्नदोष इत्याह—यदीति। पूर्ववादिना सिद्धे प्रयोगाभावात्, तद्बोधलिङ्गाभावाच्च न व्युत्पत्तिरित्युक्तम्। तत्र लिङ्गमात्रस्य श्लोकेन सङ्ग्रहायोगमाशङ्क्य प्रयोगस्य स्फुटत्वाल्लिङ्गस्य प्रतिपाद्यत्वात् तन्मात्रसङ्ग्रह इत्यभिप्रेत्याह—तत्र तावदिति। आदिपदेन शोकादेर्ग्रहणम्। प्रमदावनं अन्तःपुरोचितं वनम्। स्वर्णकमलवन्मणिमयाः पक्षिणोऽपि स्वर्गे सन्ति। आदिशब्दात् पुत्रस्ते जीवतीत्यादेः। परवर्तिनो हर्षादेः कथं बुद्धिलिङ्गतेति, न, अनुमितस्य लिङ्गत्वभावादित्याह—तथा हीत्यादिना। सिन्दूररञ्जितपुत्रपदाङ्कितः पटः पटवासः, तदुपायनं पुत्रजन्मलाञ्छनं प्रसिद्धम्। दिष्ट्येत्यव्ययमानन्दार्थे।

पायनार्पणपुरःसरं 'दिष्ट्या वर्धसे पुत्रस्ते जात' इति वार्ताहरव्याहारश्रवणसमनन्तरमुपजातरोमाञ्चकञ्चुकं विकसितनयनोत्पलमतिस्मेरमुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते, प्रमोदस्य च प्रागभूतस्य तद्व्याहारश्रवणसमनन्तरं भवतस्तद्धेतुताम्। न चायमप्रतिपादयन् हर्षहेतुमर्थं हर्षाय कल्पत इत्यनेन हर्षहेतुरर्थ उक्त इति प्रतिपद्यते। हर्षहेत्वन्तरस्य चाप्रतीतेः पुत्रजन्मनश्च तद्धेतोरवगमात्तदेव वार्ताहरेणाभ्यधायीति निश्चिनोति। एवं भयशोकादयोऽप्युदाहार्याः। तथा च प्रयोजनवत्तया भूतार्थाभिधानस्य प्रेक्षावत्त्वयोगोऽप्युपपन्नः। एवं च ब्रह्मस्वरूपज्ञानस्य परमपुरुषार्थहेतुभावादनुपदिशतामपि पुरुषप्रवृत्तिनिवृत्ती वेदान्तानां पुरुषहितानुशासनाच्छास्त्रत्वं सिद्धं भवति। तत्सिद्धमेतत्, विवादाध्यासितानि

महोत्पलं पद्मम्। अनुमितहर्षस्य सिद्धबुद्धयनुमापकत्वं तद्द्वाराभिधानपूर्वमाह—**प्रमोदस्य चेति**। **तद्धेतुकताम्** अनुमिमीत इत्यनुषङ्गः। अप्रतिपादयन् हर्षहेतुमिति, श्रवणमात्रेण स्वस्य हर्षाभावादित्यर्थः। **उक्तः बोधितः**। प्रतिपद्यते अनुमिमीते। अत्रेयमनुमानरीतिः। हृष्टो देवदत्तः ईदृग्वदनत्वाद् मद्वत्। हर्षोऽयमेतद्वाक्यजः ईदृगेतदनन्तर्यवत्त्वात् मदीयैतद्वाक्यगोचरप्रत्यक्षवत्। वाक्यं चेदं हर्षहेत्वर्थबोधकं, स्वरूपमात्रेण हर्षाहेतुत्वे सति हर्षहेतुत्वात्, अस्मद्भाषावाक्यवदिति। स्वार्थानुमानान्येतानि। तत्र व्याप्तमनुमातृमानसावसेयं प्रकारभेदमूरीकृत्येदृगित्युक्तम्। अतो नेदृक्त्वनिरुक्तौ क्लेशः कार्यः। हर्षहेत्वर्थबोधानुमानसंभवेऽपि तद्विशेषः पुत्रजन्मेति दुर्बोधः, प्रियासुखप्रसवादिहर्षहेतुसम्भवादत आह—**हर्षहेत्वन्तरस्येति**। पटवासोपायनार्हस्येत्यर्थः। न चास्यापि स्वभाषायां कार्यान्वितव्युत्पत्तिं प्राथमिकीमनुरुध्य पुत्रादिपदानां कार्यान्वित एवार्थे व्युत्पत्तिर्भवतीति वाच्यम्। प्रथमं व्युत्पित्सोरप्येवं व्युत्पत्तिसम्भवात्। न च पटवासादिसमयमप्यजानतः कथं हर्षहेतुपरिशेष इति वाच्यम्। परिशेषानुपपत्तेः कार्येऽपि तुल्यत्वात्, गवानयनानुभवात् परिशेष इति चेन्न गामानयेति वृद्धोक्तं कार्यं बहिरेव कृत्वा स्वेच्छया गवानयनमन्यत्करोतीति शङ्काशान्त्यभावात्। प्रयोगबाहुल्यान्निर्णयस्तु प्रकृतेऽपि तुल्यः। दुहितृजन्मादावीदृक्प्रयोगाश्रवणादिति द्रष्टव्यम्। हर्षादेरुन्नयनहेतोरित्यत्रादिशब्दार्थमाह—**एवमिति**। आदिशब्देन क्रोधादेर्ग्रहणम्। उक्तमुपजीव्यार्थवत्त्वैवमिति श्लोकभागं व्याचक्षाणः पुरोक्तं सिद्धप्रयोगाभावमपि निरस्यति—**तथा चेति**। सिद्धवाक्याद्धर्षादिसम्भवे, तथा चेत्येतत्, श्लोकस्थैवंशब्दव्याख्यानम्। **अनेन अर्थवत्ता**। एवं हर्षादिवल्लिङ्गमिति भ्रमो निरस्तः। हितशासनादित्यस्यासिद्धमुद्धरन् चतुर्थपादं व्याचष्टे—**एवं चेति**। हितशासनादपि शास्त्रतोपपत्तेः, शास्त्रत्वाद् विधिवाक्यवत् कार्यपरतानुमानमप्रयोजकमित्यर्थः। एवं कार्यपरत्वव्यापकमपाकृत्याकार्यपरत्वमनुमिमीते। **तदिति**। तच्छब्देन तस्मादर्थेन सिद्धे व्युत्पत्त्यादिपरामर्शिना वक्ष्यमाणहेत्वसिद्धिरुद्भूयते। विधिवाक्येषु बाधं नुदति—**विवादेति**।

केवलवस्तुवादी वेदभागो नास्ति' इति, तन्न; औपनिषदस्य पुरुषस्यानन्यशेषत्वात् । योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्मस्वरूपः

वचनानि भूतार्थविषयाणि, भूतार्थविषयप्रमाजनकत्वात् । यद्यद्विषयप्रमाजनकं तत्तद्विषयं, यथा रूपादिविषयं चक्षुरादि तथा चैतानि, तस्मात्तथेति । तस्मात्सुष्ठूक्तम् - तन्न, औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति । उपनिपूर्वात्सदेर्विशरणार्थात्क्विप्युपनिषत्पदं व्युत्पादितं उपनीयाद्वयं ब्रह्म सवासनामविद्यां हिनस्तीति ब्रह्मविद्यामाह । तद्धेतुत्वाद्वेदान्ता अप्युपनिषदः । ततो विदित औपनिषदः पुरुषः । एतदेव विभजते—योऽसावुपनिषत्स्वेवेति । अहप्रत्ययविषयाद्भिनत्ति—असंसारीति । अत एव क्रियारहितत्वाच्चतुर्विधद्रव्यविलक्षणः । *आतश्च चतुर्विधद्रव्यविलक्षणो यदनन्यशेषः ।

संगतिग्रहे कार्यविषयत्वं, तदभाववति भागासिद्धिर्मा भूदिति वचनानीत्युक्तम् **भूतार्थविषयाणि** । न कार्यविषयाणीत्यर्थः तेन कार्यार्थाद्ब्रह्मनिश्चयवादिना भूतार्थविषयत्वमात्रस्य तत्प्रमाजनकत्वस्य चेष्टत्वात् सिद्धसाधनता । प्रमाजनकत्वस्य साध्यावैशिष्ट्यं चेति परिहृतम् । कार्यतच्छेषविलक्षणो हेतुः स्वभूतशब्दार्थः तेन कार्यपरे तच्छेषदेवतादावपि प्रमाणे अर्थवादे व्यभिचारो निरस्तः । **यद्विषयेति** । यद्भूतविषयेत्यर्थः । **तद्विषयं** तद्भूतविषयं न कार्यविषयमित्यर्थः । **रूपादिविषयं** रूपादिविषयप्रमाजनकम् । एवं चानन्यशेषत्वहेतुर्नासिद्ध इत्याह—**तस्मादिति** । औपनिषदस्य वैदान्तिकस्येत्यर्थः । **अनन्यशेषत्वादिति** । अन्यशेषत्वानुपपत्तेरित्यर्थः । ननु "धर्मे रहस्युपनिषदि"ति निघण्डुकारः[1] कथं वेदान्तेषूपनिषत्पदमित्याशङ्क्य तद्दर्शनाय तस्य यौगिकार्थं तावदाह—**उपनीति** । **विशरणार्थादिति** । "विशरणं हिंसायामिति स्मरणात् तत्र व्युत्पादितमुपनिषत्पदं ब्रह्मविद्यामाहेत्यन्वयः । तस्याम्, उपेत्युपसर्गार्थं धात्वर्थं चाह **उपनीयेति** । ब्रह्मोपनीय विषयीकृत्य । **हिनस्तीति** नैतत्सदोरूपं, किन्तु तस्यार्थनिर्देशः । न तर्हि वेदान्तेषूपनिषत्पदं, न, लक्षणोपपत्तेरित्याह—**तद्धेतुत्वादिति** । उपनिषद् ?[2] (त्) कार्यस्य कथमौपनिषदत्वं न, तद्धितस्याने कार्थत्वादित्याह—**तत इति** । योसाविति भाष्ये नासौ नास्तीत्यप्रस्तुतकथनं, पुरुषविशेषणानि च व्यर्थानीत्याशङ्क्याह—**एतदिति** । औपनिषदत्वम् अन्यशेषत्वस्यानुपपन्नत्वं चेति द्वयम् **विभजते** औपनिषदः पुरुष एव नास्ति उपनिषद्भ्यः पुरुषविशेषाधिगमोऽपि नास्ति इति शङ्कामनुभवेनापाकुर्वता योसावुपनिषत्स्वेवाधिगत इत्येतत्सहितेन, नासावित्यादिना उपनिषद्विषयत्वं पुरुषविशेषणैरन्यशेषत्वानुपपत्तिं च विवृणोतीत्यर्थः । विशेषणैरन्यशेषत्वानुपपत्तिविभजनप्रक्रियामाह—**अहम्प्रत्ययेत्यादिना** । **आतश्च,** अवश्यं च । अनन्यशेषः अन्यशेषत्वबोधिमानहीनः । विक्रियमाणमन्यशेषत्वं, अन्यशेषत्वानुपपत्तिरूपम् । अतश्च विक्रियमाणतया प्रधानस्यानन्यशेषत्वस्य कथं चतुर्विधद्रव्यवैलक्षण्ये हेतुत्वमिति न शङ्क्यम् ।

---

1 "राः" ख पाठः 2 "द" ख - पाठः * अतश्चेति कल्पतरुधृतः पाठः

उत्पाद्यादिचतुर्विधद्रव्याविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' (बृह. ३-९-२६)

अन्यशेषं हि भूतं द्रव्यं चिकीर्षितं सदुत्पत्त्याद्याप्यं संभवति। यथा 'यूपं तक्षति' इत्यादि। यत्पुनरनन्यशेषं भूतभाव्युपयोगरहितं, यथा 'सुवर्णं भार्यम्' 'सक्तून् जुहोति' इत्यादि, न तस्योत्पत्त्याद्याप्यता। कस्मात्पुनरस्यानन्यशेषतेत्यत आह—यतः स्वप्रकरणस्थः। उपनिषदामनारभ्याधीतानां पौर्वापर्यपर्यालोचनया पुरुषप्रतिपादनपरत्वेन पुरुषस्यैव प्राधान्येनेदं प्रकरणम्। नच जुह्वादिवदव्यभिचरितक्रतुसंबन्धः पुरुष इत्युपपादितम्। अतः स्वप्रकरणस्थः सोऽयं तथाविध उपनिषद्भ्यः प्रतीयमानो न नास्तीति शक्यो वक्तुमित्यर्थः। स्यादेतत्—मानान्तरागोचरत्वेनागृहीतसंगतितयाऽपदार्थस्य ब्रह्मणो वाक्यार्थत्वानुपपत्तेः कथमुपनिषदर्थतेत्यत आह—स एष नेति नेत्यात्मेत्यात्मशब्दात्। यद्यपि गवादिवन्मानान्तरगोचरत्वमात्मनो नास्ति; तथापि प्रकाशात्मन एव सतस्तत्तदुपाधिपरिहाण्या शक्यं वाक्यार्थत्वेन निरूपणं, हाटकस्येव कटककुण्डलादिपरिहाण्या। न हि प्रकाशः स्वसंवेदनो न भासते, नापि

अनन्यशेषत्वस्योक्तेऽर्थे हेतुत्वं व्यतिरेकान्वयाभ्यां दर्शयति—**अन्यशेषं हीति**। भूतपदं स्फुटीकरणार्थम्। **चिकीर्षितं** सिसाधयिषितं। उत्पत्त्यादिभिःप्राप्यं साध्यमित्यादि वाक्ययोक्तं यूपादीत्यर्थः। **अनन्यशेषम्**। अत एव भूतभाव्युपयोगरहितम्। सक्तूनां प्रागविनियोगाद्धोमेन भस्मीभावाच्च नोपयोगद्वयम्। **अनन्यशेषता** अन्यशेषत्वप्रापकमानहीनता। कस्मादिति प्रश्नानुरूप्याय यत इति पूरणम्। तदसिद्धिं वारयति—**उपनिषदामिति**। **अनारभ्येति** क्रतुप्रकरणस्य पौर्वापर्येत्युपासनादिप्रकरणस्य निरासः। प्रकरणापाठेऽपि वाक्यात्क्रतुप्रवेशमाशङ्क्याह—**न चेति**। नासौ नास्तीति प्रतिज्ञामात्रमाशङ्क्य योसावुपनिषत्स्वेवाधिगत इति तद्धेतुसम्बन्धं दर्शयन् आह—**सोऽयमिति**। नास्तीत्यनधिगमस्याप्युपलक्षणम्। उपनिषत्स्वेव अधिगतत्वस्य नास्तीति वक्तुमशक्यत्वे हेतोरुक्तत्वात् स एष इत्यादि वृथा, न च तत्रात्मशब्दप्रयोगादात्मशब्दार्थस्य च प्रत्याख्यातुमशक्यत्वादित्युत्तरसहितं हेत्वन्तरमिति वाच्यम्, लोकप्रसिद्धस्यात्मनोऽप्रत्याख्यानेऽपि पराभिप्रेतस्यात्मनः प्रत्याख्यानाविरोधादित्याशङ्क्य शङ्कोत्तरत्वमाह—**स्यादेतदिति**। उक्तशङ्कायाः कथमिदमुत्तरमत आह—**यद्यपीति**। **प्रकाशात्मन इति**। तदनेन मानान्तरविशेषणवैयर्थ्यात् स्वप्रकाशतया प्रकाशमाने व्युत्पत्तिसम्भवात् पदार्थत्वमुक्तम्॥ **वाक्यार्थत्वेन निरूपणमिति**। एष इति स्वप्रकाशतया प्रकाशमानमनूद्यात्मेत्यात्मतया निरूपणमित्यर्थः। प्रकाशेन सह तदारोपितस्यापि स्फुरणान्निर्धारणायोगमाशङ्क्य उक्तम्। **तत्तदुपाधीति**। ननु प्रमिते तथाविधस्य निषेधः, तथा च कथं स्वप्रकाशे समारोपितस्य निषेधः, अत आह—**न हीति**। **अवच्छेदः** उपाधिः। भासमाने भासमानं

इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता

तदवच्छेदकः कार्यकरणसंघातः । तेन 'स एष नेति नेत्यात्मा' इति तत्तदवच्छेदपरिहाण्या बृहत्वादापनाच्च स्वयंप्रकाशः शक्यो वाक्यात् ब्रह्मेति चात्मेति च निरूपयितुमित्यर्थः । अथोपाधिनिरासवदुपहितमप्यात्मरूपं कस्मान्न निरस्यत इत्यत आह - आत्मनश्च प्रत्याख्यातुमशक्यत्वात् प्रकाशो हि सर्वस्यात्मा तदधिष्ठानत्वाच्च प्रपञ्चविभ्रमस्य । न चाधिष्ठानाभावे विभ्रमो भवितुमर्हति । न हि जातु रज्ज्वभावे रज्ज्वां भुजङ्ग इति वा धारेति वा विभ्रमो दृष्टपूर्वः । अपि चात्मनः प्रकाशस्य भासा प्रपञ्चस्य प्रथा । तथा च श्रुतिः—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति । न चात्मनः प्रकाशस्य प्रत्याख्याने प्रपञ्चप्रथा युक्ता । तस्मादात्मनः प्रत्याख्यानायोगाद्वेदान्तेभ्यः प्रमाणान्तरागोचरसर्वोपाधिरहितब्रह्मस्व-

---

निषेध्यमित्युक्तम् । प्रमाणविशेषणं तु व्यर्थमित्यर्थः । ननु योसावुपनिषत्स्विति भाष्येऽसंसारिब्रह्मेत्युक्तस्य ब्रह्मणोऽपदार्थत्वात् वाक्यार्थाप्रवेशे शङ्कित आत्मेति निरूपणस्य शक्यत्वाभिधानमननुरूपमित्याशङ्क्या-त्मेत्येतद् ब्रह्मेत्यस्योपलक्षणमित्यभिप्रेत्य फलितमाह—**तेनेति** । तेन स्वयंप्रकाशः प्रकाशो वाक्याद् ब्रह्मेति चात्मेति च निरूपयितुं शक्यमित्यन्वयः । तद्वाक्यमाह—**स एष इति** । आत्मेतीतिशब्दः सत्यज्ञानानन्दादि-वाक्यप्रदर्शनार्थः । प्रकाशेन सह तत्समारोपितोपाधेरपि[1] भाने तन्निष्कर्षायोग इत्यत आह—**तत्तदिति** । नेति वाक्ये अवच्छेदपरिहाणिः स्फुटा । सत्यादिवाक्येपि, अनन्तमिति सर्वावच्छेदपरिहाणिः । एवमपि ब्रह्मेति, आत्मेति च कथं निरूप्यते डित्थो डवित्थ इति निरूपणं कथं न भवतीत्याशङ्क्य ब्रह्मात्मशब्द-प्रवृत्तिमूलयोर्बृहत्याप्नोत्योरर्थानुगमादित्याह—**बृहत्त्वादापनाच्चेति**। चशंकोच्छेदी। बृहत्त्वमिति वृद्धेर्व्याप्तेश्च साधारणनिर्देशः । अतिशायनमसङ्कोचः । ननु भाष्ये ब्रह्मपदयुक्तं वाक्यं कथं नापाठीति । सर्वपदनियमा-भावात्, नेति वाक्ये परिच्छेदपरिहारेण स्फुटत्वाच्चेति ब्रूमः । आत्मनश्चेति चकाराद् वाक्यार्थत्वोपपत्तौ युक्त्यन्तरं भाति । तन्न, प्रत्याख्यातुमशक्यत्वेऽपि मानागोचरत्वनिमित्तापदार्थत्वस्य तदधीनावाक्यार्थत्वस्य चाशान्तेरित्याशङ्क्य शङ्कोत्तरत्वमाह—**अथेति** । आत्मनिरासशङ्किनं प्रति प्रत्याख्यानस्याशक्यत्वादिति प्रतिज्ञाकल्पमाशङ्क्यात्मन इत्येतद्विवक्षितं हेतुमाविष्करोति—**प्रकाशो हीति** । आत्मा तत्त्वं । रज्ज्वभावे दण्डादौ भुजङ्गभ्रमोऽस्ति अत उक्तं **रज्ज्वामिति** । चशब्दसूचितं हेत्वन्तरमाह—**अपि चेति** । **प्रथा** प्रथमानता । उक्तस्य प्रासङ्गिकशङ्कोत्तरत्वे सति नातीवोपयोग इति प्रकृतान्वयमाह—**तस्मादिति** । **वेदान्तेभ्यः** 'सत्यं ज्ञान'मित्यादिभ्यः । आत्मज्ञानस्यापि निरास्पदस्यानन्तरोक्तस्य वाक्यान्निरूपणस्य

---

1 "पिन भा"? ख पाठः

तस्यैवात्मत्वात् । नन्वात्माहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम् । न; तत्साक्षित्वेन प्रत्युक्तत्वात् । न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण

रूपावगतिसिद्धिरित्यर्थः । उपनिषत्स्वेवावगत इत्यवधारणममृष्यमाण आक्षिपति—नन्वात्मेति । सर्वजनीनाहंप्रत्ययविषयो ह्यात्मा कर्ता भोक्ता च संसारी; तत्रैव च लौकिकपरीक्षकाणामात्मपदप्रयोगात् । य एव लौकिकाः शब्दास्त एव वैदिकास्त एव च तेषामर्था इत्यौपनिषदमप्यात्मपद तत्रैव प्रवर्तितुमर्हति, नार्थान्तरे तद्विपरीत इत्यर्थः । समाधत्ते—न अहंप्रत्ययविषय औपनिषदः पुरुषः । कुतः तत्साक्षित्वेन । अहंप्रत्ययविषयो यः कर्ता कार्यकरणसंघातोपहितो जीवात्मा तत्साक्षित्वेन परमात्मनोऽहंप्रत्ययविषयत्वस्य प्रत्युक्तत्वात् । एतदुक्तं भवति—यद्यपि 'अनेन जीवेनात्मना' इति जीवपरमात्मनोः पारमार्थिकमैक्यं; तथापि तस्योपहितं रूपं जीवः, शुद्धं तु रूपं तस्य साक्षि, तच्च मानान्तरानधिगतमुपनिषद्गोचर इति । एतदेव प्रपञ्चयति—न

चासिद्धिशङ्कोत्तरमेतदित्यर्थः । योऽसावुपनिषत्स्वेवावगत इत्यस्यानन्तरमयमाक्षेपः, कुतो नाभूदित्याशङ्क्य अस्यावधारणाक्षेपत्वादवधार्योपनिषदधिगतिसिद्ध्यानन्तर्या[1]र्नहत्वादित्याह—उपनिषत्स्विति । अहंधीविषयात् सकाशादौपनिषदात्मनोऽन्यत्वादवधारणोपपत्तिमाशङ्क्याह—सर्वजनीनेति । अहम्प्रत्ययविषयः संसारी-ह्यात्मेत्यन्वयः । सर्वजनीनेत्यहम्प्रत्ययस्याबाधितत्वं, कर्तेत्यादि संसारित्वोक्तिः । लौकिकात्मपदस्यायमर्थो भवतु वैदिकस्य त्वन्योऽर्थ इति शङ्काशान्तिः कुतः, अत आह—य एवेति । यद्यप्याक्षेपसमाधावुच्यत इत्यारम्भः प्राप्तः, तथाप्याक्षेपस्य तुच्छत्वान्नेत्यारभ्यत इति मत्वाह—समाधत्ते । नेति । नानुपपन्नमिति नञोऽन्वये-ऽनुपपत्तिहेतुनिषेधो नार्थिकसिद्धिः, आर्थिकस्तु हेतुनिषेधेऽनुपपत्तिनिषेध इति मत्वा निषेध्यमाह—अहमिति । तृतीयापञ्चम्यन्ताभ्यां हेतुद्वयोक्तिभ्रमं नुदति—कुत इति । तच्छब्दस्य नेति प्रतिज्ञास्थौपनिषदपुरुषग्राहित्वभ्रमं व्याहतिशङ्कावहं नुदति—अहमिति । परमात्मनो भिनत्ति जीवात्मेति । अत्र च जीवात्मेति परमात्मन इति विशिंषता आत्मशब्दस्य चेतनमात्रे सङ्गतिग्रहः, न तत्तद्विशेषे शक्तिगौरवादिति सूचितम् । जीवत्व-विवरणं कर्तेति । भोक्तृत्वाध्यासमूलं कार्यकारणेत्यादि । पुरुषस्वरूपप्रत्युक्तिभ्रमं नुदति—अहम्प्रत्यय-विषयत्वस्येति । जीवाभिन्नस्य तत्तत्साक्षित्वं तस्याहंधीगोचरत्वं तदगोचरत्वं च व्याहतं, अनहंधीगोचर-त्वेऽपि नौपनिषदत्वावधारणम्, मानान्तरस्यापि सम्भवादित्याशङ्क्य आह—एतदिति । उपहितानुपहितभेदेन प्रथमयोरनुपपत्त्योः परिहारः । तच्चेति तृतीयस्याः पूर्वं सामान्येन मानान्तरानधिगतिरभिप्रेता । विवरणे तु विधिकाण्डतर्कसमयमात्रानधिगतिरुच्यत इति, असङ्गतिः । आत्मविशेषणानि च व्यर्थानीत्याशङ्क्याह—एतदेवेति । मानान्तरानधिगतत्वमेवेत्यर्थः । अहम्प्रत्ययविषयककर्तृव्यतिरेकेणेति कर्तृमात्रगोचराहंधी-

[1] "र्यार्ह" क पाठः

तत्साक्षी सर्वभूतस्थः समः एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा । अतः सः न केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम् । आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः । सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति ।

ह्यहंप्रत्ययविषयेति । विधिशेषत्वं वा नेतुं न शक्यः । कुतः आत्मत्वादेव । न ह्यात्माऽन्यार्थोऽन्यत्तु सर्वमात्मार्थम् । तथा च श्रुतिः—'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति' इति । अपि चातः सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः; सर्वस्य हि प्रपञ्चजातस्य ब्रह्मैव तत्त्वमात्मा । न च स्वभावो हेयोऽशक्यहानत्वात् । न चोपादेयः उपात्तत्वात् । तस्माद्धेयोपादेयविषयौ विधिनिषेधौ न तद्विपरीतमात्मतत्त्वं विषयीकुरुत इति सर्वस्य प्रपञ्चजातस्यात्मैव तत्त्वमिति । एतदुपपादयति—सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति । अयमर्थः—पुरुषो हि श्रुतिस्मृतीतिहासपुराणतदविरुद्धन्यायव्यवस्थापितत्वात्पर-

---

विधिकाण्डाभ्याम् अनधिगतिः । तत्साक्षीति व्यतिरेके हेतुः । सर्वभूतस्थ इति बौद्धनये, **सम इति** सावयवत्वेनात्मनोऽसमत्ववादिविवसनसमये, **एकेति** चतुर्व्यूहवादिपञ्चरात्रनये, **कूटस्थ** इति नित्यपरिणामिवादिनये, **सर्वस्यात्मेति** नैयायिकादितर्कानधिगतिः प्रपञ्च्यते । तेन सर्वविशेषनिषेधे सामान्यतो, मानान्तरानधिगमसिद्धिः विशेषणानां च सोपयोगत्वमित्यर्थः । नेतुमित्यस्याकाङ्क्षामनुषङ्गेण वारयति—**न शक्यत इति** । एवमपि प्रतिज्ञामात्रमिति शङ्कते—**कुत इति** । अहेयानुपादेयत्वे वक्ष्यमाणं हेतुम् आकाङ्क्षावशादिहापि योजयन् परिहरति—**आत्मत्वादेवेति** । आत्मत्वस्य शेषत्वाभावहेतुता कथमित्याशङ्क्यानात्मनामेव शेषत्वदर्शनादित्याह—**न ह्यात्मेत्यादि** । एतच्च पूर्वोक्तस्याशेषत्वस्य, उपोद्बलनमात्रं, स्वामित्वेन शेषिणोऽप्यात्मनः कर्तृत्वेन कर्मशेषत्वादिति द्रष्टव्यम् । नैष पूर्वत्रैव हेतुः, तथा च सति चकारायोगादिति मत्वोत्तरत्रापि योजयति—**अपि चेति** । यद्वा अवधारणार्थस्य एवकारस्य समुच्चयार्थस्य च चकारस्य मिथो विरोधमाशङ्क्य, अपिचार्थे चकार इति दर्शयन्नाह—**अपि चेति** । सर्वेषां न हेय इत्यन्वये परेण सर्वहेयत्वादेरनाशङ्कितत्वात् प्रतिषेधायोगमाशङ्क्य व्यत्ययेन योजयति—**सर्वेषामात्मत्वादिति** । कथं तत्त्वे वा कथमहेयादित्वमत आह—**सर्वस्य हीति** । ब्रह्मैवात्मेत्यन्वयः । आत्मपदव्याख्या **तत्त्वमिति** । हिशब्देन वेदान्तिप्रसिद्धिरुदाहृता । अहेयत्वाद्युक्तेः प्रकृतासङ्गतिमाशङ्क्याह—**तस्मादिति** । सर्वं हीति केयमकाण्डे नाशप्रक्रियोक्तिः अत आह—**सर्वस्येति** । **आत्मैव** ब्रह्मैव । ननु विकारस्य प्रकृत्यन्तो नाशः कथं पुरुषान्तः अत आह—**अयमिति** । पुरुषस्य प्रकृतित्वार्हतामुक्त्वा प्रपञ्चस्य प्रकृत्या-

पुरुषो विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्धबुद्धमुक्तस्वभावः । तस्मात् 'पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः' (काठ. १-३-११) 'तं त्वौपनिषदं पुरुषं पृच्छामि'

मार्थसन्, प्रपञ्चस्त्वनाद्यविद्योपदर्शितोऽपरमार्थसन्; यश्चापरमार्थसन्नासौ प्रकृती रज्जुतत्त्वमिव सर्पविभ्रमस्य विकारस्य। अत एवास्यानिर्वाच्यत्वेनादृढस्वभावस्य विनाशः, पुरुषस्तु परमार्थसन् नासौ कारणसहस्रेणाप्यसन् शक्यः कर्तुम्। न हि सहस्रमपि शिल्पिनो घटं पटयितुमीशत इत्युक्तम् । तस्मादविनाशिपुरुषान्तो विकारविनाशः शुक्तिरज्जुतत्त्वान्त इव रजतभुजङ्गविनाशः। पुरुष एव हि सर्वस्य प्रपञ्चविकारजातस्य तत्त्वम्। न च पुरुषस्यास्ति विनाशो यतोऽनन्तो विनाशः स्यादित्यत आह—पुरुषो विनाशहेत्वभावादिति। न हि कारणानि सहस्रमप्यन्यदन्यथयितुमीशत इत्युक्तम्। अथ मा भूत्स्वरूपेण पुरुषो हेय उपादेयो वा, तदीयस्तु कश्चिद्धर्मो हास्यते, कश्चिच्चोपादास्यत इत्यत आह—विक्रियाहेत्वभावाच्च कूटस्थनित्यः। त्रिविधोऽपि धर्मलक्षणावस्थापरिणामलक्षणो विकारो नास्तीत्युक्तम्। अपि

काङ्क्षतार्हतामाह—**प्रपञ्चस्त्विति**। उक्तस्य फलं सोदाहरणमाह—**यश्चेति प्रकृतिः**—विकारस्येत्यन्वयः। **सर्पभ्रमस्य** - भ्रमविषयसर्पस्य प्रकृतित्वात् । पुरुषस्य मृदादिवन्नाशमाशङ्क्यानिर्वाच्यत्वमुपाधिमाह—**अतएवेति**। साधनव्याप्तिं निरस्यति—**पुरुषस्त्विति** । तत्स्वभावस्य असत्त्वं व्याहतमिति प्रतिकूलतर्कमाह—**नासाविति** । अन्यादृक्स्वभावोऽन्यादृक्कर्तुमशक्य इत्युदाहरति—**नहीति** । उक्तोपपादनेन पुरुषाविनाशतदन्तप्रपञ्चनाशसिद्धिद्वारा प्रपञ्चस्यात्मैव तत्त्वमिति प्रकृतं फलतीत्याह—**तस्मादित्यादिना तत्त्वमित्यन्तेन**। अत्र हिशब्दः फलतोऽर्थस्य स्फुटत्वद्योती, पुरुषान्तनाशोक्त्यैव पुरुषाविनाशसिद्धेः पुनः पुरुषाविनाशोक्तिर्वृथेत्याशङ्क्य नाशस्य पुरुषान्तत्वशैथिल्यशङ्काशान्त्यर्थत्वमाह—**न चेति**। नाशहेतुरपि कश्चिद्भविष्यतीति तदभावासिद्धिः। अत आह—**न हीति**। **कारणानि**। कारणत्वाभिमतानि। अतो नाशकारणानि न सम्भवन्तीत्यर्थः। विक्रियाहेत्वभावादित्यस्यात्मैव सर्वस्य तत्त्वमिति प्रकृतासङ्गतेरयुक्तमाशङ्क्य व्यवहितेन सङ्गतिमाह—**अथेति**। हेयोपादेयधर्मद्वारा विधिप्रतिषेधप्राप्तिः शङ्काफल, कृत्स्नैकदेश विकल्पासहतया कापि विकारमनिच्छतः। तद्वत्वः ? (त्वा) प्रसिद्धेर्निषेधायोगमाशङ्क्य जगति विकारस्यैवाभावात्, मृदादौ तद्भावाङ्गीकारस्यैवाभावात्, मृदादौ तद्भावाङ्गीकारेऽपि ब्रह्मणि तद्धेत्वभावादिति विवक्षितत्वाददोष इत्याह—**त्रिविध इत्यादिना, अन्यो विकार इत्यन्तेन**। **नास्तीत्युक्तम्**। हाटकवादेः परिणामखण्डनात्। नैतद्यक्तिद्वयं भाष्ये न

(बृह. ३-१-२६) इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते । अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम् । यदपि शास्त्रतात्पर्यविदामनुक्रमणम्—'दृष्टो हि तस्यार्थः

चात्मनः परमार्थसतो धर्मोऽपि परमार्थसन्निति न तस्यात्मवदन्यथात्वं कारणैः शक्यं कर्तुम्, न च धर्मादन्यथात्वादन्यो विकारः; तदिदमुक्तम्—विक्रियाहेत्वभावादिति । सुगममन्यत् । यत्पुनरेकदेशिना शास्त्रविद्वचनं साक्षित्वेनानुक्रान्तं तदन्यथोपपादयति-यदपि शास्त्रतात्पर्यविदामनुक्रमणमिति । 'दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनम्' इति वक्तव्ये धर्मजिज्ञासायाः प्रकृतत्वाद्धर्मस्य च कर्मत्वात् 'कर्मावबोधनम्' इत्युक्तम्, न तु सिद्धरूपब्रह्मावबोधनव्यापारं वेदस्य वारयति । न हि सोमशर्मणि प्रकृते तद्गुणाभिधानं परिसंचष्टे विष्णुशर्मणो गुणवत्ताम् । विधिशास्त्रं विधीयमानकर्मविषयं, प्रतिषेधशास्त्रं च प्रतिषिध्यमानकर्मविषयमित्युभयमपि कर्मावबोधनपरम् । अपि च 'आम्नायस्य क्रियार्थत्वात्' इति शास्त्रकृद्वचनम् । तत्रार्थग्रहणं

भाति । विक्रियायास्तद्धेतोश्चाभावादिति व्याख्योपपत्तेरित्याह—तदिति । विकारे सत्यनित्यत्वादिप्राप्तेर्नित्यत्वादिरक्षणाय कौटस्थ्यमेष्टव्यमिति अत एवेति भाष्यम् । पुरुषावधिविनाशश्रुतिः "पुरुषान्नपर"मिति । मानान्तरागम्यत्वे श्रुतिः "तं त्वौपनिषदमिति" । साहसमात्रं साहसमात्रविजृम्भितमिति सुवोधमित्याह—सुगममिति । एकदेशिदूषणस्य प्रकृतत्वात् ततोऽन्येषां अनुक्रमणस्यानुवादायोग, एकदेशिकृततद्वचोनुक्रमणानुवादोपि विधिप्रतिषेधशास्त्राभिप्रायमित्ययुक्तं, सर्वशास्त्राभिप्रायेणैकदेशिना तदनुक्रमणात्, अत आह—यत्पुनरिति । अत्रानुक्रमणमित्यनुक्रान्तं वचनमुक्तं नानुक्रमणमात्रम् अतो न द्वितीयानुपपत्तिरित्यर्थः । एकदेशिनेति प्रथमानुपपत्तिशान्तिः । शास्त्रतात्पर्यविदां स्वरूपेणाननुक्रान्तत्वाद्वचनग्रहणम् । अदूषयित्वा अन्यथावर्णने कारणं शास्त्रविदिति । धर्मजिज्ञासाविषयत्वादित्ययुक्तं 'दृष्टो हीति वचसो धर्मजिज्ञासाप्रतिपादकत्वाभावात् विधिप्रतिषेधशास्त्राभिप्रायमिति परमतस्यानिराकृतिः परेण सर्वं शास्त्रं विधिप्रतिषेधात्मकमिति इष्टत्वात् इत्याशङ्क्य धर्मजिज्ञासाप्रकरणस्थत्वं तद्विषयत्वं विधिप्रतिषेधशब्देन च वेदान्तान्विहायान्यो भागो गृहीत इत्याशयेन आह—दृष्टो हीत्यादिना । ननु तर्हि धर्मावबोधनमिति वाच्यमत आह—धर्मस्य चेति । किमेवमुत्तरेण, कर्मग्रहणं ब्रह्मण उपलक्षणमित्युच्यतामत आह—नत्विति । साधारणोक्तिसंभवे कर्मेति गृह्णन् प्रकरणमनुसृत्य वेदैकदेशार्थमेवाहेति युक्तं, न तूपलक्षणत्वकल्पनेनोत्तरं योग्यमित्यर्थः । प्रकरणानुरोधात् कर्मकाण्डार्थोक्तिरर्थान्तरं वेदान्तानां वारयति अत आह—न हीति । तद्गुणाभिधानं तद्गुणस्य दयालुत्वादेरभिधानं । प्राज्ञत्वादिगुणवत्तां । निषेधानामननुष्ठेयावबोधकत्वात् कथं कर्मावबोधः प्रयोजनमत आह—विधिशास्त्रमित्यादिना । उदाहरणार्थं विधिशास्त्रग्रहणम् । कर्मावबोधनपरं तदवबोधप्रयोजन-

कर्मावबोधनम्' इत्येवमादि, तद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्। अपि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं

यद्यभिधेयवाचि, ततो भूतार्थानां द्रव्यगुणकर्मणामानर्थक्यमनभिधेयत्वं प्रसज्येत, न हि ते क्रियार्था इत्यत आह—अपि चाम्नायस्येति। यद्युच्येत न हि क्रियार्थत्वं क्रियाभिधेयत्वं, अपि तु क्रियाप्रयोजनत्वं; द्रव्यगुणशब्दानां च क्रियार्थत्वेनैव भूतद्रव्यगुणाभिधानं न स्वनिष्ठतया, यथाहुः शास्त्रविदः—'चोदना हि भूतं भवन्तम्' इत्यादि। एतदुक्तं भवति—कार्यमर्थमवगमयन्ती चोदना तदर्थं भूतादिकमप्यर्थं गमयतीति, तत्राह—प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेदिति। अयमभिसंधिः—न तावत्कार्यार्थ एव स्वार्थे पदानां संगतिग्रहो नान्यार्थ इत्युपपादितं भूतेऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः। नापि स्वार्थमात्रपरतैव पदानाम्। तथा सति न वाक्यार्थप्रत्ययः स्यात्। न हि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा। तस्मात्पदानां स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थपरतयैकवाक्यता। तथा च तत्तदर्था-

---

परम् भूतोपदेशानर्थक्यस्य परेणेष्टत्वाद् अपि चेति भाष्यायोगमाशङ्क्य विकल्पमुखेन घटयति—**अपि चेति**। एकदेश्युपन्यस्तदूषणभ्रमं नुदति—**शास्त्रकृद्वचनमिति**। **अर्थग्रहणं** गृह्यमाणमर्थपदम्। भूतोपदेशपदेन भूतपरवाक्यग्रहणभ्रमं नुदति—**द्रव्येति**। आनर्थक्यव्याख्या, **अनभिधेयत्वम्**। प्रवृत्तिनिवृत्तीत्यनुक्तोपालम्भत्वमाशङ्क्य विकल्पान्तरमनूद्य निरस्यतीत्याह—**यदीति**। अस्मिन्पक्षे द्रव्यगुणशब्दानर्थक्यं नेत्याह—**द्रव्येति**। **स्वनिष्ठतया** स्वार्थप्राधान्येन। "ननु चोदना हि भूतं भवन्तं भविष्यन्तमित्येवञ्जातीयकं शक्नोत्येवावगमयितुमिति शाबरवाक्ये सिद्धबोधिता भाति न कार्यबोधिता न च तादर्थ्येनेतरबोधिता। अत आह—**एतदिति**। चोदनाग्रहणादेतल्लभ्यत इति भावः। को हेतुरित्युक्तम्। अभव्यार्थत्वस्यैव हेतुत्वादत आह—**अयमिति**। अभव्यार्थोपदेशायोगः किं कार्यपरत्वनियमात् संसर्गपरत्वनियमाद्वा नाद्य इत्याह—**न तावदिति**। **अन्यार्थे** अन्यार्थमुपदिश्यमाने स्वार्थमात्रे अर्थान्तर संसर्गपरतामात्रेण द्वितीयपक्षं निराकरिष्यमाणः किं संसर्गपरत्वेन, स्वार्थमात्र एव तात्पर्यमस्त्विति शङ्कां तावन्निरस्यति—**नापीति**। तर्हि व्युत्पत्तिरपि संसृष्टेऽस्तु, न, अभिधानदशायां संसर्गाभानादिति मत्वोपसंहरति—**तस्मादिति**। गुणप्रधानभावरहितानामेकवाक्यत्वादर्शनादित्यर्थः। नास्मिन्पक्षे प्रागुक्तो वाक्यार्थप्रत्ययाभावप्रसङ्ग इत्याह—**तथा चेति**। पदानामभिधानं स्वार्थे तात्पर्यमन्यविशिष्टे इत्यत्र भट्टसम्मति-

नोपादिशतीति को हेतुः। न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात्क्रियार्थ एव भूतोपदेश इति चेत्, नैष दोषः; क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव, क्रियार्थत्वं

न्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति। यथाहुः शास्त्रविदः—'साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्। वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले॥ वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्। पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥' इति। तथा चार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम्। एवं च सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोष इति। भव्यं कार्यम्। ननु यद्भव्यार्थं भूतमुपदिश्यते, न तद्भूतं, भव्यसंसर्गिणा रूपेण तस्यापि भव्यत्वादित्यत आह—न हि भूतमुपदिश्यमानमिति। न तादात्म्यलक्षणः संसर्गः, किन्तु कार्येण सह प्रयोजनप्रयोजनिलक्षणोऽन्वयः, तद्विषयेण तु भावार्थेन भूतार्थानां क्रियाकारकलक्षण इति न भूतार्थानां क्रियार्थत्वमित्यर्थः। शङ्कते—अक्रियात्वेऽपीति, एवं चाक्रियार्थकूटस्थनित्यब्रह्मोपदेशानुपपत्तिरिति भावः। परिहरति—नैष दोषः। क्रियार्थत्वेऽपीति। न हि क्रियार्थं भूतमुपदिश्यमानमभूतं भवति, अपि तु

माह—**यथेति**। सत्यं संसर्गपराणि पदानि संसर्गस्तु कार्येण; अतो द्वितीयपक्ष इत्याशङ्क्याह—**तथा चेति**। **पदानामिति** पदार्थानां वाक्यार्थप्रमितिद्वारत्वेन तदभिहितानां चेत्यर्थः। पूर्वपक्षिणा कार्यप्रयोजनत्वोक्तेर्भव्यार्थत्वेन इत्यसदनुवादमाशङ्क्याह—**भव्यमिति**। परेण क्रियाशेषत्वे कथ्यमाने क्रियात्वनिषेधासङ्गतिमाशङ्क्य शङ्कान्तरमाह—**नन्विति**। आम्नायस्येति सूत्रेऽर्थपदमभिधेयवाचि न च द्रव्यगुणपदानामनभिधेयत्वप्रसङ्गः [1]तेषामप्युक्तरीत्या कार्यवाचित्वादिति जीवत्याद्यः पक्ष इति शङ्कार्थः। भाष्यं प्रतिज्ञामात्रमाशङ्क्य भव्यसंसर्गिणा रूपेणेत्यत्र किं भव्यमपूर्वकार्यं भावार्थकार्यं वा पक्षद्वयेऽपि न भूतस्य भव्यत्वमित्याह—**नेति**। आम्नायस्येति सूत्रेऽर्थपदस्य प्रयोजनवाचित्वेऽपि दूषणस्योक्तत्वात् पुनःशङ्कानुदयमाशङ्क्याऽर्थपदस्याभिधेयवाचित्वमेवेति प्रथमपक्षोज्जीवनशङ्कायामुद्भूतायां तत्पक्षदोषाप्राप्तिमात्रेण दृष्टस्य निरस्ते द्वितीयपक्षे शङ्कामात्रमेतदित्याह—**शङ्कत इति**। द्रव्यगुणोपदेशस्य क्रियार्थत्वं नास्माकमनिष्टमित्याशङ्क्यानिष्टपर्यन्ततामाह—**एवं चेति**। निरस्तमेतदिति वक्तव्येऽपि परबुद्धिमनुरुध्य परिहारमेव करोतीत्याह—**परिहरतीति**। शङ्कित्रा भूतोपदेशे, उक्ते वस्तूपदिष्टमिति व्यधिकरणम्। उपदिष्टमेवेति च वृथा अनुपदेशस्य अत्यन्तमप्राप्तेरित्याशङ्क्य, वस्तुप (रं ? दं) भूतपरं वस्त्वेवेति चैवकारान्वय इत्याह—**नहीति**। भाष्ये तस्येत्यन्तः प्रथमपक्षत्यागः द्वितीय-

---

[1] 'मुक्तरी' ख पाठः

तु प्रयोजनं तस्य । न चैतावता वस्त्वनुपदिष्टं भवति । यदि नामोपदिष्टं

क्रियानिर्वर्तनयोग्यं भूतमेव तत् । तथा च भूतेऽर्थेऽवधृतशक्तयः शब्दाः क्वचित्स्वनिष्ठभूतविषया दृश्यमाना मृत्वा शीर्त्वा वा न कथंचित्क्रियानिष्ठतां गमयितुमुचिताः । न ह्युपहितं शतशो दृष्टमप्यनुपहितं क्वचिद्दृष्टमदृष्टं भवति । तथा च वर्तमानापदेशा अस्तिक्रियोपहिता अकार्यार्थी अप्यटवीवणनादयो लोके बहुलमुपलभ्यन्ते । एवं क्रियाऽनिष्ठाः, अपि संबन्धमात्रपर्यवसायिनः, यथा कस्यैष पुरुष इति प्रश्नोत्तरं राज्ञ इति । तथा प्रातिपदिकार्थमात्रनिष्ठाः यथा कीदृशास्तरव इति प्रश्नोत्तरं फलिन इति । न हि पृच्छता पुरुषस्य वा तरूणां वास्तित्वनास्तित्वे प्रतिपित्सिते, किन्तु पुरुषस्य स्वामिभेदस्तरूणां च प्रकारभेदः । प्रष्टुरपेक्षितं चाचक्षाणः स्वामिभेदमेव प्रकारभेदमेव च प्रतिवक्ति, न पुनरस्तित्वं तस्य तेनाप्रतिपित्सितत्वात् । उपपादिता च भूतेऽप्यर्थे व्युत्पत्तिः प्रयोजनवति पदानाम् । चोदयति—यदि नामोपदिष्टं भूतं किं तव—उपदेष्टुः

पक्षस्वीकारानुवादत्वान्नोत्तरं, न चैतावतेत्यपि न पूर्वशङ्कोत्तरम् । अनाशङ्कितानुपदेशोत्तरत्वादित्याशङ्क्य, सत्यं तस्येत्यन्तोऽनुवादः । न चेत्यादि तु एतावता क्वचित् क्रियार्थभूतोपदेशासत्तामात्रेण वस्तु, अक्रियार्थभूतमुपदिश्यमानमुपलब्धं लोकेऽनुपदिष्टं न भवतीति व्याख्यायमानं पूर्वशङ्कापरिहार इत्याह—**तथा चेति** । केवलभूतबोधक्षमत्वाय अवधृतशक्तय इत्युक्तम् । **कथंचित्** । अध्याहारादिना भूतस्य पदशक्तिविषयत्वेऽपि तस्य वाक्येषूपदेशस्य क्रियार्थत्वदर्शनभूयस्त्वात् केवलोपदेशाः कथंचिन्नेतुमुचिता एव नेत्याह—**नहीति** । केनचिदुपहितस्य बहुशो दृष्टस्य क्वचितदनुपहितस्य दर्शनानादरे धर्मित्वस्य बहुदृष्टस्य राज्ञः क्वचित्केवलदर्शनमनादरणीयं स्यादित्यर्थः । केवलोपदेशदृष्टयसिद्धिमुद्धरति—**तथा चेति** । अकार्यर्थताहेतुः **अस्तिक्रियेति** । अङ्गीकृत्य क्वचिदित्यवोचाम । क्वाचित्कत्वमपि नास्तीत्यभिप्रायेणोक्तं **बहुलमिति** । पूर्वोदाहृतावविधेयापि क्रियास्तीति, तद्रहितमुदाहरति— **एवमिति** । पूर्वोदाहृतौ षष्ठीप्रयोगात् प्रकृतिप्रत्ययार्थान्वयनिष्ठता उत्तरस्यां तु प्रथमाप्रयोगात् प्रातिपदिकार्थमात्रनिष्ठतेत्याह—**तथेति** । तत्राप्यस्तिक्रियाध्याहारमाशङ्क्याह—**नहीति** । अप्रतिपित्सितत्वादिति पूर्वमुक्तस्य स्मारणम् भूतेऽर्थेऽवधृतशक्तय इति यदुक्तं तदसिद्धिमाशङ्क्योक्तं स्मारयति—**उपपादिता चेति** । **प्रयोजनवति** । हर्षादिप्रयोजनकपुत्रजन्मादिवाक्यजातेऽपि । अप्रयोजनसिद्धोपदेशा इहोदाहार्या इति मत्वैतद्विशेषणम् । सिद्धोपदेशस्य सिद्धब्रह्मोपदेशनिर्वाहार्थतायाः स्फुटत्वात् प्रश्नायोगमाशङ्क्याह—**चोदयतीति** । उपदिष्टं किमित्याकाङ्क्षां पूरयति—**भूतमिति** । तवेत्ययुक्तं ममाभावेऽप्यन्यस्य किञ्चिद्भावात् । किमित्यप्ययुक्तम् । उपदेशेन ज्ञानसिद्धेरित्याशङ्क्य तवेष्टसिद्धोपदेशेन श्रोतुरुपदेष्टुर्वा किं प्रयोजनमित्याक्षेपार्थ इत्याक्षेपार्थ इत्याह—**किं तवेति** ।

किं तव तेन स्यादिति । उच्यते—अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति । तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं

श्रोतुर्वा प्रयोजनं स्यात् । तस्माद्भूतमपि प्रयोजनवदेवोपदेष्टव्यं नाप्रयोजनम् । अप्रयोजनं च ब्रह्म, तस्योदासीनस्य सर्वक्रियारहितत्वेनानुपकारकत्वादिति भावः । परिहरति—अनवगतात्मोपदेशश्च तथैव—प्रयोजनवानेव—भवितुमर्हति, । अप्यर्थश्चकारः । एतदुक्तं भवति—यद्यपिब्रह्मोदासीनं ; तथापि तद्विषयं शाब्दज्ञानमवगतिपर्यन्तं विद्या स्वविरोधिनीं संसारमूलनिदानमविद्यामुच्छिन्दत्प्रयोजनवदित्यर्थः । अपि च येऽपि कार्यपरत्वं सर्वेषां पदानामास्थिषत, तैरपि 'ब्राह्मणो न हन्तव्य' 'न सुरा पातव्या' इत्यादीनां न कार्यपरता शक्यास्थातुम् कृत्युपहितमर्यादं हि कार्यं कृत्या व्याप्तं तन्निवृत्तौ निवर्तते, शिंशपात्वमिव वृक्षत्वनिवृत्तौ । कृतिर्हि पुरुषप्रयत्नः स च विषयाधीननिरूपणः । विषयश्चास्य साध्यस्वभावतया भावार्थ एव पूर्वापरीभूतोऽन्योत्पादानुकूलो भवितुमर्हति, न द्रव्यगुणौ, साक्षात्कृतिव्याप्यो हि कृतेर्विषयः ।

एवमपि प्रयोजनप्रश्नोऽयं न चोद्यमित्याशङ्क्याह—**तस्मादिति** । यस्माल्लोके भूतोपदेशाः सन्तोपि (न ?) सप्रयोजना एव दृष्टाः तस्मादित्यर्थः । **भूतमपि** अन्यत्राप्यतिदिश्यमानमिति शेषः । उक्तं प्रयोजनं प्रस्मृत्यैतच्चोद्यम् । निरस्तमेतदिति वाच्येऽपि परबुद्धिमनुरुध्य तमेव परिहारं नूतनवत् करोतीत्याह—**परिहरतीति** । एवकारेण लौकिकसिद्धोपदेशवैषम्यलवो नास्तीति नाभिप्रेतम् । किन्तु निष्प्रयोजनत्वनिवृत्तिरित्याह—**प्रयोजनवानेवेति** । तथैवेत्युपमानेन समुच्चयसिद्धेश्चकारवैयर्थ्यं आशङ्क्याह—**अप्यर्थ इति** । (अपरे अपि ?) अपेरपि चकारतौल्यमाशङ्क्यापिर्यद्यपीत्यर्थे सचाशङ्कानुवादेन परिहारार्थं इत्याह—**एतदिति** । उपदेशः प्रयोजनवानिति प्रतिज्ञा, अवगतिप्रयोजनोक्तिर्व्यधिकरणा, अत आह—**तद्विषयमिति** । अवगतेरुपदेशद्वारागतत्वान्न वैयधिकरण्यमित्यर्थः । मिथ्याज्ञानस्य संसारत्वात् तद्धेतुत्वायोगमाशङ्क्य, अनिर्वाच्याविद्या मिथ्याज्ञानमुक्तेत्याह—**अविद्यामिति** । विवेकनोद्या अविद्या कथमवगत्या नुद्येत । न, अवगतेर्विद्यात्वादित्याह—**विद्येति** । विद्याभवत् , ज्ञानमुच्छिन्ददित्यन्वयः ॥ अभिप्रायोक्तिमुपसंहरति—**इत्यर्थ इति** । सर्वपदानां कार्यपरतामिच्छता निषेधेष्वपि कार्याङ्गीकरणाद्, अपिचेति भाष्यायोगमाशङ्क्य तेनापि तेषु कार्यस्य दुर्वचत्वं मत्वैवमाहेत्याह—**अपि चेत्यादिना** । सर्वपदानां कार्यपरत्वाच्छक्यमास्थानमत आह—**कृतीति** । मर्यादास्वरूपम् । प्रकृते कृतिरपि मा निवर्तिष्ट । न, तद्व्यापकनिवृत्तौ तदयोगादिति वक्तुं तद्व्यापकमभिधित्सुः कृतिस्वरूपमाह—**कृतिर्हीति** । एतच्च करणं कृतिरिति क्रियात्वभ्रमव्युदासाय, प्रकृते कृतिव्यापकविषयाभावसिद्ध्यै[1] तत्स्वरूपमाह—**विषयश्चेति** । भावार्थस्यैव कृतिविषयत्वे कृत्योपादानादि न सिध्येदत आह—**अन्येति** । दृश्यमानेऽपि सकृत्करादिव्यापारात्मनि भावार्थे फलादर्शनात्

---

[1] 'भावा' ख पाठः

न च द्रव्यगुणयोः सिद्धयोरस्ति कृतिव्याप्यता। अत एव शास्त्रकृद्वचः—'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत' इति। द्रव्यगुणशब्दानां नैमित्तिकावस्थायां कार्यावमर्शेऽपि भावस्य स्वतः द्रव्यगुणशब्दानां तु भावयोगात्कार्यावमर्श इति भावार्थेभ्य एवापूर्वावगतिर्न द्रव्यगुणशब्देभ्य इति। न च 'दध्ना जुहोति' 'संततमाघारयति' इत्यादिषु द्रव्यादीनां कार्यविषयता। तत्रापि हि होमाघारभावार्थविषयमेव कार्यम्। न चैतावता 'सोमेन यजेत' इतिवत् दधिसंततादिविशिष्टहोमाघारविधानात् 'अग्निहोत्रं जुहोति' आघारमाघारयति' इति तदनुवादः। यद्यप्यत्रापि भावार्थविषयमेव कार्यं; तथापि भावार्थानु-

---

कथमन्योत्पादानुकूलः अत आह—**पूर्वापरीभूतः**। न प्रतिक्षणसमाप्तः किन्तु सन्तन्यमान इत्यर्थः। तस्य विषयत्वयोग्यतोक्तिः **साध्यस्वभावतयेति**। स्वभावतः साध्यतयेत्यर्थः। द्रव्यगुणयोरपि कृतिविषयत्वादेवकारायोगमाशङ्क्याह—**न द्रव्येति**। प्रतिज्ञामात्रत्वं वारयति—**साक्षादिति**। **सिद्धयोः** अक्रियात्मनोः। **कृतिव्याप्यता** साक्षादिति शेषः। भावार्थस्यैव साक्षात्कृतिव्याप्यत्वे जैमिनिसूत्रमाह—**अतएवेति**। तत्र गुरुमत्या, अधिकरणं सङ्गृह्णाति—**द्रव्येति**। अवमर्शेपीत्यन्तः पूर्वपक्षानुवादः। पदस्मारितान्वितार्थेषु निमित्तेषु भावान्वितावस्था नैमित्तिकी तस्यां द्रव्यगुणयोः क्रियान्वयेन साध्यता अस्ति। अतो द्रव्यगुणभावार्थवाचिशब्दानामविशेषेण साध्यार्थवाचित्वात् साध्यविषयत्वाच्च, नियोगस्याविशेषेण नियोगविशेषसमर्पकत्वमित्यर्थः। **कार्यावमर्शे** साध्यार्थबोधित्वे। राद्धान्तमाह—**भावस्येति**। भावशब्दस्येत्यर्थः। **भावयोगात्** स्वार्थस्येति शेषः। तस्मान्नियोगः साक्षात्कृत्य विषयस्तद्विषयत्वाय स्वावच्छेदकं साक्षात्कृतिसाध्यं भावार्थमासाद्यानपेक्षो भावद्वारा साध्यं द्रव्यादिकं नाकाङ्क्षतीति भावार्थशब्देभ्य एव "यजेतेत्यादिभ्यो विषयविशिष्टापूर्वसिद्धिरित्याह—इति **भावार्थेभ्य** इति। क्वचित् द्रव्यगुणयोरपि विधानात् कार्यस्य भावविषयत्वनियमभङ्गमाशङ्क्याह—**न चेति**। तत्किं कार्यं निर्विषयं नेत्याह—**तत्रापीति**। हिशब्दः सिद्धान्तत्वद्योती। "दध्नेत्यादौ भावार्थविधाने श्रुतदध्यादित्यागायोगाद् विशिष्टविधित्वापत्तौ 'आघाराग्निहोत्रमरूपत्वादित्यधिकरणस्य विशिष्टविधिदूषणमाशङ्क्याह—**न चेति**। "ऐन्द्रवायवं गृह्णाति" "मैत्रावरुणं गृह्णाती"ति वाक्यैर्द्रव्यदेवताख्यरूपप्रतीत्या यागानुमानात्, तत्समुदायानुवादत्वं रूपद्वयरहितस्य सोमेनेत्यस्य प्राप्य, ऐन्द्रवायवादिपदानां रसवाचित्वात् सोमशब्दस्य लतावाचित्वात् प्रत्यभिज्ञाभावेनानुवादायोगाद् यजेतेति प्रत्यक्षयागविधौ तदनुमानाप्राप्तेः सोमेनेति द्रव्यविशिष्टयागविधिः। ऐन्द्रवायवादिवाक्यानि तु देवताभ्यो रसानामुपकल्पनाविधय इति निर्णीतम्, तदाह—**सोमेनेति**। भावार्थस्य विषयत्वं न च विशिष्टविधित्वमित्युक्त्या किं दध्यादेरविषयस्य त्यागोऽभिप्रेतः, नेत्याह—**यद्यपीति**। भावार्थेनैव विधावनाकाङ्क्षे किं

बन्धतया द्रव्यगुणावविषयावपि विधीयेते। भावार्थो हि कारकव्यापारमात्रतयाऽविशिष्टः कारकविशेषेण द्रव्यादिना विशेष्यत इति द्रव्यादिस्तदनुबन्धः। तथा च भावार्थे विधीयमाने स एव सानुबन्धो विधीयत इति द्रव्यगुणावविषयावपि तदनुबन्धतया विहितौ भवतः। एवं च भावार्थप्रणालिकया द्रव्यादिसंक्रान्तो विधिर्गौरवाद्बिभ्यत्स्वविषयस्य चान्यतः प्राप्ततया तदनुवादेन तदनुबन्धीभूतद्रव्यादिपरो भवतीति सर्वत्र भावार्थविषय एव विधिः। एतेन—'यदाग्नेयोऽष्टाकपालो भवति' इत्यत्र संबन्धविषयो विधिरिति परास्तम्;—ननु न भवत्यर्थो विधेयः, सिद्धे भवितरि लब्धरूपस्य भवनं प्रत्यकर्तृत्वात्। न खलु गगनं भवति। नाप्यसिद्धे; असिद्धस्यानियोज्यत्वात्, गगनकुसुमवत्। तस्माद्भवनेन प्रयोज्यव्यापारेणाक्षिप्तः प्रयोजकस्य भावयितुर्व्यापारो विधेयः। स च व्यापारो भावना, कृतिः, प्रयत्न इति निर्विषयश्चा-सावश्यप्रतिपत्तिरतो विषयापेक्षायामाग्नेयशब्दोपस्थापितो द्रव्यदेवतासंबन्ध एवास्य विषयः।

द्रव्यादिनेत्याशङ्क्य विषयानुबन्धस्यापि विध्याकाङ्क्षितत्वादित्याह—**भावार्थानुबन्धतयेति**। **अविशिष्टः** अव्यावृत्तः। तर्कि भावार्थस्य द्रव्यादेश्च विधिः, तर्हि वाक्यभेदः नेत्याह—**तथाचेति**। एवमनुबन्धत्वं वाक्यभेदाप्रसक्तिं चोक्त्वा अनुबन्धतया द्रव्यगुणविधिं पूर्वोक्तं निगमयति—**इतीति**। सानुबद्धविधाने विशिष्टविध्यापातमाशङ्क्याह—**एवं चेति**। **द्रव्यादिसङ्क्रान्तो विधिः द्रव्यादिपरो भवति**। तन्मात्रपरो भवतीत्यर्थः। अथ विशिष्टे कथं न तात्पर्यमत आह—**गौरवादिति**। सोमेन यजेतेतिवत् किन्नस्यादत आह—**स्वविषयस्येति**। ननु भावार्थोऽपि भाति अत आह—**अनुवादेनेति**। अत्र वाक्यधर्मः, तात्पर्यं विधावुपचरितम्[1] 'यदाग्नेय' इत्यत्र द्रव्यदेवतासम्बन्धविधिरिति मीमांसकैकदेशिमतेन विधेर्भावार्थविषयत्वानयमभागमाशङ्क्याह[2]—**एतेनेति**। सिद्धस्य दध्यादेरविषयत्वन्यायेनेत्यर्थः। 'आग्नेयो-ऽष्टाकपालो भवतीत्यत्र सम्बन्धो भवत्यर्थश्च प्रतीयते। तत्र भवत्यर्थस्याविधेयत्वात् सम्बन्धविधिः पर्यवस्यतीति शङ्कते एकदेशी **नन्वित्यादिना**। भवितर्यसिद्धे सिद्धे वा भवनविधिः नाद्यः इत्याह—**सिद्ध इति**। **भवनं** जन्म **भवति** जायते। न द्वितीय इत्याह—**नापीति**। तर्कि तद्वाक्यं प्रमत्तगीत नेत्याह—**तस्मादिति**। अस्त्वेवं सम्बन्धे किमायातमित्याशङ्क्य भावयितृव्यापारविषयतया सम्बन्धविधिं विवक्षुः व्यापारस्वरूपमाह—**स चेति**। ध्यानाद् व्यवच्छिनत्ति—**कृतीति**। क्रियातो भिनत्ति—**प्रयत्न इति**। गीयत इति शेषः। प्रयत्नपर्यायस्य भावयितृव्यापारस्य विधेयत्वे गतः सम्बन्ध-विधिरत आह— **निर्विषयश्चेति**। सम्बन्धपदाश्रवणात् कथं तस्य विषयता, अत आह—**आग्नेय-शब्देति**। **सम्बन्ध एवास्य विषय इति**। ततश्च विधिनिर्वर्तकप्रयत्नविषयत्वसिद्धिरिति भावः।

---

1 'तः' ख पाठः   2 'माभावमा' ख पाठः

ननु व्यापारविषयः पुरुषप्रयत्नः कथमव्यापाररूपं संबन्धं गोचरयेत्? नहि घटं कुर्वित्यत्रापि साक्षान्नामार्थं घटं पुरुषप्रयत्नो गोचरयत्यपि तु दण्डादि हस्तादिना व्यापारयति। तस्माद्धटार्थां कृतिं व्यापारविषयामेव प्रतिपद्यते, न तु रूपतो घटविषयाम्, उद्देश्यतया त्वस्यामस्ति घटो न तु विषयतया। विषयतया तु हस्तादिव्यापार एव। अत एवाग्नेय इत्यत्रापि द्रव्यदेवतासंबन्धाक्षिप्तो यजिरेव कार्यविषयो विधेयः। किमुक्तं भवति, आग्नेयो भवतीति, आग्नेयेन यागेन भावयेदिति। अत एव 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इत्यनुवादो भवति 'यदाग्नेयः' इत्यादिविहितस्य यागषट्कस्य। अत एव च विहितानूदितस्य तस्यैव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिकारसंबन्धः। तस्मात्सर्वत्र कृतिप्रणालिकया भावार्थविषय एव विधिरित्येकान्तः। तथा च 'न हन्यात्' 'न पिबेत्' इत्यादिषु यदि कार्यमभ्युपेयेत, ततस्तद्व्यापिका कृतिरभ्यु-

---

चोदयन्निव[1] परिहरति—नन्विति। 'घटं कुर्वि' त्यत्राव्यापारस्य प्रयत्नविषयत्वात्, न व्यापारविषयत्वनियमः अत आह—न हीति। नामार्थं कारकशब्दार्थम्। कृतेर्घटाविषयत्वे घटं कुर्विति प्रयोक्त्रभिप्रायविरोधमाशङ्क्याह—तस्मादिति प्रतिपद्यते। प्रयोक्ता। एवकारव्यावर्त्यं स्फुटयति—न त्विति। कथं तर्हि द्वितीया, अप्रयोजनत्वादित्याह—उद्देश्यतयेति। ननूद्देश्यतया कर्मत्वनिर्देशः क्लिष्टः, सत्यं मुख्यकर्मत्वाभावादेवमित्याह—नत्विति। अन्यस्यैव कर्मतानुभवादित्याह—विषयतया त्विति। सिद्धं भवितरीत्यादिना, व्यापारविधेः खण्डितत्वादगत्या प्रकृते सम्बन्धविधिरस्तु न, व्यापारान्तरविध्युपपत्तेरित्याह—अत एवेति। यतो व्यापार एव साक्षात्कृतिविषयः अत इति, ननु यजिरिह न भाति, अत आह—आक्षिप्त इति। अत्यक्तस्य हविषो देवतासम्बन्धाभावात् सम्बन्धाक्षिप्तः। देवतायै हविस्त्याग एव याग इत्यर्थः। वर्तमानापदेशत्वात् कथमत्र विधिः पञ्चमलकारत्वेऽपि भवति त्यागः सम्बन्धप्रत्ययः। कथं यागं विदध्यादिति शङ्कते—किमुक्तमिति। वाक्यविपरिणामेनोत्तरमाह—आग्नेयेनेति। यागेनेत्याग्नेयपदलक्ष्यस्योक्तिः। भावयेदिति भवतिलक्ष्यस्य, आग्नेयादिवाक्यविहितानुवादे यजिश्रवणादपि "यदाग्नेय" इत्यादिवाक्ये यजिरेव विधेयः। अन्यथा विध्यनुवादवैरूप्यापत्तेरित्याह—अत एवेति। यत एवाग्नेयादिवाक्ये यागविधिः अत एवेत्यर्थः। अधिकारवाक्ये यजिश्रवणात् तद्वैरूप्यार्थमप्याग्नेयाद्युत्पत्तिवाक्ये यजिर्विधेय इत्याह—अतएवेति। एवमन्यत्रापि भावार्थान्यस्य विधिविषयत्वशङ्का अपास्येति मत्वोपसंहरति—तस्मात्सर्वत्रेति। कृतिसाध्यस्य विधेः किं भावार्थेन अत आह—कृतीति। साक्षान्नियोगं साधयितुम् अक्षमां कृतिं तेन घटयितुं प्रनाडिकात्वेनेत्यर्थः। विधिः नियोगः। एकान्तः नियतस्वभावः, अस्तु नियोगस्य कृत्या, तस्य भावार्थेन व्याप्यता, निषेधेषु कार्यस्यास्थातुमशक्यता कुतः, व्यापकप्रसङ्गादित्याह—तथा चेति। इष्टापत्ति-

---

1 'ति' ख पाठः

क्रियत इत्याविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन । अपि च 'ब्राह्मणो न हन्तव्य इत्येवमाद्या निवृत्तिरुपदिश्यते । न च सा क्रिया । नापि क्रियासाधनम् । अक्रियार्थानामुपदेशोऽनर्थकश्चेत् ब्राह्मणो न हन्तव्य

पेतव्या । तद्व्यापकश्च भावार्थो विषयः । एवं च प्रजापतिव्रतन्यायेन पर्युदासवृत्त्याऽहननापानसंकल्पलक्षणया तद्विषयो विधिः स्यात् । तथा च प्रसज्यप्रतिषेधो दत्तजलाञ्जलिः प्रसज्येत । न च सति संभवे लक्षणा न्याय्या । 'नेक्षेतोद्यन्तम्' इत्यादौ तु 'तस्य व्रतम्' इत्यधिकारात्प्रसज्यप्रतिषेधासंभवेन पर्युदासवृत्त्याऽनीक्षणसंकल्पलक्षणा युक्ता । तस्मात् 'न हन्यात्' 'न पिबेत्' इत्यादिषु प्रसज्यप्रतिषेधेषु भावार्थाभावात्तद्व्याप्तायाः कृतेरभावः, तदभावे च तद्व्याप्तस्य कार्यस्याभाव इति न कार्यपरत्वनियमः सर्वत्र वाक्य इत्याह—ब्राह्मणो न हन्तव्य इत्येवमाद्या इति । ननु कस्मान्निवृत्तिरेव कार्यं न भवति, तत्साधनं वेत्यत आह—न च सा क्रियेति । क्रियाशब्दः कार्यवचनः । एतदेव विभजते—अक्रियार्थानामिति । स्यादेतत्—विधिविभक्तिश्रवणात्कार्यं तावदत्र प्रतीयते, तच्च न भावार्थमन्तरेण । न च रागतः प्रवृत्तस्य हननपानादावकस्मादौदासीन्यमुपपद्यते विना विधारकप्रयत्नम् । तस्मात्स एव प्रवृत्त्युन्मुखानां मनोवाग्देहानां विधारकः प्रयत्नो

माशङ्क्याह—**एवं चेति** । नामधात्वर्थयुक्तस्यैव नञः पर्युदासकत्वान्न हन्यादित्यादावाख्यातयुक्तेः प्रतिषेधो भवतीति सङ्कल्पलक्षणया पर्युदासवृत्तिः स्यादित्यर्थः । एतदपीष्टतममत आह—**तथा चेति** । विधिप्रतिषेधविभागो न स्यादित्यर्थः । आख्यातयुक्तनञ्त्वं प्रतिषेधत्वमितरेषां विधित्वमिति विभागप्रसिद्धेरन्यथासिद्धिमाशङ्क्याह—**न चेति** । तर्हि नेक्षेतेत्यपि लक्षणा न स्यादत आह—**नेक्षेतेति** । नाचात्र नञो मुख्यार्थत्वबाधकमस्तीति मत्वोपसंहरन् प्रागुक्तप्रसङ्गयोर्विपर्ययमाह—**तस्मादिति** । न च सेति निषेध्याप्राप्तिमाशङ्क्य प्राप्त्याभासमाह—**नन्विति** । कस्मादित्याभासत्वं सूच्यते कार्यतत्साधनशङ्कायां, न चेत्यादिर्व्यधिकरणमत आह—**क्रियाशब्द इति** । अक्रियार्थानामिति भाष्ये । तच्चानिष्टमिति प्रसङ्गविपर्ययोक्त्या निषेधेषु कार्यपरत्वनियमभङ्गो भाति । तथा च अपि चेति भाष्येण पौनरुक्त्यमाशङ्क्य प्रसङ्गविपर्ययाभ्यां सङ्ग्रहविवरणामित्याह—**एतदेवेति** । निषेधेषु कार्यव्यापकाभावेन कार्याभावस्योक्तत्वात् पुनस्तत्कल्पनप्रतिषेधायोगमाशङ्क्य विधिविभक्तिबलेन स्फुटं कार्यदर्शनात् व्यापकमूरीकार्यमिति शङ्कोत्तरत्वमाह—**स्यादेतदिति** । सत्यं न भावार्थमन्तरेण कार्यं स तु प्रकृतेर्दुर्लभः । हननस्य प्राप्तस्याविधेयत्वाद् अन्यस्य चाभावात् अत आह—**न चेति** । प्रयत्नसत्त्वेऽपि न क्रियासिद्धिरित्याशङ्क्य स एव क्रियेति विधेयकथनपूर्वकमाह—**तस्मादिति** । **विधारकः प्रयत्न इति** लक्ष्यमाण इति शेषः । स्फुटप्रतिपन्नकार्य-

इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तम् । तच्चानिष्टम् । न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं, हननक्रियानि-

निषेधविधिगोचरः क्रियेति नाक्रियापरमस्ति वाक्यं किञ्चिदपीत्याह—न च हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुम् । केन हेतुना न शक्यमित्यत आह—स्वभावप्राप्तहन्त्यर्थानुरागेण नञः । अयमर्थः—हननपानपरो हि विधिप्रत्ययः प्रतीयमानस्ते एव विधत्ते इत्युत्सर्गः । न चैते शक्ये विधातुं ; रागतः प्राप्तत्वात् । न च नञः प्रसज्यप्रतिषेधो विधेयः ; तस्याप्यौदासीन्यरूपस्य सिद्धतया प्राप्तत्वात् । न च विधारकः प्रयत्नः ; तस्याश्रुतत्वेन लक्ष्यमाणत्वात्, सति संभवे च लक्षणाया अन्याय्यत्वात्, विधिविभक्तेश्च रागतः प्राप्तप्रवृत्त्यनुवादकत्वेन विधिविषयत्वायोगात् ,तस्माद्यतिपबेद्धन्याद्वेत्यनूद्य तन्नेति निषिध्यते, तदभावो ज्ञाप्यते, न तु नञर्थो विधीयते । अभावश्च स्वविरोधिभावनिरूपणतया भावच्छायानुपातीति सिद्धे सिद्धवत्, साध्ये च साध्यवद्भासत इति साध्यविषयो नञर्थो साध्यवद्भासत

स्याक्यनिर्वाह्यत्वान्न च सति सम्भवे लक्षणेत्येतत् परावृत्तमिति शङ्काभिप्रायः, स्वभावप्राप्तहन्त्यर्थानुरागेणेत्यस्याप्राप्तक्रियार्थत्वकल्पने हेतुत्वेनानुवादता, न, प्राह्यविधिविभक्तिश्रवणस्यैव तद्धेतुत्वात् । हन्त्यर्थानुरागमात्रस्य पूर्वोत्तरपक्षसाधारणत्वाच्चेत्यभिप्रेत्य व्यवहितयोजनयाऽवतारयति—**न च हननेति** । तत्किं भाष्यांशस्त्याज्यः, नेत्याह—**केनेति** । नञित्येतदुभयत्रान्वेति विधिश्रवणात्कार्यकल्पने हन्त्यर्थानुरागेणेति न तत्प्रतिषेधहेतुः, पर्युदासमिच्छता परेणापि तदनुरागस्येष्टत्वादित्याशङ्क्य यथास्यैव हेतुता तथाह—**अयमिति** । हननपानपरः । तयोरुपरिवर्तमानः नञोऽर्थ इति शेषः—**औदासीन्यरूपस्य** अहननात्मनः । **सिद्धतयाप्राप्तत्वात्** विद्यमानत्वेन ज्ञातत्वात् । यद्यपि परेण प्रयत्नविधिरेव शङ्कितः, तथापि प्रकृत्यर्थनञर्थविधिद्वयमपि, अनुपपन्न इति दर्शयितुं पक्षान्तरयोः प्रतिक्षेपः सति सम्भव इत्यसिद्धं, लिङादिप्रतिपन्नकार्यस्य लक्षकत्वादत आह—**विधीति** । तदनेन प्राप्तार्थायाः प्रकृतेः शिरसि वर्तमाना विधिविभक्तिः प्रबलं प्रापकं विना विधायिनी न प्राह्येति परिहारः । स्वभावप्राप्तहन्त्यर्थेति वदता भाष्येणोक्त इत्युक्तं भवति । न चानुवादो वृथा निषेधार्थत्वादित्याह—**तस्मादिति** । यदेति, अनुवादव्यञ्जनम् । निषेधशब्दस्याभावार्थत्वादभावः क्रियत इति शङ्कां नुदति—**तदभाव इति** । (नञर्थः) नञर्थलक्ष्यः प्रयत्नो विधीयते । अत्रेति (पद) मध्याहृत्यायमर्थ इत्यनेनान्वयो ज्ञेयः । पूर्ववाक्ये नञः प्रतिषेधार्थत्वान्मुख्यतामादायैव परिहारान्नञश्चेति पुनरुक्तं । तद्विवरणत्वे वा चकारायोगः इत्याशङ्क्य नञर्थस्य विधेयत्वे हननं नास्तीत्यत्रैव सिद्धतया प्रतीतौ युक्तायां साध्यतया प्रतिभासः कथमिति शङ्काशान्त्यर्थत्वमभिप्रेत्याह—**अभावश्चेति** । **साध्यविषयः** । रागतस्साध्यत्वेन प्राप्तहननविषयः । हननस्य रागप्राप्तकर्तव्यत्वेन रूपेण निषेधप्रतियोगित्वात्[1] तद्गतं

1 'गिकत्वा' ख पाठः

वृत्त्यौदासीन्यव्यतिरेकेण । नञश्चैष स्वभावो यत्स्वसंबन्धिनोऽभावं बोधयतीति । अभावबुद्धिश्चौदासीन्यकारणम् । सा च दग्धेन्धनाग्निवत्स्वय-

---

इति नञर्थः कार्यः इति भ्रमः । तदिदमाह—नञश्चैष स्वभाव इति । ननु बोधयतु संबन्धिनोऽभावं नञ्, प्रवृत्त्युन्मुखानां तु मनोवाग्देहानां कुतोऽकस्मान्निवृत्तिरित्यत आह—अभावबुद्धिश्चौदासीन्यपालनकारणम् । अयमभिप्रायः—'ज्वरितः पथ्यमश्नीयात्' 'न सर्पायाङ्गुलिं दद्यात्' इत्यादिवचनश्रवणसमनन्तरं प्रयोज्यवृद्धस्य पथ्याशने प्रवृत्तिं भुजङ्गाङ्गुलिदानोन्मुखस्य च ततो निवृत्तिमुपलभ्य बालो व्युत्पित्सुः प्रयोज्यवृद्धस्य प्रवृत्तिनिवृत्तिहेतू इच्छाद्वेषावनुमिमीते । तथाहि—इच्छाद्वेषहेतुके, वृद्धस्य प्रवृत्तिनिवृत्ती, स्वतन्त्रप्रवृत्तिनिवृत्तित्वात्, मदीयस्वतन्त्रप्रवृत्तिनिवृत्तिवत् । कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वकौ च, अस्येच्छाद्वेषौ, प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषत्वात्, मत्प्रवृत्तिनिवृत्तिहेतुभूतेच्छा-

---

कार्यत्वं नञर्थे समारोप्यत इत्यर्थः ॥ नञा, अभावो बोध्यत इत्युक्त्या शान्ते पूर्वपक्षे अभावबुद्धेः कार्यकथा वृथेत्याशङ्क्य आह—**नन्विति** । शब्देन हननस्य कर्तव्यताकारनिषेधेऽपि हननगतदृष्टेष्टसाधनत्वधीप्रयुक्तकर्तव्यतानपायान्न ततो निवर्तते, अतो निवृत्त्यै कल्प्यो विरोधी यत्न इति शङ्कार्थः । औदासीन्यस्य सिद्धत्वादकार्यत्वमाशङ्क्याध्याहरति—**पालनेति** । औदासीन्यपालनं नाम तद्विरोधिप्रवृत्तिहेतुध्वंस इति कारणवानित्यर्थः । अभावबुद्धौ सत्यामपि देहाद्यनिवृत्तौ शङ्कितायामभावबुद्धिरेवौदासीन्यं । पालयतीति नोत्तरमित्याशङ्क्य निषेधेषु नञन्वितविधिविभक्त्या प्रकृत्यर्थहननादिगतदृष्टेष्टोपायतानुपमर्देन तद्गताधिकादृष्टानिष्टोपायता बोध्यते । ततो निवृत्तिसिद्धिरिति वक्तुं लोके विधिनिषेधयोरिष्टानिष्टोपायबोधकत्वं व्युत्पत्तिबलेन दर्शयति—**अयमित्यादिना** । अनुमानद्वयस्य सौकर्यार्थं सकृदुक्तिः । ननु रजतभ्रमाच्छुक्तौ प्रवृत्तस्य तत्त्वज्ञानात् ततो निवृत्तिः न द्वेषात् किन्त्विच्छोच्छेदादिति व्यभिचारः । सत्यं, सर्पाङ्गुलिदानादिनिवृत्तौ तद्व्यापकं व्युत्पित्सुमानसावसेयं किञ्चिद्विशेषणं भविष्यति न च स्वार्थानुमाने तदनिरुक्तिर्दोषाय, अनुमेयेच्छाद्वेषलिङ्गकं व्युत्पित्सोरनुमानान्तरमाह—**कर्तव्यतेति** । यद्यपीष्टानिष्टसाधनभावावगमानुमितिपूर्वकत्वानुमितौ नास्ति बाधादि, तथापि विधिनिषेधवाक्यार्थभूतप्रवर्तकनिवर्तकज्ञानस्य प्रयोज्यगतस्य सिसाधयिषितत्वात् तत्सिद्ध्यर्थं विशिनष्टि—**कर्तव्यतैकार्थसमवेतेति** । एतत्साधनभावस्य विशेषणम् । फलेच्छाद्वेषयोर्व्यभिचारं वारयति—**प्रवृत्तिनिवृत्तिहेत्विति** । नहि फलविषयाभ्यामिच्छाद्वेषाभ्यां प्रवृत्तिनिवृत्ती, किन्तु तत्प्रसूताभ्यां तत्साधनविषयाभ्याम् । अन्येच्छाद्वेषाभ्यामन्यत्र प्रवृत्तिनिवृत्त्योरतिप्रसङ्गादित्यर्थः ।

द्वेषवत् । न जातु मम शब्दतद्व्यापारपुरुषाशयत्रैकाल्यानवच्छिन्नभावनापूर्वप्रत्ययपूर्वा-विच्छाद्वेषावभूताम्, अपि तु भूयोभूयः स्वगतमालोचयत उक्तकारणपूर्वावेव प्रत्यवभासेते। तस्माद्वृद्धस्य स्वतन्त्रप्रवृत्तिनिवृत्ती इच्छाद्वेषभेदौ च कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावाव-गमपूर्वावित्यानुपूर्व्या सिद्धः कार्यकारणभाव इतीष्टानिष्टसाधनतावगमात्प्रयोज्यवृद्धप्रवृत्तिनिवृत्ती इति सिद्धम्। स चावगमः प्रागभूतः शब्दश्रवणानन्तरमुपजायमानः शब्दश्रवणहेतुक इति प्रवर्तकेषु वाक्येषु 'यजेत' इत्यादिषु शब्द एव कर्तव्यमिष्टसाधनं व्यापारमवगमयंस्तस्येष्ट-साधनतां कर्तव्यतां चावगमयति, अनन्यलभ्यत्वादुभयोः, अनन्यलभ्यस्य च शब्दार्थत्वात्। यत्र तु कर्तव्यतान्यत एव लभ्यते, यथा 'न हन्यात्' 'न पिबेत्' इत्यादिषु हननपानप्रवृत्त्यो

हिताहितसाधनत्वान्यस्य, शब्दतद्व्यापारादेरवगमस्येच्छाद्वेषहेतुत्वात् साध्यविकलो दृष्टान्तः अत आह—न जात्विति। पुरुषाशयः आज्ञादिः। पचतीत्यादौ वर्तमानादिकालावच्छिन्नभावना न प्रवर्तकेच्छाहेतुरत उक्तं—त्रैकाल्येति। अतत्पूर्वकत्वनिश्चयः कथमत आह—अपि त्विति। स्वगतं स्ववृत्तं स्वेच्छाधीन-प्रवृत्तौ सर्वेषामेषामभावादित्यर्थः। साध्यवैकल्ये परिहृते हेतुमति पक्षे साध्यसिद्धिं फलमाह—तस्मादिति। स्वतन्त्रे प्रवृत्तिनिवृत्ती याभ्यां तौ तथेतीच्छाद्वेषविशेषणम्। चकारो दृष्टान्तसमुच्चयार्थः। उक्तरीत्येच्छा-द्वेषयोः प्रवृत्तकनिवृत्तकत्वे तयोरशब्दबोध्यत्वात् विधिनिषेधवाक्ययोः प्रवर्तकनिवर्तकबोधित्वमभिमतं भज्येतेत्याशङ्क्य, इष्टानिष्टोपायताज्ञानयोरिच्छादिद्वारा प्रवर्तकनिवर्तकत्वं व्युत्पित्सुरवगच्छतीत्यदोष इत्याह—इत्यानुपूर्व्येणेति। आनुपूर्व्येण इच्छादिक्रमेण। प्रवृत्तिनिवृत्त्योरिष्टानिष्टसाधनतावगमस्य च कार्यकारणभावः सिद्ध इति कृत्वेत्यर्थः। अस्त्वेवं वाक्यस्येष्टोपायतायार्थत्वे किमायातमत आह—स चेति। हेतुक इति व्युत्पित्सुरनुमिमीत इत्यनुषङ्गः। एवं लोके विधिनिषेधवाक्ययोर्बोधनप्रक्रियामुक्त्वा प्रकृतसिद्ध्यर्थं वेदेऽप्याह—प्रवर्तकेष्विति। प्रवर्तकप्रक्रियोक्तिः निवर्तकेषु तद्विलक्षणप्रक्रियावैशद्याय। कर्तव्यं कृतिसाध्यं। इष्टसाधनव्यापारं। इष्टसाधनं कर्म, अस्य व्यापारस्य कर्तव्यतां च। इष्टसाधनताविशेषणभूतां कृतिसाध्यतां च तथा च कृतिसाध्येष्टसाधनतामित्यर्थः। अवगमयति। तत्परत्वं गच्छति। शब्द एवेत्येवकारासहिष्णुं प्रत्याह—अनन्येति। उभयोः अन्योन्यविशिष्टयोः, तथा च कृतिसाध्येष्टसाधनत्वस्येत्यर्थः। एवमपि किं तत्र तात्पर्येण अत आह—अनन्येति। शब्दार्थत्वात्। तात्पर्यविषयत्वात् सम्प्रति निषेधेषु प्रक्रियामाह—यत्र त्विति। कर्तव्यता हितसाधनता-वच्छिन्ना। अन्यतः अशब्दप्रमाणात्। लभ्यते ज्ञायते। हननमिदं ममेष्टसाधनं विरोधिहननत्वाद

रागतः प्रतिलम्भात्, तत्र तदनुवादेन नञ्समभिव्याहृता लिङादिविभक्तिरन्यतोऽप्राप्तमनयोरनर्थहेतुभावमात्रमवगमयति। प्रत्यक्षं हि तयोरिष्टसाधनभावोऽवगम्यते; अन्यथा रागविषयत्वायोगात्। तस्माद्रागादिप्राप्तकर्तव्यतानुवादेनानर्थसाधनताज्ञापनपरं 'न हन्यात्' 'न पिबेत्' इत्यादिवाक्यं, न तु कर्तव्यतापरमिति सुष्ठूक्तमकार्यनिष्ठत्वं

मत्कुणहननवदित्यनुमानादित्यर्थः। अन्यतो लाभे हेतुमाह – **हननेति**। **प्रतिलम्भात्** प्राप्तेः। अन्यतः कृतिसाध्येष्टसाधनत्वाज्ञाने रागाभावात् प्रवृत्तिर्न स्यादित्यर्थः। **तदनुवादेन** कृतिसाध्येष्टसाधनत्वानुवादेन। **लिङ्विभक्तिः** तदन्तं पदं पदमात्रं प्रमित्यजनकम् अत आह—**नञ् समभिव्याहृतेति**। तदनेन न हन्यादिति वाक्यमित्युक्तं भवति। अत एव न हन्यान्न पिबेदित्यादि वाक्यमिति वक्ष्यति। **अवगमयति** तत्परं भवति, मात्रचा, कार्यपरत्वादिव्युदासः। अर्थानर्थसाधनतापरत्वेन किम् इष्टसाधनत्वाभावपरत्वं कुतो न स्यात् प्रमाणान्तरविरोधापत्तेरित्याह—**प्रत्यक्षमिति**। क्रियाविशेषणमेतत् स्फुटतरानुमानसिद्धत्वात् प्रत्यक्षमित्युपचारः। नन्वभावो नञोमुख्यार्थ इत्यभावार्थत्वं प्रागुक्तम् इदानीमनर्थसाधनतारूपभावार्थत्वमुच्यत इति पूर्वापरविरोधः, पर्युदासपक्षादविशेषश्चेति। न विशिष्टेष्टसाधनत्वप्रतिषेध एव श्रौतो वाक्यार्थः, तात्पर्यन्तु तदन्तर्गतायामनर्थसाधनतायाम्, न चाविशेषः, विधारकप्रयत्नवदनर्थसाधनताया नञा लक्ष्यत्वानङ्गीकारादित्याह—**तस्मादिति**। एतदुक्तं भवति—यथा कृतिसाध्यत्वेष्टसाधनत्वविशेषणं केवलस्येन्दूदयादौ प्रवर्तकत्वव्यभिचारात्। एवमनिष्टासाधनताया अपि तद्विशेषणं, तद्रहितस्येष्टसाधनत्वस्य भुजगमस्तकन्यस्तमण्यादौ प्रवर्तकत्वव्यभिचारात्। ततश्च निषेधवाक्यमशृण्वतो हननजमनिष्टमपश्यतः प्रवर्तकत्वेन प्राप्तं कृतिसाध्यानिष्टासाधनेष्टसाधनत्वं[1] हन्यादित्यादिना अनूद्य तन्नेति निषिध्यते। विशिष्टनिषेधश्चायं सर्वाभावेऽन्यतमाभावे चोपपद्यते। न च कृतिसाध्यत्वेष्टसाधनत्वयोरभावः शक्यो वक्तुमिति परिशेषाद् विशिष्टनिषेधोऽयमनिष्टासाधनत्वलक्षणविशेषणमात्रविषयो भवति अनिष्टासाधनत्वाभावश्चानिष्टसाधनत्वमेवेति तत्परं वाक्यमिति। न चानिष्टासाधनत्वमपि तेनावगतमिति तन्निषेधोऽशक्य इति वाच्यम्। आपाततोऽनिष्टानुपलम्भमात्रजस्यानिष्टासाधनत्वज्ञानस्य योग्यानुपलम्भजत्वाभावेन प्रमात्वाभावात्, हननजस्य नरकादेः सम्प्रति द्रष्टुमयोग्यत्वात्। अक्षरार्थस्तु **कर्तव्यतानुवादेन** कृतिसाध्यत्वानिष्टसाधनत्वैकार्थसंवेतेष्टसाधनत्वानुवादेन [2]हन्यादित्यादिरूपेण नेति तन्निषेधं कुर्वद्वाक्यमुक्तरीत्या, अनर्थसाधनताप्रज्ञापनपरमिति। एवं पक्षद्वयसाम्यनिषेधे लक्ष्यप्रयत्नविधिपक्षो[3] न सिध्यतीत्याह—**नत्विति**। नन्विष्टसाधनत्वज्ञाने सत्यनिष्टसाधनत्वज्ञानान्न निवृत्तिः क्रियामात्रस्य क्लेशहेतुत्वेनानिष्टसाधनत्वानपायात्, न दुःसहानिष्टासाधनतायाः प्रज्ञाप्यमानत्वात्

1 'धनत्वं' ख. पाठः   2 'दिना रू' ख-पाठः   3 'त्न' ख - पाठः

निषेधानाम् । निषेध्यानां चानर्थसाधनताबुद्धिरेव निषेध्याभावबुद्धिः । तया खल्वयं चेतन आपाततो रमणीयतां पश्यन्नप्यायतिमालोच्य प्रवृत्त्यभावं निवृत्तिमवबुध्य निवर्तते । औदासीन्यमात्मनोऽवस्थापयतीति यावत् । स्यादेतत्—अभावबुद्धिश्चेदौदासीन्यस्थापनकारणं यावदौदासीन्यमनुवर्तेत, न चानुवर्तते ; न ह्युदासीनोऽपि विषयान्तरव्यासक्तचित्तस्तद्भावबुद्धिमान् । न चावस्थापककारणाभावे कार्यावस्थानं दृष्टम् । नहि स्तम्भावपाते प्रासादोऽवतिष्ठतेऽत आह—सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति । तावदेव खल्वयं प्रवृत्त्युन्मुखो न यावदस्यानर्थहेतुभावमधिगच्छति । अनर्थहेतुत्वाधिगमोऽस्य समूलोद्धारं प्रवृत्तिमुद्धृत्य दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति । एतदुक्तं भवति—यथा प्रासादावस्थानकारणं स्तम्भो नैवमौदासीन्यावस्थानकारणमभावबुद्धिः, अपि त्वागन्तुकाद्विनाशहेतोस्त्राणेनावस्थानकारणम् । यथा कमठपृष्ठनिष्ठुरः कवचः शस्त्रप्रहारत्राणेन राजन्यजीवावस्थानहेतुः । न च कवचापगमे चासति च शस्त्रप्रहारे राजन्यजीवनाश इति । उपसंहरति—

तादृगनिष्टासाधनताया एव प्रवर्तकेष्टसाधनत्वविशेषणत्वादिति मत्वाह—इति सुष्ठ्विति । निषेधानामित्यत्र, इतिशब्दं कृत्वा, अयमभिप्राय इति पूर्वान्वयः । उक्तरीत्यानर्थसाधनत्वबुद्धेरौदासीन्यस्थापकत्वादभावबुद्धिरिति निर्देशः कथमत आह—निषेध्यानां चेति । चः शङ्काछेदी । निषेध्याभावबुद्धिरित्युपचर्यत इति शेषः । उपचारे कः सम्बन्धः अभावबुद्धिजनकत्वमित्याह—तयेति । खलुर्यस्मादर्थे । तया प्रवृत्त्यभावमवबुद्ध्य निवर्तत इति सम्बन्धः । ननु निवृत्तिमवबुध्य निवर्तते न प्रवृत्त्यभावम् न, प्रवृत्त्यभावस्यैव निवृत्तित्वादित्याह—निवृत्तिमिति । निवृत्तिरौदासीन्यं अवबुध्य स्थाप्यत्वेन[1]ज्ञात्वा । यदि तया प्रवृत्त्यभावं बुध्येत, इष्टसाधनबुद्ध्या प्रवृत्तिं कथं[2] न बुध्यते, न, इष्टस्याल्पत्वात्, अनिष्टस्याधिकत्वादिति मत्वाऽह—आपातत इत्यादिना । आपाततः तदा आयतिम् अधिकानिष्टान्वितमुत्तरंकालम् । एवमालोचनक्षमत्वमाह—चेतनः प्रेक्षावान् । निवर्तते निवृत्तिं करोतीति भ्रमं नुदति—औदासीन्यमिति । सा चेति भाष्यमभावबुद्धेः कथं शान्तिरिति प्रकृतासङ्गतशङ्कोत्तरमिव, अतः शङ्कान्तरमाह—स्यादेतदिति । प्रसङ्गविपर्ययमाह—न चेति । प्रसङ्गस्य व्याप्त्यभावमाशङ्क्याह—न चावस्थापकेति । स्वयमेवोपशाम्यति न तु स्थाप्यमौदासीन्यमिति । प्रतिज्ञामात्रत्वमाशङ्क्य आह—तावदिति । समूलोद्धारं रागाद्युद्धारपूर्वं । प्रवृत्तिमुद्धृत्य औदासीन्यं स्थापयित्वा, रागादिभङ्गस्यैवौदासीन्यस्थापनत्वेऽपि भेदोपचारः । यथा दग्धदारोर्वह्नेः शान्तावपि न दारुकार्यजन्म, एवं भग्नरागादेरभावबुद्धेः शान्तावपि न रागादिकार्यप्रवृत्तिजन्मेति नौदासीन्यशान्तिरित्यर्थः । प्रसङ्गस्य किं दूषणमित्याशङ्क्य दृष्टान्तं विघटयन् प्रसङ्गं व्यभिचारयति—एतदिति ।

---

1 'न ज्ञाप्यत्वेन ज्ञात्वा' ? ख. पाठः 2 'थंबु' - ख पाठः

मेवोपशाम्याति। तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे, अन्यत्र प्रजापतिव्रतादिभ्यः। तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्। यदप्युक्तम्—कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात्, सप्तद्वीपा वसुमतीत्यादिवदिति तत्परिहृतम्; रज्जुरियं नायं सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्। ननु-श्रुतब्रह्मणोऽपि यथापूर्वं

तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेवेति। औदासीन्यमजानतोऽप्यस्तीति प्रसक्तक्रियानिवृत्त्योपलक्ष्य विशिनष्टि। तत्किमक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वोपवर्णनं जैमनीयमसमञ्जसमेवेत्युपसंहारव्याजेन परिहरति—**तस्मात्पुरुषार्थेति**। पुरुषार्थानुपयोग्युपाख्यानादिविषयावाक्यार्थतया क्रियार्थतया च पूर्वोत्तरपक्षौ, न तूपनिषद्विषयौ; उपनिषदां स्वयंपुरुषार्थब्रह्मरूपावगमपर्यवसानादित्यर्थः। यदप्यौपनिषदात्मज्ञानमपुरुषार्थं मन्यमानेनोक्तम्—**कर्तव्यविध्यनुप्रवेशमन्तरेणेति**। अत्र निगूढाभिसंधिः पूर्वोक्तं परिहारं स्मारयति—**तत्परिहृतमिति**। अत्राक्षेप्ता स्वोक्तमर्थं स्मारयति—**ननु श्रुतब्रह्मणोऽपीति**। निगूढमभिसंधिं समाधातोद्धाटयति

विनाशहेतोः रागादिकात्। युद्धमध्ये कवचापगमे जीवननाशादुक्तम्—**असतीति**। एवकाराधिक्यमाशङ्क्य निगमनत्वाददोष इत्याह—**उपसंहरतीति**। न च प्रसक्तिक्रियानिवृत्तित्यप्यधिकमित्याह—**औदासीन्यमिति**। प्रसक्तक्रियानिवृत्त्या। क्रियाप्रसञ्जकरागादिनिवृत्त्या **उपलक्ष्य विशिनष्टीति**। निवृत्त्योपलक्षितमन्वितमौदासीन्यं निवृत्त्यौदासीन्यमिति पदेनोक्तमित्यर्थः। भाष्ये प्रतिषेधार्थमिति प्रतिषेधप्रयोजनम् विशिष्टेष्टसाधनत्वाभावस्य वाक्यार्थत्वात्। तस्मात्पुरुषार्थेत्यप्रतिज्ञातोपसंहारमाशङ्क्य आह - **तदिति**। निषेधानामक्रियार्थत्वबलादापाद्य तद्वद्वेदान्तानामक्रियार्थत्वमुच्यते यदि तर्हि, इत्यर्थः। एवेति शङ्कायामिति शेषः। भाष्ये आनर्थक्याभिधानमित्युक्त्या पूर्वपक्षस्यैवोपाख्यानादिविषयत्वेन सङ्कोचः, सिद्धान्तस्तु सर्वविषय इति शङ्कां नुदन् व्याचष्टे - **पुरुषार्थानुपयोगीति** स्वत इति द्रष्टव्यम्। पुरुषार्थानुपयोगिविशेषणव्यावर्त्यमाह—**नात्वति**। आत्मज्ञानस्याफलत्वशङ्कायां यदप्यकर्तव्यप्रधानमित्यादि भाष्य एव निरासात् पौनरुक्त्यमाशङ्क्य श्रुतब्रह्मणोऽपि संसारदर्शनात् आत्मज्ञानमफलमिति पराभिमानोद्धारत्वाददोष इत्याह—**यदपीति**। तदिदमुक्तं **मन्यमानेनेति**। पूर्वपक्षे एव निरस्तस्य परिहारस्योक्त्ययोगमाशङ्क्याह—**निगूढेति**। नन्विति भाष्ये उक्तमित्ययुक्तं ईदृशवाक्यस्य पूर्वपक्षेऽनुक्तेः, न, अर्थस्मारकत्वादित्याह—**अत्रेति**। निगूढाभिसन्धेरीदृगुक्तिः कथमित्यभिसंधिनिगूहनस्य त्यागादित्याह—**निगूढमिति**।

संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्, अत्रोच्यते - नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्। न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम्। न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्राजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं

—अत्रोच्यते - नावगतब्रह्मात्मभावस्येति। सत्यं, न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणमपि तु साक्षात्कारपर्यन्तम्। ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः। स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन्नात्मानमपि प्रपञ्चत्वाविशेषादुन्मूलयतीत्युपपादितमधस्तात्। तस्माद्रज्जुस्वरूपकथनतुल्यतैवात्रेति सिद्धम्। अत्र च वेदप्रमाणमूलतया वेदप्रमाणजनितेत्युक्तम्। अत्रैव सुखदुःखानुत्पादभेदेन निदर्शनद्वयमाह—न हि धनिन इति।

शब्दादवगमेऽप्यभिमानाद्यनिवृत्तेर्नहीत्यादि भाष्यायोगमाशङ्क्यावगमः साक्षात्कारोऽभिप्रेत इत्याह—सत्यमित्यादिना। ननु स्वरूपसाक्षात्कारं नित्यं ब्रूषे—अत आह—ब्रह्मेति। वृत्तिभेदोऽपि शब्दाज्जातः अत आह—श्रवणेति। शब्दो न साक्षात्कारकारीत्युक्तमित्यर्थः। वेदान्तानां फलवत्सिद्धोपदेशत्वे रज्जूपदेशवच्छ्रवणानन्तरं फलजनकत्वं स्यात्, न, षड्जाद्युपदेशव्यभिचारादित्याह—षड्जादीति। नन्वयमवगमो निवर्तते नो वा, निवर्तते चेत् तन्निवर्तकज्ञानान्तरसिद्ध्यर्थमविद्या वाच्या। अनिवृत्तौ च तत्संरक्षणार्थमेव सा वाच्येति सिद्धेऽप्यवगमे दुर्वारः संसारः, अत आह—स चेति। तुल्यता फलवत्त्वमात्रेण, नानन्तरफलवत्त्वेन। शब्दस्य असाक्षात्कारकारित्वात् वेदप्रमाणजनितेत्ययुक्तमत आह—अत्र चेति। वेदप्रमाणमूलतया पारम्पर्येण। यथेत्यनुपक्रमाद्, नहि शरीराद्यात्माभिमानिन इति दार्ष्टान्तिकविवरणं नहि धनिन इत्युपक्रमाच्च। प्रकृतासङ्गतविवरणत्वभ्रमं दृष्टान्तत्वेन प्रकृतसङ्गत्यानुदन् दृष्टान्तद्वयवैफल्यं निरस्यति—अत्रैवेति। दुःखादिराहित्यमुक्त्वा प्रियादिराहित्यश्रुतिपाठोऽसङ्गतः

भवति । तदुक्तं श्रुत्या—'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छान्दो. ८-१२-१) इति । शरीरे पतितेऽशरीरत्वं स्यात् न जीवत इति चेन्न; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वान्यतः सशरीरत्वं शक्यं कल्पयितुम् । नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम । तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न; शरीरसंबन्धस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेः । शरीर-

---

श्रुतिमत्रोदाहरति—तदुक्तमिति । चोदयति—शरीरे पतित इति । परिहरति—न । सशरीरत्वस्येति । यदि वास्तवं सशरीरत्वं भवेन्न जीवतस्तन्निवर्तेत मिथ्याज्ञाननिमित्तं तु तत् । तच्चोत्पन्नतत्त्वज्ञानेन जीवतापि शक्यं निवर्तयितुम् । यत्पुनरशरीरत्वं तदस्य स्वभाव इति न शक्यं निवर्तयितुं, स्वभावहानेन भावविनाशप्रसङ्गादित्याह—नित्यमशरीरत्वमिति । स्यादेतत्—न मिथ्याज्ञाननिमित्तं सशरीरत्वमपि तु धर्माधर्मनिमित्तं, तच्च स्वकारणधर्माधर्मनिवृत्तिमन्तरेण न निवर्तते, तन्निवृत्तौ च प्रायणमेवेति न जीवतोऽशरीरत्वमिति शङ्कते— तत्कृतेति । तदित्यात्मानं परामृशति । निराकरोति—न शरीरसंबन्धस्येति । न तावदात्मा साक्षाद्धर्माधर्मौ

अत आह—श्रुतिमिति । अत्र सुखदुःखादेरनुत्पादे । प्रियाप्रियशब्दयोः सुखदुःखार्थत्वादित्यर्थः । अशरीरत्वमेव धर्मकार्यमिति चेदित्यत्राशरीरत्वं स्वाभाविकमित्युक्तत्वात् कथं शङ्केत्याशङ्क्य तत्र श्रुत्या स्वाभाविकत्वमुक्तम् । इह युक्त्या तद्वक्तुं चोद्यमात्रं करोतीत्याह—चोदयतीति । ज्ञाने सति [1]सुखाद्यस्पर्शः श्रुत्यर्थः, अशरीरत्वं च न जीवत इति श्रुतिरभिमतासमर्पिकेति चोद्यार्थः । नेति चोद्यांशद्वयं न निराक्रियते किन्तु चोद्यं परिहृयत इत्याह—परिहरतीति । अशरीरत्वं जीवतो नेति चोद्यस्य सशरीरत्वोक्तिर्व्यधिकरणोत्तरम् अत आह—यदीति । मिथ्याज्ञाननिमित्तं सशरीरत्वं जीवतोऽपि ज्ञानान्निवर्तेत इति प्रकृतं, तत्रासङ्गतमशरीरत्वस्य नित्यताभिधानमिति चेत्, तन्न यदि ज्ञानेन जीवतः सशरीरत्वं निवर्तेत तर्हि सर्वद्वैतविरोधिना तेनाशरीरत्वमपि जीवत एव निवर्तेतेत्याशङ्क्य, ज्ञाननिवर्त्यत्वाभिमतमशरीरत्वं शरीरसम्बन्धध्वंसो वा, वस्तुतश्शरीरसम्बन्धरहितमात्मरूपं वा, नाद्यः ध्वंसस्य अनिवर्त्यत्वात्, इत्यभिप्रेत्य द्वितीयस्य दूष्यमाणत्वादित्याशयेनाह—यत्पुनरिति । धर्माधर्मनिमित्तत्वेऽपि मिथ्याज्ञाननिमित्तत्वप्रयुक्त्या जीवतो निवृत्त्युपपत्तेस्तादवस्थ्यादफलाशङ्केत्याशङ्क्याह—स्यादेतदिति । प्रायणमिति । देहारम्भककर्मध्वंसे देहस्थित्ययोगादित्यर्थः । पूर्वग्रन्थे तच्छब्दपरामृश्याभावात्, नह्यात्मन इत्यत्रत्यात्मपरामर्शमाह—तदिति । नेति परिहारमात्रं न, किन्तु शङ्कास्वरूपोच्छेद इत्याह—निराकरोतीति । देहसम्बन्धाभावे

---

1 'घर्थस्य' ? स पाठः

संबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्धपरंपरैषानादित्वकल्पना। क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। संनिधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न; धनदानाद्युपार्जितभृत्यसंबन्धित्वात्तेषां

कर्तुमर्हति, वाग्बुद्धिशरीरारम्भजनितौ हि तौ नासति शरीरसंबन्धे भवतः, ताभ्यां तु शरीरसंबन्धं रोचयमानो व्यक्तं परस्पराश्रयं दोषमावहति। तदिदमाह—शरीरसंबन्धस्येति। यद्युच्येत सत्यमस्ति परस्पराश्रयः, नत्वेष दोषोऽनादित्वाद्बीजाङ्कुरवदित्यत आह—अन्धपरम्परैषानादित्वकल्पना। यस्तु मन्यते नेयमन्धपरम्परातुल्यानादिता। न हि यतो धर्माधर्मभेदादात्मशरीरसंबन्धभेदस्तत एव स धर्माधर्मभेदः किंत्वेष पूर्वस्मादात्मशरीरसंबन्धात्पूर्वधर्माधर्मभेदजन्मनः, एष त्वात्मशरीरसंबन्धोऽस्माद्धर्माधर्मभेदादिति, तं प्रत्याह—क्रियासमवायाभावादिति। शङ्कते—संनिधानमात्रेणेति। परिहरति—नेति। उपार्जनं स्वीकरणं। न त्वियं

देहविशिष्टकृतत्वं मास्तु, आत्मकृतत्वस्य का क्षतिरत आह—न तावदिति। आरम्भः उद्यमः वागाद्यारम्भजत्वनियमप्रसिद्धिद्योती हिशब्दः आत्मकृतधर्माधर्मौ हेतू। देहसम्बधस्तत्कार्य इत्येतावन्मात्रं शङ्कित्वोक्तम तत्र, कथं परस्पराश्रयत्वमित्याशङ्क्य, अनुरूपशङ्कोत्तरत्वमाह—ताभ्यामिति। अनादित्वकल्पनायाः प्रागशङ्कितत्वादेवेति तदनुवादेन निषेधायोगमाशङ्क्य, नूत्नशङ्कानिरासोऽयं एषेति दार्ष्टन्तिकस्येति विवक्षितमिति मत्वाह—यदीति। इह धर्माधर्मव्यक्त्यो र्देहसम्बन्धव्यक्तेश्चान्योन्याश्रये उक्ते, व्यक्तयोरनादित्वात् सिद्धान्तीष्टजीवाविद्यान्यायेनादोषत्वं शङ्क्यते। बीजाङ्कुरादिवदिति चान्योन्यापेक्षौ तत्प्रवाहौ दृष्टान्तः। न तद्व्यक्तयः। अन्धपरम्परेति बीजाङ्कुरप्रवाहयोरनादित्वं प्रमितम्। धर्माधर्मदेहसम्बन्धानां त्वनादित्वं निष्प्रमाणकमित्यर्थः। अन्योन्याश्रयादेव निरस्ते परपक्षे क्रियासमवायाभावाच्चेति ग्रन्थगौरवमाशङ्क्य शङ्कामाह—यस्त्विति। न व्यक्तयोरनादित्वमुच्यते येन निष्प्रमाणकत्वं स्यात्, किन्तु बीजाङ्कुरव्यक्तीनामिव प्रवाहद्वारेणोच्यत इति अदोष इति शङ्कार्थः। परस्पराभ्युपगमेऽपि निष्क्रियस्यात्मनो धर्माधर्मकर्तृकत्वानुपपत्तेर्मिथ्याज्ञानमङ्गीकर्तव्यमिति परिहारार्थः। राजादेः, वागादिव्यापारस्य स्फुटत्वात् सन्निधानमात्रेणेत्ययुक्तमाशङ्क्य भृत्यतुल्यव्यापाराभावमात्रेण शङ्काभास इत्याह—शङ्कत इति। दृष्टान्तासम्प्रतिपत्तिमनुक्त्वा परबुद्धिमनुरुध्य परिहारमेव करोतीत्याह—परिहरतीति। धनादिना भृत्यसम्बन्धो जन्यते न त्वार्ज्यते अत आह—उपार्जनमिति। स्वीकरणं जनिद्वारा सम्बन्धस्याविरुद्धमित्यर्थः। न त्वात्मन इति भाष्ये कल्पयितुमित्युक्त्या सम्बन्धनिमित्तकल्पनमाशङ्क्य वार्यत इव। ततश्च निर्बीजशङ्कोत्तरत्वमाशङ्क्य दृष्टान्तसारूप्यभावमात्रपरत्वमाह—

कर्तृत्वोपपत्तेः, न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्त किंचिच्छक्यं कल्पयितुम् । मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः । एतेन यजमानत्वमात्मनो व्याख्यातम् । अत्राहुः—देहादिव्यतिरिक्तस्यात्मनः आत्मीये देहादावभिमानो गौणो न मिथ्येति चेन्न, प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः । यस्य हि प्रसिद्धो वस्तुभेदः, यथा केसरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः सिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य । तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ । यथा

विद्यात्मनीत्याह—नत्वात्मन इति । ये तु देहादावात्माभिमानो न मिथ्या, अपि तु गौणः, माणवकादाविव सिंहाभिमान इति मन्यन्ते, तन्मतमुपन्यस्य दूषयति—अत्राहुरिति । प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः । उपपादितं चैतदस्माभिरध्यासभाष्य इति नेहोपपाद्यते । यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पुरुषात् सांशयिकौ पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, तत्र हि पुरुषत्वमनियतमपि समारोपितमेव । एवं संशये

नतिरयमिति । कल्पयितुं दर्शयितुम् । ततश्च योग्यानुपलब्ध्या नास्तीत्येव विवक्षितमित्यर्थः । गौणत्वस्यैकदेशिनानुपन्यस्तस्य निराकृतिः प्रकृतासङ्गतेत्याशङ्क्य प्रसङ्गान्मतान्तरनिरास इत्याह—ये त्विति । गौणो न मिथ्येत्युक्त्या यो गौणः स न मिथ्येति भाति । तच्च पुत्रदेहादावात्माभिमानस्य तथात्वादिष्टोक्तिर्माभूदिति व्यत्ययेनाह—न मिथ्या अपि त्विति । प्रसिद्धवस्तुभेदस्येति कर्मधारयत्वे विवरणवैरूप्यमाशङ्क्याह—प्रसिद्ध इति । नन्वात्मनोऽस्मदर्थस्य युष्मदर्थभेदासिद्धिः अत आह—उपपादितं चेति । भाष्ये प्रथमोदाहरणमपि संशयद्योतिपदाभावाद्विपर्ययोदाहरणमिव । ततश्चान्यतरोदाहरणवैयर्थ्यमाशङ्क्योत्तरत्र निश्चितावित्युक्तत्वादस्य संशयत्वमित्याह—यथेति । अगृह्यमाणविशेष इत्यस्यान्धकारविशेषणत्वभ्रमं नुदति—वस्तुनीति । स्थाणुरूप इति शेषः । सति सप्तमीयम् । अन्यथा स्थाणुविषयावित्यसङ्गतेः, नाप्रसिद्धवस्तुभेदस्येत्यत्रोदाहरणत्वादगृह्यमाणविशेष इत्यगृह्यमाणभेद इति वाच्यमिति मत्वा प्रतियोगिनमाह—पुरुषादिति । स्थाणुरयमित्यसाधारणाकारग्रह एव पुरुषभेदगर्भ इति तावदेवानूदितं भाष्ये, संशयिकत्वे भ्रान्तिनिमित्तावित्यत्रोदाहरणता[1] कथमत आह—अत्र हीति । अनियतं सांशयिकम् । भाष्ये भ्रान्तिपदेन समारोपमात्रं विवक्षितमित्यर्थः । अथास्यापि समारोपोदाहरणत्वे किं द्वितीयेन अत आह—एवमिति ।

---

1 'ण धर्मता' ख-पाठः

मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायामकस्माद्रजतमिदमिति निश्चितौ शब्दप्रत्ययौ तद्वद्देहादिसंघातेऽहमिति निरुपचारेण शब्दप्रत्ययावात्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम् । आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः । तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः । तस्मान्मिथ्याप्रत्यय-

---

समारोपितमनिश्चितमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति—यथा वा शुक्तिकायामिति । शुक्लभास्वरस्य द्रव्यस्य पुरः स्थितस्य सति शुक्तिकारजतसाधारण्ये यावदत्र रजतविनिश्चयो भवति तावत्कस्माच्छुक्तिविनिश्चय एव न भवति । संशयो वा द्वेधा युक्तः समानधर्मधर्मिणोदर्शनात् उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषद्वयस्मृतेश्च । संस्कारोन्मेषहेतोः सादृशस्य द्विष्टत्वेनोभयत्र तुल्यमेतदित्यत—उक्तम् अकस्मादिति । अनेन दृष्टस्य हेतोः समानत्वेऽप्यदृष्टं हेतुरुक्तः । तच्च कार्यदर्शनोन्नेयत्वेनासाधारणमिति भावः । आत्मानात्मविवेकिनामिति । श्रवणमननकुशलतामात्रेण पण्डितानाम् ; अनुत्पन्नतत्त्वसाक्षात्कारणामिति यावत् । तदुक्तम्—'पश्वादिभिश्चाविशेषात्' इति । शेषमतिरोहितार्थम् । जीवतो विदुषोऽशरीरत्वे च श्रुतिस्मृती* रुदाह-

---

अकस्मादित्ययुक्तं विपर्ययस्य सामग्रीजत्वात् अतःशङ्कोत्तरत्वमाह—शुक्लेति । द्रव्यस्य द्रव्याकारस्य । शुक्त्यसाधारणधर्मा[1]ग्रहात्तदनिश्चयमाशङ्क्याह—संशय इति । द्वेधा उक्तकोटिद्वयावलम्बी । सामग्र्यभावे कथं संशयः, अत आह—समानेति । विशेषाग्रहमाह—उपलब्धीति । अनयोरेकसम्बन्धी विशेष उपलभ्यते नान्यसम्बन्धीति व्यवस्थाभावादित्यर्थः । संशयसामग्रीप्रविष्टं कारणान्तरमप्याह—विशेषेति । द्वयस्मृत्यसिद्धिमाशङ्क्य-आह—संस्कारेति । तुल्यमेतदिति । इतिर्हेतौ । यस्मात् तुल्यं सादृश्यं तस्माद्विशेषद्वयस्मृतेश्च सत्त्वात् संशयो युक्त इत्यन्वयः नियामकाभावे विपर्ययनियमायोगादकस्मादित्यनुत्तरमत आह—अनेनेति । अदृष्टमपि तुल्यमत आह—तच्चेति । आत्मानात्मविवेकिनामित्ययुक्तं तेषां विवेकध्वस्तत्वाद् भ्रमस्य, अत आह—आत्मेति । तेषां प्राकृतवद् व्यवहारः, अत आह—तदुक्तमिति । देहादेरात्मत्वादगौणोऽपि किं तत्राहङ्कारो न मिथ्येति शङ्का तस्माद्देहादीत्युपसंहारव्याजेनापानुद्यते[2] इत्यादिव्यक्तमित्याह—शेषमिति । सशरीरत्वस्य मिथ्याप्रत्ययमूलत्वाज्जीवतोऽशरीरत्वमुपसंहृत्य तथा चेति श्रुत्याद्युक्तिरयुक्ता तत्र [3]मिथ्याप्रत्ययमूलत्वाप्रतीतेरित्याशङ्क्य साध्यांश एव श्रुत्याद्युक्तिरित्याह—जीवत इति । एवार्थश्चः, श्रुतीस्मृतीश्चेति वान्वयः । श्रुतयः स्मृतयश्चेति विग्रहः । अहिनिर्ल्वयनी सर्पत्वक् । अचक्षुःसचक्षुरि-

---

1 'मैग्र'। ख पाठः 2 'नानूद्य' ख - पाठः 3 'लप्र'? ख पाठः

* श्रुतिस्मृती उदाहरति इति कल्पतरुवदितः भामतीपाठः

निमित्तत्वात्सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् । तथा च ब्रह्मविद्विषया श्रुतिः—'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृह. ४-४-७) इति । 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' इति च । स्मृतिरपि च—'स्थितप्रज्ञस्य का भाषा' (भ. गी. २-५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति । तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम् । यस्य तु यथापूर्वं संसारित्वं नासाववगतब्रह्मात्मभाव इत्यनवद्यम् । यत्पुनरुक्तं श्रवणात्पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति । न; अवगत्यर्थत्वान्मनननिदिध्यासनयोः । यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत भवेत्तदा

रति—तथा चेति । सुबोधम् । प्रकृतमुपसंहरति —तस्मान्नावगतब्रह्मात्मभावस्येति । ननूक्तं यदि जीवस्य ब्रह्मात्मत्वावगतिरेव सांसारिकधर्मनिवृत्तिहेतुः, हन्त मननादिविधानानर्थक्यं, तस्मात्प्रतिपत्तिविधिपरा वेदान्ता इति, तदनुभाष्य दूषयति—यत्पुनरुक्तं श्रवणात्पराचीनयोरिति । मनननिदिध्यासनयोरपि न विधिः, तयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात् । तदिदमुक्तम्—अवगत्यर्थत्वादिति । ब्रह्मसाक्षात्कारोऽवगतिस्तदर्थत्वं मनननिदिध्यासनयोरन्वयव्यतिरेकसिद्धमित्यर्थः । अथ कस्मान्मननादिविधिरेव न भवतीत्यत आह—यदि ह्यवगतमिति । न तावन्मनननिदिध्यासने प्रधानकर्मणि अपूर्वविषये अमृतत्वफले इत्युक्तमध-

---

वेत्यदि पाठविपरीतान्वयः । शरीरायत्तप्रवृत्त्यसम्बन्धदर्शनमेवाशरीरत्वदर्शनमिति सुग्रहमित्याह—सुबोधमिति । श्रुत्याद्युदाहरणमिति शेषः । जीवतोऽशरीरत्वमुपपाद्यान्यस्योपसंहारमाशङ्क्याह—प्रकृतमिति । उपदेशमात्रेण संसारभ्रमानिवृत्तिसाधकत्वे न मननादिदर्शनं प्रागुक्तं तस्येह स्वतन्त्रहेतुवदनुवादायोगमाशङ्क्य, अनुवादेऽप्यन्यसाधकत्वद्वारकं विधिपरत्वसाधकत्वं विवक्षितमिति मत्वाह—नन्विति । अवगत्यर्थत्वादिति नोत्तरम् । अतदर्थत्वेऽपि विध्यानर्थक्यशङ्कानुपशान्तेरत आह—मननेति । अपिः श्रवणसमुच्चयार्थः । सत्यमयं परिहारः । भाष्यं तु नोत्तरमत आह—तदिदमिति । अमुमर्थं भाष्येण वाचयति— ब्रह्मेति । अवगत्यर्थत्वादिति सिद्धवदुपदिशता अन्वयव्यतिरेकसिद्धिरभिप्रेतेत्यर्थः । अन्वयव्यतिरेकसिद्धयैव विधेर्विधूतत्वाद् यदिहावगतमिति वृथेत्याशङ्क्य साक्षात्कारार्थविध्ययोगोऽपि मननादेरन्यार्थो विधिरस्त्विति शङ्कोत्तरत्वमाह—अथेति । अत्रैवकारेण साक्षात्कारार्थत्वं व्युदस्यति । अन्यत्रापि नियोगो विधिशेषत्वं न हन्ति,

विधिशेषत्वम्। न तु तदस्ति; मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात्। तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम्। एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक्शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत। आरभ्यमाणं चैवमारभ्येत—अथातः

स्वात्। अतो गुणकर्मत्वमनयोरवघातप्रोक्षणादिवत्परिशिष्यते, तदप्ययुक्तं; अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावादात्मनः, विशेषतस्त्वौपनिषदस्य कर्मानुष्ठानविरोधादित्यर्थः। प्रकृतमुपसंहरति—तस्मादिति। एवं सिद्धरूपब्रह्मपरत्वमुपनिषदाम्। ब्रह्मणः शास्त्रार्थस्य धर्मादन्यत्वाद्भिन्नविषयत्वेन शास्त्रभेदात् 'अथातो ब्रह्मजिज्ञासा' इत्यस्य शास्त्रारम्भत्वमुपपद्यत इत्याह—एवं च सतीति। इतरथा तु धर्मजिज्ञासैवेति न शास्त्रान्तरमिति न शास्त्रारम्भत्वं स्यादित्यत आह—प्रतिपत्तिविधिपरत्व इति। न केवलं सिद्धरूपत्वाद्ब्रह्मात्मैक्यस्य धर्मादन्य-

---

सुवर्गकारणवदुपपत्तेः, अत आह—न तावदिति। भाष्येऽन्यगतमन्यत्र विनियुज्यते इत्युपयोक्ष्यमाणनिरसनं भाति। तदुपलक्षणमित्याह—विशेषत इति। कथं तर्हि विधिविभक्तिरित्याशङ्क्य यथा श्रवणस्य शब्दज्ञानात्मनः प्राप्तस्य विधिस्वरूपेणानुवादः एवं मनननिदिध्यासनयोरपि प्राप्तत्वाविशेषादित्येतदर्थं मनननिदिध्यासनयोरपि श्रवणवदिति भाष्यम्। तस्माद् इत्यत इत्युपसंहारद्वयवैयर्थ्यमाशङ्क्य पूर्वपक्षनिरासोपसंहारपूर्वं स्वपक्षोपसंहार इत्याह—प्रकृतमिति। एवं च सतीति स्वपक्षे शास्त्रारम्भोपपत्तिकथनं प्रतिज्ञामात्रम् शास्त्रारम्भ उपपद्यत इत्ययुक्तं, आरम्भसूत्रस्वरूपोपपत्तेः परपक्षेऽपि तुल्यत्वादित्याशङ्क्य एवं चेत्यनेनैव विवक्षितं हेतुं दर्शयन् शास्त्रारम्भ इत्युक्त्या प्रतिज्ञासूत्रत्वं विवक्षितमित्याह—एवं चेति। यद्वा, एवं चेति स्वपक्षे जिज्ञासासूत्रोपपत्तिमात्रं, तत्र च तत्सूत्रोपन्यासेनैवालं, शास्त्रारम्भ इत्यधिकमित्याशङ्क्यैवं चेत्यभिप्रेतं हेतुं वदन् स्वपरपक्षयोः सूत्रोपपत्त्यनुपप (त्ति ? त्ती) शास्त्रारम्भत्वमेव स्पृशत इति नाधिकोक्तिरित्याह—एवं चेति। एवंशब्दस्य सन्निहितहेतुमात्रपरामर्शित्वभ्रमं निरस्यति—सिद्धेति। प्रतिपत्तिविधिपरत्व इत्ययुक्तं विध्यन्तरपरत्वेऽपि दोषस्य तुल्यत्वात् धर्मजिज्ञासेत्येवारब्धत्वादित्ययुक्तं, धर्मजिज्ञासेत्यनेन ब्रह्मजिज्ञासारम्भस्यासिद्धेरित्याशङ्क्य प्रतिपत्तिविधीति विधिमात्रं परपक्षोपलक्षणं धर्मजिज्ञासेत्यारब्धत्वादित्यत्र च तदन्तर्गतत्वादिति हेतुरभिप्रेत इत्याह—इतरथेति। अप्रतिपादितोपसंहारमाशङ्क्याह—न केवलमिति। इत्येतदवसान

परिशिष्टधर्मजिज्ञासेति, 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै. ४-१-१) इतिवत् । ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः— 'अथातो ब्रह्मजिज्ञासा' इति । तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि । न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति । अपि चाहुः—

स्वमपि तु तद्विरोधादपीत्युपसंहरव्याजेनाह—तस्मादहं ब्रह्मास्मीति । इतिकरणेन ज्ञानं परामृशति । विधयो हि धर्मे प्रमाणम् । ते च साध्यसाधनेतिकर्तव्यताभेदाधिष्ठाना धर्मोत्पादिनश्च तदधिष्ठाना न ब्रह्मात्मैक्ये सति प्रभवन्ति, विरोधादित्यर्थः । न केवलं धर्मप्रमाणस्य शास्त्रस्येयं गतिः, अपि तु सर्वेषां प्रमणानामित्याह—सर्वाणि चेतराणि प्रमाणानीति । कुतः ? न हि । अद्वैते हि विषयविषयिभावो नास्ति । न च कर्तृत्वं ; कार्याभावात् । न च करणत्वं अत एव । तदिदमुक्तम्—अप्रमातृकाणि च । इति चकारेण । अत्रैव ब्रह्मविदां गाथामुदाहरति—अपि चाहु रिति । पुत्रदारादिष्वात्माभिमानो गौणः । यथा स्वदुःखेन

इति वाक्यावसानत्वं प्रतीयते, तदयुक्तं, सत्यपि वाक्ये विध्यनवसानादत आह—इतिकरणेनेति । विरोधाभिप्रायेणोक्तस्य तदवसानत्वस्यासिद्धिमाशङ्क्याह—विधय इति । धर्मे हीत्यन्वयः । ते च धर्मे प्रमाणीभवन्तः, त्र्यंशभावनाया धर्मत्वात् । साध्यादिभेदसापेक्षत्वम् । न केवलं भावनांशभेदापेक्षत्वं धर्मेण सहोत्पाद्योत्पादकभेदापेक्षत्वमपीत्याह—धर्मोत्पादिनश्चेति । उपदिश्य धर्मं पुरुषेणानुष्ठाप्यन्तः । तदधिष्ठानाः । भेदापेक्षाः प्रकृते धर्मान्यत्वे हेतुत्वाभावात् सर्वाणि चेति वृथेत्याशङ्क्य, कैमुत्येन विधिविरोधदृढीकार इत्याह—न केवलमिति । ज्ञानावसानत्वविवृतौ न ह्यद्वैतात्मावगतौ प्रमाणानि भवितुमर्हन्तीत्यलं इतरदधिकमित्याशङ्क्य नैतद्विवरणं, किन्तु हेतुरित्यदोष इत्याह—कुत इति । अद्वैतावगतौ विषयप्रमात्रोरभावः कथमित्याशङ्क्य विषयस्य विषय्यपेक्षया द्वितीयत्वात् प्रमातृत्वस्य च कर्तृत्व भेदस्य कार्यरूपद्वितीयापेक्षत्वादित्याह—अद्वैत इति । तत्साक्षात्कार इत्यर्थः । कर्तृत्वं प्रमायामिति शेषः । कार्याभावाद् द्वितीयस्य कार्यस्याभावात् । प्रमायाः कर्म-कर्तृ-करणापेक्षत्वाद् द्वयोरेवाभावोक्तिर्न्यूना, अत आह—न च करणत्वमिति । अत एव करणसाध्यस्य कार्यस्याभावादेव । तथापि भाष्यं न्यूनमेव, अत आह—तदिदमिति । अत्राहुर्देहादिव्यतिरिक्तस्येति भाष्यवदपि चाहुरित्यस्य पूर्वपक्षान्तरानुवादत्वभ्रमं नुदति—अत्रेति । विरुद्धविषयत्वाभावान्न पूर्वः पक्ष इत्येवकारार्थः ब्रह्मविदामिति ।

गौणमिथ्यात्मनोऽसत्वे पुत्रदेहादिबाधनात्। सद्ब्रह्मात्माहमित्येवं बोधि कार्यं

दुःखी यथा स्वसुखेन सुखी तथा पुत्रादिगतेनापीति सोऽयं गुणः। नत्वेकत्वाभिमानः, भेदस्यानुभवसिद्धत्वात्। तस्माद्गौर्वाहीक इतिवद्गौणः। देहेन्द्रियादिषु त्वभेदानुभवान्न गौण आत्माभिमानः, किन्तु शुक्तौ रजतज्ञानवन्मिथ्या। तेदवं द्विविधोऽयमात्माभिमानो लोकयात्रां वहति। तदसत्त्वे तु न लोकयात्रा नापि ब्रह्मात्मैकत्वानुभवः, तदुपायस्य श्रवणमननादेरभावात्। तदिदमाह—पुत्रदेहादिबाधनात्। गौणात्मनोऽसत्वे पुत्रकलत्रादिबाधनम्। ममकाराभाव इति यावत्। मिथ्यात्मनोऽसत्वे देहेन्द्रियादिबाधनं श्रवणादिबाधनं च। ततश्च न केवलं लोकयात्रा-

---

सम्मत्योचिता। लेखकदोषादश्लोकत्वेन मा पाठीति गाथामित्युक्तम्। पिण्डीकृतस्य श्लोकार्थस्य बुद्ध्यारोहाय तत्तात्पर्यमादौ कथयन् गौणमिथ्यात्मन इत्येकवचनात् कर्मधारयभ्रमे गौणस्य मिथ्यात्वं व्याहतमिति शङ्काशान्त्यै विभज्य गौणमिथ्यात्मानौ दर्शयति—पुत्रेति। अतस्तदभिमानविषयः। पुत्रादिर्गौणात्मा। साम्यमस्तीत्येव गौणत्वे शक्तौ रजतप्रत्ययो गौणः स्यात्। अत आह—नत्विति। विमतोऽभिमानो गौणः गौणत्वप्रयोजकवत्त्वात् गौर्वाहीक इति प्रत्ययवदिति। बाहीको देशभेदः। तद्वासी जनो बाहीकः। एवं पुत्रादिगौणात्मनमुक्त्वा देहादिमिथ्यात्मानमाह—देहेति। अभेदानुभावात् भेदानुभवाभावात् किं देहादिरेवात्मा नेत्याह—किन्त्विति। अद्वैतावगतौ विरोधिसर्वासत्त्वे कथनीये पुत्रदेहादिबाधनात् ब्रह्मात्मत्वोधासत्त्वमात्रोक्तिरयुक्ता, न, आत्माभिमानद्वयस्य सर्वव्यवहारहेतुत्वात् तदसत्त्वं कथयता तत्प्रयुक्तसर्वव्यवहाराभावस्याभिप्रेतत्वादित्याह—तदेवमिति। साक्षात्कृतब्रह्मणः प्राप्तकैवल्यस्यापि ब्रह्माहमिति बुद्ध्युदये कैवल्यपरावृत्तिमाशङ्क्य, पश्चादाशङ्क्यमानः साक्षात्कारः प्राथमिकसाक्षात्कारवत् किं श्रवणाद्यपेक्षः, अथाभ्यस्तगान्धर्वशास्त्रस्य साक्षात्कृतषड्जादिभेदस्य कालान्तरजसाक्षात्कारवत् तदनपेक्ष इति विकल्प्य आद्यदूषणं सद्ब्रह्मेत्यादीति मत्वाह—नापीत्यादिना। नन्वभिमानासत्त्वं श्लोकेऽनुक्तमत आह—तदिदमिति। तत्किं गौणमिथ्यात्मनोऽसत्त्व इत्येव हेयम् न, पुत्रदेहादिबाधने हेतुत्वेनान्वयादिति दर्शयन् श्लोकं व्याचष्टे गौणेत्यादिना। अत्र पुत्रादिबाधने गौणमिथ्यात्मासत्त्वं विशिष्टं हेतुरिति भ्रमो मा भूदिति विभज्योक्तम्। अत्र द्वन्द्वान्ते श्रुतस्यादिशब्दस्योभयसाधारण्यं मत्वाह—कलत्रादीति। ननु पुत्रादिरेव गौणात्मा कथं तदभावस्तदभावप्रयोजकः अत आह—ममकारेति। अनन्तरोक्तरीत्या देहेन्द्रियादिबाधनमहङ्काराभाव इति व्यक्तत्वादनुक्तम्। पूर्वोक्तः श्रवणाद्यभाव आदिपदेन सिद्ध्यतीति मत्वाह—श्रवणादीति। पुत्रादिश्रवणादिबाधाद् ब्रह्मसाक्षात्काराभावमात्रं श्लोके भाति। न तु प्रागुक्तो लोकयात्रोच्छेदः। अतोऽपिश-

कथं भवेत्। अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः। अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः ॥ देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्' इति ॥ ४ ॥

॥ इति शाङ्करभाष्ये चतुःसूत्री समाप्ता ॥

समुच्छेदः सद्ब्रह्माहमित्येवंबोधशीलं यत्कार्यम्। अद्वैतसाक्षात्कार इति यावत्। तदपि कथं भवेत्। कुतस्तदसंभव इत्यत आह—अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः। उपलक्षणं चैतत्। प्रमाप्रमेयप्रमाणविभाग इत्यपि द्रष्टव्यम्। एतदुक्तं भवति—एष हि विभागोऽद्वैतसाक्षात्कारकारणं, ततो नियमेन प्राग्भावात्। तेन तदभावे कार्यं नोत्पद्यत इति। न च प्रमातुरात्मनोऽन्वेष्टन्य आत्मान्य इत्याह—अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः। उक्तं ग्रीवास्थग्रैवेयकनिदर्शनम्। स्यादेतत्—अप्रमाणात्कथं पारमार्थिकाद्वैतानुभवोत्पत्तिरित्यत आह—देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं

द्वमध्याहृत्य द्वितीयार्धं व्याचष्टे—ततश्चेति। समुच्छेदः अपुनरुद्भवमुच्छेदः। एवंबोधीति नान्तपाठं व्याचष्टे—एवं बोधनशीलमिति। एवं विषयीकरणस्वभावमित्यर्थः। अस्य च बोधस्य परोक्षत्वे श्रवणाद्यभावात्तदभावोक्तिर्व्याहन्येत, अत आह—साक्षात्कार इति। भवेत् जायेत। तदेवं श्रवणाद्यभावात् पुनः साक्षात्कारानुदयोक्त्या प्रपञ्चबाधनसाक्षात्कारस्य लोकयात्राया इव अपुनरुद्भवोच्छेद उक्तो भवति ॥ सर्वोच्छेदस्योक्तत्वात् प्रमातृत्वादिकातत्कथा पुनरुक्तेरित्याशङ्क्य द्वितीयपक्षशङ्कोत्तरं द्वितीयं पद्यमिति मत्वाह—कुत इति। श्रवणाद्यनपेक्षत्वात् तदभावोप्यसम्भवः कुत इति शङ्कार्थः। प्रमातृत्वमात्रोपादानात् प्रमेयत्वादिविभागः पश्चादपीति शङ्कां नुदति—उपलक्षणमिति। साक्षात्कारासम्भवः कुत इत्युक्ते, अन्यस्यावधिप्रतिज्ञा न युक्ता अत आह—एतदिति। तेन कारणत्वेन। तावतैव द्वितीयपक्षनिवृत्तौ द्वितीयार्धवैयर्थ्यमाशङ्क्य प्रथमार्धे "अन्वेष्टव्यात्मेत्यात्मन इति निर्देशादात्मनानात्वभ्रमं वारयितुम् उच्यत इत्याह—न चेति। प्रमातुः प्रमातृत्वोपलक्षितात्। इत्यनेनाभिप्रायेण प्रमातृत्वमुपलक्षणमित्याविष्कर्तुमात्मैवेति प्रमातैवेति पदस्थाने पठितम् ॥ दोषो रोगादिः तज्जः प्रवृत्त्यादिरादिपदार्थः। वर्जित इति। उक्तमिति शेषः। पाप्मदोषादिवर्जितोऽन्विष्टःप्रमातैव प्रमातृत्वोपलक्षितात्मैव भवति। तस्य स्वरूपत्वेन पर्यवस्यतीत्यर्थः। अभेदेऽन्वेषणायोगमाशङ्क्याह—उक्तमिति। लौकिकप्रमाणप्रामाण्यनिरूपणं प्रकृतासङ्गतमाशङ्क्याह—स्यादेतदिति। अप्रमाणात्, अलीकात्, प्रमात्रादिविभागात् पारमार्थिकेत्यनुभवविशेषणम्। अतः सत्यकार्यसिद्धये प्रमात्रादिभेदेनापि सत्येन भाव्यमिति ज्ञानबाध्यतोक्तिरयुक्तेति शङ्कार्थः।

तु । अस्यावधिमाह—आऽऽत्मनिश्चयात् । आ ब्रह्मस्वरूपसाक्षात्कारादित्यर्थः । एतदुक्तं भवति—पारमार्थिकरूपश्रवणादिभिरपि देहादिष्वात्माभिमानो मिथ्येति वक्तव्यम्; प्रमाणबाधितत्वात्, तस्य च समस्तप्रमाणकारणत्वं भाविकलोकयात्रावाहित्वं चाभ्युपेयम् । सेयमस्माकमप्यतद्वैतसाक्षात्कारे विधा भविष्यति । न चायमद्वैतसाक्षात्कारोऽप्यन्तःकरणवृत्तिभेद एकान्ततः परमार्थः । यस्तु साक्षात्कारो भाविकः, नासौ कार्यः, तस्य ब्रह्मस्वरूपत्वात् । अविद्या तु यद्यविद्यामुच्छिद्याज्जनयेद्वा, न तत्र काचिदनुपपत्तिः । तथा च श्रुतिः—'विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥' इति ॥ तस्मात्सर्वमवदातम् ॥ ४ ॥

इति भामत्यां चतुःसूत्री समाप्ता

प्रामाण्ये हेतुत्वभ्रमं नुदति—अस्येति । नन्वत्रावधिर्न भाति, आङोऽन्तर्लीनत्वेऽप्यात्मनिश्चयस्य नावधित्वं जीवज्ञानस्य शब्दब्रह्मज्ञानस्य तत्सहचारादत आह—आब्रह्मेति । देहात्मप्रत्ययस्य सावधिप्रामाण्यमसिद्धम् । सिद्धावप्यसत्यात् सत्यकार्यानुपपत्तिशङ्कायां सावधिप्रमाणमात्रोदाहरणमनुत्तरमत आह—एतदिति । अलीकात्सत्यः साक्षात्कारो न स्यादित्यत्र साक्षात्कारः किं वृत्तिरूपः, उत, स्वरूपम्, उभयत्रापीष्टापत्तिरित्याह—न चेति । एकान्ततः परमार्थ इति । सत्यविषयत्वात् सत्यव्यवहारः, न स्वरूपसत्यत्वादित्यर्थः । वृत्तिसाक्षात्कारोऽलीकश्चेद् अविद्यात्मा स कथमविद्यामुच्छिन्द्यात् । अविद्या वा स्वविरोधिनं तं कथं जनयेदत आह—अविद्येति । स्वरूपासत्यस्यापि विषयसत्यत्वेन प्रमात्वाद्विद्यानिवर्तकता । निशाणाविद्यायाश्च स्वनाशकव्याघ्रादिभ्रमजनकत्वं दृष्टमिति नानुपपत्तिरित्यर्थः । अविद्यानिवृत्तिं विद्यां च । सह कार्यकारणभावेन । अविद्यया अविद्यामूलापरोक्षवृत्त्या । मृत्युं मरणाद्यध्यासमूलम् अविद्यां । तीर्त्वा निवर्त्य । विद्यया स्वरूपाविर्भावेन । अमृतम् अमृतत्वं कैवल्यं अश्नुत इति श्रुत्यर्थः । एवं विधौ श्रुतितात्पर्याभावाद् विधिना सद्वितीयत्वं पूर्वपक्ष्यभिप्रेतं परावृत्तमिति सिद्धान्ते फलं हृदि कृत्वाह—तस्मादिति ।

इति भामतीतिलके

समन्वयाधिकरणम् समाप्तम्

चतुःसूत्री समाप्ता